# ।। संस्कारभास्करः - एकं समीक्षात्मकमध्ययनम् ।।

वटोदरस्थ-श्रीमहाराजा-सयाजिराव-विश्वविद्यालयस्य वाचस्पत्युपाध्यर्थं
**(Ph.D.)**
समर्पितोऽयं शोधनिबन्धः।


शोधछात्रः
पंड्या संकेतकुमार हर्षदभाई

मार्गदर्शकः
प्रो. डॉ. जयदेव अ. जानी (पूर्वाध्यक्षः)
संस्कृत-पाली-प्राकृतविभागः
फेकल्टी ऑफ आर्ट्स्
महाराजा सयाजिराव विश्वविद्यालयः
वडोदरा (वटपत्तनम्) ३९०००२


ऑगस्ट २०१३

# आभारप्रदर्शनम्।

अत्र महाशोध निबन्धे विविधासु पूजासु होमादिकर्मणी च शुक्लयजुर्वेदोक्त मन्त्राः पुराणोक्त मन्त्राश्च शास्त्री–दुर्गाशङ्कर–उमाशङ्कर–ठाकरमहोदयसङ्कलिताद् ब्रह्मनित्यकर्मसमुच्चयाख्यग्रन्थात् डॉ. मुकुन्दचन्द्र–शान्तिलाल–ठाकरमहोदयसम्पादिताद् याज्ञिकरत्नाख्यग्रन्थात् तस्यैव च शान्तिरत्नाख्य– ग्रन्थात् रमाशङ्कर–जोषीमहोदयसम्पादितात् कर्मकौशलाख्यग्रन्थात् च सङ्कलिताः।

ऋषिभट्टस्य संस्कारभास्कराख्यः पत्राकाररूपो ग्रन्थः श्रीलक्ष्मीवेङ्कटेश्वर मुद्रणालये प्रकाशितः। तस्यैव साङ्गोपाङ्गमध्ययनमत्र महानिबन्धे प्रस्तुतम् । संशोधनार्थं महाराजा सयाजिराववविश्वविद्यालयस्य श्रीमतीहंसामहेतापुस्तकालयात् प्राच्यविद्यामन्दिराद् वडोदरासंस्कृतमहाविद्यालयाच्च अत्युपयोगिनो ग्रन्था वार्षिकपत्राणि त्रैमासिकपत्राणि च वारं वारं सौकर्येण सम्प्राप्तानि एतदर्थं तत्रत्यान् अधिकारिमहोदयान् प्रति हृदयपूर्वकमाभारप्रदर्शनं करोमि।

वडोदरा।

२२–०८–२०१३ पण्ड्या संकेतकुमार हर्षदभाई

## ।। मार्गदर्शकस्य प्रमाणपत्रम् ।।

(Certificate I)

वाचस्पत्यस्य(Ph.D.) शोधछात्राय संकेतकुमार–हर्षदभाई–पंड्यामहोदयायेदं प्रमाणपत्रं दीयते यदस्य वाचस्पत्य–महानिबन्धस्य समग्रं संशोधनं मदीये मार्गदर्शने सम्यक्तया शोधछात्रेण मौलिकप्रदानरूपं कृतम्। अत्र महानिबन्धे संशोधनविषयकाः सर्वे सिद्धान्ता विचाराश्च शोधछात्रेण स्वयं सङ्कलिता विशदीकृताः प्रस्थापिताश्चेति प्रमाणीक्रियते।

वडोदरा।

दिनाङ्कः २२/०८/२०१३

प्रॉ. डॉ. जयदेव अरुणोदय जानी

पूर्वाध्यक्षः,
संस्कृत–पाली–प्राकृतविभागः
फेकल्टी ऑफ आर्ट्स्।
महाराजा सयाजिराव विश्वविद्यालयः।
वडोदरा – ३९०००२

## ।। प्रमाणपत्रम् ।।

(Certificate II)

इदमत्र प्रमाणीक्रियते मया शोधछात्रेण यदस्य वाचस्पत्यस्य(Ph.D.) समग्रं संशोधनं मदीयमेव। तत्र प्रस्थापितानि चर्चानिरूपणानि मदीयान्येव। अत्र प्रस्थापितं संशोधनं मयाऽस्य महानिबन्धस्याऽन्तिमे भागे प्रदत्तैः सूचीनिर्दिष्टैः ग्रन्थैः त्रैमासिकादिभिश्च सम्पूर्णतां नीतमस्ति। प्रदानमपि मौलिकमिति शम्।

वडोदरा

दिनाङ्कः २२/०८/२०१३

संकेतकुमार हर्षदभाई पंड्या

वाचस्पत्य(Ph.D.)–शोधछात्रः

गर्भाधानमतश्च पुंसवनकं
सीमन्तजाताभिधे
नामाख्यं सहनिष्क्रमेण च
तथाऽन्नप्राशनं कर्म च।
चूडाख्यं व्रतबन्धकोऽ-
प्यथ चतुर्वेदव्रतानां पुरः
केशान्तः सविसर्गकः परिणयः
स्यात् षोडशीकर्मणाम्।।

संस्कारभास्करः।। (पृ. ०२)

**प्राक्कथनम्।**

वात्सल्यात्पितरौकपोलयुगलं स्वस्यागतौ चुंबितुं
दृष्ट्वा कुंचितमास्यपद्ममलं सेषत्स्मितं सत्वरम्।
अन्योन्यं शिवयोस्तत:सुवदने युक्ते अभूतांतयो-
रित्थं येन विनोदितौसभगवान् बालोगजास्योऽवतु।।
संस्कारभास्कर:, पृ. ०२।।

महाराजासयाजिरावविश्वविद्यालयस्य वडोदरासंस्कृतमहाविद्यालये शुक्लयजुर्वेदयाज्ञिकी पाठ्य-पुस्तकेषु ऋषिभट्टस्य संस्कारभास्कराख्यस्य ग्रन्थस्याध्ययनकाले गुर्जराङ्ग्लहिन्दीभाषाभ्यो नैकस्या- मपि तस्यानुवाद: प्राप्तो नाऽऽसीत्। तदानिमेव संस्कारभास्करस्याध्ययनं सघनं कर्तव्यमिति वृत्तिरुत्पन्ना जाता। २००५तमे ख्रिस्ताब्दे शुक्लयजुर्वेदयाज्ञिक्या अनुस्नातकोपाधिमतिगत्य वर्षमेकं वडोदरासंस्कृतमहाविद्यालय एवाध्यापनमपि कृतम्। तदनन्तरं वर्षमेकं अमेरिकानिवासे याज्ञिक्या: प्रायोगिकोऽनुभवोऽपि सम्पादित:। तत्र निवसता मया नैकश: संस्कारभास्करस्य पठनं कुर्वता संशोधनस्याभिलाषो दृढतरां वृद्धिं गत:। सर्वं परित्यज्य मातृभूमिं प्रत्यागतोऽहं मम पूजनीयचरणानां मातुलवर्याणां श्रीमतां हर्षदभाईदवे(बापा)महानुभावानां चरणकमलेषु मदीयामुत्कटामिच्छां निवेदितवान्। तै: सहसा निगदितं "प्रोफेसर जयदेवभाईं वद" इति।

मम मित्रवर्येण (डॉ.) गिरीशपुरोहितेन समं प्रो. डॉ. जयदेवजानीमहोदयानां साक्षात्कारस्तेषां गृहे जात:। संस्कारभास्करस्य विषये महानिबन्धं पारयितुं मदीया मनीषा तै: सपद्येव स्वीकृता महानिबन्धपञ्जीकरणानन्तरं च प्रतिसप्ताहं वारद्वयमपि निर्धारितम्। अधुना चतुर्णां वर्षाणामन्तेऽयं महानिबन्ध: सम्पूर्णतां नीत इति हृदयं सानन्दमुल्लसति।

अतिप्रसिद्धानां षोडशसंस्काराणां सर्वेषु प्रकाशितग्रन्थेषु प्रयोगा: समग्राङ्गसहिता नाऽस्माभिर्दृष्टा:। ततो सूक्ष्मातिसूक्ष्म विधिकर्म पूरयितुं प्रयत्नोऽस्माभि: कृतो वर्त्तते। संस्काराणां विधिप्रयोगा: समग्रतया प्रदत्ता एव, विशेषस्तु "वामहस्ते अक्षतान् गृहीत्वा" तदनन्तरं प्रत्येक कर्मान्ते "इत्यक्षतान् क्षिपेत्" तथा च "हस्ते जलमादाय" अनन्तरं च "इति जलपात्रे जलं क्षिपेत्" एवमादिभि: कर्म कलापै: संशोधन ग्रन्थोऽयं पूर्णतां प्रापित:।

प्रो. डॉ. जयदेवजानीमहोदयानां पादपद्मेषु भूरि भूरि प्रणामान् विरच्याऽऽभारं प्रदर्शयामि।

संस्कारभास्करस्याध्ययनसमये नैकाः याज्ञिकीविषयकाः समस्या उद्भूतास्तासां सप्रमाणं निराकरणं प्रदर्शयन्तः गुरुचरणाः स्व. अश्विनभाईपाठकमहोदयाः डॉ. गिरीशमहोदयश्च विशेषान् धन्यवादानर्हन्ति। अस्मिन् महानिबन्धे यत्र कुत्रापि यदा कदाऽऽवश्यकतानुसारं सूचनैः मह्यं सहायं कृतवतां डॉ. किशोरवैद्यमहोदयानां डॉ. महेशपटेलस्य श्रीमिहिरोपाध्यायस्य ़डॉ. संजयजोषीमहोदयस्य
कु. कामाक्षीजानीभगिन्याश्चोपकारान् व्याहरामि।

मम शोधनिबन्धमार्गदर्शकस्य प्रॉ. डॉ. जयदेवजानीमहानुभावानां धर्मपत्नी अ.सौ. लतिकाबेनजानीमहोदया प्रकृत्या छात्राणां प्रिया या गृहागतेभ्यः छात्रेभ्यः सवात्सल्यं स्वागतं व्याहरन्ती प्रोत्साहनपूर्वकं प्रेरणां ददाती छात्राणां संशोधनस्य पूर्णतायै परिप्रश्नानपि करोति तस्यै भूरि नमस्कारान् करोमि।

वडोदरासंस्कृतमहाविद्यालयस्य पूर्वप्रधानाचार्याः श्रीमन्तो योगेशओझामहानुभावाः डॉ. श्रीठाकोरलालदवेमहोदयाः श्रीवासुदेवव्यासमहोदयाश्च प्रणामैः सम्भाव्यन्ते मया। प्राच्यविद्यामन्दिरस्य कार्यकारिनियामकाः प्रो. डॉ. मुकुन्दवाडेकरमहाभागास्तत्रैव सेवां कुर्वाणा डॉ. श्रीमती मीनाबेनपाठकमहोदया च नैकेषां सन्दर्भानां सुकरां प्राप्तिमकुरुतां तावपि सनमस्कारं धन्यवादं व्याहरामि। डॉ. मिलिन्दजोशीमहोदया अस्य शोधनिबन्धस्य पृष्ठायोजनं कम्प्यूटरे साधयितुं मह्यमतीव साहाय्यं कृतवन्तोऽतस्तेभ्यो धन्यवादान् व्याहरामि।

अस्मिन् स्थले मम मातामहचरणान् स्व. श्रीअरविन्दभाईदवेमहानुभावान् मातामहीं च स्व. कैलासगौरीं मातुलचरणान् श्रीहर्षदभाईदवेमहोदयान् मातुलानीं च सरोजगौरीं मातरं मृदुलां पितरं च हर्षदभाईं च हृदयेन प्रणमन् स्वात्मानं धन्यमनुभवामि। भ्रातरं हिरेनं भ्रातृजायां च ममतां तयोः सर्व कार्येषु सहकारार्थ आशिषो व्याहरामि। मदीया पत्नी अ.सौ. तेजलगौरी स्वधर्मं सर्वप्रकारकसहकाररूपं प्रस्तुतवति मम च पुत्रीद्वयं चि. हेत्वी चि. वरेण्या च सर्वदा प्रोत्साहनेन माम् प्रेरितवत्यः तासां चाऽऽभारं प्रदर्शयितुं कथं समर्थो भवामि ?

वडोदरा पण्ड्योपाह्वो हर्षदभाईपुत्रः संकेतकुमारः।
दिनाङ्कः २२-०८-२०१३

# STATEMENT - I

## HOW THE PRESENT WORK TENDS TO THE GENERAL ADVANCEMENT OF KNOWLEDGE

The Dharmaśāstra is not only a religious philosophy reigning over the hearts of Indian people but it also furnishes the practical side of the life-style spent or intensely desired to be spent by common people. Any person who desires to lead the magnanimous religious life, makes advancement into the Dharmaśāstra depending on his capacity and interest. The only system closer to the religious practices is the Purificatory rites called Samskāras. The *Samskārabhāskara* of Ṛṣibhaṭṭa is a text on such purificatory rites.

There is no authentic study or research on the *Samskārabhāskara* of Ṛṣibhaṭṭa has been carried out so far.

The thesis deals with the following matters of discussion and relevant topics. The preface gives the clear indication of its necessity and importance of the topic of research proposed in the subsequent pages of thesis. The thesis comprises of 07 chapters (called संस्कृतिः) and 12 Appendices followed by Bibliography.

The present study attempts to specify the significant contribution of *Samskārabhāskara* of Ṛibhaṭṭa on the line of purificatory ritualism in the field of Dharmaśāstra. It deals with the highly purificatory value. Hence the effort is made to evaluate *Samskāra*s.

The study is exhaustive, comprehensive and critical as well as analytical, hence it tends to contribute towards the general enhancement of knowledge.

# STATEMENT – II

## SOURCES, INDEBTEDNESS AND ORIGINALITY

In the preparation of the present thesis, I have fully drawn upon the available published literature on the Dharmaśāstra. All the sources, quotations and references occurring in the present thesis have been verified properly and traced to the original source.

I have studied the text of *Samskārabhāskara of Ṛṣibhaṭṭa* , which was available to me from Baroda Sanskrit Mahavidyalaya (MSU) Vadodara. The text is published by Lakshmivenkateshvar Press (Mumbai) in 1926 AD. I have also carefully gone through all the available relevant literature and sources. I have expressed my own views in the light of the text of Samskārabhāskara.

# संक्षेपः।

## Sypnosis

प्रस्तुतशोधनिबन्धे नासिक(महाराष्ट्र)निवासिभिः ऋषिभट्टाचार्यैर्विरचितस्य संस्कारभास्कराख्यग्रन्थस्य समीक्षात्मकमध्ययनं प्रस्तूयते।

अस्मिन् शोधनिबन्धे संस्कृतिनामकानि ०७ प्रकरणानि १३ परिशिष्टानि तदन्ते च सन्दर्भग्रन्थसूची सन्ति।

### ।। प्रथमा संस्कृतिः ।।

### भूमिका।

अस्यां संस्कृत्यां संस्कारशब्दस्याऽर्थो व्युत्पत्त्यनुसारं शास्त्रानुसारं च विवेचितोऽस्ति। संस्काराणां मनुष्यजीवने यन्महत्वं विद्यते यच्च प्रयोजनं वैदिकैर्ऋषिमुनिभिः प्रविलोकितं यश्च प्रभावः साम्प्रत-कालपर्यन्तो दृष्टस्तन्महत्वं स च प्रभावः संस्कारविषयकाणां गृह्यसूत्रादीनामभ्यासेन पुरस्थापिताः सन्ति। प्राचीनेषु संस्कारविषयकग्रन्थेषु संस्काराणां गणना विभिन्ना प्राप्यते। गौतमधर्मसूत्रानुसारेण चत्वारिंशत् (४०) संस्कारा वैखानससूत्रानुसारेणाऽष्टादश (१८) मनुस्मृतिमतेन वेदव्यासमतेन च षोडश (१६) पारस्करमतेन बौधायनमतेन च त्रयोदश (१३) संस्काराः सन्ति। आश्वलायनगृह्यसूत्रानुसारेण त्वेकादश (११) संस्कारा मताः।

एतेषां ग्रन्थकाराणां मध्ये प्रायः मनुस्मृतिकाराणां वेदव्यासस्य चाऽवलम्बनं गृहीत्वा ऋषिभट्ट-महानुभावैः षोडश संस्काराः संस्कारभास्कराख्ये ग्रन्थे स्वीकृता विवेचिताश्च।

### ।। द्वितीया संस्कृतिः ।।

### ऋषिभट्टः - व्यक्तित्वं कतृत्वं च।

शुक्लयजुर्वेदीयो वाजसनेयिमाध्यन्दिनशाखाध्यायी ऋषिभट्टोयं महाराष्ट्रप्रान्तस्य नासिक-नगरनिवासी आसीत् । तस्य जन्मकालो वैक्रमाब्दः १७५६ ख्रिस्ताब्दः १६९९ शकाब्दश्च १६२१ प्राप्यते। अयं भगवतः श्रीरामस्य भक्त आसीत्। स्वयं च याज्ञिकत्वेन जीवननिर्वाहमकरोत् । अत एव भावियाज्ञिकानां कृते सर्वेषां संस्काराणां विधि-विधानं प्रस्तूतवान्।

अस्य ऋषिभट्टस्य संस्कारभास्करो वैक्रमाब्दे १९८३तमे वर्षे लक्ष्मीवेंकटेश्वर (स्टीम्) मुद्रणालयेन प्रकाशितो जातः स एव २९१ पत्रान्कितो ग्रन्थोऽस्मिन् शोधनिबन्धे प्रमाणत्वेन स्वीकृतो वर्तते।

### ।। तृतीया संस्कृतिः ।।

### सर्वसंस्कारसामान्यविधिः।

अस्यां संस्कृत्यां प्राय: सर्वेषां संस्काराणां पूर्वाङ्गकर्मत्वेन विहितानां विधीनां श्रौतस्मार्तानां प्रयोग: प्रस्थापितो वर्त्तते। तत्र च सर्वसंस्कारसामान्यविधे: प्रारम्भे सम्पूर्णो ग्रहशान्तिप्रयोगो वर्णितोऽस्ति। अस्या एव संस्कृत्या अङ्गानि परासु संस्कृतिषु दिग्दर्शनरूपेण प्रदत्तानि सन्ति। तत्कारणं तु पुनरुक्तिदोषपरिहारं ग्रन्थभूस्त्वभयं च।

## ।। चतुर्थी संस्कृतिः ।।
## गर्भाधानाद्युपनयनान्ताः संस्काराः ।

अस्यां संस्कृत्यां (१) गर्भाधानम् (२) पुंसवनम् (३) सीमन्तोन्नयनम् (४) जातकर्म (५) नामकरणम् (६) निष्क्रमणम् (७) अन्नप्राशनम् (८) चूडाकरणम् (९) उपनयनं चेत्येषां संस्काराणां साङ्गो विधिर्निरूपितोऽस्ति।

अत्र गर्भाधानादारभ्योपनयनपर्यन्तानां नवसंस्काराणां समग्रो विधि: समन्त्रको विवेचितो वर्त्तते।

## ।। पञ्चमी संस्कृतिः ।।
## ऋग्वेदव्रतादिविवाहान्ताः संस्काराः ।

अस्यां संस्कृत्यां (१) ऋग्वेदव्रतम् (२) यजुर्वेदव्रतम् (३) सामवेदव्रतम् (४) अथर्ववेदव्रतम् (५) केशान्त: (६) समावर्तनम् (७) विवाहश्चेत्येषां संस्काराणां साङ्गो विधिर्वर्णितोऽस्ति।

अत्र ऋग्वेदव्रतादारभ्य विवाहपर्यन्तानां सप्तसंस्काराणां समग्रो विधि: समन्त्रको विवेचितो वर्तते। अस्यां च सर्वेषां संस्काराणामुत्तराङ्ग कर्मत्वेन विहितानां विधीनां श्रौतस्मार्तानां प्रयोग: प्रस्थापितोऽस्ति।

## ।। षष्ठी संस्कृतिः ।।
## संस्कारविधिनियमानां सामाजिकरीतीनां च समीक्षा ।।

अस्यां संस्कृत्यां मुख्यत: ऋषिभट्टेन संस्कारभास्करे दर्शितानां विधिनियमानां समीक्षा प्रदत्ता वर्तते। तत्र च महाराष्ट्रान्तर्गतनासिकनिवासित्वेन ऋषिभट्टेन तत्रस्थानां विधिनियमा विहितास्तै: गुर्जरप्रान्ते विद्यमानानां संस्कारविषयक विधिनियमानां तुलना ह्रासोऽधिकता च समीक्षिता:। एतदर्थं डॉ. जगदीशचन्द्रमिश्रमहोदयानां पारस्करगृह्यसूत्रमिति ग्रन्थस्य भूमिकाया: सन्दर्भा अपि तन्नामपुर:सरं संगृहीता: सन्ति।

अस्यां च संस्कृत्यां संस्कारभास्करस्य लेखकेन तत्र ग्रन्थे संस्कारविषयकाणि बहूनि विधिविधानानि प्रस्तुतानि। तत्र सामाजाजिकविधिविधानानां महत्वपूर्णं प्रस्थापनं दृश्यते। एतै: सामाजिकविधिविधानै: तत्कालिना लोकस्थिति: तस्याश्च सामाजिको व्यवहारो दृष्टिगोचरो भवति।

## ।।सप्तमी संस्कृतिः ।।
## उपसंहारः ।

अस्मिन् शोधनिबन्धे १३ परिशिष्टानि सन्ति।

(०१) संस्कारसङ्ख्याभिन्नत्वम्।
(०२) उद्धृतवैदिक/पौराणिकमन्त्राणाम् अकाराद्यनुक्रमणी।
(०३) पादटीपोद्धृतपौराणिकमन्त्राणाम् अकाराद्यनुक्रमणी।
(०४) शुक्लयजुर्वेदीयं पुरुषसूक्तम् (अध्यायः ३१)।
(०५) व्यासोक्तं पौराणिकं नवग्रहस्तोत्रम्।
(०६) शुक्लयजुर्वेदीयं रुद्रसूक्तम् (अध्यायः १६)।
(०७) श्रीपुष्पदन्तप्रणीतं शिवमहिम्नःस्तोत्रम्।
(०८) मार्कण्डेयपुराणान्तर्गता शक्रादिस्तुतिः।
(०९) मार्कण्डेयपुराणोक्तं रात्रिसूक्तम्।
(१०) मुख्यसंस्कारोपयोगसामग्रीसूची ।
(११) कार्त्तिकादिमासानां द्वादश विष्णोर्नामानि।
(१२) अवकहडाचक्रम्।
(१३) संस्कारविध्युपयोगि मुहूर्तकोष्टकम्।

**अन्ते च संदर्भग्रन्थसूची प्रदत्ताऽस्ति।**

**शुभमस्तु।**

## संक्षिप्त शब्दसूचि।

अ० – अथर्ववेद:।
ऋ० – ऋग्वेद:।
ऋ०खि०– ऋग्वेदीय खिलसूक्तम्।
कर्म० – कर्मकौशल:।
दे०भा० – देवीभागवत्।
नै०प्र० – नैमित्तिककर्मप्रकाश:।
पा०गृ०सू० – पारस्करगृह्यसूत्रम्।
पा०शि० – पाणिनीय शिक्षा।
पा०सू० – पाणिनीय सूत्रम्।
प्र०मौ० – प्रतिष्ठा मौक्तिकम्।
बृ०प्र० – बृहद् नित्यकर्मप्रकाश। (गुजराती)
ब्र०स० – बृहद् ब्रह्मनित्यकर्मसमुच्चय:।
भ०गी० – श्रीमद् भगवद् गीता।
मनु० – मनुस्मृति:।
या० – याज्ञवल्क्यस्मृति।
रघु० – रघुवंशम्।
या०र० – याज्ञिकरत्नम्।
रा०र० – रामरक्षास्तोत्रम्।
वि०स० – विष्णुसहस्रनामस्तोत्रम्।
व्र०चं० – व्रतोद्यापनचन्द्रिका।
शा०र० – शान्तिरत्नम्।
शु०य० – शुक्लयजुर्वेद:।
स०श० – सप्तशति।
सं०प्र० –वीरमित्रोदय, संस्कारप्रकाश:।
सं०भा० – संस्कारभास्कर:।
सा० – सामवेद:।

# विषयानुक्रमणी।


आभारप्रदर्शनम्।
प्रमाणपत्रम् ०१।
प्रमाणपत्रम् ०२।
प्राक्कथनम्।
संक्षेपसूची।

| संस्कृतिः। | विषयः। | पृष्ठानि। |
|---|---|---|
| प्रथमा | भूमिका। | ००१–०१७ |
| द्वितीया | ऋषिभट्टः – व्यक्तित्वं कतृत्वं च। | ०१८–०६२ |
| तृतीया | सर्वसंस्कारसामान्यविधिः। | ०६३–२१२ |
| चतुर्थी | गर्भाधानाद्युपनयनान्ताः संस्काराः। | २१३–२८२ |
| पञ्चमी | ऋग्वेदव्रतादिविवाहान्ताः संस्काराः। | २८३–३६२ |
| षष्ठी | संस्कारविधिनियमानां सामाजिकरीतीनां च समीक्षा। | ३६३–३७५ |
| सप्तमी | उपसंहारः। | ३७६–३८३ |

परिशिष्टानि। ३८४–४३३

(०१) संस्कार संख्याभिन्नत्वम्।
(०२) उद्धृतवैदिक/पौराणिकमन्त्राणाम् अकाराद्यनुक्रमणी।
(०३) पादटीपोद्धृतपौराणिकमन्त्राणाम् अकाराद्यनुक्रमणी।
(०४) शुक्लयजुर्वेदीयं पुरुषसूक्तम् (अध्यायः ३१)।
(०५) व्यासोक्तं पौराणिकं नवग्रहस्तोत्रम्।
(०६) शुक्लयजुर्वेदीयं रुद्रसूक्तम् (अध्यायः १६)।
(०७) श्रीपुष्पदन्तप्रणीतं शिवमहिम्नःस्तोत्रम्।
(०८) मार्कण्डेयपुराणान्तर्गता शक्रादिस्तुतिः।
(०९) मार्कण्डेयपुराणोक्तं रात्रिसूक्तम्।
(१०) मुख्यसंस्कारोपयोगिसामग्रीसूची।
(११) कार्तिकादिमासानां द्वादश विष्णोर्नामानि।
(१२) अवकहडाचक्रम।
(१३) संस्कारविध्युपयोगिमुहूर्तकोष्टकम्।

**संदर्भग्रन्थसूची।** ४३४–४४२

प्रथमा संस्कृतिः।

भूमिका।

पृष्ठानि ०१ – १७।

# प्रथमा संस्कृतिः।
# भूमिका।

## वेदकालीन संस्काराः।

वैदिककालादेव संस्काराणां प्रचलनं सम्भाव्यते। बहूनां वेदविदुषां वैदिककाले वस्तत्स्तु ऋग्वेदकाले तावन्तः संस्कारा नाऽऽसन् किन्तु कतिचिदेव संस्काराः प्रचलिता आसन्निति यथार्थमेव। पाश्चात्य विदुषां मते वैदिके काले संस्काराणां प्रचलनमशक्यं सम्भाव्यते। यतस्तेषां मते पाश्चात्यभूमिषु यथा संस्कृतिविकासो नाऽऽसीत् तथाऽऽर्यावर्त्ते भारतवर्षे वा विकसिता संस्कृतिर्न भवेदिति। किन्तु ऋग्वेदस्य दशममण्डले १२१तमे सूक्ते पुंसवनविधेः मन्त्राः प्राप्यन्ते। तत्र ४५तमं सूक्तं वर्तते यत्र जातकर्मसंस्कारविधेरुपकार्यम् आयुष्करणमन्त्ररूपं विधानं प्राप्यते। तत्रैव सप्तमण्डले ६६तमे सूक्ते तच्चक्षुरिति षोडशतमे मन्त्रे शिशोर्निष्क्रमणस्य बीजं स्फुटं विलोक्यते। तत्र प्रथममण्डलस्य ५०तमे सूक्ते उदु त्यम् जातवेदसम् देवं वहन्ति केतव इति प्रथमे मन्त्रे, दशममण्डले ०९तमे सूक्ते आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातनेति मन्त्रत्रितये, तृतीयमण्डलस्य ६२तमे सूक्ते तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहीति दशमे मन्त्रे, प्रथममण्डलस्य ११४तमे सूक्ते मा नस्तोके तनये मा न आयुषि मानो गोषु मा नो अश्वेषु रीरिष इति चाऽष्टम मन्त्रे संस्कारविध्युपयोगिनो विधिमन्त्राः प्राप्यन्ते। तत्र च दशममण्डले ८५तमं सूर्यासूक्तं वर्तते यत्र सूर्यपुत्र्या विवाहविधिरुपदर्शितोऽस्ति। एवं सति वैदिककाले संस्काराणां प्राथमिकरूपेण विद्यमानता स्वीकर्तव्यैव। यद्यपि वेदोत्तरकाले श्रौतगृह्यसूत्राणां प्रादुर्भावानन्तरं संस्कारविधीनां विधानं समग्रतया प्रचलितं प्रसारितं च जातम्। स्मृत्युत्तरकाले तु संस्काराणां यावान् यादृशश्च विस्तारो दृश्यते तावान् तादृशश्च वैदिककाले पल्लवितरूपो विस्तारो नाऽऽसीदेव।

वेदानां समकाल उत्तरकाले वा प्रणीतेषु वेदाङ्गेषु वेदपुरुषस्य (०१) गायत्र्यनुष्टुप्त्रिष्टुबुष्णिगादि-छन्दांसि पादौ (०२) यज्ञयागादिपरकः कल्पो हस्तौ (०३) नक्षत्रादिज्योतिःशास्त्रं चक्षुः (०४) शब्दव्युत्पत्तिकरं निरुक्तं श्रोत्रम् (०५) मन्त्राद्युच्चारणनियमावलिरूपा शिक्षा घ्राणम् (०६) शब्दशास्त्रं व्याकरणं मुखमिति स्पष्टतया पाणिनिमुनिना भणितम्।

> छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
> ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
> शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
> तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।। पा०शि० ४१-४२।।

धर्मशास्त्रविषयकं वेदाङ्गं कल्पः। सामान्यतया कल्पाख्य वेदाङ्गस्यार्थः कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति गृह्यते। कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रमित्यऽपि विवेचनं प्राप्यते। कल्पसूत्रेषु यज्ञयागादिश्रौतविषयाः संस्कारादिगृह्यविषयाश्च प्राप्यन्ते एतानि कल्पसूत्राणि श्रौतसूत्राणि

गृह्यसूत्राणि धर्मसूत्राणि शुल्बसूत्राणि च सन्ति। श्रौत गृह्यकर्मणोर्भेदः स्पष्ट एव। श्रुतिमन्त्राः येषु विधिषु प्रत्यक्षतया विनियोज्यन्ते तत् कर्म श्रौतम्। यत्र तु श्रुतिमन्त्राः स्मृतिगतत्वेन वेदमूलकतया प्रयुज्यन्ते तद् कर्म गृह्यम्।

**संस्कारपदस्याऽर्थः।**

व्याकरण दृष्ट्या पाणिनीयव्याकरणे धातुपाठे डुकृञ् करणे – कृ (करोति–कुरुते) करणार्थकस्य कर्मार्थकस्य वा तनादेरष्टमगणस्य धातोः कृ–धातोः प्रयोगो वर्त्तते। करणार्थे कृ–धातोः घञ् (अ–वृद्धिकरोयं) प्रत्यये कृते सम्–उपसर्गपूर्वके वृद्धिकृते सति संपुंकानां सो वक्तव्य इति पाणिनीयव्याकरणस्य वार्त्तिकानुसारेण सुडागमे जाते परिष्करणे शुद्धीकरणे वेत्यर्थे संस्कारशब्द[१] उपयुज्यते। प्रायः शुद्धिकरणं, मलदूरीकरणमिति सामान्यार्थे ज्ञायते यन्मलिनपदार्थस्य मालीन्यं दूरीकृत्य समुपयोगार्थं या क्रिया सैव संस्कृतिः संस्कारो वा कथ्यते।

यद्यपि तर्कभाषायां संसकारपदस्य लक्षणमेवमुक्तं यत् संस्कारव्यवहाराऽसाधारणं कारणं संस्कारः। संस्कारस्त्रिविधो वेगो भावनास्थितिस्थापकश्च (पृ. ४८३) तथाऽपि वाचस्पत्ये[२] स्नानाचमनादिजन्याः संस्काराः देहे उत्पद्यमानानि तदभिधानानि जीवे कल्प्यन्ते। प्रोक्षणादिजन्य संस्कारो यज्ञाङ्ग पुरोडाशेषु।

साम्प्रतकालेऽस्य पदस्योपयोगः (०१) संस्कृतिः (०२) प्रशिक्षणम् (०३) सौजन्यम् (०४) व्याकरणजन्यशुद्धिः (०५) परिष्करणम् (०६) आभूषणम् (०७) प्रभावः (०८) रूपान्तरम् (०९) क्रिया (१०) चिह्नमित्येतेषु सर्वेष्वर्थेषु भवति।[३] सङ्केतस्तु तस्य ज्ञानार्थं भ्रान्तिर्न भवेत् यदा मालीन्यं दूरीभवेत् तदा संस्कारः स्वयमेव प्राप्यते। यत्र मनोमालीन्यं दूरीभवति तत्रैव संस्कारः जागर्तीति पारस्करगृह्यमतानुसारेण[४] संस्कारो मानवानां जीवनस्य प्रत्यवसरविषये महत्वं पावित्रता– प्रदानं च करोति। मानवानां जीवनविकासार्थं सर्वाः शारीरिकक्रियाः न आवश्यकाः किन्तु तासां सम्बन्धः प्रत्येक मनुष्यस्य बुद्धिः भावना एवं आध्यात्मिक गुणानां अभिव्यक्तिः एतेषु विषयेषु आधारं स्थापयन्नेव भगवान् मनुर्वदति[५] – कार्यः शरीरसंस्कार इति (०२/२६)। आधुनिके समाजे विश्वासेन सद्विचारैश्च संस्कारा उत्तममनुष्यस्याऽऽधारस्तम्भा भवितुमर्हन्ति। एतैरेव मानवजीवने शान्तिः पुष्टिस्तुष्टिः सौभाग्यं च जायन्ते।

---

[१] संस्कारपदस्य व्याकरणोक्तदिशा व्युत्पत्तिः डॉ. किशोरवैद्यमहोदयेन सुष्ठुतया व्याख्याता एतदर्थं भूयो भूयो धन्यवादान् व्याहरामि।

[२] वाचस्पत्यम्। पञ्चमभागः, पृ. ५१८८।

[३] विस्तरार्थं डो. जगदीशचन्द्र मिश्रस्य पारस्करगृह्यसूत्रस्य प्रस्तावना (पृ. १४) द्रष्टव्या ।

[४] महामहोपाध्यायकाणेमहोदयैः धर्मशास्त्रस्येतिहासाख्यस्य ग्रन्थस्य तृतीयभागे (पृ. १७)। पारस्करगृह्यसूत्ररचनाकालः ६००–३००ख्रिस्ताब्दपूर्वः स्वीकृतः। यद्यपि ज्योतिःशास्त्रमाधारीकृत्य गङ्गाधरशास्त्रीमहोदयैः १४००–५०० विक्रमाब्दपूर्वो निश्चितो वर्तते।

[५] महामहोपाध्यायकाणेमहोदयैः धर्मशास्त्रेतिहासाख्यस्य ग्रन्थस्य तृतीयभागे (पृ. १७) मनुस्मृतिसङ्कलनकालः २०० ख्रिस्ताब्दपूर्वतः १०० ख्रिस्ताब्द पर्यन्तः स्वीकृतः।

सामाजिक विनय: शक्ति: स्वातन्त्र्यं च संस्काराणां लक्षणानि सन्ति। सरलया रीत्या यदि संस्कारपदस्यार्थो ज्ञातव्य: स्यात् तदा निश्चितया पद्धत्या ह्यनाकृतपदार्थस्याऽऽकृतिप्रदानमेव संस्कार:।

अस्य जगत: प्रत्येके पदार्था: परिवर्तनशीला: सन्ति। अनेन नियमेन प्रत्येकस्मिन् पदार्थे न्यूनाधिकत्वं वारं वारं भवत्येव। अस्या: प्रक्रियाया: प्रकारद्वयं दृश्यते। तद्यथा शिष्टाऽशिष्टा च। शिष्टा क्रिया संस्कृतिरशिष्टा तु विकृति:। यस्मिन्बीजे धान्यस्योत्पादनशक्तिर्वर्त्तते तत्बीजं विविधाभि: शिष्टक्रियाभि: संस्कृतं क्रियन्ते तैरेव बीजवपने कृते सति सुधान्योत्पादनं भवति। अनेन प्रकारेण स्वकुलवृध्यर्थं श्रेष्ठसन्तानोत्पादनार्थं च मनुष्यैर्जन्मप्रभृति मृत्युपर्यन्तं वेदकालीनानां षोडशसंस्काराणां पारस्करगृह्यसूत्रमतानुसारेण वा त्रयोदशसंस्काराणां ये विधय: कर्तव्यतया ऋषिमुनिभि: सविस्तरं वर्णितास्तेषां विधीनामाचरणेन मनुष्या: श्रेष्ठसन्तानोत्पादनं कर्तुं समर्था: भवन्ति। अपक्वमन्नं यथा भक्षणयोग्यं न भवति तथैवाऽसंस्कृत: मनुष्यो धर्मादिपुण्यकार्येष्वयोग्यो भवति। तस्यै तस्य जनस्य योग्यताप्रदानार्थं संस्कारा: आवश्यका इत्यस्मिन्नर्थे ब्रह्मक्षत्रियवैश्यानां कृते भगवता मनुनैव कथितमस्ति यज्जन्मना जायते शूद्र: संस्कारात् द्विज उच्यते इति। अतो मनुष्यो जन्मनैव शूद्र एव भवति किन्तु संस्कारै: स एव मनुष्यो द्विजो भूत्वा ब्राह्मणो वा क्षत्रियो वा वैश्यो वा भवति।

**संस्कारनामानि।**

गर्भाधानमतश्च पुंसवनकं सीमंतजाताभिधे
  नामाख्यं सह निष्क्रमेण च तथाऽन्नप्राशनं कर्म च।
चूडाख्यं व्रतबंधकोऽप्यथ चतुर्वेदव्रतानां पुर:
  केशांत: सविसर्गक: परिणय: स्यात् षोडशी कर्मणाम्।।

इदं पद्यं संस्कारभास्करकारै: (पृ. ०२) स्मृन्त्यन्तराद् गृहीतम्। तस्यैवाऽर्थोऽत्र संगृह्यते। सर्व शिष्ट सम्मता: संस्कारा: षोडश।

(०१) गर्भाधानं शुभे मुहूर्ते दम्पत्योर्विधिपूर्वकं समागमनम्। पुंसा स्त्रियां रेतोनिधानम्।

निषिक्तो यत्प्रयोगेण गर्भ: संधार्यते स्त्रिया।
तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभि:।। सं०प्र०पृ., ५९।।[६]

(०२) पुंसवनं प्रथमे तृतीये वा मासे गार्भिकं बैजिकं च दोषपरिहारार्थं गर्भस्य संरक्षणार्थं पुत्रप्राप्त्यर्थं च भर्त्रा पत्न्या दक्षिणनासिकायामौषधिरससेचनम्।

---

[६] गर्भाधानपुंसवनसीमन्तोन्नयनसंस्काराणां व्याख्या: स्पष्टतया वीरमित्रोदयस्य संस्कारप्रकाशे प्रदत्ता:। अतस्तस्मात् ता अत्र गृहीता:।

पुमान् प्रसूयते येन कर्मणा तत् पुंसवनमीरितम्।। सं०प्र०, पृ. ७३।।

(०३) सीमन्तोन्नयनं गर्भिण्याः गर्भस्य षष्ठेऽष्टमे वा मासे गर्भशुद्ध्यर्थं पापनिवारणार्थं गर्भरक्षणार्थमुत्तमसन्तति प्राप्त्यर्थं च भर्त्रा पिञ्जुलैः त्रिर्विनयनम्।

सीमन्त उन्नीयते यस्मिन् कर्मणि तत्
सीमन्तोन्नयनमिति कर्मनामधेयम्।। सं०प्र०, पृ. ७८।।

(०४) जातकर्म नवजातं प्राङ्नालच्छेदात् समन्त्रोच्चारं सुवर्णशलाकया घृतमधुप्राशनम्।

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते। मनु० ०२/२९ अब।

(०५) नामकरणं शिशोः जन्मनः दशदिनोर्ध्वं पित्रा जन्ममासनक्षत्रव्यवहारनामदेवतानां पूजनम्।

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत्।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते।। मनु० ०२/३०।।
मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।
वैश्यस्य धनसंयक्तं शूद्रस्य तु जुगुप्सितम्।। मनु० ०२/३१।।

(०६) निष्क्रमणं शिशोर्जन्मनः चतुर्थेमासे दीर्घायुष्यकामनार्थं पितृकृतसङ्कल्पपूर्वकं मात्रा शिशवे सूर्यदर्शनार्थं गृहाद् बहिर्गमनम्।

चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गुहात्। मनु० ०२/३४ अब।

(०७) अन्नप्राशनं शिशोर्जन्मनः षष्ठेमासे पित्रा गर्भस्थस्थितौ मलमूत्रप्राशनादिदोष परिहारार्थं ब्रह्मतेज-इन्द्रियायुर्बलादिप्राप्त्यर्थं कांस्यपात्रे मधुरादिषड्रसप्राशनम् आजीविकापरिक्षणं च।

मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम्।। मनु० ०२/२९ कड।।
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले।। मनु० ०२/३४ कड।।

(०८) चूडाकर्म चौलं वा बालस्य जन्मनः प्रथमे तृतीये पञ्चमे वा वर्षे कुलाचारानुसारेण जन्मकालीन- केशवपनम्।

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्।। मनु० ०२/३५।।

(०९) व्रतबन्ध उपनयनं मौञ्जीबन्धनं  वा द्विजानां यज्ञोपवीतधारणम् ।

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः।।
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे।। मनु० ०२/३६-३७।।
कार्पासमुपवीतं स्याद् विप्रस्योर्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्।। मनु० ०२/४४।।

(१०-१२) ऋग्वेदादिव्रतबन्धाः।

अध्येष्यमाणस्त्वाचान्तो यथा शास्त्रमुदङ्गमुखम्।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रिय।। मनु० ७०।।
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः।। मनु० ७१।।

(१३) अथर्ववेदव्रतं गुरोर्गृहे अथर्ववेदाध्ययनम्।

अग्नीन्धनं भैक्षचर्यमधःशय्यां गुरोर्हितम्।
आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः।। मनु० १०८।।

(१४) केशान्तः वेदाध्ययनान्तरं केशस्मश्रुवपनम्।

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः।। मनु० ०२/६५।।

(१५) समावर्तनं ब्रह्मचारिणा वेदाद्यध्ययनं पारयित्वा स्नातको भूत्वा गुरोर्गृहाद्  गृहप्रत्यागमनं गृहस्थादिधर्मपालनं च।

तत्र समावर्त्तनं नाम वेदाध्ययनान्तरं गुरुकुलात् स्वगृहागमनम्।। सं०प्र०, पृ. १८७।।

(१६) विवाहः  समस्तपितृणां उद्धारणार्थं पितृऋणात् मुक्त्यर्थं विधिपूर्वकं स्वज्ञातीयया कन्ययाऽनुलोमेन परज्ञातीयया वा कन्यया विलोमेन विवाहकरणं गृहस्थाचरणं च।

गुरुणाऽनुमत: स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्।। मनु. ०३/०४।।

इदमत्र स्पष्टं वक्तव्यं यत् स्त्रीणां उपनयनादारभ्य संस्कारामन्त्ररिता: क्रियन्ते। एतदर्थं भगवान् मनु: कथयति।

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषत:।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्।। मनु० ०२/६६।।

वैवाहिको विधि: स्त्रीणां संस्कारो वैदिक: स्मृत:।
पतिसेवा गुरौ वासौ गृहार्थोऽग्निपरिक्रिय:।। मनु० ०२/६७।।

**संस्कारविधेर्दृष्टादृष्टलाभ विचार:।**

मेधातिथि[७]विरचिते मनुस्मृति(०२/२७)भाष्ये संस्कारशब्दस्य व्याख्या प्रतिपादिता यत् संस्कारश्च सर्वसंस्कार्ये कार्यान्तरशेषभूते कृतार्थे करिष्यमाणार्थे वा कञ्चिदृष्टमदृष्टं वा विशेषमादधातीति। अस्मिन् विषये मनुस्मृतौ निगदितम्।

गार्भैर्होमैर्जातकर्म चौडमौञ्जीनिबन्धनै:।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।। ०२/२७।।

गर्भशुद्ध्यर्थं कर्तुं योग्या: गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातकर्म नामकरणं निष्क्रमणमन्नप्राशनं चूडाकर्म व्रतबन्ध: (यज्ञोपवीतधारणं) चेत्यादय: नव संसकारा: द्विजानां जन्मनो बैजिकं गार्भिकं वा पापमपाकुर्वन्ति। बैजिकं पापं तु पितु: कुलपरम्पराया: मालीन्यम्। तद्यथा शारीरिकविकृतय: व्याधय: स्वभावगताश्च प्रकृतिविकारा:। अत्र च गार्भिक मालीन्येन मातृकुलस्य शारीरिकविकृतयो रक्तविकृतयो वा ज्ञातव्या:। संसारेऽस्मिन् मनुष्यस्य जन्मन: प्राक् रजोदर्शनशान्ति: नाम एको विशिष्टो विधि: स्त्रिय: देहेन्द्रियकर्मणां शुद्ध्यर्थमवश्यं कार्य:। अस्मिन्नेवार्थे संस्कारशब्दस्य अर्थ: प्रयोगश्च उपयुज्यते। गृहस्थ: श्रद्धाविमुख: प्रमादेन शास्त्रविधिमुत्सृज्य रजोदर्शनशान्तिमकुर्वन् गर्भाधानसंस्कारस्य नियमानां च पालनं विहाय गर्भाधानं कुर्यात् तदा नारी रजोदर्शनशान्तिविधेरभावाद् गर्भस्थदोषनिवृत्तेरभावाच्च सुखप्रसवं संस्कृतशिशुं च न लभते।

---

[७] महामहोपाध्यायकाणेमहोदयै: धर्मशास्त्रेतिहासाख्यस्य ग्रन्थस्य तृतीयभागे (पृ. १८) मनुस्मृते: टीकाकारस्य मेधातिथे: काल: ९०० ख्रिस्ताब्द: स्वीकृत:।

कृषीवलो यथा स्वक्षेत्रे निरूपयोगीतृणान्यपाकुरुते क्षेत्रशुद्धिं करोति ततश्च तत्र बीजारोपणं करोति। अत एव सा भूमि: योग्यकाले योग्यतामापन्ना कृषीवलेच्छानुसारेणानल्प प्रमाणेन परिमाणेन धान्यप्रदानक्षमा जायते सन्तोष प्रदा च सञ्जायते। अनेन कारेणेनैव गर्भाधानादिसंस्कारा: विधिपूर्वकं विहितास्तदा संजायमाना सन्तति: सद्गुणान्विता धीरा धर्मनिष्ठा बुद्धिमती निरामया पराक्रमशीला सुखयुक्ता दीर्घायुषी च भवति। कृषीवल: प्रमादेन स्वक्षेत्रं परिस्कृतमकृत्वा यद्यमूल्यबीजमपि रोपयति तर्हि किं संजायेतेति विचारास्पदं नाऽवतरति।

वैदिकसंस्कारै: ब्रह्मज्ञानं भवति ब्रह्मज्ञानेन च मोक्षप्राप्तिर्भवति। आधुनिककाले पितरौ मन्येते यत्तयोर्बालोनाऽज्ञानी नैव मूर्खश्चाऽस्ति। तथा च वचसा कर्मणा च समाजे स्वदोषाणां विकाराणां च प्रदर्शनं न करोति। अस्मिन् विषये अमेरिकादेशस्य प्रसिद्धलेखक ऑल्वीन टीफ्लर महोदयेन 'फ्युचरशॉक' नाम्नि पुस्तके[८] नैक युवकै: सह वार्तालापं कृत्वा तेषां मनीषा ज्ञाता। तत्र मातापितृभ्यां सह युवकानां सम्बन्धचर्चा प्रश्नोत्तरि रूपेण कृता वर्त्तते। तत्रत्ययुवकानां सकोपोऽभिप्रायो यत् तेषां मातापितरौ पालकरूपेण सुसंस्कारार्थं वा जन्म न प्रदत्तवन्तावपि तु केवलमात्मन: कामसन्तोषार्थं विषयान्दप्राप्यर्थं च तानुत्पादितवन्तौ।

वैदिकसंस्कृतौ संस्कारविधिविषये समुउच्चार्यमाणानां वैदिकमन्त्राणां दिव्यं दर्शनं ऋषिभि: प्रस्थापितम्। वैदिकसाहित्ये मन्त्रैरीश्वरसमक्षमुत्तमसन्तानयाचनां कुर्वन् शुक्लयजुर्वेदस्य मन्त्रद्रष्टा घोषयति।

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्य: शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढाऽनड्वानाशु: सप्ति: पुरन्धिर्य्योषा जिष्णू रथेष्ठा: सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे न: पर्जन्यो वर्षतु फलवत्यो न ओषधय: पच्यन्तां योगक्षेमो न: कल्पताम्।। २२/२२।।

अत्रेदमिदमाचार्यस्योवटस्य[९] भाष्यावतरणमवलोकनीयम्।

(अध्वर्यु:) जपति। **आ ब्रह्मन्** आ **जायतां** हे ब्रह्मन्, **ब्राह्मण: ब्रह्मवर्चसी**। यज्ञाध्ययनशीलो ब्राह्मण आजायतामित्यर्थ:। **राष्ट्रे**। आजायतां च राष्ट्रे **राजन्य: शूर: इषव्य:** इषुभि: विध्यति इषव्य: इषुषु: वा साधु: इषव्य:। **अतिव्याधी महारथ:**। अतिध्यति द्विषन्तमित्यतिव्याधी। महारथश्च **दोग्ध्री धेनु:** राष्ट्रे आजयातामिति सर्वत्र सम्बन्ध:। **वोढा अनड्वान् आशु:** शीघ्र: **सप्तिरश्व:**। **पुरन्धिर्योषा**। पुरं शरीरं रूपादिगुणसमन्वितं धारयतीति पुरन्धि:। **जिष्णू रथेष्ठा:**। जयनशील: रथे तिष्ठतीति रथेष्ठा: युयुत्सु: **सभेयो युवा**। सभामर्हति विद्यागुणचरित्रै: सभेय: युवा आ **अस्य यजमानस्य** आ**जयातां** चास्य यजमानस्य धीर: पुत्र:। किंच **निकामे निकामे न: पर्जन्यो वर्षतु** प्रार्थनायामवश्यं भवतीति निकाम:।

---

[८] अत्र श्रीदिनेशपाठकस्य षोडशसंस्कार (संस्कारसौरभ)(गुजराती)पुस्तकस्य प्रस्तावनाया: पृ. ६ द्रष्टव्यं।

[९] शुक्लयजुर्वेदसंहिता। सं० पणशीकर वासुदेव लक्ष्मण। पृ. ५६४।

अभ्यासो वीप्सार्थः अस्माकं राष्ट्र इत्यर्थः। **फलवत्य** अतिशयेन फलयुक्ताः **नो**ऽस्माकं राष्ट्रे **ओषधयः पच्यन्ताम्**। **योगक्षेमो नः कल्पताम्**। योगो द्रव्यादीनां संयोगः क्षेमस्तेषामेव परिपालनम्। योगश्च क्षेमश्चास्माकं क्लृप्तो भवतु। योगश्च क्षेमश्चेति द्वन्द्वः। तत्र नपुंसकलिङ्गता वा स्यात् द्विर्वचनं वा इति। तत्र छान्दसो विसर्जनीयो द्रष्टव्यः।

अनेन सुस्पष्टं भवति यत् सर्वप्रकारकाः संस्काराः सर्वत्र सर्वदा सर्वथाऽत्युत्तमानुपम सन्ततेर्जनेतारः। न केवलं मनुष्याणामपि तु पशूनां महाभूतानामपि संस्काराः आवश्यकास्तत्र सुखशान्तिसमृद्धिपूर्णजीवनस्य पवित्राभिलाषः कारणभूतो दृश्यते। एभिः संस्कारैः पूतेन वेदज्ञेन मनुष्येण वेदानां अध्ययनेन व्रत-होम-तर्पणं-पुत्रोत्पत्तिः-पञ्चमहायज्ञाः-ज्योतिष्टोमादि महायज्ञा अनुष्ठीयन्ते ततश्चेदं शरीरं ब्रह्मप्राप्त्यर्थं योग्यं सम्पद्यते। अस्मिन्नेवार्थे भगवता मनुना पुष्टिं कुर्वता कथितम्।

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।। ०२/२८।।

वैदिक कर्मभिः ब्रह्मज्ञानं ब्रह्मज्ञानेन च मोक्षप्राप्तिर्भवति। ईदृशमक्षय्यमदृष्टं फलं भगवतामनुना प्रदिष्टम्।

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः।
स गच्छत्युत्तमस्थानं न चेहाजायते पुनः।। २/२४९।।

अत्राऽयमर्थो बोध्यते। यो ब्राह्मणः शास्त्रविधेरनुसारेणाऽखण्डं ब्रह्मचर्यं चरति स उत्तमलोकं प्राप्नोति। ततश्चास्मिन् लोके पुनर्न जायते। तेन च 'पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनं' इति फलितं भवति। शास्त्रस्याऽऽज्ञानाः सश्रद्धं ससन्मानं च पालनीया योग्यकाले च विधिविधानपूर्वकं गर्भाधानादि- संस्काराः कर्तव्याः।

**संस्कारसङ्ख्या।**

जगत्स्रष्टा पितामहो ब्रह्मा सृष्टिमुत्पाद्य ब्राह्मणं क्षत्रियं वैश्यं शूद्रं चेति वर्णान् निर्माय जगति धर्मसंस्थापनाय तेषां वर्णानां संस्कारा ऋषिमुनिवर्यैः प्रस्थापयामास। किन्तु देशानुसारेण कालानुसारेण कुलानुसारेण च ऋषिपुङ्गवैः विहितानां संस्काराणां सङ्ख्याया भिन्नत्वं दृश्यते।

साम्प्रतं षोडशसंस्काराणां महत्वमत्यन्तमल्पं दृश्यते तथापि गौतमाश्वलायनादिशास्त्रकाराणां मतेन क्रमः सङ्ख्याभिन्नत्वं च दृश्येते। कर्मकाण्डस्य ग्रन्थेषु[१०] षोडशसंस्काराणामेव विधयः दृश्यन्ते

[१०] महामहोपाध्यायकाणेमहोदयैः धर्मशास्त्रस्येतिहासे (०५/०१। पृ० ६०४) राजमार्तण्डस्य श्लोकमुद्धृत्य प्रस्थापितं यत् पुंसवनसंस्कारादारभ्य अन्नप्राशनसंस्कारपर्यन्तविधिषु ग्रहाणां यथावश्यक स्थितयो विपत्तिकाले न बाधन्ते।

गौतमधर्मसूत्रे चत्वारिंशत्,[११] मनुस्मृत्यनुसारेण षोडश, आश्वलायनगृह्यसूत्रानुसारेणैकादश, व्यासमतेन षोडश, बौधायनगृह्यसूत्रानुसारेण त्रयोदश, वाराहगृह्यसत्रानुसारेण त्रयोदश, वैखानसगृह्यसूत्रानुसारेणाऽष्टादश, अङ्गिरसो मतेन पञ्चविंशतिः, पारस्करगृह्यसूत्रानुसारेण त्रयोदश याज्ञवल्क्यमतेन च षोडश संस्काराः स्वीकृताः सन्ति।

संस्काराणां सङ्ख्या मनुष्यस्य समग्रं जीवनं संस्कारप्रक्रियया सुसंस्कृतं कर्तुं पृथक् पृथक् काले परिवर्तिताः। किन्त्वत्र बौधायनवाराहपारस्करगृह्यसूत्रेषु संस्काराणां सङ्ख्या त्रयोदश एव वर्तन्ते। एवं पारस्कराचार्यस्य मतेन वैदिककालीन संस्काराणां सरली करणार्थं लोकभोग्यत्वार्थं च समाजे श्रेष्ठत्व प्राप्त्यर्थं त्रयोदशसंस्काराः एव महत्वं भजन्ते इति मन्यते। पारस्कराचार्येण संस्काराणां गणना विवाहसंस्कारात् कृता अतएव अयं विवाहसंस्कारः आधारशिला गण्यते यतः सैवाऽऽधारशिला समाजनिर्माणेऽत्यन्तोपयोगी भवति। संस्कारः मनुष्यमात्रस्य प्रथम एव अधिकारः किन्तु ब्राह्मणक्षत्रियविशां कृते गर्भाधानादारभ्य अन्त्येष्ठिसंस्कारपर्यन्तं सर्वेसंस्काराः समन्त्रकाः कर्तव्याः। शूद्राणां कृते सर्वेसंस्काराः अमन्त्रकाः कर्तव्याः इति भगवता याज्ञवल्क्येन प्रतिपादितम्। स्त्रीणां कृते गर्भाधानात् चूडाकरणपर्यन्तं सर्वेसंस्काराः अमन्त्रकाः विवाहसंस्कारस्तु समन्त्रं कर्तव्यः।

**संस्कारविधिषु वेदज्ञब्राह्मणानां महत्वम्।**

आथर्वणज्यौतिषे एवमाम्नातं

चतुर्भिः कारयेत्कर्म सिद्धिहेतोर्विचक्षणः।
तिथिनक्षत्रकरणमुहूर्तेनेति निश्चयः।। ०७/१२।।

दूरस्थस्य मुहूर्तस्य क्रिया च त्वरिता यदि।
द्विजपुण्याहघोषेण कृतं स्यात्सर्वसम्पदम्।। ०७/१६।।

कोविदो जनः संस्कार विधीनवश्यं कुर्यात् कारयेद्वा यत्र तिथिनक्षत्रकरणमुहूर्तानां परस्पर मेलनं कल्याणकरं सिद्धिप्रदं च भवेत्। एषु तिथिनक्षत्रादिषु मुहूर्तेषु एक द्वयोः त्रयाणां चतुर्णां वा शुभा संगतेर्नभवेत् तदा वेदज्ञ ब्राह्मणानां अस्तु पुण्याहमिति वाचएव विधिफलदायिन्यः।

उपरि निर्दिष्टस्य महाप्रभावकवाक्यस्य प्रामाणिकतां प्रस्थापनायाऽधोलिखित संवादो यजमानस्याऽऽचार्यस्य मध्ये संजायते तस्य च फलमपि वेदज्ञानपूताचार्यस्य वाक्सिद्धिरेव कारणम्।

पुण्याहवाचनविधौ यजमानो वदेत्। आचार्यो वदेत्।

---

[११] शास्त्रकाराणां संस्कारसंङ्ख्याभिन्नत्वं प्रथमे परिशिष्टे प्रदर्शितम्।

०१. भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्या-
ख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु। ॐ अस्तु पुण्याहम्। इति त्रिः।

०२. भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्या-
ख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु। ॐ अस्तु कल्याणम्। इति त्रिः।

०३. भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्या-
ख्यस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु। ॐ कर्म ऋध्यताम्। इति त्रिः।

०४. भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्या-
ख्यस्य कर्मणः स्वस्ति भवन्तो ब्रुवन्तु। ॐ आयुष्मते स्वस्ति। इति त्रिः।

०५. भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्या-
ख्यस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु। ॐ अस्तु श्रीः। इति त्रिः।

एवंप्रकारेण विधिसम्पादनसमये यजमानो यां यां कामनां प्रस्तौति तस्यास्तस्याः कामनायाः पूर्त्तिरवश्यं भवत्येवेति वेदज्ञाचार्यो वेदज्ञब्राह्मणो वा स्वकीयया वेदपवित्रितवाचया सिध्यति। यजमानस्य स्वकल्याणानन्तरं कुटुम्बस्य कुलस्य समाजस्य च शान्तिं पुष्टिं तुष्टिं वृद्धिमित्यादि सिद्धयो तस्यैवाचार्यब्राह्मणस्य वाक्सिद्धिद्वारेणावश्यं फलन्ति। इत्यलं बहुना।

**संस्कारविषयकाग्रन्थाः।**

संस्काराणां सङ्ख्याभिन्नत्वं प्रदर्शयन्तो ग्रन्थानां परिचयोऽत्र संक्षेपेण प्रस्तूयते।

(०१) **आश्वलायनगृह्यसूत्रम्।**(६००-३०० ख्रिस्ताब्दपूर्वम्)[१२] ऋग्वेदीयं गृह्यसत्रमिदं चतुर-ध्यायात्मकम्। अत्र गृह्यकर्माणि संस्काराश्च सविवेचनं वर्णिताः सन्ति। अत्र ऋषितर्पणं वेदाध्ययनं

[१२] अत्र येषां येषां गृह्यसूत्राणां कालनिर्देशः कृतस्तेषां तेषां गणना महामहोपाध्यायकाणेमहोदयानां धर्मशास्त्रस्ये-तिहासेति तृतीयभागात् (पृ. १७-२०)साभारं संगृहीता।

श्रावणीकर्म चेत्यादि विषयाः। अस्य ग्रन्थस्य महत्वमत्यन्तं वर्त्तते यतो नैके प्राचीनानामाचार्याणां नामोल्लेखः प्राप्यते। अस्य च प्रसिद्धिस्तदुपरि लिखितानां नैकेषां कारिकाग्रन्थानां प्राप्तत्वेन ज्ञायते।

(०२) **शाङ्खायनगृह्यसूत्रम्।**(६००-३०० ख्रिस्ताब्दपूर्वम्) ऋग्वेदीयं गृह्यसत्रमिदं षड्अध्यायात्मकं सुयज्ञेन विरचितं मन्यते। अत्र संस्काराणां विवेचनेन सह तत्सम्बद्धित विषयाणां गृहनिर्माणगृहप्रवेशादीनां चर्चा प्राप्यते।

(०३) **कौषीतकिगृह्यसूत्रमपरनाम शाम्भव्यगृह्यसूत्रम्।** ऋग्वेदीयं गृह्यसूत्रमिदं पञ्चाध्यायात्मकं शाम्भव्येन विरचितं मन्यते। अत्र प्रारम्भे विवाहसंस्कारवर्णनं विधाय जातकर्मसंस्कारानन्तरमुपनयनसंस्कारो वर्णितोऽस्ति। तथा च कृषिकर्म पितृमेध (अन्त्येष्टि) प्रभृतिसंस्कार चर्चा विद्यते।

(०४) **शौनकगृह्यसूत्रम्।** ऋग्वेदीयं गृह्यसूत्रमिदमौषतः प्राप्यतेऽस्य च शौनकाश्वलायनावित्यपि नामान्तरम्। विषयदृष्टाऽस्याऽऽश्वलायनेन साम्यं प्रतीयते।

(०५) **पारस्करगृह्यसूत्रम्।**(६००-३०० ख्रिस्ताब्दपूर्वम्) शुक्लयजुर्वेदीयं गृह्यसूत्रमिदं वाजसनेयिगृह्यसूत्रं कातीयगृह्यसूत्रं वेत्ति नाम्नाऽपि प्रसिद्धमस्ति। काण्डत्रितये १९ + १७ + १५ = ५१ कण्डिकाः शुक्लयजुर्वेदीयमन्त्ररूपाः सन्ति। अस्य ग्रन्थस्य प्रचारो मान्यता च माध्यन्दिन-काण्वशाखयोः समानतयैव स्तः। अत्र अग्न्याधानं विवाहादारभ्य वेदारम्भसंस्कारचतुष्कं विहाय द्वादशान्त्येष्टिं समाविश्य त्रयोदश संस्काराणां विधिविधानानि प्रस्तुतानि। पञ्चमहायज्ञा श्रावणीकर्म सीतायज्ञश्चेत्यपि वर्णिताः सन्ति।

(०६) **बैजवापगृह्यसूत्रम्।** शुक्लयजुर्वेदीयं गृह्यसूत्रमिदमाचार्यबैजवापविरचितं मन्यते। अस्य तु गृह्यसूत्रस्य ग्रन्थोऽप्राप्यस्तथापि प्राचीनेभ्यो ग्रन्थेभ्यो बैजवापस्याऽनल्पानि पद्यानि प्राप्यन्ते।

(०७) **बौधायनगृह्यसूत्रम्।**(६००-३०० ख्रिस्ताब्दपूर्वम्) कृष्णयजुर्वेदीयं गृह्यसूत्रमिदमौशेन बौधायनकल्पसूत्रस्याङ्गमस्ति। चतुःप्रश्नात्मकमिदं यत्राऽध्यायस्य प्रश्न इति नामकरणम्। अत्र च परिभाषा गृहशेष पितृमेध (अन्त्येष्टि) प्रभृतयो विषयाः सन्ति।

(०८) **भारद्वाजगृह्यसूत्रम्।** कृष्णयजुर्वेदीयं गृह्यसूत्रमिदमध्यायत्रयान्वितम्। सर्वसंस्कारविधि वर्णनमत्र प्राप्यते। विवाहसंस्कारविधौ नूतना नियमाः प्रदर्शिताः सन्ति।

(०९) **आपस्तम्बगृह्यसूत्रम्।**(६००-३०० ख्रिस्ताब्दपूर्वम्) कृष्णयजुर्वेदीयं गृह्यसूत्रमिदमापस्तम्ब कल्पसूत्रग्रन्थस्य सप्तविंशतितमः प्रश्नोऽस्ति यत्राऽध्यायस्य प्रश्न इति नामकरणम्। अत्र सप्तविंशतितमे प्रश्ने (अध्याये) त्रयः प्रश्नाः विभागाः सन्ति। प्रश्नत्रये चाऽष्टपटलानि खण्डानि च त्रयोविंशतिः सन्ति। अत्र संस्कारविधेः प्रत्येकस्य विधानस्य मन्त्रनिर्देशः कृतो वर्त्तते।

(१०) **हिरण्यकेशिगृह्यसूत्रम्।**(६००-३०० ख्रिस्ताब्दपूर्वम्) कृष्णयजुर्वेदीयं गृह्यसूत्रमिदं सत्याषाढगृह्यसूत्रमिति नाम्नाऽपि प्रसिद्धम्। इदं गृह्यसूत्रं हिरण्यकेशिकल्पसूत्रस्यैकोनविंशतितमो विंशतितमश्च प्रश्नद्वयरूपं वर्त्तते। अत्र गृह्यकर्मानुष्ठानस्याऽनल्पाः मन्त्राः पठ्यन्ते। अत्र भाषाविषयकाणामनेके वैदिकप्रयोगाः दृश्यन्तेऽतः प्राचीनमिदं प्रतिभाति।

(११) **वैखानसगृह्यसूत्रम्।**(२००-५०० ख्रिस्ताब्दपूर्वम्) कृष्णयजुर्वेदीयं गृह्यसूत्रमिदं नाऽतिप्राचीनम्। अत्र विविधेष्वनुष्ठानेषु प्रयोगार्हाणां मन्त्राणां प्रतीकरूपेण सङ्कलनं प्राप्यते। तस्य च प्रतीकरूपेण सङ्कलितस्य मन्त्रपाठस्य पूर्णमन्त्ररूपेण पाठो वैखानसीयमन्त्रसंहितेति नाम्ना प्रसिद्धम्।

(१२) **अग्निवेश्यगृह्यसूत्रम्।** कृष्णयजुर्वेदीयं गृह्यसूत्रमिदमग्निवेशाचार्येण विरचितमिति मन्यते। अत्र कृष्णयजुर्वेदीयतैत्तिरीयशाखान्तर्गतबाधूलशाखाया अग्निवेशाख्योपशाखायाः गृह्यादिसंस्कारविधि-विधानानां विवरणं प्रस्तुतम्। अत्र वर्णिता नारायणबलि यतिसंस्कार सन्यासविधि वानप्रस्थविध्यादयो विषया अस्य ग्रन्थस्यार्वाचीनतां प्रमाणयति।

(१३) **वाराहगृह्यसूत्रम्।** कृष्णयजुर्वेदीयं गृह्यसूत्रमिदं मैत्रायणिशाखान्तर्गतवाराहोपशाखाया विधि-विधानानि प्रस्तौति। अत्र मैत्रायणिसंहितामन्त्राणां समावेशो दृश्यते। विषयदृष्ट्या चेदं मानवधर्मसूत्रं काठकगृह्यसूत्रं चाऽनुसरति।

(१४) **काठकगृह्यसूत्रम्।** कृष्णयजुर्वेदीयं गृह्यसूत्रमिदं काठकमुनिना कठमुनिना वा विरचितमिति मन्यते। अस्यैवापरनाम लौगाक्षिगृह्यसूत्रमित्यपि प्राप्यते। अस्य ७३ कण्डिकानां पञ्चाध्यायेषु विभाजितत्वादस्य पञ्चाध्यायीति गृह्यपञ्चकेति वा नामान्तरे प्राप्येते।

(१५) **कौथुमशाखीयगोभिलगृह्यसूत्रम्।** सामवेदीयं गृह्यसूत्रमिदं नामत एव ज्ञायते यदिदं कौथुमशाखाया संस्कारविषयकाणि विधिविधानानि विवृणोति। इदं नैकैहि प्रकाशकैः प्रकाशितमत एवाऽस्य प्रसिद्धिं द्योतयति। सामवेदिनां लोकप्रियमिदं गृह्यसूत्रम्। अस्य चतुषु प्रपाठकेषु नैकानि खण्डानि सन्ति यत्र अनुष्ठानानां सामान्यविधिर्यशस्कामकर्माणि पुरुषाधिपत्यकर्माणि पिण्डपितृयज्ञः (= अनत्येष्टिः) चेत्यादि विषया वर्णिताः सन्ति। अत्र च साममन्त्राणां प्रतीकरूपेण समावेशो दृश्यते।

(१६) **खादिरगृह्यसूत्रम्।** सामवेदीयं गृह्यसूत्रमिदं राणायनीयशाखाया गृह्यविधिविधानानि प्रस्तौति। अस्य च विषयो गोभिलसूत्रावलम्बनयुक्तो मन्यते।

(१७) **जैमिनीयगृह्यसूत्रम्।** सामवेदीयं गृह्यसूत्रमिदं खण्डद्वयात्मकं वर्त्तते। अस्य प्रथमखण्डे २४ कण्डिकाः द्वितीयखण्डे च ०९ कण्डिकाः प्राप्यन्ते। अयं ग्रन्थोऽपूर्णो प्रतिभाति यतोऽत्र प्रसिद्धपुरुषसूक्तस्याऽपि सप्तमन्त्रा एव प्राप्यन्ते।

(१८) **कौथुमगृह्यसूत्रम्।** सामवेदीयं गृह्यसूत्रमिदं प्रकाशितमपि[१३] पूर्णग्रन्थरूपेण न प्राप्यते।

(१९) **कौशिकसूत्रम्।** अथर्ववेदीयं गृह्यसूत्रमिदं चतुर्दशाध्यायात्मकम्। अत्र विविधसंस्कारविषयकाणि विधिविधानानि तादृशं महत्वं न धारयन्ति यतोऽत्र वैद्यकीयौषधोपचार विषयकाः विधयो भिन्नभिन्नैन्द्र जालिकविद्याविषयककर्माणि च प्रचुरतया सन्ति। तान्त्रिकदृष्ट्याऽस्य महत्वमनुपमं विद्यते।

उपरिनिर्दिष्टानामेकोनविंशतिगृह्यसूत्रग्रन्थानां स्वल्प परिचयेन ज्ञायते यद् आश्वलायनगृह्यसूत्रं शाङ्खायनगृह्यसूत्रं पारस्करगृह्यसूत्रं बौधायनगृह्यसूत्रं आपस्तम्बगृह्यसूत्रं हिरण्यकेशिगृह्यसूत्रं च कालदृष्ट्या प्राचीनानि कौशितकिगृह्यसूत्रमपरनाम शाम्भव्यगृह्यसूत्रं शौनकगृह्यसूत्रं बैजवापगृह्यसूत्रं भारद्वाजगृह्यसूत्रं वैखानसगृह्यसूत्रं अग्निवेश्यगृह्यसूत्रं वाराहगृह्यसूत्रं काठकगृह्यसूत्रं कौथुमशाखीयगोभिलगृह्यसूत्रं खादिरगृह्यसूत्रं जैमिनीयगृह्यसूत्रं कौथुमगृह्यसूत्रं कौशिकसूत्रं चावान्तरकालीनानि सन्ति। कृष्णयजुर्वेदीयतैत्तिरीयशाखाया वैखानसगृह्यसूत्रं सामवेदीयं च कौथुमशाखीयगोभिलगृह्यसूत्रं वस्तुतो गृह्यसूत्रसाहित्यस्य कक्षायां नावतरतो यतोऽत्र यज्ञादिविधीनां संस्कारविधीनां च विषयकान् मन्त्रान् प्रतीकरूपेण संगृहणीतः। अथर्ववेदीयं कौशिकसूत्रमपि स्वल्पांशेन गृह्यसूत्रग्रन्थोऽधिकांशेन तु औषधोपयोगीन्द्रजालविद्युपयोगी च लक्ष्यते। अतः ऋग्वेदिना-माश्वलायनगृह्यसूत्रं शुक्लयजुर्वेदिनां पारस्करगृह्यसूत्रं कृष्णयजुर्वेदिनां बौधायनापस्तम्बवैखानस- गृह्यसूत्राणि सामवेदिनां कौथुमशाखीयगोभिलगृह्यसूत्रमथर्ववेदिनां च कौशिकसूत्रमतिप्रचलितानि भान्ति तेषां च प्रचारः प्रसारश्च सर्वदा स्वीकृतौ दृश्येते। इति किं बहुना?

अष्टादशपुराणान्यपि वैदिकसंस्कृतेः प्रामाण्यं स्वीकृत्य वैदिकज्ञानस्य वैदिकविधिनां च दर्पणसमानि प्रतिभान्तिः। अत एव संस्कारभास्करे भविष्यपुराणं ब्रह्मपुराणं वायुपुराणं मत्स्यपुराणं स्कन्दपुराणं गरुडपुराणं नारदपुराणं वराहपुराणं मार्कण्डेयपुराणम् अग्निपुराणं विष्णुपुराणं भविष्योत्तरपुराणं विष्णुधर्मोत्तरपुराणं पुराणान्तरः तत्र निर्दिष्टान् विधिविषयान् संगृहणन्ति।

न केवलं वैदिकानि गृह्यसूत्राण्यपि तु पुराणानि समावेशयन्तः संस्कारभास्करकाराः यमस्मृतिः वसिष्ठस्मृतिः कात्यायनस्मृतिः शङ्खस्मृतिः आपस्तम्बस्मृतिः शातातपस्मृतिः गौतमस्मृतिः मनुस्मृतिः नारदस्मृतिः शौनकस्मृतिः स्मृतिसङ्ग्रहः स्मृतिरत्नावली हेमाद्रिः सिद्धान्तशेखरः कृष्णभट्टः कर्मप्रदीपः सूत्रकारो बौधायनः स्मृतिदर्पणः धर्मसिन्धुः पञ्चरात्रं शान्तिकमलाकरः आचारदर्शः प्रयोगचूडामणिः वृद्धमनुः रेणुकारिका शान्तिसारः कल्पवल्लि कुशकण्डिका लीलावतिगणितशास्त्रं परशुरामः व्याघ्रपादः योगियाज्ञवल्क्यः विश्वामित्रः बृहद् याज्ञवल्क्यः कर्मप्रदीपः महाभारतं बैजवापः गदाधरः बृहन्नारदीय/नारदपुराणं ज्योतिर्निबन्धः प्रतिष्ठाकल्पः मदनरत्नसङ्ग्रहः शान्तिरत्नं ग्रहरत्नावली एतेभ्यो ग्रन्थेभ्य आवश्यकसन्दर्भान् प्रस्थापयन्ति।

---

[१३] एशियाटिक सोसायटी (बङ्गाल)तः प्रकाशिता वृत्तिरेव प्राप्यते।

**उपसंहारः।**

वैदिककाले संस्काराणामुद्गमोजातस्तदनन्तरम् आश्वलायनादिगृह्यसूत्रेषु मन्वादिस्मृतिषु च क्रमेण विधिविस्तारो जातः। वैदिककाले कति संस्काराः प्रचलिता आसन्निति निर्णयोऽशक्यप्राय एव।

धर्मसिन्धुकाराणामस्मिन् प्रसङ्गोचितमुद्धरणमावश्यकम्। यतस्तैः सर्वसामान्यविधेः पूजाया वा समग्राण्यङ्गानि सुचारुतयाऽनुपमरीत्या प्रदर्शितानि। तानि यथा

सङ्कल्पः स्वस्तिवाग्विप्रवरणंभूतनिःसृतिः।
पञ्चगव्यैर्भूमिशुद्धिर्मुख्यदैवतपूजनम्।।

अग्निप्रतिष्ठासूर्यादि ग्रहस्थापनपूजनम्।
देवतान्वाहितिःपात्रासादनं हविषांकृतिः।।

यथाक्रमं त्यागहोमा वितिपूर्वाङ्गकःक्रमः।
पूजास्विष्टं नवाहुत्यो बलिःपूर्णाहुतिस्तथा।।

पूर्णपात्र विमोकाद्यग्न्यर्चनान्तेऽभिषेचनम्।
मानस्तोकेति भूतिश्च देवपूजा विसर्जने।।

श्रेयोग्रहोदक्षिणादि दानं कर्मेश्वरार्पणम्।
क्रमोयमुत्तराङ्गानां प्रायःस्मार्तेष्विति स्थितिः।।

(०१)सङ्कल्पः (०२) स्वस्तिवाचनम् (०३) विप्रवरणम् (०४) पञ्चगव्यकरणम् (०५) भूमिशुद्धिः (०६) मुख्यदेवतापूजनम् (०७) अग्निप्रतिष्ठापनम् (०८) सूर्यादिग्रहस्थापन-पूजनम् (०९) देवतावाहनम् (१०) अन्वाधानम् (११) पात्रासादनम् (१२) कुशकण्डिका (१३) आघाराज्याहुतिः (१४) वराहुतिः (१५) द्रव्यत्यागः (१६) प्रधानहोमश्चेति पूर्वाङ्ग- विधिक्रमः। तदनन्तरं (१७) उत्तरपूजनम् (१८) स्विष्टकृद्धोमः (१९) नवाहुतिः (२०) बलिदानम् (२१) पूर्णाहुतिहोमः (२२) पूर्णपात्रदानम् (२३) प्रणीताविमोकः (२४) अग्नि-पूजनम् (२५) अभिषेकः (२६) विसर्जनम् (२७) श्रेयोग्रहणम् (२८) दक्षिणादिदानम् (२९) कर्मेश्वरार्पणमित्युत्तराङ्गविधिक्रमः।

एतत्संशोधनस्योपादेयता यदत्रोपरिनिर्दिष्टानां पूर्वाङ्गोत्तराङ्गयोरेकोनत्रिंशतिविधीनां समग्राङ्गतया प्रस्तुतिः तृतीयायां चतुर्थ्यां पञ्चम्यां च संस्कृतिषु कृता। तत्र च संस्कारभास्करस्य भिन्नमतानां प्रादेशिकगतानां विधीनां चर्चा अपि कृताः।

(०१) प्राय:सर्वेषु राज्येषु राज्यन्तर्गत नगरग्रामादिषु यज्ञयागादीनां होमवास्तुपूजादीनां संस्कारविधीनां च क्रियाकलापस्य क्रमो व्यवस्थितरूपेण न प्राप्यते। अत एव पाठशालासु अध्येतृणाम् अध्यापाकानां अध्येष्यमाणानां च यक्षप्रश्न इव महतीनां समस्यानाम् उद्भवो जायते। दुर्गाशङ्कर–उमाशङ्कर–ठाकरमहोदयै: रचिते बृहद्ब्रह्मनित्यकर्मसमुच्चयेऽष्टविभागेषु षष्ठो विभागो ग्रहशान्तिसहितषोडशसंस्काराणां दिशासूचनरूपां प्रस्तुतिं करोति। तत्र स पूर्वेषामाचार्याणां मतं रीतिं शैलीं चाऽनोसृत्य विधिविधानम् अधोलिखितप्रकारेण ददाति।

अथ गर्भाधानसंस्कारप्रयोग:। अथर्तुमति स्त्री नूतन वस्त्रादिकं परिधाय शुभासने **प्राङ्मुखमुपविशेत्**। तत: पतिपुत्रवतीभि: कुलवृद्धसुमङ्गलस्त्रीभिर्गोधूमैर्नारिकेलादिनानाफलैस्तत्प–ल्लवैश्च प्रवेशनं यथावृद्धाचारं कारयेत्। शान्त्यभावे पत्न्या सह कर्ता प्रातरभ्यङ्गस्नानं कृत्वा तथा सहोपविश्याचम्यप्राणानायम्य देशकालौ सङ्कीर्त्य अस्या मम भार्याया: प्रथमगर्भातिशयद्वारा अस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणार्थं गर्भाधानसंस्काराख्यं कर्माहं करिष्ये। इति सङ्कल्पयेत्। पुनर्जलमादाय। तत्राद्य निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं च करिष्ये। **तानि कृत्वा**। कर्तु: क्षपाकर्मणो मन्त्राभिज्ञाने सति सूर्यमवलोक्य कर्माङ्गब्राह्मणान् सम्भोज्य विप्राशिषो गृहीत्वा मातृगणं विसृज्य क्षपायामभिगमनादिकं कुर्यात्। मन्त्राणामभिज्ञाने **तु**। सूर्यावलोकनोत्तरं **दिदैव मन्त्रजपमात्रं** नाभिदेशाभिमर्शनादि हृदयालम्भनान्तं गर्भाधानाख्यं कर्म कृत्वा तदङ्गतया ब्राह्मणान् सम्भोज्य तेभ्यश्च दक्षिणां दत्वा तेषामाशिषो गृहीत्वा मातृगणं विसर्जयेदिति . . . ।

उपरिनिर्दिष्ट वर्णननैवं संस्तुत्याऽत्र महानिबन्धे प्रस्तुतम्।

गर्भाधानसंस्कारप्रयोग:।। १४।। अथर्तुमती स्त्री नूतन वस्त्रादिकं परिधाय शुभासने प्राङ्मुखी समुपविशेत्। तत: पतिपुत्रवतीभि: कुलवृद्धसुमङ्गलस्त्रीभिर्गोधूमैर्नारिकेलादिनानाफलैस्तत्पल्लवैश्च प्रवेशनं यथावृद्धाचारं कारयेत्। शान्त्यभावे पत्न्या सह कर्ता प्रातरभ्यङ्गस्नानं कृत्वा तथा सहोपविश्याचम्यप्राणानायम्य सङ्कल्पं च कुर्यात्। १४/०१. अथ सङ्कल्प:। हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्या मम भार्याया: प्रथमगर्भातिशयद्वारा अस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणार्थं गर्भाधानसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। पुनर्जलमादाय। तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघण्टार्चनं दीपपूजनं सूर्यपूजनं आसनादिविधिं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

एवं प्रत्येकस्य संस्कारस्य विध्यङ्गानां प्रत्यङ्गं भिन्नशीर्षकपुर:सरं लिखितं वर्त्तते। एतत्सर्वं तृतीयाचतुर्थीपञ्चमीषु द्रष्टव्यम्।

अत: परमावश्यकत्वेन करणीया विधय: तृतीयसंस्कृते: सर्वसंस्कारसामान्यविधि(०१)– प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९) च कर्तव्यानि।

गणपतिपूजने (०२) गणपत्यथर्वशीर्षम् (०२/०१)। पुण्याहवाचनप्रयोगे (०३) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वाद: (०३/०५), पात्रे उदकसेक: (०३/०६), अभिषेक: (०३/०७) च। मातृकापूजने (०४)[१४] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्प: (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०)। आयुष्यमन्त्रजप: (०५)। नान्दीश्राद्धप्रयोगे (०६) पाद्यदानम् (०६/०१), सङ्कल्प: (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११) च कर्तव्यानि।

कर्तु: क्षपाकर्मणो मन्त्राभिज्ञाने सति सूर्यमवलोक्य क्षपायामभिगमनादिकं कुर्यात्। मन्त्राणामभिज्ञाने तु सूर्यावलोकनोत्तरम्।

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर।
दिवाकर नमस्तुभ्यं प्रभाकर नमोस्तुते।।

इति मन्त्रजपमात्रं नाभिदेशाभिमर्षनादि हृदयालम्भनान्तं गर्भाधानाख्यं कर्म कृत्वा तदङ्गतया ब्राह्मणान् सम्भोज्य तेभ्यश्च दक्षिणां दत्वा तेषामाशिषो गृहीत्वा मातृगणं विसर्जयेदिति।

अत्रेदमिदमवश्यं वक्तव्यं यत् तत्र प्रदत्ता: पादटिप्पण्यो यथातथमेव स्वीकृता:।
(०२) प्राय: सर्वेषु पुस्तकेष्ववान्तरसङ्कलनेषु क्वचिद् देशकालौ सङ्कीर्त्य क्वचिच्च देशकाल कीर्तनान्ते इत्येवं पठ्यते। तत्र देशकालौ सङ्कीर्त्येति पाठ एवाऽत्र स्वीकृत:।

(०३) अस्मिन् शोधनिबन्धे प्रत्येकसंस्कारवर्णनस्य प्रारम्भे तदुचिता प्रास्ताविकी प्रदत्ता यत्र तत्तत्संस्कारस्य विधिवर्णनं प्रस्तुतं वर्तते। तदनन्तरं सङ्कल्पादिविषया: प्रस्तुता:।

(०४) प्राय: संस्कारविषयकेषु प्रकाशितेषु ग्रन्थेषु सङ्कल्पादि विधौ **कुमारस्य** इति पठ्यते। किन्तु आधुनिके काले पुत्रीणां महत्वमतीव स्वीक्रियतेऽतो महानिबन्धेऽस्मिन् कुमारस्येत्यनन्तरं कन्यायावेत्यधिकं गृहीतम्।

---

[१४] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका–(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१–०६) न गृह्यन्ते।

पण्डित माधावाचार्य शास्त्रीण: 'क्यों' इति हिन्दीभाषायां लिखितस्य पुस्तकस्य पूर्वाधानुसारेण गर्भाधानसंस्कारकरणाद् बीजस्य गर्भसम्बद्धमालीन्यं दूरी भवति। अथ च क्षेत्ररूप स्त्रीय: संस्कारोऽपि भवति। गर्भात् पुत्रस्यैवोत्पत्तिर्भवेदिति हेतो: पुंसवनसंस्कार: क्रियते। गर्भस्य शुद्धी रक्षणं च सीमन्तोन्नयनसंस्कारेण भवत:। जातकर्मसंस्कारेण मातु: पूर्वकृतखाद्यपेयसम्बद्धा: सर्वेदोषा: अपाक्रियन्ते। जातस्य बालस्य आयुष्यतेजोभिवृद्ध्यर्थं लोकव्यवहारे च तस्य नाम प्रसिद्ध्यर्थं नामकरणसंस्कार: क्रियते। अत एव स लोकव्यवहारे स्वप्राधान्यं प्रस्थापयति। निष्क्रमणसंस्कारेण शिशोरुपरि सूर्यमन्त्रै: अर्चनेन दर्शनेन च भगवत: सूर्यनारायणस्य पवित्रकिरणै: तस्याऽऽयुष्यं लक्ष्मीवृद्धिश्च भवत:। गर्भस्थसमये मलमूत्रभक्षणेन ये दोषा: सम्भवन्ति तेषामन्नप्राशनसंस्कारेण शुद्धिकरणं भवति। चूडाकरण संस्कारेणाऽऽयु: ब्रह्मतेजश्च वर्धते। उपनयनसंस्कारेण बालको द्विजो भवति वेदाध्ययनस्याऽधिकारं प्राप्नोति। अनन्तरं केशान्तसमावर्तनसंस्कारानन्तरं विवाहसंस्कारेण सपत्निकाग्निहोत्राद्यनुष्ठानद्वारा स्वर्गप्राप्तिर्भवति। एवं ब्राह्मविधिना विवाहेन कुले उत्तमसन्तानस्योत्पत्या स्वमातु: पितु: पूर्वजानां च सेवा भवति। पञ्चत्वगतानां पितृणां कृते श्राद्धतर्पणादि क्रियाभि: स बालकस्तानुद्धरते। एतत्सर्वं विवाहसंस्कारस्य फलमेव कथ्यते ब्रह्मचर्यस्य अनुष्ठानद्वारा भगवत: मनो: मतानुसारेण मोक्षप्राप्तिर्भवति।

एतेषां संस्काराणां महत्वं यदाऽऽधुनिककालस्य जना अवबुद्धेययुस्तदैव सुसंस्कृतस्य पवित्रस्य सुदृढसमाजस्य निर्माणं भवेदेव येन आधुनिक जना: वैदिकपरम्पराया: परिचयस्य लाभानां च ज्ञानेन पाश्चात्य संस्कृते: प्रभावरक्षणार्थं समाजे श्रेष्ठमनुष्यरूपेण जीवनस्यानन्दं प्राप्य परमेश्वरप्रदत्त- मनुष्यजन्म सार्थकं कर्तुमर्हति।

अनेन प्रकारेण संस्कारशब्दस्य एवं संस्कारविधे: चर्चयेदं स्पष्टं भवति यत् देहशुद्ध्यर्थं चित्तशुद्ध्यर्थमतिपावित्र्यार्थं जीवात्मनश्च योग्यतार्थं मनुष्यजीवने संस्काराणां अतीवावश्यकता वर्त्तते। संस्काराणां विधिषूच्चार्यमाणानां वैदिकमन्त्राणां प्रभाव: पितृभ्यां द्वारा तस्य बालकस्य जीवोपरि प्रभवति तस्य लाभश्चानुजै: प्राप्यते। अत एवैते सर्वे संस्कारा: मनुष्यजीवनमूल्यानां रक्षणं कर्तुमर्हन्ति। मनुस्मृत्यनुसारेण-

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुत:।
स गच्छत्युत्तमस्थानं न चेहाजायते पुन:।। २/२४९।।

द्वितीया संस्कृतिः।

ऋषिभट्टः – व्यक्तित्वं कर्तृत्वं च।

पृष्ठानि १८ – ६२।

## द्वितीया संस्कृतिः।
## ऋषिभट्टः - व्यक्तित्वं कर्तृत्वं च।

महामहोपाध्यायाः पाण्डुरङ्गवामनकाणेमहोदयाः प्रथम द्वितीय परिशिष्टान्तर्गतोल्लेखेषु ऋषिभट्टस्याऽपरनाम ऋषिबुधः इति शौच(शौचे) वा।[१५]

कविप्रजनशास्त्रप्रश्रयसंस्कारसंस्करणकुशलो धर्मशास्त्र निपुणाग्रगण्यः प्रमाणीकृतार्षग्रन्थगणः जनकतनयास्नानपुण्योदकाया गोदावर्या दक्षिणे तीरे नासिकेतिप्रसिद्धे सिद्धक्षेत्रे ब्राह्मणज्ञातीय ऋषिभट्टाऽपर नाम ऋषिभट्टी निवसतिस्म। तस्यैतस्य नासिकनगरनिवासित्वात् सङ्कल्पविधावासन- विधिंदिग्रक्षणं च न निर्दिष्टे। यतः नासिकनगरं तीर्थक्षेत्रं तत्र च दिग्रक्षणस्याऽऽवश्यकता नैव। तेन शुक्लयजुर्वेदान्तर्गतवाजसनेयिमाध्यन्दिनशाखाध्यायिनां संस्काराणां सुलभतया लाभायायं संस्कार-भास्करो नाम ग्रन्थः १७५६तमे वैक्रमाब्दे १६९९तमे ख्रिस्ताब्दे १६२१तमे शकाब्दे पूर्णतां नीतः।

### विषयग्रथनम्।

लक्ष्मीवेङ्कटेश्वरस्टीममुद्रणालयात् १९८३तमे वैक्रमाब्दे १९२६तमे ख्रिस्ताब्दे १८४८तमे च शकाब्दे प्रकाशितः संस्कारभास्करः पत्राकाररूपोऽस्ति। तत्र पत्राणि २९१ सङ्ख्याकानि तेषां च द्वितयगुणितानां ५८२ सङ्ख्याकानि भवन्ति यत्र प्रतिपृष्ठं दशपङ्क्तयः सन्ति (यत्र प्रत्येक पङ्क्तौ प्रायः पञ्चत्रिंशद्वर्णाः)। एवं ६३६६ श्लोकप्रमाणको महाकायो ग्रन्थ ऋषिभट्टस्य याज्ञिकीकर्म- विधावमूल्य प्रदानरूपो भवति।

ग्रन्थारम्भे श्रीगणेशं श्रीसरस्वतीं श्रीगुरून् श्रीलक्ष्मीनारायणौ च प्रणम्य ग्रन्थलेखनमारभन्ते। अन्ते च

ग्रन्थाननेकानालोक्य यथामति मया कृतः।
याज्ञिकानां हितार्थाय श्रीरामचरणार्पितः।।
भूनेत्ररसभूशाके प्रमथानि शुभे मधौ।
ऋषिसंज्ञेन रचितः सर्वसंस्कारभास्करः।। पृ. २९१।।

इति स्वयमेव संस्कारभास्करस्यापरनाम सर्वसंस्कारभास्कर इति नामनिर्देशेन भू(१)नेत्र(२)-रस(६)भू(१)तमे (अङ्कानां वामतो गतिरिति समयात्) १६२१तमे शाके ग्रन्थरचना कृतेति लिखन्ति।

प्रकाशितस्य सर्वसंस्कारभास्करस्य निर्दिष्टविषया एवं सन्ति।

संस्कारसङ्ख्या ०१ पत्रे, द्विजाः, शूद्रसंस्काराः, कन्यासंस्काराः, संस्काराणां फलानि च ०२ पत्रे, विशेषकर्माणि, परिभाषा, सङ्कल्पेनविनाकर्मकरणेदोषः, सङ्कल्पप्रकारः, स्वशाखोक्तकर्माकरणेदोषः, अन्यथाकर्मकरणेदोषः, प्रधानकर्माकरणेतदङ्गकरणे च प्रायश्चित्तम्, धौतवस्त्रधारणम्, वाग्यम-लोपेप्राय०,

[१५] हिस्ट्री ऑफ धर्मशास्त्र। ०१/०२। पृ० ११३४।

आहतवस्त्रलक्षणं च ०३ पत्रे, कम्बलपट्टवस्त्रेचनीलिराग:शस्त:, उदकोपस्पर्शकारणानि, अनुक्ताङ्गेअङ्गम्, अदिङ्नियमे, आसीनाद्यवनियमे, ग्रह्मविष्टरनिर्णय:, पवित्रप्रमाणम्, पवित्रे-दर्भसङ्ख्या, दर्भकुशलक्षणं च ०४ पत्रे, अयातयामानि, निर्माल्यकुशा:, पवित्रधारणस्थानं लक्षणंच, स्वर्णपवित्रप्रमाणम्, पवित्राभावेदर्भा:, उपवीतिनाबद्धशिखेन च विनाकर्मकरणेदोष:, यज्ञोपवीत-निवीतिप्रचीनावीतिलक्षणम्, मङ्गलेतिलकनिश्चय:, आहुतिकाल:, वह्निजायालक्षणं च ०५ पत्रे, यज्ञियवृक्षा:, समित्प्रमाणम्, ग्रह्याग्राह्यविचारश्च, शूद्रानीतसमिदादीनांदोष:, देवपितृ-कर्मकण्डनादीनि, असमिद्धाग्नौहोमेदोष:, अग्निधमनविचार:, सामान्यग्रहहोमाहुतिप्रमाणम्, स्वगृह्योक्तकर्मनिश्चय:, अन्यथाकर्मकरणेविचारश्च ०६ पत्रे।

उक्तवस्त्वभावेअन्यग्रहणविचार:, मूलमन्त्रोच्चारप्रकार:, दध्याद्यलाभेप्रतिनिधि:, प्रजापत्यादि-तीर्थनिर्णय:, आहुतिद्रव्यग्रहणमानम्, स्रुवेणहवनद्रव्याणि, द्रव्यभेदेनआहुतिमानं च ०७ पत्रे, एकाहुत्याङ्कुशदूर्वासं०, मृगीमुद्रालक्षणम्, ऋषिच्छन्दोऽज्ञानेदोष:, पञ्चरत्नानि, माङ्गल्याभरणानि, पञ्च-गव्यम् ०८ पत्रे, मधुरत्रयम्, पञ्चामृतानि, पञ्चभङ्गा:, यक्षकर्दम:, सर्वगन्धा:, सर्वौषधय:, अर्घद्रव्याणि, सप्तधातव:, पञ्चरङ्गा:, दशाङ्गधूप:, धातुमयकलशाश्च ०९ पत्रे, कलशसप्रमाणम्, कलशेपूर्णपात्रम्, सप्तधान्यानि, सप्तमृद:, द्रव्यमानम्, ताम्रस्योन्मानम्, धान्यमानं च १० पत्रे, स्मार्तकर्मक्रम:, दशप्रणवा:, कर्मविशेषेअग्निनामानि च ११ पत्रे, कर्माङ्गस्वस्तिवाचनदेवता:, कर्मादौ-
प्रणवोच्चारणं, इक्ष्वादिभक्षणेकर्माधिकार:, स्नानोत्तरंकर्मादिकारश्च १२ पत्रे, मुख्यस्नानम्, सन्ध्या-वन्दनंविनाअशुचि:, सर्वकर्मसुयोग्यताकर्माणि, कर्माङ्गस्नानेविशेष:, मङ्गलस्नानम्, आर्द्रशुष्कवासो-निर्णय:, सप्तवाताहतवस्त्रंशुष्कं, दग्धजीर्णादिवस्त्रपरिधानेनिषेध:, वर्ज्यवस्त्राणि, धौतवस्त्रप्रसार निर्णयश्च १३ पत्रे।

अन्यद्वास:, धौतवस्त्राभावेवस्त्राणि, नीलरक्तवस्त्रनिषेध:, एकवस्त्रपरिधानेनिषेध:, एकवस्त्र-निर्णय:, कच्छत्रयनिर्णय:, धर्मकार्येवर्ज्यवस्त्रम्, आसुरीकक्षानिषेध:, यज्ञोपवीतधारणसङ्ख्या, शिखा-बन्धननिर्णयश्च १४ पत्रे, विशिखनिर्णय:, कर्मकालेनिन्द्यशब्दा:, उपांशुलक्षणम्, स्पष्टतरवर्णोच्चार:, षोडशोपचारा:, पञ्चोपचारा:, राजोपचारा:, धनिकादीनांदक्षिणादानेयत्ता, धनिकादिलक्षणं च १५ पत्रे, धनिकादीनांमध्येकेनकियद्देयमित्यस्यनिर्णयश्च, मुख्यकल्पशक्तौअनुकल्पेनकर्मकरणेदोष:, दक्षिणा-प्रतिनिधि:, रजतमुद्रादक्षिणादाननिषेध:, सर्वकर्मसुब्राह्मणभोजनसङ्ख्या च १६ पत्रे, सफलानिकर्माणि, सप्तगोत्राणि, एकोत्तरशतकुलानि, इति परिभाषाप्रकरणम्, अग्निचक्रंविनाकर्माणि, नारदोक्तरजोदर्शन-शान्तिक्रमश्च १७-१८ पत्रयो:, शान्तिप्रयोगानुक्रम: १९ पत्रे, मङ्गलस्नानविधि:, वस्त्रपरिधानादिश्च २० पत्रे, शान्तिपाठमन्त्रा: २१पत्रे, कर्मारम्भेगणेशादिस्मरणम् २२ पत्रे।

प्रधानसङ्कल्प: २३ पत्रे, कलशादिपूजनम् २४ पत्रे, गणपतिपूजनम् २५-३० पत्रेषु, स्वस्ति-पुण्याहवाचनम्, पुण्याहवाचनाङ्गवरुणपूजनं च ३१-३३ पत्रेषु, अथपुण्याहवाचनम् ३४-३९ पत्रेषु, अथाभिषेक: ४० पत्रे, नीराजननम् ४१ पत्रे, मातृकास्थापनक्रम:, मातृकापूजनं च ४२-४४ पत्रेषु, गृहमध्येअविघ्नकलशमातृशूर्पस्थापनम् ४५ पत्रे, वसोर्धाराकरणम्, आयुष्यमन्त्रजप:, मण्डपेसंस्कारा:, मण्डपंविनामातृकापूजनाभाव:, नान्दीश्राद्धकालश्च ४६ पत्रे, नान्दीश्राद्धमध्येद्वितीयनान्दीश्राद्धनिषेध:, अथजीवत्पितृकेवृद्धिश्राद्धनिषेधश्च ४७-४८ पत्रयो:, अथसाङ्कल्पिकविधिनानान्दीश्राद्धप्रयोग: ४९-५० पत्रयो:, ब्रह्मचार्यऋत्विग्वरणानि ५१-५२ पत्रयो:, आचार्यदीनांप्रार्थना ५३ पत्रे, दिग्रक्षणम् ५४ पत्रे,

पञ्चगव्यकरणम्, भूमिपूजनं च ५५-५६ पत्रयोः, पञ्चभूसंस्कारकरणम्, अग्निस्थापनं च ५७ पत्रे, ऋतुशान्तिविशेषः, मूर्तीनामग्न्युत्तारणं च ५८ पत्रे, प्राणप्रतिष्ठा ५९ पत्रे।

सूर्याद्यावाहनम्, इन्द्रावाहनम्, इन्द्राण्यावाहनम्, भुवनेश्वर्यावाहनम्, सूर्यादिदेवतापूजनम्, सूर्यप्रार्थनाक्षमापणं च ६० पत्रे, इन्द्रप्रार्थनाक्षमापणं च, इन्द्राणीप्रार्थनाक्षमापणं च, भुवनेश्वरी-प्रार्थनाक्षमा०, स्वर्णकदलीस्थापनम्, सूर्यादीनांसूक्तजपः, ग्रहमण्डलदेवतास्थापनप्रकारः, ग्रहनामानि, ग्रहवर्णाश्च ६१ पत्रे, ग्रहप्रतिमानिर्माणधातवः, ग्रहप्रतिमानिर्माणकारः, ग्रहदेशाः, ग्रहगोत्राणि, ग्रहस्थानानि च ६२ पत्रे, ग्रहमण्डलव्यासः, ग्रहदिङ्मुखानि, यजमानाभिमुखे ग्रहाणांस्थापनम्, अधिदेवताप्रत्यधिदेवतास्थानानि, अधिदेवतानामानि, प्रत्यधिदेवतानामानि, गणेशदुर्गादीनांस्थानानि, इन्द्रादिदिक्पालानां स्थानानि च ६३ पत्रे, ग्रहाणांवस्त्राणि पुष्पाणि च, ग्रहाणांगन्धाः, ग्रहाणांधूपाः, ग्रहाणांनैवेद्यानि, हविर्द्रव्याणि, ग्रहाणांसमिधः, काण्डानुसमयः, पदार्थानुसमयः, गणेशायवराहुतिः, आघाराज्यभागाहुतिस०, त्रिविधग्रहमखाः, त्रिविधग्रहमखेषुग्रहाणामाहुतिसङ्ख्या, व्याहृतिहोमसङ्ख्या- पूरणा च ६४ पत्रे, अधिप्रत्यधिदेवताहुतिस०, पूर्णाहुतिमन्त्रक्रमः, पूर्णाहुत्याज्यसंस्कारः, पूर्णाहुति-होमस्रुवधारणा च ६५ पत्रे, ग्रहमण्डलेगणपतिदुर्गाक्षेत्रपालावाहनम्, ग्रहाणांस्थापनं च ६६-७१ पत्रेषु।

ग्रहपूजा, ग्रहाणांप्रार्थनामन्त्राश्च ७२ पत्रे, रुद्रकलशस्थापनम्, कुशकण्डिकाव्याख्या, वारुण-पात्रलक्षणं च ७३ पत्रे, चमसलक्षणम्, परिस्तरणलक्षणम्, आसादनीयपात्रमध्यतरम्, आज्यस्थाली-लक्षणम्, चरुस्थालीलक्षणम्, सम्मर्गकुशलक्षणम्, उपयमनकुशलक्षणम्, स्रुवलक्षणम्, पवित्रच्छेदन-लक्षणं च ७४ पत्रे, उत्पवनद्विङ्गनलक्षणम्, प्रोक्षणेकारणमाह, असञ्चरस्थानम्, तंदुलक्षालनप्रकारः, क्षालनप्रकारः, श्रपणलक्षणम्, पर्यग्निकरणंत्कारणं च, स्रुवसम्मार्जनप्रकारः, उद्वासनस्थानं च ७५ पत्रे, उत्पुनातिकरणमवेक्षणलक्षणं च, प्रदक्षिणपर्युक्षणकारणम्, आघाराज्याहुतिप्रकारः, उपांशुप्रकारः, अन्वारम्भप्रकारश्च ७६ पत्रे, स्रुवधारणप्रकारः, स्रुवहोमेएवत्यागः, अनेकस्रुवमाध्यहोमप्रकारः, अग्नि-पूजास्थानम्, स्विष्टकृदाहुतिनिर्णयः, अन्वाधाननिर्णयः, कुशकण्डिका च ७७-७९ पत्रेषु, आहुति-दानसमयः, मुख्यहविश्च ८० पत्रे, हवनारम्भआहुतिसङ्ख्या, मृडाग्नेरुत्तरपूजनंलक्षणं च ८१ पत्रे, भूराद्यानवाहुतयः, दिक्पालानांबलिदानं च ८२ पत्रे, गणेशदुर्गाक्षेत्रपालानांबलिदानम् ८३ पत्रे, ग्रहाणांबलिदानम् ८४ पत्रे, मातृणांबलिदानम् प्रधानदेवताबलिदानम्, क्षेत्रपालमहाबलि च ८५ पत्रे, दुब्राह्मणलक्षणम् ८६ पत्रे, पूर्णाहुतिहोमः, वसोर्धारामन्त्राश्च ८७-८८ पत्रयोः, वसोर्धाराब्राह्मणम् ८९-९० पत्रयोः, त्र्यायुषकरणम् ९१ पत्रे, श्रेयः सम्पादनम्, आचार्यपूजनम्, स्वर्णदानं च ९२ पत्रे, गोदानम्, भूमिदानम्, तिलपात्रदानम्, हेमकदलीदानम्, मूर्त्तिदानम्, अभिषेकमन्त्राश्च ९३-९५ पत्रेषु, अभिषेकेपौराणमन्त्राः, आज्यावलोकनं च ९६ पत्रे, ब्राह्मणभोजनसङ्कल्पः, आचार्यादीनांदक्षिणादानम्, देवताविसर्जनम्, अग्निविसर्जनम्, कर्मेश्वरार्पणं च ९७ पत्रे।

गर्भाधानसंस्कारनिर्णयः, प्रथमर्तौशिष्टाचारात्कर्त०, सर्वर्तसाधारणेविशेषः, रजस्वलाशुद्धिप्रकारः, गर्भाधानकालः, स्त्रीणांयौगपद्येनऋतौगमन च ९८ पत्रे, आगमनेदोषः, गर्भाधानाकरणेप्राय०, ऋतावनृतौचगमनेशुद्धिप्रकारश्च ९९ पत्रे, रजोदर्शनात्प्राक्स्त्रीगमनदोषः, गर्भाधानेमलमासादिनिर्णयः, गर्भाधाननिर्णयः, गर्भाधानप्रयोगानुक्र०, गर्भाधानप्रयोगश्च १००-१०१ पत्रयोः, गर्भाधारणमौषधं, पुंसवननिर्णयश्च १०२ पत्रे, पुंसवनप्रयोगः, गर्भिणीधर्माश्च १०३-१०४ पत्रयोः, गर्भिणीपतिधर्माः १०५-१०६ पत्रयोः, गर्भवृद्ध्युपायः, गर्भरक्षोपायः, गर्भस्त्रावहरोपायश्च १०७ पत्रे, सीमन्तोन्न- यननिर्णयः,

सीमन्तोन्नयनप्रयोगानु०, सीमन्तोन्नयनप्रयोगश्च १०८-१०९ पत्रयो:, औदुम्बरादि- पञ्चकबन्धनम् ११० पत्रे, गर्भाधानाद्यकरणेप्राय०, शीघ्रप्रसवोपायमन्त्र:, शीघ्रप्रसवार्थमन्त्रितंजलं च १११ पत्रे, कुयोगादिशान्तिप्राप्तौ स्नाननिर्णय:, जातकर्मसंस्कारनिर्णय:, जातकर्माङ्गनान्दीश्राद्धनि०, नालच्छेदनेकालावधि:, नालच्छेदनप्रकार:, जातकर्मक्रम:प्रयोगश्च ११२ पत्रे।

मेधाजननम्, आयुष्करणं च ११३ पत्रे, वात्सप्रमन्त्रा: ११४ पत्रे, कुमारमातु: स्तनाभिमन्त्रण-मन्त्रा:, कुमारायस्तनप्रदानमन्त्र:, उदकपूर्णकलशस्थापनमं० च ११५ पत्रे, अग्निस्तापनम्, हवन-मन्त्रा:, बालग्रह:कुमारमुपद्रवेत्तदामं० च ११६ पत्रे, ग्रहणजाताशौचमध्ये च जातकर्मकरणनिर्णय:, बालस्यदुष्टदृष्टिदोषेरक्षाविधि:, बालरोदनपरिहारार्थंयन्त्रं च ११७ पत्रे, अथषष्ठीपूजनकारिका०, षष्ठीपूजनप्रकारश्च ११८-१२० पत्रेषु, षष्ठीप्रार्थना १२१ पत्रे, सुतिकागृहेबलिदानमन्त्र:, द्वारमातृका, रात्रिवर्ग(शान्तिपाठ) मन्त्रक्रमश्च १२२ पत्रे, अथनामकरणसंस्कारनिर्णय: १२३ पत्रे, नामकरण- प्रयोग: १२४-१२५ पत्रयो:, उपांशुलक्षणम्, आयुष्यकरणमन्त्रा:, आन्दोलाहरणं च १२६ पत्रे, पय:पानम्, अथनिष्क्रमणसंस्कार:, कुमारायसूर्यदर्शनं च १२७ पत्रे, भूम्युपवेशनम्, अथान्नप्राशन- संस्कारश्च १२८-१२९ पत्रयो:, शौनकोक्तदत्तकप्रतिग्रहविधाननिर्णय:, दत्तकेविशेष:, कन्यादत्तक- ग्रहणेविशेषश्च १३० पत्रे, स्त्रीशूद्रयोस्तुविशेष:, पुत्रप्रतिग्रहप्रयोग:, कन्यावुषयेविशेषश्च १३१ पत्रे, पुत्रदानसङ्कल्प:, कन्यादानेसङ्कल्पश्च १३२ पत्रे, हवनविधि: १३३ पत्रे, अतिरिक्तसंस्कारेप्रायश्चित्तम् १३४ पत्रे, संक्षिप्तान्तरितसंस्कारप्रयोग: १३५ पत्रे।

अथान्तरितसंस्कारेअवश्यकर्त्तव्यानि, अथचूडाकरणसंस्कारनिर्णयश्च १३६ पत्रे, चूडाकरणक्रम: प्रयोगश्च १३७-१४० पत्रेषु, स्पृष्टास्पृष्टेशुद्धिप्रकार:, कर्णवेधश्च १४१ पत्रे, कर्णक्षालनप्रकार:, स्त्रीणांजातादिसंस्का, वर्धापननिर्णय:,वर्धापनप्रयोगश्च १४२-१४४ पत्रेषु, अथाक्षरलेखनारम्भनिर्णय: १४५ पत्रे, अक्षरारम्भप्रयोगानुक्रम:, अक्षरारम्भप्रयोगश्च १४६-१४७ पत्रयो:, अथोपनयनम्, उपनयनेकाल:, उपनयनशब्दार्थ:, ब्राह्मणादीनांवसन्तादिऋतुग्रहणनिर्णय:, ज्येष्ठमासनिर्णय:, जन्मनक्षत्रादिवर्ज्यनिर्ण०, ज्येष्ठमासापवाद:, जन्ममासादीनामपवादश्च १४८ पत्रे, उपनयनेतिथ्यादि, नैमित्तिकानध्यायोपिकालार्तस्यबटोर्ग्रहणविचार:, प्रायश्चित्तनिमित्तमेखलाबन्धनेविशेषनिर्णयश्च १४९ पत्रे, नष्टचन्द्रेअष्टमशुक्रेनिरंशेभास्करे च व्रतंशस्तं, निरंशस्वरूपम्, युगाद्यनध्यायानां प्रतिप्रसव:, त्रयोदश्यातिथिवर्ज्यत्वम्, तत्रापवादश्च, अनध्यायस्यपूर्वापरदिनवर्ज्य०, सोपपदानिषेधोयाजुषांनि०, सोपपदातिथय:, वारनिर्णयश्च १५० पत्रे।

शाखाधिबलाभावदोष:, वर्णाधिपतिस्तद्बलं च, सङ्कटेचन्द्रताराद्यभावेदानम्, गुरुबलालाभेनिर्णय:, दुष्टस्थानेदुरौशान्त्यादिनोपनयनाधिकारश्च १५१ पत्रे, अतिसंकटेवत्सरातिक्रमे च निर्णय:, राशिविशेष-स्थेगुरौअनिष्टस्थानस्थेपिनदोष:, रव्यादिग्रहाणामुच्चस्था०, अनिष्टगुरुरेकद्व्यर्चनाच्छुभ:, चतुर्थाष्ट-मादिगुरौनदोष:, उपनयनेनक्षत्राणि च १५२ पत्रे, वेदविशेषेनक्षत्रविशेषा:, उपनयनयोगाश्च १५३ पत्रे, उपनयनेकरणानि, उपनयनेदिनभागव्यवस्था, उपनयनेनिमित्तावशषेणनिषेध:, निषेधापवादा:, चन्द्र-सूर्यग्रहणेवर्ज्यदिनानि, अकालवृष्ट्यादौकार्याकार्यवि० च १५४ पत्रे, उपनयनोत्तरंसूतकप्राप्तौवि०, लग्नकालाश्च १५५ पत्रे, उपनयनाधिकारिण:, आचार्यादीनांकर्मनिर्णय:, अधिकारसिद्धये प्रायश्चित्तम्, मण्डपनिर्माणप्रकार:, वेदिनिर्माणप्रकारश्च १५६ पत्रे, घटीयन्त्रप्रकार: १५७ पत्रे, घटीगमन-दिक्फलानि०, अनिष्टदिग्गतघटीदोषपरिहारोपाय:, उपनयनसम्भारा:, अजिनप्रकारश्च १५८ पत्रे,

मेखलानिर्णयप्रकार: १५९ पत्रे, यज्ञोपवीतनिर्माणप्रकार:, दण्डप्रकारश्च १६० पत्रे, उपनयने-मात्रासहभोजननिर्णय:, मातृभोजनात्पूर्वंमातार रजस्वलायांनिर्णय:, उपनयनक्रमकारिका, सर्वसाधारणसंभार:, उपनयनप्रयोगश्च १६१ पत्रे।

उपनयनदिनेकृत्यम् १६२ पत्रे, प्रतिष्ठामन्त्रा: १६३-१६४ पत्रयो:, प्रतिष्ठाकर्म १६५-१६७ पत्रेषु, ब्रह्मचारिणेव्रतोपदेश:, गायत्र्युपदेशादिकर्म च १६८ पत्रे, समिदाधानम् १६९ पत्रे मुखविमार्जनम्, अङ्गालम्भनम्, अभिवादनं च १७० पत्रे, सन्ध्यावन्दनाधिकार:, भिक्षाचरणं च १७१ पत्रे, ब्रह्मचारियमनियमा:, अथाशीर्वादब्राह्मणमन्त्राश्च १७२-१७६ पत्रेषु, ब्रह्मचारिनित्योपासना १७७ पत्रे, यमलजातपुत्रयोरुपनयनप्रयोगेविशेष: १७८ पत्रे, अथकर्माधिकारदानम् १७९ पत्रे, अथयमल-जातककन्यकोद्वाहप्र०, विकलाङ्गाद्युपनयनप्रकारश्च १८० पत्रे, पुनरुपनयनकारणं तद्विधिश्च १८१-१८२ पत्रयो:, अथयजुर्वेदिनांप्रायश्चित्तैसहपुरुपनयनप्रयोग: १८३-१८४ पत्रयो:, अथब्रह्मचारि-व्रतलोपेप्रायश्चित्तम् १८५ पत्रे, वेदारम्भनिर्णय:, वेदारम्भयोगानुक्रमश्च १८६ पत्रे, वेदारम्भप्रयोग:, वेदारम्भाहुतयश्च १८७ पत्रे, वेदाधदययनारम्भ: १८८ पत्रे, अथकेशान्तसंस्कार: १८९-१९० पत्रयो:, अथसमावर्तनसंस्कार:, समावर्तनप्रयोगानुक्रम: प्रयोगश्च १९१-१९३ पत्रेषु, स्नानार्थ-मष्टोदकुम्भस्था०स्ना० १९४ पत्रे, आदित्योपस्थानमन्त्र:, दधिप्राशनादिकर्म, अथचन्दनवस्त्र-यज्ञोपवीतादिधारणमन्त्राश्च १९५-१९६ पत्रयो:, स्नातस्यनियमा: १९७ पत्रे, स्नातस्यअहोरात्र-त्रयव्रतचर्योच्यते १९८ पत्रे, अथक्रमप्राप्तोविवाह:, तत्रादौअनाश्रामिनिर्णय:प्रयश्चित्तं च १९९ पत्रे।

प्राजापत्याकृच्छ्रप्रकार: तत्प्रत्यामन्याश्च, अतिकृच्छ्रप्रकार:, तत्प्रत्याम्नाय, कृच्छ्रातिकृच्छ्रप्रकार-स्तत्प्र०, चान्द्रायणप्रकारस्तत्प्रत्याम्नाया०, प्रथमाब्देप्राजापत्यकृच्छ्रव्रतेसङ्कल्प:, द्वितीयाब्देअतिकृच्छ्र-व्रतेसङ्कल्पादि च २०० पत्रे, तृतीयाब्देकृच्छ्रातिकृच्छ्रव्रतेसं०, विवाहोपयोगिकन्यादिप्रकार०, कन्या-लक्षणपरिक्षा च २०१ पत्रे, कन्यादोषा:, अथवरगुणा:, अथवरदोषाश्च २०२ पत्रे, अथसापिण्ड्य-निर्णय:, अथदत्तकसापिण्ड्यनि० च २०३-२०४ पत्रयो:, अथगोत्रप्रवरनिर्णय: २०५ पत्रे, अथ-दत्तकस्यगोत्रादि, अथप्रत्युद्वाहादिनिषेध: २०६ पत्रे, अथसोदरकन्यापुत्रयोर्विवाहनिर्णय:, प्रवेशादेक-वर्षेनिर्गमनि० च २०७ पत्रे, एकवत्सरेसमानोदरकन्यया:वरयोश्चविवाहनिषेध:, तत्रविशेषश्च २०८ पत्रे, एकवासरेयमलजातविवाहनिषेध:, स्त्रीणामुपनयनस्थानेविवाहोक्तनिषेध:, एकवत्सरे कन्या-पुत्रयोर्विवाहोपनयननिर्णयश्च २०९ पत्रे, कन्यापुत्रयो:परिवेत्रीत्वपरिवेतृत्वनिर्णय:, प्रवेशनिर्गम- निर्णय:, नान्दीश्राद्धोत्तरनिषिद्धकर्मा० च २१० पत्रे, मुण्डनद्वयनिर्णय:, पुत्रोद्वाहात्कन्याविवाहनिर्णय:, अथोशोभनसन्निपातनिर्णयश्च २११ पत्रे।

मण्डनमुण्डनविचार:, चत्वारिमुण्डनानि च २१२ पत्रे, अथगुरुलघुमङ्गलानि० २१३ पत्रे, सीमन्ताद्यन्नप्राशनान्तसंस्कारेगुरुशुक्रास्ताधिमासादिनिर्णय:, परिवेत्रादिनिर्णय:प्राय० च २१४ पत्रे, अथाग्रेदिविषूपत्यादेर्विशेष:, परिवेदनदोषत्यापवादश् २१५ पत्रे, विवाहेआशौचप्राप्तौनिर्णय: २१६ पत्रे, मुहूर्तान्तरालाभेसामग्र्यांकृतायांसूतकिनोऽप्यधिकारोपा०, आरम्भोत्तरंसतकेप्राप्ते विशेष:, सङ्कल्पितान्नभोजननि०, अथविवाहेवधूवरजननीरजोदोषेनिर्णयश्च २१७ पत्रे, नान्दीश्राद्धोत्तररजोदर्शनो-त्पत्तौनिर्णय:, अथकन्यारजोदोषनि० च २१८ पत्रे, विवाहहोमकालेकन्याऋतुमतीचेत्तत्रनि०, अथप्रतिकूलनिर्णयश्च २१९ पत्रे, अथसङ्कटेप्रवृत्तिप्रकारमा०, प्रतिकूलेपिविवाहकर्तव्यानि०, सङ्कटे-विनायक शान्ति:, प्रतिकूलदोषेविनायकशान्तिश्च २२० पत्रे, वाङ्निश्चयोत्तरंसूतकप्राप्तौनिर्णय:,

त्रिपुरुषान्तर्गतेप्रतिकूलदोषनिर्णयः, अथचूडोपनयनोद्वाहनारम्भोत्तरञ्जननाशौचप्राप्तौ कूष्माण्डीहोम- प्रकारश्च २२१-२२२ पत्रयोः।

अथविवाहहोमकालेकन्यात्रऋतुमतीचेत्तत्रहोमप्रयोगः २२३ पत्रे, अथश्रीशान्तिप्रयोगः, अथ-विनायकशान्तिप्रयोगश्च २२४ पत्रे, अथविनायकशान्तिसं, विनायकशान्तिप्रयोगश्च २२५-२३२ पत्रेषु, अथकन्यावरयोर्गुर्वर्कबलनि० २३३ पत्रे, अथबृहस्पतिशान्तिः, बृहस्पतिशान्तिप्रयोगः, अथाष्टौविवाह-भेदाश्च २३४ पत्रे, कन्याविवाहकालः २३५ पत्रे, कन्यादानाधिकारिः २३६ पत्रे, विवाहदिना-त्प्राक्विवाहाङ्गकर्मनि०, अथब्राह्मविवाहाङ्गवाग्दानविधिश्च २३७-२३८ पत्रयोः, तैलहरिद्रारोपणं-गोधूमपूजनं च, विवाहादिनात्पूर्वदिनेकर्तव्यमुच्यते च २३९ पत्रे, घटीगमनदिक्फलानि, अथगौरीहर- पूजनं च २४० पत्रे, सीमन्तिकार्चनम् २४१ पत्रे, वरप्रस्थानकृत्यम् २४२, मधुपर्कक्रमकारिकाश्च २४२ पत्रे, अथमधुपर्कप्रयोगः २४३ पत्रे, अथगवालम्भनं तत्प्रयोगः २४५ पत्रे, अथवरायगन्धा- द्युपचारदानम्, विवाहवेद्युपरिअग्निस्थापन० २४६ पत्रे, वधूवरन्तराले अन्तःपटधारणंमङ्गल- सूक्तादिपठनं च, वर-कण्ठेपुष्पमालार्पणम्, वधूवरयोःप्रत्यक्प्राङ्मुखोपवेशनम्, प्रतिष्ठामन्त्राः, अथवरोवध्वैपरिधानार्थंवस्त्राद्यर्प० च २४७ पत्रे, माङ्गल्यतन्तुबन्धनं, अथसूत्रवेष्टनमन्त्राश्च २४८ पत्रे, कन्यादानसङ्कल्पः २४९-२५० पत्रयोः।

कन्यादानेगोदानादि, गोदानमन्त्रः, अङ्गुलीयकदानमन्त्रः, कुण्डलदानमन्त्रः, वलयदानमन्त्र, तामपात्रजलपात्रदानमन्त्रः, कांस्यपात्रदानमन्त्रः, रौप्यपात्रदानमन्त्रः, ताम्बूलदानमन्त्रः, दीपदानमन्त्रः वरायोपदेशश्च २५१ पत्रे, सुवर्णाभिषेकमन्त्रः २५२-२५४ पत्रेषु, वरप्रार्थनादि २५५ पत्रे, अथगणपतिपूजनंकङ्कणबन्धनादि २५६ पत्रे, दक्षिणतोब्रह्मासनादि उपकल्पनीयानि च २५७ पत्रे, आघारावाज्यभागौभूराद्यष्टाहुतयश्च, अथराष्ट्रभृद्धोमश्च २५८ पत्रे, अथजयाहोमः २५९ पत्रे, अथाभ्यातनहोमः २६० पत्रे, अथाग्निरित्यादिपञ्चकहोमः २६१ पत्रे, अथलाजाहोमः, वरेणवधू-हस्तग्रहणमन्त्रश्च २६२ पत्रे, अथाशमारोहणम्, अथगाथागानम्, अथाग्निपरिक्रमणादि च २६३ पत्रे, अथसप्तपदी, सप्ताचलपूजनम्, अथकन्याप्रतिज्ञामन्त्राश्च २६४ पत्रे, वधूमूर्धन्यभिषेकादिकर्म २६५-२६६ पत्रयोः, अथाशीर्वादमन्त्राः २६७ पत्रे। वधूवरयोर्मन्त्रपठनकारिकाः, अथविवाहेमन्त्राधि- कारिणः, अथविवाहहोमेआहुतित्यागादिकारिकाश्च २६८ पत्रे।

अभ्रातृककन्योद्वाहेनिर्णयः, अथग्रामवचनार्थः, विवाहादारभ्य त्रिरात्रवरनिय०, अथऐरणीप्रदानं च २६९ पत्रे, अथऐरणीपूजनम्, ऐरणीप्रार्थना, वरमात्रेऐरणीदानं च २७० पत्रे, वरगोत्रजादीनां- वस्त्रादिभिः पूजनंप्रार्थना च, ऐरणीवंशपात्रस्थवरगोत्रजादीनांशिरसिथारणं, कन्यानिवेदनम्, वसिष्ठारुन्धती-पूजनमर्घ्यदानंप्रार्थना च, वायनदानादि, वरहस्तेकन्यानिवेदनम्, अथवधूप्रवेशनिर्णयश्च २७१-२७२ पत्रयोः, वधूप्रवेशाङ्गगणपतिपूजनादि, अथप्रथमाब्देवधूनिवासः, अथचतुर्थीकर्मक्रमश्च २७३ पत्रे, चतुर्थीकर्मप्रयोगः २७४ पत्रे, अथदेवकोत्थापनमण्डपोद्वासननिर्णयः २७५ पत्रे, देवकोत्थापनप्रयोगः २७६ पत्रे, अथद्विरागमनम् २७७ पत्रे, विवाहेभार्ययासहभोजनं, देवकोत्थापन- पर्यन्तनिषिद्धकर्माणि, अथमातृविसर्जनानन्तरमब्दपर्यन्तंनिषेधमाहअत्रापवा०, कन्यागृहेभोजननिषेधश्च २७८ पत्रे, अथवरस्यमृतभार्यत्वपरिहारोपायकर्मक्रमः, अथप्रयोगश्च २७९ पत्रे, अथैकभार्याविद्यमान-त्वोद्वितीयविवाहेअधिवेदनीयकार०, अधिवेदनकालप्रतीक्षामाह, विवाहान्तरोविशेषमाह च २८० पत्रे,

अथस्त्रीनिधनेद्वितीयपरिणयकालमाह, अथकन्याविषयोत्पन्नचेद्वैधव्ययोगहरकुम्भविवाहनि०, अथकुम्भ-विवाहप्रयोगश्च २८१ पत्रे।

अथबालवैधव्यहरविष्णुमूर्तिदानम् २८२ पत्रे, अथार्कीविवाहनिर्णयः २८३-२८४ पत्रयोः, अत्रशौनकोक्तहोमप्रकारः २८५ पत्रे, अथार्कीविवाहप्रयोगः २८६ पत्रे, अथार्कीविवाहाङ्गहोमः २८७ पत्रे, अनादिष्टप्रायश्चित्तानि २८८ पत्रे, अनादिष्टप्रायश्चित्तप्रयोगः २८९ पत्रे।

अस्मिन् ग्रन्थे ऋषिभट्टेन शुभारंभ कुर्वतैवं लिखितं वर्तते।

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः। श्रीलक्ष्मीनारायणाभ्यां नमः। अथ संस्कारभास्करप्रारंभः।

तदनु ग्रन्थकारेण प्रथमं गणेशं तदनन्तरं शारदादिनवग्रहाँश्च नमस्कृत्य स्वकीयः परिचयः प्रदत्त। तद्यथा-

वात्सल्यात्पितरौकपोलयुगलं स्वस्यागतौ चुंबितुं
दृष्ट्वा कुंचितमास्यपद्ममलं सेषत्स्मितं सत्वरम्।
अन्योन्यं शिवयोस्ततःसुवदने युक्ते अभूतांतयो-
रित्थं येन विनोदितौसभगवान् बालोगजास्योऽवतु।। पृ. ०२।।

शिवपार्वतीतनयस्य बालगणेशस्य हास्यरसपूर्णां लीलां वर्णयन् ऋषिभट्टो लिखति। पितरौ पार्वतीपरमेश्वरौ स्वस्य बालगणेशस्य कपोलयुगलं वामकपोलंदक्षिणकपोलं च पितृसहजस्नेहाद् यदा चुंबितुं चुंबनं कतृमागतौ समागन्तौ तदा बालगणेशेन तयोः समीपमागमनं दृष्ट्वा विलोक्य स्वकीयममलं निर्दोषमास्यपद्मं मुखकमलं सत्वरं झटिति दूरीकृतं तदपि सेषत्स्मितं स्वल्पस्मितेन शोभितमासीत्। ततः किम्? तदनन्तरं तयोर्द्वयोः शिवयोः शिवाशिवयोः पार्वतीपरमेश्वरयोर्वा सुवदने शोभनमुखे युक्ते अतिसमीपे अभूतां। अत्यन्तं सामीप्यमभजतां चुंबनं च संजातमिति यावत्। इत्थमेवंप्रकारेण येन बालगणेशेन पितरौ लीलया विनोदितौ विनोदमानन्दं प्रापितौ स बालो गजास्यो गजाननो भगवान् श्रीगणेशोऽवतु। अस्मान् पाठकश्रोतृन् रक्षतु। सर्वप्रकारेभ्यो विघ्नेभ्योऽन्तरायेभ्यो वा त्रायतु।। ०१।।

श्रीगणेशंशारदां च लक्ष्मीनारायणंगुरुम्।
नवग्रहाँश्चदिक्पालान्नमस्कृत्य पुनःपुनः।। पृ. ०१।।

बालगणेशस्य रसिक क्रीडा वर्णनान्ते देवतानमस्कारान् कुर्वन् ऋषिभट्टो लिखति। श्रीगणेशं शारदां शरदवर्णां सरस्वतीं ततश्च गुरुं लक्ष्मीनारायणं ततश्च सूर्यादिनवग्रहान् इन्द्रादिदशदिक्पालां च पुनःपुनः नमस्कृत्य नमस्कारान् विधाय तृतीयं श्लोकं लिखति।। ०२।।

योभूच्छौचोपनामा बुधमुकुटमणिर्विश्वनाथः प्रसिद्ध-
स्तज्जोगंगाधराख्यः क्षितिसुरमहितः सर्ववेदार्थवेत्ता।

तत्पुत्रः साधुशीलः शतपथनिपुणो याज्ञिकैर्वंद्यमानः
पुण्यात्मा सर्वकाले जयतिऋषिबुधः शिष्यसङ्घार्चितांघ्रिः।। पृ. ०१।।

शौचोपनामा शौचे इत्यवटङ्कितः बुधानां पण्डितानां मुकुटभूताः ये तेषाम् अग्रणीः अग्रेसरः मूर्धन्यो वा विश्वनाथः इति नाम्ना प्रसिद्धः यः अभवत्। तज्जः तस्य विश्वनाथस्य पुत्रः गंङ्गाधर इति
नाम्ना अभवत् यः क्षितीनां पृथिवीनां सुराः देवाः भूसुराः भूदेवाः ब्राह्मणाः इति तेषां महितः पूजीतः पूज्यो वा आसीत्। स सर्वेषां वेदानां अर्थवेत्ता अर्थज्ञानी चतुर्वेद पण्डितोऽभवत्। तस्य गङ्गाधरस्य साधुशीलः सदाचारनीष्ठः ऋषिभट्टनाम्ना पुत्रः आसीद् यः शतपथब्राह्मणे निपुणः पारङ्गतः याज्ञिकैः यजुर्वेद पण्डितैः याज्ञिकैर्वा वंद्यमानः वंदनार्हः आसीत्। स सर्वकाले प्रातर्मद्याह्नसायंकालेषु त्रिषवनेषु पुण्यात्मा आह्निकादि कर्मकार्यनिरतः आसीत्। तथा च शिष्याणां संघैर्वा अर्चितांघ्रिः पूजितपादः। अनेक शिष्यैः वृत आसीत्। एतच्छ्लोकानन्तरम् अतः परमपि द्वितीय श्लोकस्याऽनुसंधानं कुर्वन् लिखति।। ०३।।

करोति विदुषां प्रीत्यै सर्वसंस्कारभास्करम्।
सूत्रंहरिहरंकर्कंवासुदेवींसमाहितः।। पृ. ०१।।

स एष ऋषिभट्टः विदुषां विद्वज्जनानां प्रीत्यै प्रीत्यर्थं सर्वेषां संस्काराणां भास्करं सूर्यरूपं तदाख्यं वा ग्रन्थं विरचयति। तत्पूर्वम् अस्य संस्कारभास्कर ग्रन्थस्य रचनात्पूर्वम् ऋषिभट्टः हरिहरस्य कर्कस्य च सूत्रं सूत्रग्रन्थं पठितवान् समाहितो भूत्वा वासुदेवीं च वसुदेवकृतां टीकामपि पठितवान्।। ०४।।

आलोक्यसम्यङ्मनसा सरलं सुगमं नवम्।
यस्यावलोकनेनैव स्फुरंति हृदि तत्क्षणात्।। पृ. ०१।।

तामेव वसुदेवकृतां टीकां मनसा एक चित्तेन पठित्वा सर्वं विषयवस्तु यस्य अवलोकनेन पठनेन सरलं सुगमं बुद्धिग्राह्यं नवं नवं च एक चित्तेन तत्क्षणात् तस्मिन् क्षणे एव हृदि चित्ते हृदये वा स्फुरंति स्मृतिमायान्ति।। ०५।।

एवं मङ्गलाचरणश्लोकद्वयानन्तरम् ऋषिभट्टः स्वकीयं व्यक्तित्वमेवं संक्षेपेण ज्ञापयति।

वैक्रमे सप्तदशशतकारंभे महाराष्ट्रान्तर्गते गोदावर्यास्तीरे नासिक नगरे शौचे कुलोत्पन्नो विश्वनाथो नाम याज्ञिक आसीत्। तस्य पुत्रः शौचे गङ्गाधरो नाम तत्पुत्रश्च शौचे ऋषिभट्टः अभवत्। सोऽयं ब्राह्मणाग्रणीः शुक्लयजुर्वेदान्तर्गतवाजसनेयिमाध्यन्दिनशाखायाः शतपथब्राह्मणग्रन्थे पारंगतः आसीत्। ऋषिभट्टः हरिहरसूत्रं कर्कसूत्रं तस्य च वासुदेवीत्याख्यां टीकामपि पठितवान्। एवमेव स्वविषयनिष्णातोऽयं शुक्लयजुर्वेदान्तर्गतवाजसनेयिमाध्यन्दिनशाखाध्यायिनां ब्राह्मकुलानां कृते सर्वसंस्कारभास्करोऽपर संस्कारभास्कर इति ग्रन्थस्य रचनां कृतवान्।

ऋषिभट्टः गौतमस्य चत्वारिंशत् संस्काराणां परिगणनं प्रस्तूय अङ्गिरसश्च पञ्चविंशतिसंस्कारान् परिगणय्य स्वयं गृहितानां षोडशसंस्काराणां परिगणनं कृत्वा तेषामेव व्याख्याने कृतमतिरस्तीति दर्शयति "अधुनास्वगृह्योक्तागर्भाधानादिविवाहान्ताः षोडशसंस्काराः मुख्याः मयाऽस्मिन्ग्रन्थे परिगृहीताः" इति।

**संस्कारभास्करस्य विषयवस्तु।**

संस्कारभास्करस्याऽऽरम्भे प्रथमस्तावद् गर्भाधानसंस्कारः। तत्रादौ मण्डपादि स्थापनमुहूर्तं तदर्थमावश्यकं वस्तुजातं विधिस्वरूपं च वर्णयितुं नारदपुराणस्य–

निंद्यर्क्षतिथिवारेषु यदि पुष्प प्रदृश्यते।
अशुभंचेद्रजःस्त्रीणां निंद्यस्थाने च वासिस।। पृ. १७।। इत्यारभ्य।
एवंयः कुरुते शान्तिं नारदोक्त प्रमाणतः।
तदनिष्टं तु सकलं सद्य एव विनश्यति।। पृ. १९।।

इत्यन्ताः श्लोका रजोदर्शनशान्ति विध्यर्थं संगृहीताः। तदनन्तरं शान्तिप्रयोगविधिरेवं वराहपुराणात् नारदपुराणस्य नामोल्लेखेन सह प्रदत्त।

ग्रहशान्तिक्रमः। शान्तिक्रमं प्रवक्ष्यामि नारदेन यथोदितम्।
गणेशंपूजयेदादौ स्वस्तिपुण्याहवाचनम्।।
मातृणांपूजनंकार्यं नान्दीश्राद्धमतः परम्।
आचार्यंवरयित्वाथब्रह्माणं गाणपत्यकम्।।
सादस्यमृत्विजश्चैव जापकान्वरयेत्ततः।
दिग्रक्षणं ततः कार्यं पञ्चगव्यं यथाविधि।।
भूमिंसम्पूज्यविधिवत्तत्र संस्कारपञ्चकम
स्थण्डिलेग्निं प्रतिष्ठाप्य कलशान्स्थापयेत्क्रमात्।।
मूर्त्यग्न्युत्तारणं प्राणप्रतिष्ठास्थापनार्चनम्।
ग्रहादीन् स्थापयित्वाथस्थापयेद्रुद्रकुम्भकम्।।
ब्रह्मासनं ततो दत्त्वा कारयेत्कुशकण्डिकाम्।
लिङ्गोक्तैर्नाममन्त्रैर्वा यथाविध्युक्तद्रव्यतः।।
देवता ग्रहहोमं च यथा सङ्ख्यापुरःसरम्।
पूजास्विष्टं नवाहुत्यां बलिं पूर्णाहुतिं तथा।।
स्रुवाश्नादिविमोकान्तं होमशेषं समापयेत्।
श्रेयःसम्पाद्यदानं च अभिषेको विसर्जनम्।।
विप्राशिषःप्रगृह्णीयात्तान्मिष्टान्नेन भोजयेत्।। पृ. १९।।

तदनन्तरं ग्रन्थभूयस्त्वभयाद् ऋषिभट्टेन स्पष्टोल्लेखः कृतो वर्तते यद् गर्भाधानसंस्कारविधिं विहायाऽन्य संस्कारविधिषु ऋषिच्छन्दोन्वाधानानि न दर्शितानि तानि च प्रचलितानि विधिपण्डितज्ञातानि च।

अत्र विशेषोऽपि प्रदर्शितः। संस्कारविधिनां लघुत्वदीर्घत्वापेक्षया एकदिवससाध्या-नामनेकदिवससाध्यानां वा प्रयोगे विधिनां गणेशमातृकापूजनादीनां विसर्जन ब्राह्मणभोजनपर्यन्तानां एकस्मिन्नेवदिने दिनद्वये दिनत्रये वा कर्म सम्पादनीयमिति।

**विवेचनशैली।**

ऋषिभट्टस्य संस्कारभास्करे रचनाशैलि पाठकानां ध्यानमाकर्षति।

०१. ग्रन्थारम्भे संस्काराणां गणनाप्रसंगे गौतमस्य चत्वारिंशत् संस्काराणां परिगणनान्ते अङ्गिरसश्च पञ्चविंशति संस्काराणां परिगणनान्ते ऋषिभट्टः स्पष्टं लिखति यद् "एषां प्रयोगाः ग्रन्थविस्तारभयान्नाऽत्र लिखिताः" इति। अनेन ज्ञाप्यते यद् ग्रन्थकारः आवश्यकतानुसारेण प्रतिपादनं करोति। न तु व्यर्थं विस्तारं करोति।

०२. ग्रहशान्तिप्रकरणे गणपतिपूजने ऋषिभट्टं ब्रह्मनित्यकर्मसमुच्चयकारा अनुसरन्तीति भाति। यतो षोडशोपचारेषु ॐगणानान्त्वे (शु०य० २३/१९)ति मन्त्रेणावाहनं ॐवर्ष्मोऽस्मी (पा०गृ०सू० ०१/०३/०८)ति मन्त्रेणाऽऽसनं ॐधामन्त इ(शु०य०१७/१९)ति मन्त्रेणाऽर्घ्यं ॐइमम्मे वरुणे (शु०य०२१/०१)- ति मन्त्रेणाऽऽचमनं ॐघृतम्मिमिक्ष इ(शु०य० १७/८८)ति मन्त्रेण घृतस्नानं ॐअहिरिवभोगैरि (शु०य० २९/५१ )ति मन्त्रेणोद्वर्तनस्नानं ॐआपोहिष्ठे (शु०य० ३६/१४-११/५१-११/५२)ति तृचेन स्नानमभिषेकं च ॐधूरसिधूर्व इ(शु०य० ०१/०८)ति मन्त्रेण धूपं ॐअगनिर्ज्योतिरि (शु०य० ०३/०९)ति मन्त्रेण दीपं ॐयेदेवास इ(शु०य० ०७/१९)ति मन्त्रेण नैवेद्यं च। पौराणिकेषु च मन्त्रेषु नानासुगन्धद्रव्यमिति गन्धोदकस्नानं दुर्वाङ्कुरान्सुहरितानिति मन्त्रेण दूर्वार्पणं हरिद्राकुङ्कुमिति मन्त्रेण सौभाग्यद्रव्यं शर्कराघृतसंयक्तमिति मन्त्रेण नैवेद्यं कदलीगर्भसंभुतेति मन्त्रेण नीराजनं च। संस्कारभास्करकाराः प्रथमं पौराणिकान् मन्त्रान् पठन्ति ततश्च वैदिकान्। किंत्वस्मिन् शोधप्रबन्धे गुर्जरप्रदेशे प्रचलितः क्रमो गृहीतः।

०३. संस्कारभास्करकाराःशुक्लयजुर्वेदीयमाध्यन्दिनशाखावलम्बि ग्रन्थं रचयन्तः पुण्याहवाचन-प्रसङ्गे आशिःप्रदानावसरे शुक्लयजुर्वेदीय मन्त्रान् प्रथमं पठीत्वा ऋग्वेदीय मन्त्रान् पठन्ति। गुर्जर प्रदेशे तु ऋग्वेदस्य प्राथम्यं स्वीकृत्य तदन्तरं शुक्लयजुर्वेदीय मन्त्रान् पठन्ति।

०४. संस्कारभास्करकाराः स्वकीयं शुक्लयजुर्वेदीयत्वं रक्षन्तः शुक्लयजुर्वेदीय मन्त्रैः सह ऋग्वेदीय मन्त्रान् ब्राह्मणमन्त्रानपि संगृह्णन्ति न तु सामवेदीय मन्त्रान् अथर्ववेदीय मन्त्रान् वा दर्शयन्ति। किन्तु

गुर्जरप्रदेशे ब्राह्मणा: वेदचतुष्टयस्य समानतया स्वीकारात् वेद तच्छाखाया: प्रधानतामुपलक्ष्य चतुरो वेदान् संगृह्णन्ति।

संस्कारभास्करकाराणां शास्त्रार्थशैली सम्पूर्णतया विद्वत्तापूर्ण लक्ष्यते। तद्यथा

०५. नैकस्थलेषु शास्त्रार्थस्य प्रदेशा उद्भवन्ति। तत्र तत्तत्स्थाने किं सूत्रं भवेत् को वा तत्सूत्रस्याऽर्थो केन वा कथं टीकाभाष्यादिनां किदृषी व्याख्या प्रस्तुता तत्सर्वं संस्कारभास्करकारा: सुनिश्चितं सन्यायं स्पष्टयन्ति।

०६. यथाऽऽघारहोमाज्याहुतिप्रकरणे शास्त्रार्थं कुर्वन्त: संस्कारभास्करकारा: अग्नावाहुतयोऽ-ग्नेर्दक्षिणप्रदेशे दीयन्ते। तत् कथमिति संक्षिप्तवाक्येनैव स्पष्टीकुर्वन्ति यद् होमाग्नेर्यजमानस्य वामप्रदेशे एव। अतस्ते लिखन्ति। कथमेते आहुती दक्षिणसंस्थं हूयेते इति चेत् सत्यम्। आत्माभिमुख- स्याग्नेर्दक्षिण वामाभिप्रायेणेत्यदोष इति।

०७. यथा वा महाव्याहृतिहोमविषये ते-प्राङ्महाव्याहृतिभि: स्विष्टकृदन्यच्चेदाज्याद्धविरितिसूत्रम् दत्वा व्याख्यां कुर्वन्तो सूत्रस्यार्थं लिखन्ति यद् यत्रहोमेआज्यादन्यद्धवि:स्यात्। अत्रहवि: शब्देन-चरुरेवहवि:। यत्रचरु:स्यात्तत्रमहाव्याहृतिभि: प्राक्स्विष्टकृद्भवति। अन्यत्रान्तेपीतिभाष्यकार:।

०८. प्रयोगविधीनां पुरोवचनान्यपि प्रदत्तानि। तद्यथा

पुण्याहवाचनविधिं वक्ष्यामोऽथ यथा विधि।
प्रयोक्तु: कर्मणामादावन्ते चोदय सिद्धये।। पृ. ३१ब।।

इति पद्यं पुण्याहवाचनप्रयोगस्याऽऽरम्भे पठन्ति। तत्र च पुण्याहवाचनस्य प्रयोजनं यजमानस्य मङ्गलार्थमेव।

०९. उत्तरपूजनस्य चर्चाप्रसङ्गे विधिनां क्रमो दर्शितोऽस्ति यथा स्थापितदेवतानां पूजा स्विष्टकृद्धोमो नवाहुतियो बलिदानमभिषेको विसर्जनं च।

पूजास्विष्टं नवाहुत्यो बलि: पूणाहुतिस्तथा।
संस्त्रवादिविमोकान्तं होमशेषसमापनम्।।
श्रेय:सम्पाद्यदानं च अभिषेको विसर्जनम्।। पृ. ८१।।

१०. संस्कारभास्करकाराणां विद्वत्ताया वैशिष्ट्यमेवमेव यत् समग्रो ग्रहशान्तिप्रयोगो नारदपुराणात् सङ्कलितोऽस्ति यत्र च स्पष्टतया लिखन्ति- (१) अथ नारदोक्त गर्भाधानादौ रजोदर्शनशान्ति:।(पृ. १७), (२) एवं य: कुरुते शान्तिं नारदोक्त प्रमाणत:।(पृ. १९), (३) इति नारदोक्तरजो-

दर्शनशान्तिक्रमः।(पृ. १९), (४) विष्णुर्विष्णुर्विष्णुः। श्रीमद्भगवतो महापुरुषस्य - - - - - नारदोक्तरजोदर्शनशान्ति०।(पृ. २४), (५) भवन्नियोगेन मया अस्मिन्नारदोक्त सग्रहमखरजोदर्शन-शान्त्याख्ये कर्मणि यत्कृतमाचार्यत्वं तदुत्पन्नं श्रेयः तत् अमुनासाक्षतेनसजलेनपूगीफलेन तुभ्यमहं सम्प्रददे।(पृ. ९२)

## ग्रन्थभूयस्त्वभयम्।

सकलस्य षोडशसंस्कारविधेः वर्णनस्य दीर्घत्वात् ऋषिभट्टा बहुशो दीर्घं विधिं संक्षेपेण श्लोकबद्धं कृत्वा प्रस्तौति। यथा

०१. पुण्याहवाचनप्रसङ्गे कलशादुदकशेक समये १. अस्तु पुण्याहं। २. अस्तु कल्याणं। ३. कर्म ऋध्यन्ताम्। ४. आयुष्मते स्वस्ति। ५. अस्तु श्रीरिति पञ्चवाक्यानि त्रिः पठनीयानीति संक्षिपति।

पुण्याहादित्रिरभ्यास मन्त्रमध्योर्ध्वनिःस्वनैः।
पुण्यंकल्याणमृद्धिश्चस्वस्तिः श्रीत्यादि पञ्चकम्।। पृ. ३२।।

०२. पुण्यंपुण्याहं दीर्घमायुरस्त्विति वचनप्रतिवचनावसरे ऋषिभट्टाः लिखन्ति यद् एवं सर्वत्र यजमानोत्तरं ब्रह्मणाः प्रतिवचनं दद्युः।

०३. यजमानस्य गृहे शान्तिपुष्टितुष्ट्यादयाशीर्वाद समयेऽपि ॐ शान्तिरस्तु। अस्तविति द्विजा प्रतिवचनं सर्वत्र दद्युः।

०४. मन्त्रेष्वपि ये ये मन्त्रा वारंवारमायान्ति ते ते समग्रा न गृहीताः किन्तु लिङ्ग निर्देशेण सूचिताः।

०५. अनेन कारणेनैव पुण्याहवाचने पौराणिकान् मन्त्रान् न गृह्णन्ति।

०६. पुण्याहवाचनप्रसङ्गे यजमानोक्तवाक्यं प्रथमवारं पूर्णतया ऋषिभट्टा लिखन्ति यत् -
भो ब्राह्मणाः! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य सग्रहमखरजोदर्शनशान्तिपूर्वकगर्भाधानाख्यस्यग्रहशान्त्याख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्त्विति। किन्तु तत् पश्चात् तद् वचनस्य पुनः प्राप्त्यवसरे लिखन्ति यत्- भो ब्राह्मणाः मया०कर्मणः कल्याणं भवन्तो ब्रुवन्त्विति।

०७. अभिषेकप्रसङ्गे पठ्यमानानां मन्त्राणां लिङ्गान्येव गृहीतानि। तद्यथा-
ॐपयः पृथिव्या०।।१।। पञ्चनद्य०।।२।। व्वरुणस्योत्तं०।।३।। पुनन्तुमा०।।४।। ॐद्यौः शांति-रन्त०।।१९।। यतोयतः समीहसे०।।२०।। तत्रैव मन्त्रद्वयमर्धमेव लिखन्ति तद्यथा देवस्यत्वा०।।

सरस्वत्यै वाचोयन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिंचामि।।७।। देवस्यत्वा०।। अश्विनोर्भैषज्येनतेजसे–ब्रह्मवर्चसायाभिहिञ्चामिसरस्वत्यैभैखज्येनवीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलाय श्रियैयशसेभिषिञ्चामि।।८।। इति।

०८. मातृकापूजनावसरे मातृका आवाहय ऋषिभट्टाः लिखन्ति– मनोजूतिरितिप्रतिष्ठाप्य षोडशो–पचारैः सम्पूजयेत्। तत्रैवाऽपरं लिखन्ति– ॐ मोदादिषड्विनायकेभ्यो नमः इति नाम मन्त्रेण आवाहनादिपुष्पाञ्जलिपर्यन्तं पूजनं कार्यम्।

०९. सूर्येन्द्रेन्द्राणिभुवनेश्वररीकदलीदेवतावाहनप्रसङ्गे ॐआकृष्णेनरजसावर्त०।।०१।। ॐ त्रातारमिन्द्रम्०।।०२।। ॐ श्रीश्चतेल०।।४।। इति मन्त्राणां पुनर्निर्देशं न कुर्वन्ति।

१०. नवग्रहाधिपतिदेवतावाहनविधौ प्रत्येकदेवता मन्त्रान्ते समुच्चार्यमाणं ॐ भूर्भुवः स्वः भो ईश्वर इहागच्छ इह तिष्ठ ईश्वराय नमः ईश्वरमावाहयामि स्थापयामि इत वाक्यम् उमास्कन्द–विष्णुब्रह्मादीनामावाहन समये केवलं ॐ भू०उमे इ०उमायै०उमामा० इत्यादिरूपाणि संक्षिप्त वाक्यानि प्रयोजितानि। तत्रैव उमायाः मन्त्रस्थानेऽपि केवलं ॐ श्रीश्चतेलक्ष्मी० इति लिखितम्। अनेन प्रकारेण संक्षिप्तीकरणस्य पाण्डित्यं प्रत्यधिदेवतालोकपालावाहनविधौ दृश्यते। तदित्थं ॐआपो हि०(इति मन्त्रः)।।२।। सोमवामपा०ॐभू०आ०इ०इ०अद्भ्यो०आ०आ० ॐस्योनापृ०(इति मन्त्रः)।।३।। भौमवामपार्श्वे।। ॐभू०पृथवीइ०पृ०पृ०पृथिवीमावाहयामि।। ॐगणानान्त्वा०(इति मन्त्रः)।।१।। रहोरुत्तरतः ॐभू० गणपतेइहा० ग० इ० गणपतिमा०।। ॐअम्बेऽअम्बिके०(इति मन्त्रः)।।२।। शनेरुत्तरतः ॐभू०दुर्गे इ० इह० दुर्गा०दुर्गा०।। ॐनहिस्पशमवदं०(इति मन्त्रः)।।२।। उत्तरे ॐभू० क्षत्राधिपतेइ० इ० क्षे० क्षेत्राधिपतिमा० इति।

११. इन्द्रादिदशदिक्पालानां माषभक्तबलिदानविधौ इन्द्राग्नियमादीनां ॐ त्रातारमिन्द्र० ॐ त्वन्नोऽअग्नेतवदेव० ॐ यामात्वाङ्गि० इत्यादि मन्त्रप्रतीकानि दत्वा केवलमिन्द्रविषये– प्राच्यांदिशि–इन्द्रंसाङ्गंसपरिवारंसायुधंसशक्तिकमेभिर्गन्धमुपचारैस्त्वामहंपूजयामि। इन्द्रायसाङ्गायसपरिवारायसा–युधायसशक्तिकायइमंसदीपमाषभक्तबलिं समर्पयामि। भोइन्द्रदिशंरक्षबलिंभक्षममसकुटुम्बस्याभ्युदयं–कुरु। आयुः कर्ताक्षेमकर्ताशान्तिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्तावरदोभव। अनेनबलिदानेनइन्द्रः प्राम्तामिति।(पृ. ८३) सम्पूर्णतया लिखितम्। अन्ते च एवं सर्वत्रोहः(सर्वत्र अहः = विचारणीयः)
इति कथयित्वाऽपरेषां नव दिक्पालानां गणेशदुर्गाक्षेत्रपालानां सूर्यादिनवग्रहाणां च मन्त्रप्रतिरकैरेव संक्षेपः साधितः।

पुण्याहवाचनानन्तरं मातृकापूजनप्रसङ्गे–

अविघ्नो मण्डपश्चैव मातृणां पूजनं सकृत्।
वैष्वदेवं वसोर्द्धारा नान्दीश्राद्धमतः परम्।।

अविघ्नपूजनात् पूर्वं वैश्वदेवं विधाय च।। पृ. ४१।।

संस्कारभास्करकाराः प्रयोगक्रमं स्पष्टं लिखन्ति।

संस्कारभास्करस्य प्रस्तावनायां वराहपुराणस्य "सुस्नातः सम्यगाचांतः" (पृ. १३)इति सन्दर्भेण स्पष्टतया ज्ञायते यद् ऋषिभट्टो न केवलं वैदिको विद्वानपि तु मेधावी पण्डितो यःस्ववर्णाश्रमाचारान् पालयामासाऽन्यांश्च धर्मे बुद्धिं कर्मणि प्रावीण्यं यागादि पूजने श्रद्धां शौचाद्याचारे च पूर्ण सभानतां ग्राहयामास।

एतेषाम् उपरि निर्दिष्टानां प्रदर्शनेन संस्कारभास्करकाराणां विद्वत्ताया अत्यन्तं महत्वपूर्णं बुद्धिमत्वं लेखन शैल्याः पाण्डित्यं च स्पष्टं भवति। यतः पुनःपुनरापद्यमानानां मन्त्राणां श्लोकानां वाक्यानां वा पुनरावृत्तिर्न कृता।

एवमेभिरुपरिनिर्दिष्टैः संक्षेपकारकैः वाक्यैः यद्यनुमानं ग्रन्थभूयस्त्वभितेः कोऽपि कुर्यात् तदा २९१ पृष्ठेषु सम्मितो संस्कारभास्करो द्विगुणितपृष्ठसंख्याकोऽभविष्यत्।

**विद्वत्ता।**

संस्कारभास्करोऽयं षोडशसंस्कारविधीनां विवेचनं प्रयोगानुकूलतया प्रस्थापयन्ति। अतः सुस्पष्टमेवैतद् यद् अनेके श्रौतगृह्यसूत्रपुराणस्मृत्यादिग्रन्था सन्दर्भत्वेन स्वीकृता भवेयुरिति। तत्र याज्ञवल्क्ययमादीनां स्मृतयः स्मृतिसंग्रहधर्मसिन्धुप्रभृतयः स्मृतिग्रन्था भविश्यद्ब्रह्मवय्वादीनि च पुराणानि स्वविषयप्रतिपादनार्थं प्रामाण्यार्थं च समावेशितानि। यद्यपि बहूनां पद्यानां दर्शनं प्रकाशितेषु पुस्तकेषु न प्राप्यते।[१६] एतेषां ग्रन्थानां सर्वेऽपि पद्यसन्दर्भा अत्र निम्नलिखिते संग्रहे न प्रदत्ताः। तेषां दिग्दर्शनमेव कृतं संशोधनग्रन्थभूयस्त्वभयात्।

बहुषः संस्कारभास्करकारा निजविद्वत्तायाः प्रमाणं प्रतिष्ठापयन्तः **अत्र विचारः** इति शीर्षकेण अत्यावश्यक चर्चा आरभन्ते यथा पञ्चगव्यकरणविधौ किदृशिनां गवां मूत्रादिकं स्वीकर्तव्यमिति शान्तिसार कल्पवल्यादि ग्रन्थानां श्लोकानृधृत्य सिद्धान्तस्थापनं कुर्वन्ति। चर्चाया अन्ते चर्चा परिसमाप्तिनिर्देशार्थं **ततः** इति निर्देश्य प्रकृतमनुसरन्ति।

ग्रहमण्डलदेवतास्थापनविधौ स्कन्दमत्स्यपुराणात् ग्रहरत्नावली प्रतिष्ठाकल्पतः सङ्गृह्य संस्कारभास्करकाराः पद्यैर्ग्रहदेवताज्ञानं तेषां च नामानि वर्णाः प्रतिमास्तद्धत्वो देशा (उद्भवस्थानानि) गोत्राण्याकृतयो ग्रहमण्डलव्यासा दिक्स्थानानि

[१६] विविध स्मृतीनां स्मृतिग्रन्थानां पुराणानां च सन्दर्भान्वेशणे प्रयासान् कृतवतो मम साहाय्यं प्राच्यविद्यामन्दिरे रिसर्च–ऑफिसर–पदे कार्यं कुर्वतीनां श्रीमतीनां डॉ. मीनाबेन पाठक महोदयानां तत् सहायिकानां च हृदयेन आभारस्मरणं क्रियते।

कुशकण्डिकाविधिव्याख्यानप्रसङ्गे संस्कारभास्करकाराः सन्दृग्धग्रन्थस्य स्पष्टं निर्देशं कुर्वन्तो लिखन्ति यद् एतस्या व्याख्या ग्रहरत्नावली कुशकण्डिकाभाष्यानुसारेणलिखितेति। अतः बहवो ग्रन्था भाष्यसमेताः पठितास्तैरिति स्पष्टीभवति।

शास्त्रार्थः-

आघारहोमाज्याहुतिप्रकरणे पुनः स्रुवधारणप्रक्रियां सुष्ठुतया बोधयन्तः संसकारभास्करकाराः दीर्घव्याख्यानं विहाय कुशकण्डिकायाः कारिका एव प्रस्तुवन्ति।

अग्रे धृत्वार्थ नाशाय मध्ये चैव मृतप्रजा।
मूले च म्रियते होता स्रुवस्थानं कथं भवेत्।।
अद्रमध्याच्च यन्मध्यं मूलमध्याच्च मध्यतः।
स्रुवं धारयते विद्वाञ्ज्ञातव्यं च सदाबुधः।।
तर्जनी च बहिःकृत्वा कनिष्ठां च बहिस्तथा।
मध्यमानामिकाङ्गुष्ठैः स्रुवं धारयते द्विजः।।
स्रुवहोमे सदात्यागः प्रोक्षणीपात्र मध्यतः।। पृ. ७७।।

संस्कारभास्करकाराः स्वकीय ग्रन्थस्य सारल्येन स्पष्टलेखनेन च विद्वन्मुर्धन्याः। यथाऽग्ने- रुत्तरभागे प्रजापतये आहुति दान विषये लिखन्ति।[१७] मृगीमुद्रया घृत स्रुवेणाऽऽज्यमादाय प्रजापतिं मनसा ध्यात्वा स्वाहाकारमुच्चैः इदं प्रजापतये उपांशु न ममेत्युच्चैरुच्चारयेत्। अत्र प्रजापतये इति तूष्णीं मनसा वा। न ममेति सर्वश्रवणयोग्यामुच्चार्यते।

**स्मृतिग्रन्थाः।**

यथा पुराणानां सात्विकादिगुणभेदात् त्रिगुणत्वं पठ्यते तथैव पद्मपुराणोत्तरखण्डे (०१) वसिष्ठस्य (०२) हारीतस्य (०३) व्यासस्य (०४) पाराशरस्य (०५) भारद्वाजस्य (०६) काश्यपस्य च स्मृतयः सात्विकत्वेन मुक्तिदाः मताः (०७) याज्ञवल्क्यस्य (०८) आत्रेयस्य (०९) तित्तिरे (१०) दक्षस्य (११) कात्यायनस्य (१२) विष्णोश्च स्मृतयो राजसाः स्वर्गदा मताः (१३) गौतमस्य (१४) बृहस्पतेः (१५) संवर्तस्य (१६) यमस्य (१७) शङ्खस्य (१८) उशनस्य स्मृतयः तामसा निरयप्रदा मताः।[१८]

भगवता मनुनाऽष्टादश स्मृतयः परिगणिताः।

[१७] संस्कारभास्करः। पृ. ७९।

[१८] वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा। भारद्वाजं काश्यपं च सात्विका मुक्तिदाः शुभाः।।
याज्ञवल्क्यं तथात्रेयं तैत्तिरं दाक्षमेव च। कात्यायनं वैष्णवं च राजसाः स्वर्गदाः शुभाः।।
गौतमं बार्हस्पत्यं च सांवर्तं च यमं स्मृतम्। शाङ्खं चौशनसं देवि तामसा निरयप्रदाः।। २६३/८६-८९।।

विष्णुः पराशरो दक्षः संवर्तव्यासहारिताः।
शातातपो वसिष्ठश्च यमापस्तम्बगौतमाः।।
देवलः शङ्खलिखितौ भारद्वाजोऽशनोऽत्रयः।
शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारिणः।। प्र०पृ. ०३।।

याज्ञवल्क्येन तु निम्नोक्ताः स्मृतयः परिगणिताः।

मन्वत्रिविष्णुहारितयाज्ञल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती।।
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः।। ०१/०४–०५।।

परम्परानुसारेणाऽष्टादश स्मृतिकाराः प्रख्याताः सन्ति। (०१) मनुः (०२) याज्ञवल्क्यः (०३) अत्रिः (०४) विष्णुः (०५) हारितः (०६) उषनाः शुक्रो वा (०७) अङ्गिराः (०८) यमः (०९) आपस्तम्बः (१०) संवर्तः (११) कात्यायनः (१२) बृहस्पतिः (१३) पराशरः (१४) व्यासः (१५) शङ्खः (१६) लिखितः (१७) दक्षः (१८) गौतमः[१९] (१९) शातातपः (२०) वसिष्ठश्च[२०]।

**याज्ञवल्क्यः।**

०१. ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।
निषेकादिश्मशानान्तास्तेषां वै मन्त्रतः क्रियाः।। ०१/१०।। पृ. ०१।।

अतएव षोडषसंस्कारानधिकृत्य तेषां प्रयोगाः समन्त्रकाः प्राग्दर्शितग्रन्थाभिप्रायेणात्र लिखिताः।

अतः स्पष्टमेव यद् ऋषिभट्टः सर्वसामान्यतया याज्ञवल्क्यस्य प्रामाण्यं स्वीकरोति।

०२. कनिष्ठादेशिन्यङ्गुष्ठ मूलान्यग्रं करस्य च।
प्रजापतिपतृब्रह्म देवतीर्थान्यनुक्रमात्।। ०१/१९।। पृ. ०७।।

[१९] मोनीयर विलियम्सेन स्वकीये ए संस्कृत–इंग्लिश डिक्षनरीत्यत्र, पृ.१२७२, कॉ००३ स्थले शातातपो वसिष्ठश्च न परिगणितौ।

[२०] वीरमित्रोदये(पृ०१५) षट्त्रिंशत् स्मृतिकारा एवं परिगणिताः।
तेषां मन्वङ्गिरोव्यासगौतमाऽत्र्युशनोन्यमाः। वसिष्ठदक्षसंवर्त्तशातातपपराशराः।।
विण्वापस्तम्बहारीताः शङ्खः कात्यायनो भृगुः। प्रचेता नारदो योगी बौधायनपितामहौ।।
सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च। सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा।।
जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसम्भवः। इति धर्मप्रणेतारः षट्त्रिंशद्दषयस्तथा।।

पाण्याहुतिर्द्वा दशपर्व पूरिका रसादिना चेत्स्त्रुचिपर्व पूरिका।
दैवेनतीर्थेन च हूयते हविः स्वङ्गारिणिस्वर्चिषि तच्च पावके।। पृ. ०७।।

०३. आर्षछंदश्चदैवत्यं विनियोगस्तथैव च।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः।।
अविदित्वातु यः कुर्याद्याजनाध्ययनं जपम्।
होममंतर्जलादीनि तस्य चाल्पफलं भवेत्।। पृ. ०८।।

०४. जालसूर्यमरीचिस्थं त्रसरेणुरजःस्मृतम्।
तेष्टोलिक्षास्तुतास्तिस्रो राजसर्षपमुच्यते।। ०१/३६२।।
गौरस्तुतेत्रयः षट्ते यवोमध्यश्चतेत्रयः।
कृष्णलाः पञ्चतेमाषस्तेसुवर्णस्तु षोडश।। ०१/३६३।।
पलंसुवर्णाश्चत्वारः पञ्चवापि प्रकीर्तिताः।
द्वेकृष्णलेरूप्यमाषो धरणं षोडशैवते।। ०१/३६४
शतमानंतुदशभिर्धरणैः पलमेवतु।। ०१/३६५।। पृ. १०।।

०५. परिधानाद्बहिः कक्षा निबद्धाचासुरीमता।
धर्मकर्मणिविद्वद्भिर्वर्जनीया प्रयत्नतः।। पृ. १४।।

०६. पेषणादिकयन्त्रेषु शब्दो यावत् प्रवर्तते।
पतितांत्यजचाण्डालादीनां यावच्चशब्दकः।।
तावत्कर्म न कर्तव्यं तथा सन्ध्याद्वयेपि च।। पृ. १५।।

**यमः।**

यमस्मृतेरपि निर्देशः कृतो दृश्यते। यथा

१. शूद्रोप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः।। पृ. ०२।।

कन्यकायाश्चगर्भाधानादिचौलान्ताः अष्टसंस्काराः अमन्त्रकाः। अनेन ऋषिभट्टस्य शूद्राणां संस्कारविषयेऽधिकारिता सम्मता।

**वसिष्ठः।**

सर्वेषु श्रुतिस्मृतिपुराणोक्तकर्मषु देहशुचिता मन:शुद्धि: धौतवस्त्राणि पूर्णतयाऽऽवश्यकानीति शुचितापादनार्थं च विष्णोर्नामस्मरणमपि कर्तव्यमिति ऋषिभट्टो दर्शयति।

०१. जपहोमोपवासेषु धौतवस्त्र धरोभवेत।
अलंकृत: शुचिर्मौनी श्रद्धावान्विजितेन्द्रिय:।।
यदिवाग्यमलोप:स्याज्जपादिषुकथंचन।
व्याहरेद्वैष्णवमन्त्रं स्मरेद्वाविष्णुमव्ययम्।। पृ. ०३।।

०२. रौद्रपित्रासुरान्मन्त्रांस्तथाचैवाभिचारकान्।
व्याहृत्यालभ्य चात्मानमप: स्पृष्ट्वाऽन्यदाचरेत्।। पृ. ०४।।

**कात्यायन:।**

०१. पित्र्यमन्त्रानुब्रुवाणे आत्मालम्भोधमेक्षणे।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे।। पृ. ०४।।
मार्जारमूषकस्पर्शे आक्रुष्टेक्रोधसंभवे।
निमित्तेष्वेषुसर्वेषु कर्मकुर्वन्नप:स्पृशेत्।। पृ. ०४।।

अत्रैतेषु प्रसङ्गेषु अप: स्पर्शनं केन प्रकारेण केषुवाङ्गेषु कर्तव्यमित्यस्य स्पष्टतां कुर्वन् ऋषिभट्ट: स्मृत्यर्थसारं निर्दिशति यत् कर्तुरङ्गानाम् अनुक्तौ स्पष्टताभावे दक्षिणमङ्गम् अद्भि: स्पृशेदिति।

०२. योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानव:।
मंदाग्निरामयावि च दरिद्रश्चैव जायते।।
तस्मात् समिद्धे होतव्यं नासमिद्धे कथञ्चन।।
नवस्त्रवायुनाकुर्यात्पणिशूर्पस्त्रुवादिभि:।
न कुर्यादग्निधमनं नकुर्याद्वा व्यजनादिना।।
मुखैनैवधमेदाग्निं मुखदेशाद्धयजायत।।
अंधोबुध: सधूमेतु जुहुयाद्यो हुताशने।
यजमानो भवेदंध: सपुत्र इति च श्रुति:।। पृ. ०६।।

**शङ्ख:।**

०१. समित्पुष्पकुशादीनि ब्राह्मण: स्वयमाहरेत्।
शूद्रानीतै: क्रयक्रीतै: कर्मकुर्वन्व्रजत्यध:।। पृ. ०६।।

**आपस्तम्बः।**

०१. त्रिमात्रस्तु प्रयोक्तव्य: कर्मारम्भेषु सर्वश:।। पृ. १२।।

०२. आर्द्रवासास्तुय: कुर्याज्जपहोम परिग्रहान्।
सर्वं तद्राक्षसंविद्याद्बहिर्जानु च यत् कृतम्।।
यज्जलेशुष्कवस्त्रेण स्थलेचैवार्द्रवाससा।
जपोहोमस्तथादानं तत्सर्वं निष्फलं भवेत्।।
नस्युतेन न दग्धेन पारक्येण विशेषत:।। पृ. १३।।

**शातातपः।**

०१. सव्यादंसात्परिभ्रष्टं कटिदेशे धृताम्बरम्।
एकवस्त्रं तु तद्विद्याद्दैवेपित्र्ये विवर्जयेत्।। पृ. १४।।

**गौतमः।**

०१. स्नानेदानेजपेहोमे दैवेपित्र्ये च कर्मणि।
बध्नीयान्नासुरीं कक्षां शेषकाले यथा रुचि।। पृ. १४।।

**मनुः।**

०१. प्रभु: प्रथमकल्पस्य योऽनुकल्पेन वर्तते।
सनाप्नोति फलं तस्य परत्रेति श्रुति:स्मृति:।। ११/३०।। पृ. १६।।

०२. वैवाहिको विधि: स्त्रीणामौपनायनिक: स्मृत:।
पतिसेवा गुरौवासो गृहस्थाग्नि परिक्रिया।। ०२/६७।। पृ. २०९।।

**नारदः।**

०१. ऐशान्यांचतुर:कुम्भान् स्थापयेद्विधिपूर्वकम्।
याम्यमारभ्योदक्संस्थान् पूर्णपात्रसमन्वितान्।।
सूर्यं च तत्र विन्यस्य इन्द्राणीं च पुरन्दरम्।
चतुर्थे विन्यसेद्विद्वान् प्रतिमां भौवनेश्वरीम्।। पृ. ५८।।

**शौनकः।**

०१. अन्ते पूर्णाहुतिं हुत्वा समुद्रादूर्मिसूक्ततः।
सततमाज्यधारांतां पूर्णाहुतिमथाचरेत्।। पृ. ६५।।

**अन्यस्मृतिग्रन्थाः।**

**स्मृत्यन्तरे।**

०१. गर्भाधानमतश्च पुंसवनकं सीमंतजाताभिधे
नामाख्यं सहनिष्क्रमेण च तथान्नप्राशनं कर्म च।
चूडाख्यं व्रतबंधकोप्यथचतुर्वेदव्रतानांपुरः
केशांतः सविसर्गकः परिणयः स्यात्षोडशीकर्मणाम्।। पृ. ०२।।

ग्रन्थारम्भे एव स्पष्टतया लिखित यद् एते गर्भाधानादि षोडशसंस्काराः सर्वेषामेव। एते च द्विजानामेव समन्त्रकाः।

०२. कनकंकुलिशंनीलंपद्मरागं च मौक्तिकम्।
एतानि पञ्चरत्नानि रत्नशास्त्रविदोविदुः।। पृ. ०८।।

**स्मृतिसंग्रहः।**

स्मृतिसंग्रहकाराणां नामोल्लेखेन संस्काराणां क्रियमाणानां कृतानां करिष्यमाणानां च किं फलं भवेदिति स्पष्टयति।

०१. निषेकाद्बैजिकंचैनो गार्भिकंचापमृज्यते।
क्षेत्रसंस्कारसिद्धिश्च गर्भाधानफलंस्मृतम्।।
गर्भाद्भवेच्चपुंसूतेः पुंस्त्वस्यप्रतिपादनम्।
निषेकफलवज्ज्ञेयं फलं सीमन्तकर्मणः।।
गर्भाम्बुपानजोदोषो जातात्सर्वोपि[२१]नश्यति।
आयुर्वर्चोभिवृद्धिश्च सिद्धिर्व्यवहृति[२२]स्तथा।।
नामकर्मफलंत्वेतत्समुद्दिष्टं मनीषिभिः।
सूर्यावलोकनादायुरभिवृद्धिर्भवेद्ध्रुवा।।

---

[२१] अपिशब्दस्य दोषशब्दे नान्वयः।

[२२] व्यवहृतिर्व्यवहारस्तस्यसिद्धिरित्यर्थः।

निष्क्रमादायु:श्रीवृद्धिरप्युद्दिष्टा मनीषिभि:।
अन्नाशनान्मातृगर्भे मलाशीचापिशुध्यति।।
बलायुर्वर्चोवृद्धिश्च चूडाकर्मफलंस्मृतम्।
उपनीते:फलंत्वेतद्विजतासिद्धिपूर्विका।।
वेदाधीत्यधिकारस्य सिद्धिर्ऋषिभिरीरिता[२३]।। पृ. ०२–०३।।

०२. स्वस्तिवाचनमन्त्रे तु कर्मेकर्मे यथा तथम्।
पृथक् पृथक् प्रकुर्वीत देवतानां समर्षणम्।।
औपासनाग्नि: सूर्यश्च विवाहे च प्रजापति:।
स्थालीपाकेग्निगर्भश्च आधानब्रह्मणस्तथा।।
प्रजापति: पुंसवने धाता सीमन्तकेप्यथ।
सविता जातकर्मेषु नामकर्मे प्रजापति:।।
निष्क्रमेन्नप्राशने च सविता परिकीर्तित:
चौले तथैव केशान्ते प्रजापतिरिति स्मृत:।।
इन्द्रस्तथोपनयने व्रततुर्ये अपापक:।
श्रद्धामेधेविसर्गे च सुश्रवा: परिकीर्तित:।।
उपाकर्मे तु सविता विवाहेषु प्रजापति:।। पृ. १२।।

०३. वामेपृष्ठे तथा नाभौकच्छत्रयमुदाहृतम्।
त्रिभि:कच्छै:परिज्ञेयो विप्रो य: सशुचिर्भवेत्।।
आदौ कच्छस्ततो नीवीननाभिमध्ये च वाससी।
नीवीदक्षिणत:स्थाप्या एतत्त्रिकच्छलक्षणम्।।
शयनंचार्द्रपादेन शुष्कपादेन भोजनम्।
नोत्तरीयमध:कुर्याद्रात्रिवासस्तथा दिने।।
कटिवेष्टयन्तु यद्वस्त्रं पुरीषोयेनवाकृत:।
मूत्रमैथुनकृद्वस्त्रं धर्मकार्ये विवर्जयेत्।। पृ. १४।।

०४. खल्वाटत्वादिदोषेण विशिखश्चेन्नरो भवेत्।
कौशीं तदा धारयीत ब्रह्मग्रन्थियुतां शिखाम्।। पृ. १५।।

मङ्गलस्नानम्। ०५. सौगन्ध्यतिलतैलेन कुर्यादङ्गेसमञ्जनम्।
तिलामलकसंयक्तै: सुगन्ध्योषधि चूर्णकै:।।
अङ्गोद्वर्त्योष्णोदकेन स्नानं तन्मङ्गलं समृतम्।। पृ. २०।।

---

[२३] यत्रयत्रनापिश्रूयतेतत्रतत्रबैजिकगार्भिकैनोविनाशोपिफलंज्ञेयम्।

०६. राहुमन्ददिनेशानामुत्तरस्यां यथाक्रमम्।
गणेशदुर्गावायुश्च राहुकेत्वोश्च दक्षिणे।।
आकाशमश्विनौ देवौ स्थापयित्वा क्रमेण तु।
वास्तोस्पतिं क्षेत्रपालं स्थाप्यगुरुत्तरेषु च।।
एताः सदैव संस्थाप्याः कर्मसाद्गुण्यदेवताः।
इन्द्राग्नियमनैर्ऋत्या वरुणो वायुरेव च।।
कुबेरेशानावित्यष्टौ प्रागादिमदिशाधिपाः।
ब्रह्माणं च ततः स्थाप्य पूर्वेशान्योस्तु मध्यमे।।
प्रतीचीनैर्ऋत्योर्मध्ये ह्यनन्तं स्थापयेदिति।
यथावर्णं प्रदेयानि वासांसि कुसुमानि च।।
नवग्रहेभ्योदेयानि सुगन्धसहितान्यपि।।

गन्धाः। आदित्यभूमिपुत्रार्थं दापयेद्रक्तचन्दनम्।
चन्दनं सितवर्णं च प्रदद्यात्सोमभार्गवे।।
कुङ्कुमेन च संयुक्तं चन्दनं जीव सौम्यययोः।
अगुरोश्चन्दनं दद्याद्राहुकेत्वर्कजेषु च।।

धूपः। रवेःकुन्दुरुकं धूपं शनिस्तु घृताक्षताः।
भौमेसर्जरसञ्चैव अगरुस्मेबुधेसमृतम्।।
सिह्लकंगुरवेदद्याच्छुक्रेबिल्वागरुं तथा।
गुग्गुलं मन्दचारे तु लाक्षाराहोश्चकेतवे।।

नैवेद्यं। गुडौदनंरवेदद्यात् सोमायघृतपायसम्।
लोहितायमसूरान्नं बुधायक्षीरषाष्टिकम्।।
दध्योदनंगुरार्दद्याच्छुक्राय च घृतौदनम्।
मिश्रितंतिलमाषान्नं निवेद्य च शनैश्चरम्।।
राहोर्माषौदनन्दद्यात् केतोश्चित्रोदनं तथा।।

हविर्द्रव्यम्। तिलाज्यचरुभिर्द्रव्यं समिधां च यथातथम्।
ग्रहादीनां च सर्वेषां हविर्द्रव्यमुदीरितम्।।

समिधा। अर्कःपलाशखदिरावपामार्गोथपिप्पलः।
औदुम्बःशमीदूर्वाःकुशाश्च समिधः क्रमात्।। पृ. ६३-६४।।

०७. कोटावधिप्रत्यधेश्च शतमष्टाधिकाहुतिः।
विनायकादिदिक्पालान्ताष्टाविंशति सङ्ख्यया।।
लक्षे अष्टाविंशतीश्च अधिप्रत्यधिकेषु च।
विनायकादिदिक्पालान्ताष्टाष्टसङ्ख्ययाहुतिः।।
अयुतेष्टाष्टसङ्ख्याकैरधिप्रत्यधिकेषु च।
विनायकादिदिक्पालान्तानांहुत्वा चतुश्चतुः।।
केवले अधिप्रत्येधि हुत्वा चैव चतुश्चतुः।
विनायकादिदिक्पाला द्वे द्वे सङ्ख्याहुति हुनेत्।। पृ. ६५।।

**स्मृतिरत्नावली।**

०१. ईषद्धौतं नवंश्वेतं सदशंयन्नधारितम्।
अहतंतद्विजानीयात्सर्वकर्मसु पावनम्।। पृ. ०४।।

ईषद्धौतमित्यस्य स्पष्टीकरणार्थं नागाह्निकाख्यस्य समाधानं गृह्णन् ऋषिभट्टः लिखति ईषद्धौतम् अरजकादिनाऽसकृद्धौतमिति। तत्र च काश्यपोक्तिमपि समाविषति। तद्यथा

०२. अहतंयंत्रनिर्मुक्तं वासःप्रोक्तं स्वयंभुवा।
शस्तं तन्माङ्गलिक्येषु तावत्कालं न सर्वदा।। पृ. ०४।।

०३. द्वयोस्तुपर्वणोर्मध्ये पवित्रं धारयेद्बुधः।
अनामिकाग्रपूर्वे तु निसर्गं तु पवित्रकम्।।
नोच्छिष्टं तत्पवित्रंस्याद्भुक्तोच्छिष्टं विवर्जयेत्।
द्वयङ्गुलं मूलवलयं ग्रन्थिरेकाङ्गुलो भवेत्।।
चतुरङ्गुलमग्रंस्यात्पवित्रंस्यात्प्रमाणतः।। पृ. ०५।।

अत्र नोच्छिष्टं तत् पवित्रमिति स्पष्टीकरणार्थम् ऋषिभट्टः नागाह्निकस्य संदर्भं गृह्णन् लिखति।

०४. अन्यान्यपिपवित्राणि कुशदूर्वामयानि च।
होमात्मकपवित्रस्य कलां नार्हन्ति षोडशीम्।।
माषाणांषोडशादूर्ध्वं कुर्याद्धेम पवित्रकम्।
तेभ्यः स्वल्पतरंन्यूनं नकुर्वीतकदाचन।।
हीनकर्मणिचोच्छिष्टे कुशंधृत पवित्रकम्।
निर्माल्यंतेषु संप्राप्तिर्नहेमनश्च पवित्रके।। पृ. ०५।।

तथा च सुमंतुरपि तदभावेऽभिप्रायं निदर्शति।

०६. समूलाग्रौ विगर्भौतु कुशौद्वौ दक्षिणेकरे।
सव्येचैवतथात्रिन्वै बिभृयात्सर्वकर्मसु।। पृ. ०५।।

**हेमाद्रिः।**

०१. दिक्षणंबाहुमुद्धृत्य वामस्कन्धे निवेशितम्।
यज्ञोपवीतमित्यक्तं देवकार्यषु शस्यते।।
कंठावलंबितंचैव ब्रह्मसूत्रं यदा भवेत्।
तन्निवीतमितिख्यातं शस्तंकर्मणिमानुषे।।
उत्क्षिप्ते वाामबाहौतु दक्षिणस्कंधमाश्रितम्।
प्राचीनावीतमित्युक्तं तत्पित्र्येष्वेव कर्मसु।। पृ. ०५।।भारद्वाजोक्ति।।

०२. स्नातोधिकारी भवति दैवेपित्र्ये च कर्मणि।
पवित्राङ्गस्तथा जाप्ये दाने च विधि चोदिते।। पृ. १२।।

०३. प्रागग्रमदगग्रं वा धौतंवासः प्रसारयेत्।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनाच्छुचि।। पृ. १३।।

०४. मातृश्राद्धं  तु पूर्वाह्णे मध्याह्ने पैतृकं तथा।
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्।। पृ. १३।।

**सिद्धान्तशेखरः।**

द्रव्यभेदेनाहुतिमानंसिद्धान्तशेखरः।

०१. कर्षमात्राणिमक्ष्याणि लाजामुष्टिमितामताः।
अन्नंग्राससमंग्राह्यं शाकंग्रासार्धमात्रकम्।।
मूलानां तु त्रिभागःस्यात्कंदानामष्टमांशकः।
इक्षोः पर्वप्रमाणं स्यादङ्गुलद्वितयंलता।।
प्रादेशमात्राः समिधो व्रीहीणामञ्जलेः समम्।
तिलसक्तु काणादीनां मृगीमुद्रा प्रमाणतः।।
पत्रपुष्पफलादीनां समानाहुतिरुच्यते।

चंदनश्रीखण्डकस्तूरीकुङ्कुमागरुकर्दमा।।
हरिमंथसमाः प्रोक्ता गुग्गुलोबदरीसमः।
आहुतीनामिदंमानं कथितं वेद वादिभिः।। पृ. ०७-०८।।

मृगीमुद्रालक्षणमेवं प्रदत्तम्।

०२. मिलितानामिकाङ्गुष्ठ मध्यमाङ्गुलीयोर्यजेत्।
शेषाङ्गुलीउच्छ्रितेति मृगीमुद्रेयमीरिता।। पृ. ०८।।

**कृष्णभट्टः।**

०१. न च स्मरेद्यषिंछन्दः श्राद्धवैतानिके मखे।।
अग्निहोत्रे वैश्वदेवे विवाहादिविधौ तथा।
होमकालेन दृश्यन्ते प्रायश्छंदर्षिदेवताः।।
शान्तिकादिषु कार्येषु मन्त्रपाठजपादिषु।
होमेनैव प्रकर्तव्याः कदाचिद्यषिदेवताः।। पृ. ०८।।

**कर्मप्रदीपः।**

०१. नांगुष्ठादधिका कार्या समित्स्थूलतरा क्वचित्।
नवियुक्तात्वचाचैव नसकीटानस्फाटिता।।
प्रादेशमत्रान्नाधिका नतथा स्याद्द्विशाखिका।
नसपर्णा समित्कार्या होमकर्म सुजानता।।
प्रागग्राः समिधोग्राह्या अखर्वानेत्रफाटिताः।
काम्येषुवशयकर्मार्दौ विपरीता जिघांसतः।।
विशीर्णाविफलाह्रस्वावक्राबहुशिखाः कृशाः।
दीर्घाः स्थूलाघुणैर्जुष्टाः कर्मसिद्धिविनाशकाः।।
होतव्या मधुसर्पिभ्र्यां दध्नाक्षीरेणसंयुताः।
प्रादेशमात्राः समिध अशाखा अपशालिनीः।। पृ. ०६।।

**सूत्रकारो बौधायनः।**

०१. हस्तयोरुभयोर्द्वौद्वा वासनेपि तथैव च।
सदोपवितिनाभाव्यं सदाबद्धशिखेन च।
विशिखोव्युपवीतश्च यत्करोति नतकृतम्।। पृ. ०५।।

०२. आज्यहोमेषु सर्वेषु गव्यमेवघृतं भवेत्।
तदभावे महिष्यास्तु आजमाविकमेव च।।
तदभावेतुतैलंस्यात्तदभावेतुजातिलम्।
तदभावेतु कौसुंभं तदभावेतु सार्षपम्।। पृ. ०७।।

पुण्याहं वाचयिष्यन्नामगृह्णीयादसौ प्रीयतामिति विवाहस्याग्निरौपासनस्याग्निसूर्यप्रजापतयः। स्थाालीपाकस्याग्निगर्भो गर्भाधानस्य च ब्रह्मा। पुंसवनस्य प्रजापतिः।

०३. काषायवासाः कुरुते जपहोम प्रतिगृहान्।
नतद्देवागमं कर्म हव्यकव्येष्वथो हविः।। पृ. १३।।

०४. पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषुद्वयोः।
भृग्वङ्गिरो गणेश्वेवं शेषेष्वेकोऽपि वारयेत्।। पृ. २०५।।

**स्मृतिदर्पणः।**

०१. गायत्र्यादायगोमूत्रं गंधद्वारेति गोमयम्।
आप्यायस्वेति च क्षीरं दधिक्राव्णोतवैदधि।।
तेजोसिशुक्रमित्याज्यं देवस्यत्वा कुशोदकम्।
एभिस्तु पञ्चभिर्युक्तं पञ्चगव्यमिति स्मृतम्।। पृ. ०८।।

०२. वेदव्रतोपनयने स्वाध्यायाध्ययने तथा।
न दोषो यजुषांसोपपदास्वध्यापनेपि च।। पृ. १५०।।

**धर्मसिन्धुः।**[२४]

०१. आज्यं क्षीरं मधु तथा मधुरत्रय उच्यते।
पयोदधिघृतंचैव मधुशर्करयायुतम्।।
पञ्चामृतमिदं प्रोक्तं सर्वदेव प्रसादकम्।। इति कात्यायनः।। पृ. ०८।।

[२४] महामहोपाध्यायकाणेमहोदयैः धर्मशास्त्रेतिहासाख्यस्य ग्रन्थस्य तृतीयभागे (पृ. २०) धर्मसिन्धु ग्रन्थस्य कर्तुः काशीनाथस्य समयः १७९० ख्रिस्ताब्दः स्वीकृतः।

०२. सङ्कल्पः स्वस्तिवाग्विप्रवरणंभूतनिःसृतिः।
पञ्चगव्यैर्भूमिशुद्धिर्मुख्यदैवतपूजनम्।।
अग्निप्रतिष्ठासूर्यादि ग्रहस्थापनपूजनम्।
देवतान्वाहितिःपात्रासादनं हविषांकृतिः।।
यथाक्रमं त्यागहोमा वितिपूर्वाङ्गकःक्रमः।
पूजास्विष्टं नवाहुत्यो बलिःपूर्णाहुतिस्तथा।।
पूर्णपात्र विमोकाद्यग्न्यर्चनान्तेऽभिषेचनम्।
मानस्तोकेति भूतिश्च देवपूजा विसर्जने।।
श्रेयोग्रहोदक्षिणादि दानं कर्मेश्वरार्पणम्।
क्रमोयमुत्तराङ्गानां प्रायःस्मार्तेष्विति स्थितिः।। पृ. ११।।

०३. अग्निस्तु मारुतोनाम गर्भाधाने विधीयते।
पावमानःपुंसवने सीमन्ते मङ्गलाभिधः।।
प्रबलो जातसंस्कारे पार्थिवोनाम कर्मणि।
अन्नाशने शुचिः प्रोक्तः सभ्यःस्याच्चौल कर्मणि।।
व्रतादेशे समुद्भवो गोदानादौ सूर्यः विवाहे योजकः।
आवसथ्ये द्विजोनाम प्रायश्चित्तेविटः स्मृतः।
पाकयज्ञेषु पावकः पैतृके कव्यवाहनः।। पृ. ११।।

दैव्ये हव्यवाहनः। शान्तिके वरदः । पौष्टिके बलवर्धनः । मृतादाहे क्रव्यादः। पूर्णाहुत्यां मृडः। अभिचारे क्रोधोग्निः। वश्यार्थे पावकः। वनदाहे दूषकः। कुक्षौ जठरः। वैश्वदेवे रुक्मः। लक्षहोमे वह्निः। कोटिहोमे हुताशनः। समुद्रे वाडवः। अग्निहोत्रे गार्हपत्यो दक्षिणाग्निराहवनीयश्चेतित्रयः।

ज्ञात्वैवमग्निनामानि सर्वकर्माणि कारयेत्।। पृ. ११।।

**पञ्चरात्रम्।**

०१. रजांसिपञ्चवर्णानि मण्डलार्थं तु कारयेत्।
शालितंडुलचूर्णेन शुक्लंवायवसंभवम्।।
रक्तंकुसुंभसिंदूर गैरिकादिसमुद्भवम्।
हरितालोद्भवंपीतं रजनीसंभववं तु वा।।
कृष्णंदग्धयवश्चापि हरितंपीतमिश्रितम्।। पृ. ०९।।

**शान्तिकमलाकरः।**

०१. आदौ प्रणवमुच्चार्य व्याहृती:प्रणवान्विता:।
मन्त्रादौ प्रणव: कार्यो मन्त्रान्ते प्रणव: पुन:।।
ततो व्याहृति संयुक्तस्त्वं ते च प्रणव: सदा।।

अथवा

आदौ प्रणवमुच्चार्य सप्तव्याहृतयस्तत:।
मन्त्रादौ प्रणव: कार्यो मन्त्रान्ते प्रणव: पुन:।।
अंतर्विसर्गकङ्कुर्याच्छ्रौतेस्मार्ते च कर्मणि।
मन्त्रादौ प्रणवस्तद्वदेवस्वामीय भाषणात्।। पृ. ११।।

**आचारादर्शः।**

०१. नरक्तमुल्वणं वासो न नीलं च प्रशस्यते।
मलाक्तं च सदा हीनं वर्जयेदम्बरं बुध:।। पृ. १३।।

**प्रयोगचूडामणिः।**

०१. हताश्च ब्रह्मद्विषेत्यादीनां शाम्यंत्वित्यंतानां पूर्वस्यां जल प्रक्षेप:।(पृ. ३७)

**वृद्धमनुः।**

०१. अलाभे भिन्न कालानां नान्दीश्राद्धत्रयं बुध:।
पूर्वेद्युर्व्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम्।। पृ. ४७।।

**रेणुकाकारिका।**

०१. पुत्रजन्मनिमित्ते तु तत्काले निशि वा दिवा।
भुक्तोव्रतोपवासी वा वृद्धिश्राद्धं तु कारयेत्।। पृ. ४७।।

**शान्तिसारः।**

०१. समं ततश्च सिद्धार्थान्क्षिपेद्रक्षोघ्नमन्त्रत:।
सर्वत: पञ्चगव्येन प्रोक्षयेद्यागमण्डपम्।।
आपोहिष्ठात्र्यृचेनैव तत: स्वस्त्ययनं जपेद्।। पृ. ५६।।

**कल्पवल्ली।**

०१. रुग्णावृद्धाप्रसूता च वन्ध्या सन्धिन्यमेध्यभुक्।
मृतवत्सा च नैतासां ग्राह्यं मूत्रं शकृत् पयः।।
रेखात्रयमुदक्संस्थं प्रागग्रंस्थण्डिलावधि।
अथवैतत् प्रकुर्वीत द्वादशाङ्गुलमायतम्।।
अवोक्षणं तु कर्तव्यमुत्तनेनैव मुष्टिना।
तद्वदभ्युक्षणं चैव कर्त्तव्यं न्युब्जमुष्टिना।।
कुलालचक्रघटितं मृन्मयं पात्रमासुरम्।
तदेव हस्तघटितं स्थाल्यादि दैविकं स्मृतम्।।
आनीतपात्रयोरेवल्पावनन्तत्क्षणे भवेत्।
नोचेकर्तुर्मनस्तापः स्यात्सन्तापस्तयोरपि।। पृ. ५६।।

०२. एवमासादनं कृत्वा पवित्रच्छेदनैः कुशैः।
अङ्गुष्ठाङ्गुलिपर्वभ्यांञ्छिंद्यात्प्रादेश संमित।।
प्रादेशमात्रमुत्सार्योत्पवनं तु विधीयते।
उद्दिङ्गनं तु कर्तव्यमूर्ध्वमूर्ध्वं प्रमाणतः।। पृ. ७४-७५।।

**कुशकण्डिका।**

०१. पुरा इन्द्रेण वज्रेण हतो वृत्रो महासुरः।
व्यापितामेदसापृथ्वी तदर्थमुपलेपनम्।।
य भ्रमन्ति पिशाचाद्या अन्तरिक्ष निवासिनः।
तेषां प्रहरणार्थाय समुद्धः कथितो बुधैः।। पृ. ५६।।

**पुराणानि।**

**भविष्यपुराणम्।**

संस्काराणां विवेचनेन सह यथावश्यकं पुराणानामपि प्रामाण्यम् ऋषिभट्ट स्वीकरोति। अतएव यस्य कस्याऽपि विधेःसंकल्प अङ्गभूत इति स्पष्टयन् स लिखति यत् संकल्पेन विनाकर्मकरणे दोष उक्तो भविष्ये।

०१. संकल्पेन विना कर्म यत्किंचित्कुरुते नरः।
फलं चाप्यल्पकं तस्य धर्मस्यार्धक्षयो भवेत।।
संकीर्त्य मासपक्षादीन्निमित्तानि तथैव च।
इदं कर्म करिष्येहमिति संकल्पमाचरेत्।।

अनुल्लंघ्यस्वशाखोक्त विधिंकर्मसमाचरेत्।
कर्मान्यथाकृतं ज्ञात्वा तावदेव पुनश्चरेत्।।
प्रधानस्याक्रियायान्तु साङ्गतत्पुनराचरेत्।
तदङ्गाकरणे  प्रायश्चित्तमेवनकर्म तत्।। पृ. ०३।।

०२. आप: क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा।
यवा: सिद्धार्थकाश्चैव अर्घोष्टांग: प्रकीर्तित:।।
सुवर्णं रजतं ताम्रमारकूटं तथैव च।
लोहंत्रपुतथासीसं धातव: सप्तकीर्तिता:।। पृ. ०९।।

०३. पलद्वयं तु प्रसृतं द्विगुणंकुडवंमतम्।
चतुर्भि: कुडवै:प्रस्थ:प्रस्थाश्चत्वार आढक:।।
आढकैस्तेश्चतुर्भिश्च द्रोणस्तु कथितो बुधै:।
कुम्भो द्रोणद्वयंशूर्प:खारिद्रोणास्तु षोडश।।
पञ्चकृष्णालकोमाषस्तैश्चत:षष्टिभि: पलम्।
पलैर्द्वादशभि:प्रस्थो मागधेषु प्रकीर्तित:।
आढकस्तैश्चतुर्भिश्च द्रोण:स्याच्चतुराढक:।। पृ. १०।।

०४. नीलीरक्तेन वस्त्रेण यत्कर्मकुरुते द्विज:।
स्नानंदानंतपोहोम: स्वाध्याय: पितृतर्पणम्।।
वृथातस्यमहायज्ञा नीलीरक्तस्यधारणात्।। पृ. १४।।

**ब्रह्मपुराणम्।**

०१. शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवा:।
अश्वत्थोदुंबरौ बिल्वश्चंदन: सरलस्तथा।।
शालश्च देवदारुश्च खादिरश्चेति याज्ञिका:।। पृ. ०६।।

०२. यथोक्तवस्त्वसंपत्तौ ग्राह्यंतदनुकारियत्।
यवानामिवगोधूमा व्रीहीणामिवशालय:।।
आज्यंद्रव्यमनादेशे जुहोतिषु विधीयते।
मन्त्रस्य देवतायाश्च प्रजापतिरितिस्थिति:।।
प्रणवादिन मोन्तञ्च चतुर्थ्यं तं च सत्तम।
देवताया: स्वकंनाम मूलमन्त्र उदाहृत:।। पृ. ०७।।

०३. अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवा:।
पञ्चभृंगाइतिप्रोक्ता: सर्वकर्मसुशोभना:।। पृ. ०९।।

**वायुपुराणम्।**

०१. कण्डनं पेषणं चैव तथैवोल्लेखनं तथा।
सकृदेवपितृणांस्याद्देवानां तत्त्रिरुच्यते।। पृ. ०६।।

**मत्स्यपुराणम्।**

०१. होमादिग्रहपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते।। पृ. ०६।।

०२. पद्मासन:पद्मकर: पद्मगर्भसमद्युति:।
सप्ताश्वरथसंस्थश्च द्विभुज:स्यात्सदा रवि:।।
श्वेत: श्वेताम्बरधरो दशाश्व: श्वेतवाहन:।
गदापाणिर्द्विबाहुश्च कर्तव्यो वरद: शशी।।
रक्तमाल्याम्बरधर: शक्तिशूल गदाधर:।
चतुर्मुखो मेषगमो वरद: स्याद्धरासुत:।।
पीतमाल्याम्बरधर:कर्णिकारसमद्युति:।
खड्गचर्मगदापाणि: सिंहस्थो वरदो बुध:।।
देवदैत्यगुरुतद्वत् पीतश्वेतौ चतुर्भुजौ।
दण्डिनौ वरदौ काव्यौ साक्षसूत्र कमण्डलू।।
इन्द्रनीलद्युति: शूली वरदो गृध्रवाहन:।।
बाणबाणासनधर: कर्तव्योर्कसुत: सदा।
करालवदन: खड्गचर्मशूलीवरप्रद:।।
नीलसिंहासनस्थश्च राहुश्चात्र प्रशस्यते।
धूम्राद्विबाहव: सर्वे गदिताविकृतानना:।।
गृध्रासनगतानित्यं केतव:स्युर्वरप्रदा:।
सर्वे किरीटन: कार्या ग्रहलोका हितावहा:।।
स्वाङ्गुलेनाच्छ्रिता: सर्वे शतमष्टोत्तरावधि।
उत्पन्नोर्क: कलिङ्गेषु यमुनायां च चन्द्रमा।।
अङ्गारकस्त्ववन्त्या च मगधायां हिमांशुज:।
सैन्ध्वेषु गुरुर्जात: शुक्रो भोजकटे तथा।।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराठिनापुरे।

अन्तर्वेद्यां तथा केतुरित्येताग्रह भूमयः।।
आदित्यः काश्यपेयस्तु आत्रेयश्चन्द्रमा भवेत्।
भारद्वाजो भवेद्भौम स्तथात्रेयश्च सोमजः।।
गुरुश्चैवाङ्गिगिरो गोत्रोः शुक्रो वै भार्गवस्तथा।
शनिः काश्यप एवाथ राहुः पैठिनसः स्मृतः।।
केतवोजैमिनीयाश्च ग्रहगोत्राणि कीर्तयेत्।
सकारेण तु वक्तव्यं गोत्रं सर्वत्र धीमता।।
सकारः कुतुपोज्ञेयस्तस्माद्यत्नेनतं वदेत्।। पृ. ६२।।

०३. मूर्धानन्दिवमन्त्रेणावशेषघृतधारया।
दद्यादुत्थाय पूर्णांवै नोपविश्य कदाचन।।[२५] पृ. ६५।।

**<u>स्कन्दपुराणम्। (मदनरत्ने)</u>**

०१. हरिद्रांकुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा।
कूर्पासकं च ताम्बूलं माङ्गल्याभरणं शुभम्।। पृ. ०८।।

०२. षड्भागकुष्ठं द्विगुणोगुडश्च लाक्षात्रयंपञ्चनखस्यभागः।
हरीतकीसर्जरसंसमासं भागैकमेकं त्रिलवंशिलाजम्।।
धनस्यचत्वारिपुरस्यचैको <u>धूपोदशाङ्गः</u> कथितो मुनीन्द्रैः।। पृ. ०९।।

०३. जन्मभूर्गोत्रमग्निश्च वर्णस्थानमुखानि च।
योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तेनावमानिताः।।
रविः सोमो महीपुत्रो बुधोजीवोथभार्गवः।
शनैश्चरो राहुकेतू नव खेटाः प्रकीर्तिताः।।
रविभौमौरक्तवर्णौ श्वेतचन्द्रस्तुभार्गवः।
बुधजीवौपीतवर्णौ कृष्णौमन्दविधुन्तुदौ।।
धूम्रवर्णा केतवश्च ग्रहवर्णाः प्रकीर्तिताः।।
रविभौमौताम्रमयौ राजतौसोमभार्गवौ।
बुधजीवौ स्वर्णमयौ लौहौमन्दविधिन्तुदौ।।
केतुः कांस्योथवासीसः प्रतिमा धातवः स्मृताः।। पृ. ६१।।
वृत्तमण्डलमादित्ये चतुरस्त्रं निशाकरे।
महीपुत्रे त्रिकोणं तु बुधेवै बाणसन्निभम्।।

---

[२५] अयं श्लोकोग्निपुराणेऽस्तीत्यतो न लिखितः।

गुरौ तु पट्टिशाकारं पञ्चकोणं तु भार्गवे।
धनुर्निभं शनौज्ञेयं शूर्पाकारं तु राहवे।।
केतवे तु ध्वजाकारं मण्डलानि प्रकल्पयेत्।। पृ. ६२।।

**गरुडपुराणम्।**

०१. कर्पूरमगरुश्चैव कस्तूरीचंदनं तथा।
कंकोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः।।
कुष्ठमांसीहरिद्रेद्वेमुरांशैलेयचन्दनम्।
वचाचंपकमुस्तां च सर्वौषध्योदशस्मृताः।। पृ. ०९।।

**नारदपुराणम्।**

०१. कार्षापणो दक्षिणस्यां दिशिरौप्यः प्रवर्तते।
पणैर्निबद्धः पूर्वस्यां षोडशैवपणाःसतु।। पृ. १०।।

**वराहपुराणम्।**

०१. पलद्वयं तु प्रसृतं मुष्टिरेकपलं स्मृतम्
अष्टमुष्टि भवेत्किंचित्किंचिदष्टौ तु पुष्कलं।।
पुष्कलानि च चत्वारि आढकः परिकीर्तितः।
चतुराढको भवेद्द्रोण इत्येतन्मान लक्षणं।। पृ. ११।।

०२. सुस्नातः सम्यगाचांतः कृतसंध्यादिकक्रियः।
कामक्रोधविहीनश्च पाखण्डस्पर्श वर्जितः।।
जितेन्द्रियः सत्यवादी सर्वकर्मसु शस्यते।। पृ. १३।।

दानमानम्। ०३. वर्धयित्वा धनं यस्तु तस्माद्ग्रासमपीहयः।
नखादेत्संग्रहपरो धनिकः स उदाहृतः।।
पोषणीय कुटुम्बस्य निर्वाहोयावता भवेत्।
तावदेव सुखं यस्तु लभते प्रतिवार्षिकम्।।
ऋणं यस्य तु नास्त्येव समध्यम उदाहृतः।
धनं पूर्वापरं यस्य वर्तते बहु सङ्चया।।
अधिकस्यार्जको यःस्यात्समहाधन उच्यते।
सदाचाररतो विप्रो धनार्जन पराङ्मुखः।।
कुटुम्बयत्नमतिकः स दरिद्र इति स्मृतः।

यस्यस्यादशनाभाव: सदाचाररतस्यहि ।।
महादरिद्र: सभवेद्वासो धान्य विवर्जित:।
वर्धयित्वा धनं यस्तु ग्रासं वार्षिकमर्जयेत्।।
स वै धन्य इति प्रोक्तश्चैकवर्षेण य: पुमान्।
वर्षद्वयमितग्रासं स हि धन्यतर: स्मृत:।।
अधिकस्यार्जको य: स्यात्सधन्यतमईरित:।
धनेनैव विना यस्तु ग्रासं वार्षिकमर्जयेत्।।
स वै धीर इति प्रोक्तस्तारतम्यं च पूर्ववत्।।
व्याहृतीनां सहस्रस्य होमे शुष्कं द्विजेर्पयेत्।
माषमात्रं सुवर्णं तु लक्षहोमेशतंयवा।।
धनिकोद्विगुणंदद्यात्त्रिगुणं तु महाधन:।
यवार्धं तु दरिद्रेण दातव्यं पुण्यलब्धये।।
दद्यान्महादरिद्रस्तु तदर्धं शुल्क मेव च।। पृ. १५।।

वामनपुराणस्य सन्दर्भं प्रस्तुत्य स कथयति यत् सर्वकर्मारम्भे सर्वमङ्गलमाङ्गल्यं नारायणं स्मरेत्।

**<u>मार्कण्डेयपुराणम्।</u>**

०१. इक्षुराप: पयोमूलं तांम्बूलं फलमौषधम्।
भक्षयित्वापि कर्तव्या: स्नानदानादिका: क्रिया:।। पृ. १२।।

०२. अन्यदेवभवेद्वास: शयनीयेनराधिप।
अन्यदेव च देवानामर्चायामन्यदेवहि।।
अन्यच्च लोकयात्रायामन्यदीश्वर दर्शने।। पृ. १४।।

०३. कुशपाणि: सहातिष्ठेद्ब्राह्मणो दम्भ वर्जित:।
स नित्यंहन्तिपापानि तूलराशिमिवानल:।। पृ. १५।।

०४. चतुर्भिर्दर्भपिञ्जुलैर्ब्राह्मणस्य पवित्रकम्।
एकैकंन्यूनमुद्दिष्टं वर्णेवर्णे यथाक्रमम्।।
सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रन्थितंनवा।
चतुर्भि: शान्तिके कार्यं पौष्टिके पञ्चभिस्तथा।।
सप्तपत्रा: शुभादर्भास्तिलक्षेत्रसमुद्भवा:।
अप्रसूता: स्मृतादर्भा: प्रसूतास्तु कुशा: स्मृता:।।
समूला: कुतपा: प्रोक्ताश्छिन्नाग्रास्तृणसंज्ञिता:।

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणाहविरग्नयः।।
अयातयामान्येतानिनियोज्यानि पुनःपुनः।
चितौदर्भाः पथिदर्भायेदर्भा यज्ञभूमिषु।।
स्तरणासनपिण्डेषु षट्कुशान्परिवर्जयेत्।। पृ. ०४।।

**अग्निपुराणम्।**

०१. स्नानानामपि सर्वेषां वारुणे न च मानवः।
कर्तुमर्हति कर्माणि विधिवत्सर्वदा द्विजः।।
संध्यावंदनं विना कर्म न कर्तव्यमित्युक्तं तत्रैव।
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत्कुरुते कर्म न तस्य फलमश्नुते।। पृ. १३।।

**विष्णुपुराणम्।**

०१. होमदेवार्चनाद्यासु क्रियास्वाचमने तथा।
नैकवस्त्रः प्रवर्तेत द्विजवाचनिके तथा।। पृ. १४।।

**भविष्योत्तरपुराणम्।**

०१. एकैकस्यावाहनादि पुष्पाञ्जल्यन्तपूजनम्।
समाप्य च ततोन्यस्य इति कण्डोनुकीर्तितः।।[२६]
सर्वेषामेकतन्त्रैण रव्यादीनां यथाविधि।
पूजनं तु प्रकर्तव्यं पदार्थोनु प्रकीर्तितः।।
गणाधिपतयेदेयात् प्रथामां तु वराहुतिम्।
अन्यथा विफलं विप्र भवतीह न संशयः।।
आघारावाज्यभागौ तु आज्येनैव यथाक्रमम्।
एकैकस्याहुतिंहुत्वा अन्यहोमस्ततः परम्।।
केवलं ग्रहयज्ञश्च सर्वशान्त्यादिकेषु च।
प्रथमोयुतहोमश्च द्वितीयो लक्षहोमकः।।
तृतीयः कोटिहोमः स्यात्त्रिविधो ग्रहयज्ञकः।
अष्टोत्तरसहस्रं तु शतमष्टाधिकं तथा।।
अष्टाविंशतिसङ्ख्याकैरेकैकस्य तु होमयेत्।

---

[२६] इमे श्लोका हेमाद्रौ समृतिसङ्ग्रहे च प्राप्यन्ते। अतस्तत्र पुनर्न लिखिताः।

कोटिलक्षायुतमखे रव्यादीनां यथाक्रमम्।।
प्रणवादिश्तल्लिङ्गः स्वाहाकारान्त एव च।
जुहुयात्सर्वदेवानां वेद्यां ये चोपकल्पिताः।। पृ. ६४।।

**विष्णुधर्मोत्तरपुराणम्।**

०१. तिलकं कुंकुमेनैव सदा मङ्गलकर्मणि।
कारयित्वा सुमतिमान्नश्वेतचंदनंमृदा।।
मन्त्रेणोङ्कार पूतेन सवाहान्तेन विचक्षणः।
स्वाहावसाने जुहुयाद्धयायन्वै मन्त्र देवताम्।।
मन्त्रतिया वह्निजाया सा तु मन्त्र स्वरूपिणी।
तदंतेन्यां प्रयुञ्जीत सा कर्माङ्गतया स्मृता।।
आदौद्रव्य परित्यागः पश्चाद्धोमो विधीयते।। पृ. ०५।।
इति देवयाज्ञिकः।

०२. दध्यलाभेपयःकार्यं मध्वलाभे तथा गुडः।
घृतप्रति निधिं कुर्यात्पयोवादधिवा नृप।। पृ. ०७।।

०३. वज्रमाणिक्यवैडूर्यपुष्परागेन्द्रनीलकम्।
पञ्चत्नमितिख्यातं नारदेनमहर्षिणा।। पृ. ०८।।

०४. हेमराजतताम्राश्च मृन्मयालक्षणान्विताः
यात्रोद्वाहप्रतिष्ठासु कुम्भाः स्यरभिषेचने।।
पञ्चाशाङ्गुलवैपुल्यमुत्सेधः षाडशाङ्गुलः।
द्वादशाङ्गुलमूलंस्यान्मुखमष्टाङ्गुलं भवेत्।।
धातुजंमृन्मयंवापि कलशं यत्प्रतिष्ठितम्।
तद्वत्प्रादेशदीर्घं च चतुरङ्गुलमुच्छ्रितम्।।
सिततण्डुलपूर्णेन पात्रेणापिहितागनम्।।
यवगोधूमधान्यानि तिलाः कङ्गुश्चमुद्गकाः।
श्यामाकाश्चणकाश्चैव सप्तधान्यमुदाहृतम्।।
अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ।
राजद्वाराच्चगोष्ठाच्च मृदमानीय निक्षिपेत्।। पृ. ०९।।

०५. पलं च कुडवः प्रस्थ आढको द्रोण एव च।
धान्यमानेषुबोधव्याः क्रमशोमीचतुर्गुणाः।।

द्रोणैः षोडशभिः खारीविंशत्या कुंभ उच्यते।। पृ. ११।।

**पुराणान्तरे।**

कतिचित्स्थलेषु पुराणस्य नामोल्लेखो न कृतः किन्तु पुराणान्तरे इति लिखितम्। तद्यथा

०१. वित्तशाठ्यंनरो यस्तु धने सति करोति हि।
सनाप्नोति फलं तत्र चौर एव प्रकीर्तितः।। पृ. १६।।

**संकीर्णग्रन्थाः।**

**छन्दोगपरिशिष्टम् (नाम्ना सामवेदानुसारी ग्रन्थः)।**

०१. यत्रदिङ्नियमोनास्ति जपादिषु कथंचन।
तिस्रस्तत्रदिशः प्रोक्ता ऐंद्रीसौम्यापराजिता।। पृ. ०४।।

इत्यस्मात् संदर्भात् सर्वसामान्यो होमपूजादिविषयको नियमो ज्ञायते यत् एतेषु कर्मसु उदीचि(अपराजिता)दिशा ऐशानी(सौम्या)दिशा प्राची(ऐंद्री)दिशा ग्राह्याः।

आसीनः प्रह्व ऊर्ध्वोवा नियमोयत्रनेदृशः।
तदासीनेनकर्तव्यं न प्रह्वेणनतिष्ठता।।
पंचाशद्भिर्भवेद्ब्रह्मा तदर्धेनतुविष्टरः।
दक्षिणावर्तकोब्रह्मा वामा वर्तस्तुविष्टरः।।
वेण्या वा वर्तुलंकृत्वा वेण्यग्रेग्रन्थिबंधनम्।
अनंतर्गर्भकंसाग्रं कौशंद्विदलमेव च।।
प्रादेशमात्रंविज्ञेयं पवित्रं यत्र कुत्रचित्।। पृ. ०४।।

विष्टर इत्यासनम्। तत्र दर्भसंख्या विषयकान् श्लोकान् ऋषिभट्टः मार्कण्डेयपुराणस्य चतुर्भिर्दर्भपिञ्जुलैरिति।। सर्वेषां वा भवेद्द्वाभ्यामिति।। सप्तपत्रा इति।। समूलाः कुतपा इति।। अयातयामा० इति।। (उपरि निर्दिष्टानां)श्लोकानां प्रामाण्येनैवं लिखति।

०२. यन्नाम्नात्वं स्वशाखायां पारक्यमविरोधिवत्।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्।।
बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम्।
तस्यतावति शास्त्रार्थे कृते सर्वं कृतं भवेत्।।

प्रवृत्तमन्यथा कुर्याद्यदिमोहात्कथंचन।
यतस्तदन्यथांभूतं ततएव समापयेत्।।
समाप्ते यदिजानीयान्मयैतदन्यथाकृतम्।
तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः।।
प्रधानस्याक्रियायत्र साङ्गंतत्क्रियते पुनः।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न्न च तत्क्रिया।। पृ. ०६-०७।।

**लीलावतीगणितशास्त्रम्।**

०१. वराटकानां दशकद्वयं यत् साकाकिणीताश्चपणश्चतस्त्रः।
तेषोडशद्रम्मइहावगम्यो द्रम्मैस्तथाषोडशभिश्चनिष्कः।। पृ. १०।।

**अन्ये ग्रन्थाः।**

**परशुरामः।**

०१. सर्वौषधीगंधचूर्णैयुक्तैः कृष्णतिलामलैः।
उद्वर्त्यांगानितैलेन चंपकादि सगन्धिना।।
तैलेन मङ्गलस्नानं कुर्वीत ब्राह्मणैःसह।। पृ. १३।।

**व्याघ्रपादः।**

०१. काषायं कृष्णवस्त्रं च मलिनं केश दूषितम्।
जीर्णं च संधितंवापि पारक्यं मैथुने धृतम्।।
छिन्नाग्रमुपवस्त्रं च कुत्सितं धर्मतो विदुः।। पृ. १३।।

०२. नैकवस्त्रोद्विजः कुर्याद्भोजनं च सुरार्चनम्।
तत्सर्वमसुरेनद्राणां ब्रह्माभागमकल्पयत्।। पृ. १४।।

**योगियाज्ञवल्क्यः।**

०१. अभावे धौतवस्त्रस्य शाणक्षौमादिकानि च।
कुतपंयोगपट्टं वा विवासायेन वै भवेत् ।। पृ. १४।।

**विश्वामित्रः।**

०१. यज्ञोपवीतेद्वेधार्ये श्रौतेस्मार्ते च कर्मणि।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते।। पृ. १४।।

**पारस्करगृह्यसूत्रम्।**

०१. एकंचेत्पूर्वस्योत्तरवर्गेण प्रच्छादयितेति।
शिखाबन्धश्चोक्तश्चतुर्विंशतिमते।।
मध्ये तु वह्वृचाश्चैवनिबध्नीयः शिखां ततः।
मध्यन्दिनाश्चये विप्राः पार्श्वे दक्षिणतः क्रमात्।।
वामपार्श्वे तु बध्नीयुर्येविप्राः सामगायनाः।। पृ. १४।।

**बृहद् याज्ञवल्क्यः।**

०१. विनाशब्दं जपोयस्तु चलज्जिह्वाद्विजच्छदः।
उपांशुं तं जपं प्राहुर्मनसा मानसं बुधाः।।
वर्णः स्पष्टतरोच्चार्यो नासाश्वासावधीति वा।
सखश्वासावधिः श्रृण्वन्नभिषेकार्चनेषु च।। पृ. १५।।

**कर्मप्रदीपः (आचारमुखे)।**

०१. आवाहनासनंपाद्यमर्घमाचमनीयकम्।
स्नानं वस्त्रोपवीतं च गन्धमाल्यान्यनुक्रमात्।।
धूपंदीपं च नैवेद्यं ताम्बूलं च प्रदक्षिणा।
पुष्पाञ्जलिरितिप्रोक्ता उपचारास्तु षोडश।।
फलेन सुफलावाप्तिः साङ्गता दक्षिणार्पणम्।।
गन्धपुष्पेधूपदीपौ नैवेद्य इति पञ्चकम्।
पञ्चोपचारमाख्यातं पूजने तत्त्वविद्बुधैः।।
ततः पञ्चामृताभ्यङ्गमङ्गस्योद्वर्त्तनं तथा।
मधुपर्कं परिमलद्रव्याणिविविधानि च।।
पादुकां दोलनादर्शं व्यजनं छत्रचामरे।
वाद्यार्तिक्यं नृत्यगीत शय्याराजोपचारकाः।। पृ. १५।।

**महाभारतम्।**

०१. वेदोपनिषदेचैव सर्वकर्मसु दक्षिणा।
सर्वत्रैवतुचोद्दिष्टा भूमिर्गावोथकाञ्चनम्।। पृ. १६।।

**बैजवापः।**

०१. शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभम्।
अमङ्गलंतद्यत्नेन देवकार्ये विवर्जयेत्।। पृ. १६।।

**गदाधरः।**

ब्राह्मणभोजनम्। ०१. गर्भाधानादिसंस्कारे ब्राह्मणान्भोजयेद्दश।
शतं विवाहसंस्कारे पञ्चशान्मेखलाविधौ।।
आवसथ्ये त्रयस्त्रिंशच्छ्रौताधाने शतात्परम्।
अष्टकं भोजयेद्भक्त्या तत्तत्संकस्कार सिद्धये।।
आग्रयणे प्रायश्चित्ते ब्राह्मणान्दश पञ्च च।। पृ. १६।।

**नारदसंहिता/नारदपुराणम्।**

ईश्वरार्पणम्। ०१. विष्ण्वर्पितानि कर्माणि सफलानि भवन्ति हि।
अनर्पितानि कर्माणि भस्मनीवहुतंहविः।।
नित्यंनैमित्तिकंकाम्यं यच्चान्यन्मोक्ष साधनम्।
विष्णोःसमर्पितं सर्वं सात्त्विकं फलदं भवेत्।।
सप्तगोत्राणि। पितुर्मातुश्चभार्या या भगिन्या दुहितुस्तथा।
पितृष्वसृमातृष्वस्रोर्गोत्राणां सप्तकं स्मृतम्।।
एकोत्तरशतकुलानि। चतुर्विंशतिविंशच्च षोडशद्वादशानिह।
रुद्रादशवसुश्चैव कुलमेकोत्तरं शतम्।।
आस्यंनासाक्षिकर्णौ च नाभिहृत्कम्भुजौ स्पृशेत्।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्।। पृ. १७।।

०२. प्रधानं पायसं प्रोक्तं सघृतं च सशर्करम्।
अष्टोत्तरशतं चैव जुहुयात्तिलसर्पिषा।। पृ. ८१।।

**प्रतिष्ठाकल्पः।**

०१. शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ।
प्रत्यङ्मुखौ सोमशनी शेषा दक्षिणतोमुखाः।।
एतादृक्दिङ्मुखाः खेटाः स्वस्वलोके निवासिनः।
यजमानात्माभिमुखाः सर्वेसंस्थापयन्ति च।।
पूज्यपूजकयोर्मध्ये यत्र प्राचीं प्रकल्पयेत्।
तत्र सम्मुखः संस्थाप्य इतिन्यायो यथातथम्।। पृ. ६३।।

**मदनरत्नसङ्ग्रहे।**

०१. ग्रहस्यदक्षिणेभागे स्थापयेदधिदेवताः।
ग्रहस्य वामपार्श्वे तु स्थाप्याः प्रत्यधिदेवताः।। पृ. ६३।।

अधिदेवतानामानि। ईश्वरं च उमां चैव स्कन्दं विष्णुं तथैव च।
ब्रह्माणमिन्द्रं तु यमं कालं चैव तु अष्टमम्।।
चित्रपुप्तं तु नवमं कीर्तिताऽऽधिदेवताः।। पृ. ६३।।

प्रत्यधिदेवतानामानि। अग्निश्चैव तथा आपः पृथिवी विष्णुरेव च।
इन्द्रश्चैव तथेन्द्राणी प्रजापतिस्तथेव च।।
सर्पश्चैव तु ब्रह्मा च एताः प्रत्यधिदेवताः।। पृ. ६३।।

**शान्तिरत्नम्।**

०१. तिलाः कृष्णाघृताभ्यक्ताः किञ्चिद्यवसमन्विताः।
होमे व्याहृतिभिश्चैव सर्वस्तत्र विधीयते।। पृ. ६५।।

**शान्तिमयूखः।**

०१. मध्येऽपि गन्धपुष्पादीन्दद्यादग्नेर्न संशयः।
बहिर्नैवेद्यमात्रं तु दातव्यमिति निश्चयः।। पृ. ७७।।

**ज्योतिषग्रन्थाः।**

**ज्योतिर्निबन्धे।**

०१. दुर्गाहोमविधौ विवाहसमये सीमन्त पुत्रोत्सवे

गर्भाधानविधौ च वास्तुसमये विष्णोः प्रतिष्ठादिषु।
मौञ्जीबन्धनवैश्वदेवकरणे संस्कारनैमित्तिके
होमोनित्यभवेन्नदोषकथितं चक्रं च वह्नेरपि।। पृ. १७।।

**<u>ग्रहरत्नावली।</u>**

०१. मण्डलव्यासः कथितः सूर्यस्यद्वादशाङ्गुलः।
चतुरङ्गुलःसोमस्य त्र्यङ्गुलोलोहितस्य च।।
चतुरङ्गुलःसोमस्य गुरोश्चैव षडङ्गुलः।
नवाङ्गुलस्तुशुक्रस्य अर्कपुत्रस्य द्वयङ्गुलः।।
द्वादशाङ्गुलो राहोश्च केतोश्चैव षडङ्गुल।
मध्ये तु भास्करं विद्याच्छशिनं पूर्व दक्षिणे।।
दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेपि च।
उत्तरे तु गुरुं विद्याद्भार्गवं पूर्वतोन्यसेत्।।
शनिं पश्चिमतः स्थाप्य नैर्ऋत्ये राहुमेव च।
केतुं वायव्यकोणे च ग्रहस्थानानि कीर्तयेत्।। पृ. ६३।।

एतावतोपरिसंदृग्धैः पद्यैः ऋषिभट्टस्य वैदुष्यं प्रकाशितं तथापि तस्य पाण्डित्य विषयेऽपि स्पष्टमिदं यतोनेन समुद्धृत पद्यान्तर्गतानां विषमपदानां सरलोर्थोपि कदाचिच्च सरला व्याख्यापि प्रदत्ता। तद्यथा मङ्गलस्नान विषयके यज्जलेशुष्कवस्त्रेणेति पद्ये शुष्कपदस्याऽर्थं विवृणवानो लिखति सप्तवाताहतमपिशुष्कम् इति।

अथ च नतद्देवागमंकर्महव्यकव्येष्वथोहविरित्यत्र बौधायन पद्ये ऋषिभट्टो लिखति–भवेदितिशेषः।

गणेशगौर्यादिचतुर्दशमातृकापूजनप्रसङ्गे यद्यपि केचन मातृः लोकमातृश्च सङ्गृह्य षोडशमातृकाः परिगणयन्ति। तदयुक्तमिति ब्रह्मनित्यकर्मसमुच्चयकाराणां स्पष्टतरो निर्देशः। एष एव संस्कारभास्करकाराः निर्दिशन्ति यद् अत्र चतुर्दशसमाहारान्मातरो लोकमातर इति सर्वाषां विशेषणम्।
अत्रैव सर्वासां लोकमातृणां लोकमातृणाम् आवाहन स्थापननादौ मन्त्राणां ग्रहणं संस्कारभास्करकारैर्न कृतं। एतन स्वीयया विद्वत्तया क्रीयाबृहत्वं समयाधिक्यं च रक्षिते।

मातृकापूजनविधौ मत्स्याद्याः सप्त जलमातरः[२७] ब्राह्म्याद्या सप्त स्थलमातरः[२८] जयन्ताद्याः पञ्च द्वारमातरः[२९] कीर्तिलक्ष्म्याद्या च गृहमातरः[३०] आवाहयन्ते पूजयन्ते च संसकारभास्करकारा इत्यधिकं पठन्ति।

---

[२७] मत्सीकूर्मी च वाराहि माण्डूकी मकरी तथा। ग्रहकी क्रौंचकी चैव सप्तैता जलमातरः।। पृ. ४४ब।।
[२८] ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चतथेनद्राणी चामुण्डाः सप्तमातरः।। पृ. ४५अ।।

मातृकापूजनावसरे तासां स्थापनान्ते घृतेन कुड्ये वा नागवल्लिदले वा पञ्चधारा अवश्यं पातनीया इति संस्कारभास्करकाराः स्पष्टं सूचयन्ति।

कुड्यलग्ना वसोर्धाराःसप्तधाराघृतेन तु।
कारयेत् पञ्चधारा वा नातिन्यूनाः कदाचन।। पृ. ४६ब।।

**विषमपदव्याख्या।**

कुशकण्डिकाविधेर्व्याख्यानावसरेऽवरोत्तरमुत्तरं हवींषीति कात्यायनसूत्रस्य दुदह पदयोः श्रपिता-दग्धयोः स्विन्नाकठिनावित्यर्थौ दर्शयन्तः संस्कारभास्करकारा अदग्धोकठिनः शुभ इत्युक्त्वा कारिकाकारस्य मतं निर्दिशन्तो लिखन्ति यद् न चातिशिथिलः पच्योन चरुश्चारसस्तथेति।

अन्नप्राशनसंस्कारविधौ शिशुं षड्रसप्राशनसमये यद्यपि दत्तकविधेः प्रसङ्गोऽनुचितो भाति तथापि संस्कारभास्करास्तं समग्रतया (पृ. १३०-१३३) विवेचयन्ति। तत्र च कुमारदत्तकविषये कन्या-दत्तकविषये स्त्रिशूद्रसन्ततिविषयके च विधिभिन्नत्वं प्रदर्शितम्।

विवाहसंस्कारविधौ ये येऽनाश्रमेणस्तेषां विवाहप्रसङ्गे सजाते तैस्तैः प्रायश्चित्तकरणं धर्मशास्त्रेषु विहितम्। तानि प्रायश्चित्तानि कानि कथंकरणीयानि चेति विज्ञापयन्तः संस्कारभास्करकाराः (पृ. १९९-२००) क्रमशः प्राजापत्यम् अतिकृच्छ्रं कृच्छ्रातिकृच्छ्रं चान्द्रायणं च वर्णयन्ति।

विवाहविधौ ब्राह्मणानां कृते समानार्षगोत्रजामिति विवेचयन्तो गोत्रपुरुषाणां निर्देशं संस्कारभास्करकाराः कुर्वन्ति। तद्यथा

विश्वामित्रो जमदग्निर्भरद्वाजोथ गौतमः।
वसिष्ठोत्रिः कश्यपश्च इत्येते सप्तऋषयः।। पृ. २०५।।

गोत्रमित्युपरिनिर्दिष्टानां सप्तानाम् ऋषीणां अगस्त्याष्टमानां यदपत्यं तद् गोत्रं (पृ. २०५) इति लक्षणं प्रस्तुत्य प्रवर इति च गोत्रप्रवर्तकस्य मुनेर्व्यावर्त्तक (पृ. २०५) इति लक्षणं स्पष्टं सूचितम्।

**उपसंहारः**

---

[२९] जयन्ती मङ्गला चैव पिङ्गला दक्षिणे गृहात्। आनन्दवर्धिनी वामे महाकाली च निर्गमे।। पृ. ४५अ।।
गृहस्य दक्षिणे भागे तिस्रोलेख्यास्तु मातरः। वामभागे तथा द्वे च जयन्त्यादि क्रमेण तु।। पृ. ४५अ।।

[३०] कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धाक्रियामतिः। बुद्धिर्लज्जावपुः शान्तिस्तुष्टिः कान्तिस्तुमातरः।। पृ. ४५ब।।

यद्यपि संस्काराणामधिकारित्वे त्रैवर्णिका गृह्यन्ते तथापि ऋषिभट्टेन शूद्राणां स्त्रीणां च संस्काराधिकारित्वे धर्मशास्त्रस्य प्रमाणं लिखितं यत् (०१) शूद्रोप्येवंविध: कार्यो विना मन्त्रेण संस्कृत:। इति। (०२) कन्यकायाश्चगर्भाधानादिचौलान्ता: अष्टसंस्कारा: अमन्त्रका:।(पृ. ०२)

यद्यपि ऋषिभट्ट: षोडशसंस्काराणां विवेचने कृतमतिरिति तेनैव प्रस्थापितं तथापि स्वयमेव कथयति यद् अन्येपिकर्णवेधादय: संस्कारा: शास्त्रान्तरोक्तास्तत्रतत्र वक्ष्यन्ते। इति। (पृ. ३)

ऋषिभट्टेन प्रदत्तेषूद्धरणेषु विषमपदानां व्याख्या अपि प्रदत्तास्तत्र नागाह्निकम् काश्यप: गोपथब्राह्मणम् मार्कण्डेय: सुमंतु: मदन: - - - - - इत्यादिनां नामोल्लेखं कृत्वा निजम् पाण्डित्यमं वैदुष्यपूर्णमिति मध्याह्ने सूर्यदर्शनमिव नयनगोचरीकृतम्।

गर्भाधानसंस्कारविधौ ऋषिभट्ट: प्रथमरजोदर्शने त्रयोदश दोषान् ज्योति:शास्त्रोक्तान् सङ्कल्पविधौ गणयति। तद्यथा

संस्कारभास्करकाराणां विद्वत्ताया अनुपमोदाहरणरूप: सन्दर्भोत्र द्रष्टव्यो यत् नवग्रहपूजनप्रसङ्गे वराहुतिदाने च भविष्योत्तरपुराणस्य श्लोका उद्धृता:। ते च सर्वे हेमाद्रौ स्मृतिसङ्ग्रहे च समानतया प्राप्यन्ते इति स्पष्टं निदिष्टम्। तथैव पूर्णाहुतिप्रसङ्गे मत्स्यपुराणस्याऽग्निपुराणस्य श्लोक उद्धृत:।[३१]

ग्रहशान्तिहोमपूर्णाहुतिप्रसङ्गे पठ्यमानानां सूक्तानां निर्देशं कुर्वन्त: संस्कारभास्करकारा: काशीपरम्पराया: स्पष्टनामोल्लेखेन[३२] लिखन्ति। समास्त्वेति (शु०य० २७/०१) नवर्चमाग्नेयं सूक्तम्। विष्णोर्नुकंवीर्याणि इति (शु०य० ०५/१८-२३) षड्ऋचं वैष्णवं सूक्तम्। नमस्ते इति (शु०य० १६/०१) षोडशर्चं रौद्रं सूक्तम्। आप्यायस्वेति (शु०य० १२/११२-११७)। महावैश्वानरं चमकंवाजश्चे(शु०य० १८/०१)त्यारभ्य सप्तविंशतिमृचाम्।

[३१] लक्ष्मीवेङ्कटेश्वर प्रकाशित: संस्कारभास्करकार: पृष्ठम्० ६४।
[३२] लक्ष्मीवेङ्कटेश्वर प्रकाशित: संस्कारभास्करकार: पृष्ठम्० ६६।

# तृतीया संस्कृतिः।

# सर्वसंस्कारसामान्यविधिः।

# पृष्ठानि ६३ – २१२।

# तृतीया संस्कृतिः।
## ।। सर्वसंस्कारसामान्यविधिः ।। ०१ ।।

अत्र सर्वेषु विधीयमानेषु संस्कारेषु यानी स्थापनानी ये च विधयः यानि च कर्माणि आवश्यकतया करणीयानि तान्यङ्गक्रमपूर्वकं लिख्यन्ते जिज्ञाशूनां च विधिकर्मचिकीर्षूणां कृते प्रस्तूयन्ते।

अत्र षोडशसंस्काराणां समग्राङ्गो विधिर्निरूपितो वर्तते। किन्तु आधुनिके काले समयाभावात् सहायकाभावाच्च केवलम् उपनयनसंस्कारकाले विवाहसंस्कारकालेन्तिमे मरणोत्तरक्रियाकाले वा समग्राङ्गो विधिः कर्तव्य इति सुचारु सुव्यवस्थितम् योग्यं च प्रतिभाति। अन्येषां तु पुंसवन–जातकर्म–नामकरणादिसंस्कारविधिषु देवब्राह्मणनमस्काराः गणेशस्थापनं तत् पूजनं संस्कारसङ्कल्पः ग्रहशान्ति–रुत्तरपूजनं च कृत्वा विधिः संक्षेपेण कर्तव्यः।

कृतमङ्गलस्नानः स्वलङ्कृतः सम्भृतमङ्गलसम्भारः कृतनिर्णेजनान्त पञ्चमहायज्ञान्तनित्यक्रियः परिहिताहतेसोत्तरियवासा यजमानो मङ्गलरङ्गवल्लीमण्डितशुद्धस्थले श्रीपर्ण्यादिप्रशस्तदारुनिर्मिते कुशोत्तरकम्बलाद्यास्तृते स्वासने उर्णवस्त्राच्छादिते पीठे प्राङ्मुख उदङ्मुखो वा उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुदङ्मुखीम् वा उपवेशयेत्।

ब्राह्मणा वदेयुः। शुभमुहूर्तंक्षेमङ्कल्याणमारोग्यमैश्वर्यं निर्विघ्नेन शुभं भवतु।

अगजाननपद्मार्कं गजाननमहर्निशम्।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे।। ०१ ।।
गणनाथ–सरस्वती–रवि–शुक्र–बृहस्पतिन्।
पञ्चैतान् संस्मरेन्नित्यं वेदवाणिं प्रवर्तयेत्।। ०२ ।।

### ०१/०१. अथ शिखाबन्धनम्।

हस्ते जलमादाय। मानस्तोक इति मन्त्रस्य कुत्स ऋषिः जगती छन्दः एको रुद्रो देवता शिखाबन्धने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ मानस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे।। शु०य० १६/१६।।[३३]

---

[३३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
चिद्रूपिणि महामाये दिव्यतेजः समन्विते। तिष्ठ देवि शिखाबन्धे तेजोवृद्धिं कुरुष्वमे।। ब्र०स०पृ. १३।।

इति अङ्गुष्ठमात्रां शिखां नैर्ऋत्यां बद्ध्वा।

## ०१/०२. अथ कुशपवित्रधारणम्।

सव्यहस्ते कुशत्रयं दक्षिणहस्ते कुशद्वयं धारयेत्।

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व: प्रसवऽउत्पुनाम्यच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभि:।। शु०य००१/१२।।[३४]
तस्य ते पवित्रपते पवित्रपूतस्य यत्काम: पूनेतच्छकेयम्।। शु०य००४/०४।।

## ०१/०३. अथ[३५]आचमनम्।

अन्तर्जानुहस्त: संहताङ्गुलिना शुद्धजलं गृहीत्वा मुक्ताङ्गुष्ठ कनिष्ठेन वामेनाऽन्वारब्धपाणिना ब्रह्मतीर्थेन[३६] त्रिरप: पिबेत्।

ॐ केशवाय नम: स्वाहा।
ॐ नारायणाय नम: स्वाहा।
ॐ माधवाय नम: स्वाहा।
ॐ गोविन्दाय नम:।
इति हस्तं प्रक्षाल्य।

## ०१/०४. अथ प्राणायाम:।[३७]

हस्ते जलमादाय। प्रणवस्य परब्रह्मऋषि:[३८]दैवी गायत्री छन्द: परमात्मादेवता।। भूरादिसप्त-व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाऋषय: गायत्र्युष्णिगनुष्टुब् बृहतीपङ्क्ति-त्रिष्टुब् जगत्यश्छन्दांसि अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवता:।। तत्सवितुरित्यस्य विश्वामित्र ऋषि:

---

३४ अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दन:। कुशाग्रे शंकरो देव: ते मे नश्यन्तु पातकम्।। या०र०पृ. ०१।।

३५ शीर्षकेषु स्वरसन्धि: वैकल्पिक इत्युत्सर्ग:।

३६ अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूलेऽग्रे दैव पित्र्यं तयोरध:।। मनु००२/५९।।

३७ अत्र यज्ञोपवीतरहितानां कृते स्त्रीणां च कृते द्वादशवारं "ॐ नमो भगवते वासुदेवाय" इति मन्त्रस्य जपो विहित:।

३८ शास्त्री दुर्गाशङ्कर उमाशङ्कर ठाकर: स्वकीये ब्रह्मनित्यकर्मसमुच्चये (पृ.१२)ऋष्यादीनां व्युत्क्रमेण पाठं प्रयच्छति यत्र ऋषि-देवता-छन्द:-विनियोगान् प्रदर्शयन्ति। किन्तु अस्माभि:-
अविदित्वा ऋषिं छन्दो दैवतम् योगमेव च। योऽध्यापयेज्जपेद्वाऽपि पापीयान् जायते तु सह।।
इति स्मृत्युक्त दिशा ऋषे: छन्द सह देवताया: विनियोगश्चाऽनुक्रमो गृहीत।

गायत्री छन्दः सविता देवता।। आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्माग्नि-वायुसूर्यादेवताः सर्वेषां प्राणायामे विनियोगः।। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ[३९] भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो यो नः प्रचोदयात्
ॐ आपोज्योति रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।।

इति मन्त्रेण एकवारं पठितेन पूरकं चतुर्वारं पठितेन कुम्भकं द्विवारं च पठितेन रेचकं च कृत्वाऽथवा यथाशक्ति जप्त्वा पूरककुम्भकरेचकान् त्रिवारं साधयेत्।। हस्तं प्रक्षालयेत्।

**०१/०५. अथ तिलककरणम्।**

अष्टगन्धेन कुङ्कुमेन वा यजमानस्य भाले तिलकं कुर्वन् पठेत्।

ॐ स्वस्ति नऽइन्द्रोवृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्तिनस्ताक्ष्योंऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।। शु०य० २५/१९।।[४०]

**०१/०६. अथ आचारात् कङ्कणबन्धनम्।**

यजमानस्य तत्पत्न्याश्च दक्षिणहस्ते[४१] रक्तसूत्रं बध्नीयात्।

ॐ यदाबद्ध्नन्दाक्षायणाहिरण्यं शतानीकायसुमनस्यमानाः।
तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्।। शु०य० ३४/५२।।[४२]

**०१/०७. अथ शान्तिपाठः।**

---

[३९] अत्र सर्वत्र वेदमन्त्राणां स्वराङ्कनं न प्रदर्शितमतः अतो मन्त्राणां स्वराङ्कनं तत्तत्संहिता पाठात्(संदर्भानुसारं) पण्डितैः ज्ञातव्यम् ।

[४०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
स्वस्त्यस्तुयाऽविनाशाख्या पुण्यकल्याण वृद्धिदा।
विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः।। सु०वि०पृ. ०२।।

[४१] अत्र केचन याज्ञिकाः यजमान पत्न्याः वामहस्ते बध्नन्ति तद शास्त्रीयं माङ्गल्यप्रदानां वस्तूनां वामकरे बन्धनं शुद्धतां निहन्ति।

[४२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
येन बद्धो बलिराजा दानवेन्द्रो महाबलः। तेन त्वामभि बध्नामि रक्षे मा चल मा चल।। कर्म०पृ. १६८।।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा। भद्रसूक्तेन शान्तिपाठं कुर्यात्।

## ०१/०८. अथ भद्रसूक्तम्।[४३]

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः।
देवा नो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ।। शु०य० २५/१४।।
देवानाम्भद्रा सुमतिर्ऋजूयतां देवानां रातिरभिनो निवर्तताम्।
देवानां सक्ख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे।। शु०य० २५/१५।।
तान्पूर्वया निविदाहूमहे वयम्भगमित्रमदितिं दक्षमस्रिधम्।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत्।। शु०य० २५/१६।।
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम्।। शु०य० २५/१७।।
तमीशानञ्जगतस्तस्थुषस्पतिंधियञ्जिन्वमवसे हूमहे वयम्।
पूषानो यथाव्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।। शु०य० २५/१८।।
स्वस्ति नऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।। शु०य० २५/१९।।
पृषदश्श्वा मरुतः पृश्निमातरः शुभँयावानो व्विदथेषु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो व्विश्वे नो देवाऽअवसागमन्निह।। शु०य० २५/२०।।
भद्रं कर्णेभिः शृणुयाम देवा भद्रम्पश्श्येमाक्षभिर्य्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवां सस्तनूभिर्व्यशेमहिदेवहितँ यदायुः।। शु०य० २५/२१।।
शतमिन्नु शरदोऽअन्ति देवायत्रानश्च्चक्क्रा जरसन्तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नोमध्यारीरिषतायुर्गन्तोः।। शु०य० २५/२२।।
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः।
विश्वे देवाऽअदितिः पञ्चजनाऽ अदितिर्ज्जातमदितिर्ज्जनित्वम्।। शु०य० २५/२३।।[४४]

---

[४३] अत्र यज्ञोपवीत रहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीःपापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्मः परिपालय देवि विश्वं ।। स०श००४/०५।।
ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवति प्रसन्ना।। स०श००४/१५।।
धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृति करोति।
स्वर्गं प्रयाति च ततो भवतिप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन।। स०श००४/१६।।
दुर्गे स्मृता हरसि भितिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता।। स०श००४/१७।।
ॐ शान्तिःशान्तिःशान्तिः। सुशान्तिर्भवतु। इत्युक्त्वा देवाय गन्धाक्षतपुष्पाणि समर्पयेत्।

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
व्वनस्प्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः
सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।। शु०य० ३६/१७।।
यतो यतः समीहसे ततो नोऽअभयं कुरु।
शं नः कुरु प्रजाब्भ्योऽभयन्नः पशुब्भ्यः।। शु०य० ३६/२२।।

ॐ शान्तिःशान्तिःशान्तिः। सुशान्तिर्भवतु। इत्युक्त्वा देवाय गन्धाक्षतपुष्पाणि समर्पयेत्।

### ०१/०९. अथ देवतानमस्कारः।

श्रीमन्महागणाधिपतये नमः।
श्रीगुरुभ्यो नमः।[४५]
श्रीपरमगुरुभ्यो नमः।
श्रीपरमेष्ठि गुरुभ्यो नमः।
श्रीपरात्परगुरुभ्यो नमः।
श्रीलक्ष्मीनारायणाभ्यां नमः।
श्रीउमामहेश्वराभ्यां नमः।
श्रीशचीपुरन्दराभ्यां नमः।
वाणीहिरण्यगर्भाभ्यां नमः।
मातापितृचरणकमलेभ्यो नमः।
इष्टदेवताभ्यो नमः।
कुलदेवताभ्यो नमः।
ग्रामदेवताभ्यो नमः।
स्थानदेवताभ्यो नमः।
वास्तुदेवताभ्यो नमः।
एतत्कर्मप्रधान नवग्रहदेवताभ्यो नमः
सर्वेभ्यो देवेभ्यो नमः।
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः।
पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु नः।

---

[४४] गुर्जरप्रदेशेऽधुना निम्नलिखितौ मन्त्रौ शान्तिपाठे न गृह्येते।
ॐ तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैब्भ्रातृभिरुतवाहिरण्यैः।
नाकङ्गृब्भ्णानाः सुकृतस्य लोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः।। शु०य० १५/५०।।
ॐ आयुष्यं व्वर्च्चस्यं रायस्प्पो षमौद्भिदम्।
इदं हिरण्ण्यं व्वर्च्चस्वज्जैत्राया विशतादुमाम्।। शु०य० ३४/५०।।
[४५] संस्कारभास्करकाराः श्रीगुरु-परमगुरु-परमेष्ठिगुरु-परात्परगुरुभ्यो नमस्कारं न गृह्णन्ति।

पुण्यं पुण्याहं दीर्घमायुरस्तु। निर्विघ्नमस्तु।।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।। ०३।। ब्र०स०पृ. २९।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि।। ०४।। ब्र०स०पृ. २९।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते।। ०५।। ब्र०स०पृ. २९।।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।। ०६।। ब्र०स०पृ. २९।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः।। ०७।। ब्र०स०पृ. २९।।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरी नारायणि नमोऽस्तुते।। ०८।। स०श०११/१०।।
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः।। ०९।।[४६] ब्र०स०पृ. २९।।
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।। १०।।[४७] ब्र०स०पृ. ३०।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।। ११।। ब्र०स०पृ. ३०।।
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।। १२।। भ०गी०१८/७८।।
सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवादिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः।। १३।। ब्र०स०पृ. ३०।।
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्।
सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये।। १४।। ब्र०स०पृ. ३०।।
विश्वेशं माधवं ढुंढिं दण्डपाणिं च भैरवम्।
वन्दे काशीगुहां गङ्गा भवानीमणिकर्णिकाम्।। १५।। सु०वि०पृ. ०५।।
आपदामपहर्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्।। १६।। रा०र० ३५।।
शङ्करं शङ्कराचार्यं केशवं बादरायणम्।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः।। १७।। ब्र०स०पृ. ०२।।

[४६] अत्राऽऽयतन शब्दस्य नित्यनपुंसकलिङ्गत्वाद् बहुषः पुरोहिताः **मङ्गलायतनो हरि**रिति घोषयन्ति तद् व्याकरण दृष्ट्याऽशुद्धप्रयोगः।

[४७] संस्कारभास्करकाराः तदेवलग्नमिति श्लोकं न गृह्णन्ति।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। १८।। रघु० ०१/०१।।
तिथिर्विष्णुस्तथावारो नक्षत्रं विष्णुरेव च।
योगश्च करणं चैव सर्वं विष्णुमयं जगत्।। १९।।

## ०१/ १०. अथ प्रायश्चित्तसङ्कल्पः।

हस्ते जलमादाय। श्रीविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे[४८] श्रीश्वेतवाराहेकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे जम्बूद्वीपे रामक्षेत्रे परशुरामाश्रमे बौद्धावतारे दण्डकारण्यैकदेशे श्रीमल्लवणाब्धेरुत्तरे तीरे श्रीनर्मदायाः[४९] उत्तरे दिग् विभागे श्रीमह्यायाः दक्षिणे दिग् विभागे विश्वामित्रि तटे वटपत्तन-नगरे अमुक तमे[५०] श्रीशालिवाहनशके अस्मिन्वर्तमाने अमुकनाम संवत्सरे अमुक तमे श्रीविक्रमवर्षे अमुकनाम संवत्सरे अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशीस्थिते श्रीचन्द्रे अमुकराशीस्थिते श्रीसूर्ये अमुकराशीस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथायथं राशीस्थान स्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ (यजमानस्य गोत्रोच्चारः) अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकवेदान्तर्गत अमुकशाखाध्यायि अमुकशर्मा सपत्नीकः सपरिवारो यजमानोऽहं ममात्मनः श्रुति-स्मृतिपुराणोक्त शुभपुण्यफल प्राप्त्यर्थं मम इह जन्मनि जन्मान्तरे वा ज्ञाताज्ञात कायिक-वाचिक-मानसिक-मानसादिक-सांसर्गिक स्पर्शास्पर्श-भुक्ताभुक्त-पीतापीत-दृश्यादृश्य-लेह्यालेह्य-चोस्याचोस्य-नानाविध जीवहिंसादि जनित दोष परिहारार्थं सङ्करीकरण-मलिनीकरण-जातिभ्रंशकरण-अपात्रिकरणादि सकल पाप क्षयार्थं अमुक संस्काराङ्गभूतं ग्रहशान्ति कर्मणि अधिकार प्राप्त्यर्थं गोनिष्क्रयीभूतं तदङ्गत्वेन मनसोद्दिष्टं द्रव्यं वा गोग्रासं दातुमहमुत्सृजामि। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

तेन अस्मिन् ग्रहशान्ति कर्मण्यधिकार सिद्धिरस्तु।

## ०१/ ११. अथ धेनुपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा। रजतरूपिणि प्रत्यक्षं वा धेनुं सम्पूजयेत्।

ॐ आयं गौः पृश्निरक्रमीदसदन्मातरम्पुरः।
पितरञ्चप्प्रयन्त्स्वः।। शु०य० ०३/०६।।[५१]

---

[४८] संस्कारभास्करकाराः विष्णुपदे इत्यधिकं पठन्ति।

[४९] अत्र संस्कारभास्करकाराः गोदावर्याः पश्चिमेतीरे इति पठन्ति।

[५०] अथाऽधस्ता यत्र यत्र अमुक इति लिखितम् तत्र तत् तद वर्ष गणना-मासादि नामानि पठितव्यानि।

[५१] अत्र यज्ञोपवीतसहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
गावोममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदयः सन्तु गवां मध्ये वसाम्यहम्।। सु०वि०पृ. ०६।।

इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत् । गोग्रासं च समर्पयेत्। नेत्रयोरपः स्पृशेत्।

## ०१/ १२. अथ प्रधानसङ्कल्पः।

हस्ते जलमादाय। श्रीविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहेकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे जम्बूद्वीपे  रामक्षेत्रे परशुरामाश्रमे बौद्धावतारे दण्डकारण्यैकदेशे श्रीमल्लवणाब्धेरुत्तरे तीरे श्रीनर्मदायाः उत्तरे दिग् विभागे श्रीमह्यायाः दक्षिणे दिग् विभागे विश्वामित्रि तटे वटपत्तन–नगरे अमुक तमे[52] श्रीशालिवाहनशके अस्मिन्वर्तमाने अमुकनाम संवत्सरे अमुक तमे श्रीविक्रमवर्षे अमुकनाम संवत्सरे अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशीस्थिते श्रीचन्द्रे अमुकराशीस्थिते श्रीसूर्ये अमुकराशीस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथायथं राशीस्थान स्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ (यजमानस्य गोत्रोच्चारः) अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकवेदान्तर्गत अमुकशाखाध्यायि अमुकशर्मा सपत्नीकः सपरिवारो यजमानोऽहं ममात्मनः श्रुति–स्मृतिपुराणोक्त शुभपुण्यफल प्राप्त्यर्थं ऐश्वर्याभिवृद्ध्यर्थं अप्राप्तलक्ष्मी प्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकाल संरक्षणार्थं सकलमनईप्सितकामना संसिद्ध्यर्थं लोके सभायां राजद्वारे वा सकलदुरितोपशमनार्थं मम सभार्यस्य सपुत्रस्य सबान्धवस्य सकुटुम्बस्य सपशोः समस्तभयव्याधि–जरापीडामृत्युपरिहारद्वारा क्षेमायुरारोग्यैश्वर्याभिवृद्ध्यर्थं मम जन्मराशेरखिलकुटुम्बस्य वा जन्मराशेः सकाशाद्ये केचिद्विरुद्ध चतुर्थाष्टमद्वादशस्थानस्थितक्रूरग्रहास्तैः सूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशद्वारा एकादशस्थानस्थित तच्छुभफलप्राप्त्यर्थं पुत्रपौत्रादिसन्ततेरनवच्छिन्नवृध्यर्थं आदित्यादिनवग्रहानुकूलतासिद्ध्यर्थं इन्द्रादिदशदिक्पालप्रसन्नतासिद्ध्यर्थं आधिदैविकाऽऽधिभौतिकाऽऽ–ध्यात्मिकत्रिविधतापोपशमनार्थं धर्मार्थकाममोक्षफलप्राप्त्यर्थं च मम अमुकनाम्ने सुतस्य अमुकनाम्न्याः सुतायाः करिष्यमाण अमुकसंस्कारे ग्रहानुकूलतासिध्यर्थं ग्रहशान्ति होमं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तदङ्गतया निर्विघ्नताद्धिय्र्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं  मण्डपमातृका– पूजनं वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृकापूजनमायुष्यमन्त्रजपं नान्दीश्राद्धमाचार्यादि ऋत्वि– ग्वरणं दिग्रक्षणं पञ्चगव्यकरणं भूमिपूजनमग्निस्थापनं ग्रहस्थापनं च करिष्ये । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघण्टार्चनं दीपपूजनं सूर्यपूजनं आसनादिविधिं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## ०१/ १३. अथ भूमिपूजनम्।

---

पञ्चगावो समुत्पन्ना मथ्यमाने महोदधौ। तासां मध्ये तु या नन्दा तस्यै धेन्वे नमोनमः।। सु०वि०पृ. ०६।।
अदितिर्देवमाता च वेदमाता च धीश्वरि। धेनुरूपेण सा देवि मम पापं व्यपोहतु।। सु०वि०पृ. ०६।।

[52] अथाऽधस्ता यत्र यत्र अमुक इति लिखितम् तत्र तत् तद वर्ष गणना–मासादि नामानि पठितव्यानि।

हस्ते जलमादाय। पृथिवित्यस्य मेरुपृष्ठ ऋषि: कूर्मो देवता सुतलं छन्द: आसने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ताभ्यां भूमिं स्पृशेत्।

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।
यच्छा न: शर्म्म सप्प्रथा:।। शु०य० ३६/१३।।[५३]

वामहस्ते जलमादाय दक्षिणहस्तस्य मध्यमानामिकाभ्याम् आसनोपरि किंचिज्जलं संप्रोक्षन्।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरुचासनम्।। २०।। ब्र०स०पृ. १५।।

इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

**०१/ १४. अथ दिग्रक्षणम् ।**

गौरसर्षपान् तदभावे अक्षतान् वा वामहस्ते गृहीत्वा स च दक्षिणजानौ संस्थाप्य तदुपरि दक्षिण- हस्तं पिधाय।

ॐ रक्षोहणं व्वलगहनं वैष्णवीमिदमहन्तं व्वलगमुत्त्किरामि यं मे
निष्ट्योयममात्त्यो निचखानेदमहन्तं व्वलगमुत्त्किरामि यं मे
समानो यमसमानो निचखानेदमहन्तं वलगमुत्त्किरामि यं मे
सबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तं वलगमुत्त्किरामि यं मे
सजातो यमसजातो विचखानोत्त्कृत्त्याङ्किरामि।। शु०य० ०५/२३।।[५४]
रक्षोहणो वो वलगहन: प्रोक्षामि वैष्णवान्रक्षोहणो वो वलगहनो
वनयामि वैष्णवान्रक्षोहणो वो वलगहनोवस्तृणामि
वैष्णवान्रक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ

---

[५३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पृथ्वी त्वया धृता लोका देवी त्वं विष्णुना धृता। त्वं च धारय मां देवी पवित्रं कुरुचासनम्।। ब्र०स०पृ. १५।।

[५४] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिता:। ये भूता विघ्नकर्तारस्तेनश्यतु शिवाज्ञया।। ब्र०स०पृ. ३२।।
अपक्रामन्तु भूतानि पिशाचा: सर्वतो दिशम्। सर्वेषामविरोधेन पूजाकर्म समारभे।। ब्र०स०पृ. ३२।।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वत:। स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु।। ब्र०स०पृ. ३२।।
भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसा:। स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम्।। ब्र०स०पृ. ३२।।
भूतानि राक्षसा वाऽपि येऽत्र तिष्ठन्ति केचन। ते सर्वेऽप्यपगच्छन्तु पूजाकर्म करोम्यहम्।। ब्र०स०पृ. ३२।।

वां वलगहनौ पर्यूहामि व्वैष्णवी व्वैष्णवमसि व्वैष्णवास्त्थ।। शु०य० ०५/२५।।
रक्षसां भागोसि निरस्तं रक्षऽ इदमहं रक्षोभितिष्ठामीदमहं
रक्षोवबाधऽइदमहं रक्षोधमन्तमोनयामि।
घृतेन द्यावापृथिवी प्रोर्ण्णुवाथां व्वायो व्वेस्तोकानामग्नि –
राज्यस्यव्वेतु स्वाहा स्वाहाकृतेऽऊर्ध्वनभसम्मारुतङ्गच्छतम्।। शु०य० ०६/१६।।
रक्षोहा व्विश्श्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्त्थमासदत्।। शु०य० २६/२६।।

एतैर्मन्त्रैः सर्षपान् अक्षतान् वा सर्वदिक्षु विकिरेत् । वामपादेन भूमिं त्रिवारं ताडयेत् । उदकस्पर्शः।[५५] वामहस्ते जलमादाय दक्षिणमध्यमानामिकाभ्यां जलं संस्पृश्य प्रथमं दक्षिणवामनेत्रे संस्पृशेत्। पुनश्च जलं संस्पृश्य दक्षिणवामकर्णौ संस्पृशेत्।

### ०१/ १५. अथ कलशार्चनम्।

ततः स्ववामभागे साक्षतपुंजोपरि पूजार्थजलपूरितकलशम् निधाय।

### तत्र वरुणावाहनम्।

हस्ते जलमादाय। तत्त्वायामित्त्यस्य शुनःशेप ऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः । इत्यक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते अक्षतान् गृहीत्वा वरुणमावाहयेत्।

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः ।
अहेडमानो वरुणेहबोद्ध्युरुशं स मा नऽ आयुः प्रमोषीः।। शु०य० १८/४९।।[५६]
सर्वे समुद्राः सरितः तीर्थानि जलदानदाः।
आगच्छन्तु पवित्राणि पूजाकाले सदा मम।। २१।। या०र०पृ. ०७।।

ॐ भूर्भुवःस्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिम् आवाहयामि स्थापयामि।[५७]इत्युक्त्वा कलशे अक्षतान् क्षिपेत्।

हस्ते अक्षतान् गृहीत्वा।

ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।

---

[५५] रौद्रं राक्षसमासुरमाभिचरणिके मन्त्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृशेदपः।।
[५६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मकरस्थं पाशहस्तमम्भसां पतिमीश्वरम् । आवाहये प्रतीचीशं वरुणं यादसां पतिम् ।। ब्र०स०पृ. ३३।।
[५७] अत्र यज्ञोपवीतरहितानां कृते ह्रीं वरुणाय नमः। इत्युक्त्वा कलशे अक्षत निक्षेपः।

व्विश्श्वे देवासऽइह मादयन्ता मो३ꣳम्प्रतिष्ठ ।। शु०य० ०२/१३।।[५८]

ॐ वरुणाय नमः । वरुण सुप्रतिष्ठितो वरदो भव । प्रतिष्ठाप्य । इत्युक्त्वा कलशमध्ये अक्षतान् क्षिपेत्।

ततः अनामिकया कलशं स्पृष्ट्वा। अभिमन्त्रयेत्।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।। २२।। ब्र०स०पृ. ३३।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।। २३।। ब्र०स०पृ. ३३।।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः।
गायत्री[५९] चात्र सावित्री शान्तिः पुष्टिकरी तथा।। २४।। ब्र०स०पृ. ३३।।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।
गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु।। २५।। ब्र०स०पृ. ३३।।
ब्रह्माण्डोदरतीर्थानि[६०] करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर।। २६।। ब्र०स०पृ. ३३।।

**कलशे वरुणपूजनम् ।**

कलशस्य कण्ठे रक्तसूत्रं बध्नीयात्। चतुर्दिक्षु चन्दनेन कुङ्कुमेन वा गन्धं कृत्वा। पूर्वे ऋग्वेदाय नमः। दक्षिणे यजुर्वेदाय नमः। पश्चिमे सामवेदाय नमः। उत्तरे अथर्ववेदाय नमः। कलशमध्ये अपाम्पतये वरुणाय नमः। इत्युक्त्वा कलशे गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ भूर्भुवः स्वः वं वरुणाय नमः इति पञ्चोपचारैः सम्पूज्य। हस्ते जलमादाय। अनेन पूजनेन वरुणः प्रीयताम्। इति वरुणं सम्पूज्य। गायत्र्यादिभ्यो नमः इति कलशदेवताः पञ्चोपचारैरभ्यर्च्य। अञ्जलिं बध्वा कलशं प्रार्थयेत् ।

**प्रार्थना।**

देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भो विधृतो विष्णुना स्वयम्।। २७।। ब्र०स०पृ. ३४।।

---

[५८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मित्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[५९] संस्कारभास्करकाराः गायत्रीति श्लोकं न गृह्णन्ति।

[६०] संस्कारभास्करकाराः ब्रह्माण्डोदरतीर्थानीति श्लोकं न गृह्णन्ति।

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।। २८।। ब्र०स०पृ. ३४।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः।। २९।। ब्र०स०पृ. ३४।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।। ३०।। ब्र०स०पृ. ३४।।

अङ्कुशमुद्रया[६१] सूर्यमण्डलात् सर्वाणि तीर्थान्यावाह्य। वं इति धेनुमुद्रया[६२] अमृतीकृत्य। हुं इति कवचेनाऽऽवगुण्ठ्य[६३]। मत्स्यमुद्रयाऽऽच्छाद्य[६४]। वं वरुणाय नमः इति मूलेनाष्टवारभिमन्त्र्य तस्मादुदकादुदकं गृहीत्वा पूजाद्रव्याणि सम्प्रोक्षेत्। तां च भूमिं सम्प्रोक्षेत्। पुनः वामहस्ते स्वल्पोदकमादाय दक्षिणमध्यमानामिकाभ्यां स्वात्मानं स्वशिरश्च सम्प्रोक्षेत्। तत्र मन्त्राः-

अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः।। ३१।। ब्र०स०पृ. ३४।।
ॐ आपो हि ष्ठा मयोभुवस्ता नऽउर्ज्जे दधातन। महे रणायचक्षसे।। शु०य० ११/५०।।[६५]
यो वः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिव मातरः।। शु०य० ११/५१।।
तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा चनः।। शु०य० ११/५२।।

पश्चात्कलश (कुम्भ)मुद्रां[६६] प्रदर्शयेत् (दक्षाङ्गुष्ठं पराङ्गुष्ठे)क्षिप्त्वा हस्तद्वयेन च । सावकाशां (मध्यशून्यां)मुष्टिकां च कुर्यात्सा कुम्भमुद्रिका ।

**०१/ १६. अथ दीपपूजनम्।**

घृतदीपं प्रज्वाल्य निर्वातस्थले निधाय । हस्ते गन्धक्षतपुष्पाणि गृहीत्वा।

---

[६१] अर्धतर्जन्या सः ऋज्व्या च मध्यमया सः अनामिकाकनिष्ठिकयोः अधवलनोपरि अङ्गुष्ठं स्थापयित्वा- रचितया अङ्कुशमुद्रया।

[६२] अञ्जलिं बध्वा वामतर्जन्यां दक्षतर्जनी स्थापयित्वा वाममध्यमां स्पृशेत्। वामतर्जन्या च दक्षमध्यमां स्पृशेत्। तथैव वामदक्षिणानामिकयोः दक्षिणवाम कनिष्ठिके स्थापयेत् तदधोमुखं रचितया धेनुमुद्रया।

[६३] उर्ध्वतलायां वामहस्ततर्जन्यां अधस्तलां दक्षतर्जनी स्थापयित्वा शृङ्खलां बध्वा मध्यनामिकाकनिष्ठिकासु अर्धवलितासु तत्तधस्ताङ्गुष्ठौ स्थापयित्वा कवचेनाऽऽवगुण्ठ्य।

[६४] अधस्तलवामहस्तोपरि अधस्तलदक्षहस्तं उभाभ्यां अङ्गुष्ठाभ्यां वर्तुलाकार चालनेन रचितया मत्स्यमुद्रया।

[६५] एते त्रयो मन्त्रा यज्ञोपवीतरहितानां कृते न पठनीयाः। यद्यऽपि-अपवित्रः पवित्रो वेति सर्वेषां कृते पठ्यते।

[६६] वामाङ्गुष्ठे दक्षाङ्गुष्ठं स्थापयित्वा अञ्जलिं बध्वा मुष्टिं चाऽङ्गुल्यग्रात् कनिष्ठिकाद्वयं विहाय सावकाशं कृत्वा रचितया।

ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्यो ज्ज्योति ज्ज्योतिः सूर्य्यः स्वाहा ।
अग्निर्व्वर्चो ज्ज्योतिर्व्वर्चः स्वाहा सूर्य्यो व्वर्चो ज्ज्योतिर्व्वर्चः स्वाहा।
ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ।। शु०य० ०३/०९/।।[६७]

ॐ भूर्भुवः स्वः दीपस्थदेवतायै नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि । इत्युक्त्वा दीप समीपे गन्धाक्षतपुष्पाणि समर्पयेत्।

हस्ते जलमादाय। अनेन पूजनेन दीपदेवता प्रीयताम् । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।।

## ०१/ १७. अथ सूर्यपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः।
केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः।। ३२।। ब्र०स०पृ. ३७।।
ॐ सूर्य्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्ज्योतिरुदर्यां र॒ऽअजस्रम्।
तस्य पूषा प्प्रसवे याति व्विद्वान्त्सम्पश्यन्न्विश्वाभुवनानि गोपाः।। शु०य० १७/५८।।[६८]

ॐ भूर्भुवः स्वः श्रीसूर्यनारायणाय नमः। गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि । इत्युक्त्वा सूर्याय गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। अनेन पूजनेन श्रीसूर्यनारायणः प्रीयताम् । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## ०१/ १८. अथ शङ्खपूजनम्।

शङ्खे जलपूरणम्। गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ।
उपयामगृहीतोस्यग्नयेत्वा व्वर्चस ऽएष ते योनिरग्नये त्वा व्वर्चसे ।। शु०य० २६/०९।।[६९]

---

[६७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते ।
भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्। यावत्पूजासमाप्तिः स्यात्तावदत्र स्थिरो भव।।
अस्य मन्त्रस्य स्थाने संस्कारभास्करकारा निम्न लिखितं मन्त्रं गृहणन्ति।
भोदीपत्वं ब्रह्मरूप अन्धकार निवारक। इमां मया कृतां पूजां गृहणंस्तेजः प्रवर्धय।।

[६८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने। जन्मान्तरसहस्रेषु दारिद्र्यंनोपजायते।।

[६९] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते ।
शङ्खं चन्द्रार्कदैवत्यं वरुणं चाधिदैवतम्। पृष्ठे प्रजापतिं विद्यादग्रे गङ्गा सरस्वती।। ब्र०स०पृ. ३५।।
त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया। शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत्।। ब्र०स०पृ. ३५।।
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। नमितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ।। ब्र०स०पृ. ३५

ॐ भूर्भुवः स्वः शङ्खस्थदेवतायै नमः आवाहयामि स्थापयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि।

पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयात्।। ३३।। ब्र०स०पृ. ३६।।

शङ्खमुद्रां[७०] प्रदर्शयेत् ।

**०१/ १९. अथ घण्टापूजनम्।**

गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ सुपर्ण्णोसि गरुत्क्मांस्त्रिवृत्ते शिरो गायत्र ञ्चक्षुर्बृहद्रथन्तरे पक्षौ।
स्तोम ऽआत्माच्छन्दा स्यङ्गानियजूंषि नाम।
साम ते तनूर्व्वामदेव्व्यं य्यज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः।
सुपर्ण्णोसि गरुत्क्मान्दिवङ्गच्छ स्वः पत।। शु०य० १२/०४।।[७१]

ॐ भूर्भुवः स्वः घण्टास्थाय गरुडाय नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि।

अत्र चतुर्थपादे घण्टामित्यस्य स्थाने देवमिति पाठभेदः प्रचलित।

**।। गणपतिपूजनम्।। ०२।।**

ताम्रपात्रे सिद्धिबुद्धिसहितं महागणपतिं संस्थाप्य।

**ध्यानम्।**[७२]

गन्धाक्षतपुष्पदुर्वाङ्कुरान् गृहीत्वा।

---

[७०] [दक्षमुष्टौ वामाङ्गुष्ठं निधाय प्रसारिताभिः वामाङ्गुलीभिः ऋज्वीकृतं दक्षाङ्गुष्ठं स्पृष्ट्वा रचितया] शङ्खमुद्रया।

[७१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते ।
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्। घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत्।। ब्र०स०पृ. ३६।।

[७२] संस्कारभास्करकारा ब्रह्मनित्यकर्मसमुच्चयादि ग्रन्थकाराश्च षोडशोपचार विषयेऽन्यान् मन्त्रान् स्वीकुर्वन्ति। किन्तु शोधप्रबन्धेऽस्मिन् गुर्जरप्रदेशे प्रचलिताः मन्त्रा सङ्गृहीताः।

हरि:ॐ गणानान्त्वागणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं हवामहे
निधीनान्त्वा निधिपतिं हवामहे व्वसोमम।
आहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भधम् ।। शु०य० २३/१९।।[७३]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि। ध्यानार्थे दुर्वासहित गन्धाक्षत-पुष्पाणि समर्पयामि। इत्युक्त्वा दुर्वासहित गन्धाक्षतपुष्पाणि देवस्य चरणकमले समर्पयेत्।

**आवाहनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्व्वतस्पृत्वात्त्यतिष्ठद्दशाङ्गुलम् ।। शु०य० ३१/०१।।[७४]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः आवाहयामि । आवाहनार्थे अक्षतान् समर्पयामि। इत्युक्त्वा अक्षतान् देवस्य चरणकमले समर्पयेत्।

**आसनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ पुरुषऽएवेदं सर्व्वयद्भूतँयच्च भाव्यम् ।
उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ।। शु०य० ३१/०२।।[७५]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः आसनं समर्पयामि। आसनार्थे अक्षतान् समर्पयामि । इत्युक्त्वा अक्षतान् देवस्य चरणकमले समर्पयेत्।

---

[७३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः
क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम्।
दोर्भि पाशाङ्कुशाब्जाभयवरदधनं चन्द्रमौलिं त्रिनेत्रं
ध्याये शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम्।। ब्र०स०पृ. ३७।।

[७४] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
हे हेरम्ब त्वमेह्येह्यम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिपतेत्र्यक्ष लक्षलाभपितःप्रभो।। कर्म०पृ. १७२।।
नागस्य नागहारत्वं गणराज चतुर्भुजम्। भूषितः स्वायुधैः स्तिक्ष्णैः पाशाङ्कुशपरस्वधैः।। कर्म०पृ. १७२।।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाणत्वं पूजां क्रतुं च रक्ष मे।। कर्म०पृ.१७२।।

[७५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम्। आसनं च मया दत्तं गृहाण गणनायक ।। या०र०पृ. १२।।

**प्रतिष्ठा।**[७६]

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० ०२/१३।।[७७]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः प्रतिष्ठार्थे अक्षतान् समर्पयामि । इत्युक्त्वा अक्षतान् देवस्योपरि समर्पयेत्। स्नानपात्रे देवस्य मूर्तिं स्थापयेत्।

**पाद्यम्।**

हस्ते जलमादाय।

ॐ एतावानस्य महिमातो ज्ज्यायाँश्च पूरुषः।
पादोस्य विश्श्वा भूतानि त्रिपादस्यामृतन्दिवि ।। शु०य० ३१/०३।।[७८]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पादयोः पाद्यं समर्पयामि । इत्युक्त्वा जलम् देवपादोपरि समर्पयेत्।

**अर्घ्यम्।**

अर्घ्यपात्रे गन्धाक्षतपुष्पाणि सहित हस्ते गृहीत्वा।

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्ष्वङ् व्यक्क्रामत्साशनानशनेऽअभि ।। शु०य० ३१/०४।।[७९]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः हस्तयोः अर्घ्यं समर्पयामि । इत्युक्त्वा अर्घ्यपात्राज्जलं देवस्य दक्षिणहस्ते समर्पयेत्।

**आचमनम्।**

---

[७६] संस्कारभास्करकारा इमं प्रतिष्ठाविधि न स्वीकुर्वन्ति।

[७७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[७८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम्। पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ।। या०र०पृ. १२।।

[७९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ताम्रपात्रे स्थितं तोयं गन्धपुष्पफलान्वितम्। सहिरण्यं ददाम्यर्घ्यं गृहाण गणनायक ।। या०र०पृ. १२।।

हस्ते जलमादाय।

ॐ ततो व्विराडजायत व्विराजोऽअधि पूरुषः।
स जातोऽअत्यरिच्च्यत पश्चाद्भूमिमथो पुरः।। शु०य० ३१/०५।।[८०]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः मुखे आचमनीयं जलं समर्पयामि । इत्युक्त्वा आचमनीयजलं देवस्य मुखे समर्पयेत्।

**स्नानम्।**

हस्ते तीर्थोदकमादाय।

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये।। शु०य० ३१/०६।।[८१]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः तीर्थोदक स्नानं समर्पयामि । इत्युक्तवा तीर्थोदकं देवस्य सर्वाङ्गे समर्पयेत्।

**पयःस्नानम्।**

पञ्चामृतं दुग्धं वा गृहीत्वा।

ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः।
पयस्वतीः प्प्रदिशः सन्तुमहयम्।। शु०य० १८/३६।।[८२]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पयः स्नानं समर्पयामि । इत्युक्त्वा पञ्चामृतं दुग्धं वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। पयः स्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

**दधिस्नानम्।**

पञ्चामृतं दधि वा गृहीत्वा।

---

[८०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वतीर्थसमायुक्तं सुगन्धिं निर्मलं जलम्। आचम्यतां मया दत्तं गृहाण गणनायक ।। या०र०पृ. १२।।

[८१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गङ्गा सरस्वती रेवा पयोष्णीनर्मदाजलैः। स्नापितोऽसि मया देव ह्यतः शान्तिं प्रयच्छ मे।। या०र०पृ. १२।।

[८२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्।। ब्र०स०पृ. ४०।।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभिनो मुखा करत्प्रणऽ आयुं षि तारिषत्।। शु०य०२३/३२।।[८३]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दधिस्नानं समर्पयामि । इत्युक्त्वा पञ्चामृतं दधि वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदक स्नानान्ते आचमनीयं जलं समर्पयामि।

**घृतस्नानम्।**

पञ्चामृतं घृतं वा गृहीत्वा।

ॐ घृतं घृतपावानः पिबत व्वसां वसापावनः पिबतान्तरिक्षस्य हविरसि स्वाहा।
दिशः प्रदिश आदिशो व्विदिशऽउद्दिशो दिग्भ्यः स्वाहा।। शु०य० ६/१९।।[८४]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः घृतस्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं घृतं वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। घृतस्नानान्ते शुद्धोदक स्नानं समर्पयामि। शुद्धोदक स्नानान्ते आचमनीयं जलं समर्पयामि।

**मधुस्नानम्।**

पञ्चामृतं मधु वा गृहीत्वा।

ॐ मधु व्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्न्नः सन्त्वोषधीः।। शु०य० १३/२७।।[८५]
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता।। शु०य० १३/२८।।
मधुमान्नो वनस्पतिर्मधुमाँ२अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।। शु०य० १३/२९।।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः मधुस्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं मधु वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**शर्करास्नानम्।**

---

[८३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४०।।

[८४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नवनीतसमुत्पन्नं सर्वसंतोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४१।।

[८५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
तरुपुष्पसमुद्भूतं सुस्वादु मधरं मधु। तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४१।।

पञ्चामृतं शर्करां वा गृहीत्वा।

ॐ अपां रसमुद्वयसं सूर्ये सन्तं समाहितम्।
अपां रसस्य यो रसस्तं वो गृह्माम्युत्तममुपयामगृहीतोऽसीन्द्राय
त्वा जुष्टं गृह्माम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्।। शु०य० ०९/०३।।[८६]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः शर्करास्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं शर्करां वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**पञ्चामृतस्नानम्।**[८७]

मिलित पञ्चामृतं गृहीत्वा।

ॐ पञ्चनद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधासोदेशेभवत्सरित्।। शु०य० ३४/११।।[८८]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पञ्चामृतस्नानं समर्पयामि । इत्युक्त्वा पञ्चामृतं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**गन्धोदकस्नानम्।**

अष्टगन्धमिश्रितं वा कुङ्कुममिश्रितं वा केशरचन्दनमिश्रितं जलं गृहीत्वा।

ॐ गन्धर्व्वस्त्वा विश्वावसुः परिदधातुविश्वस्यारिष्ट्यै यजमानस्य
परिधिरस्यग्निरिडऽईडितः।। शु०य० ०२/०३।।[८९]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धोदकस्नानं समर्पयामि । इत्युक्त्वा अष्टगन्धमिश्रितं वा कुङ्कुममिश्रितं वा केशरचन्दनमिश्रितं जलं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं

---

[८६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
इक्षुसारसमुद्भूता शर्करापुष्टिकारिका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४१।।

[८७] संस्कारभास्करकारा इदं पञ्चामृतस्नानं न स्वीकुर्वन्ति।

[८८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पयो दधि घृतं चैव मधु च शर्करायुतम्। पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४०।।

[८९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मलयाचलसम्भूतं चन्दनागरुसम्भवम्। चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४०।।

जलं समर्पयेत्। गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**उद्वर्तनस्नानम्।**

सुगन्धितैलमिश्रितं जलं गृहीत्वा।

ॐ अं शुनातेऽअं शुः पृच्यताम्परुषा परुः ।
गन्धस्ते सोममवतु मदायरसोऽअच्युतः ।। शु०य० २०/२७।।[१०]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः उद्वर्तनस्नानं समर्पयामि । इत्युक्त्वा सुगन्धितैलमिश्रितं जलं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। उद्वर्तनस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पुष्पं समर्पयामि । इत्युक्त्वा पुष्पं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः धूपं आघ्रापयामि । इत्युक्त्वा धूपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दीपं दर्शयामि । इत्युक्त्वा दीपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्यं समर्पयेत्।

फलं नैवेद्यं पञ्चामृत नैवेद्यं वा पूरतो निधाय। ॐ गं गणपतये नमः इत्युक्त्वा जलं संप्रोक्षेत्। ग्रासमुद्रया[११] भोजयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।
नैवेद्य मध्ये पानीयं समर्पयामि। पुनः भोजयेत्।
ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।

---

[१०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४०।।

[११] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

ॐ उदानाय स्वाहा।

ॐ समानाय स्वाहा।

ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत् । हस्त प्रक्षालनं समर्पयामि। इत्युक्त्वा हस्तप्रक्षालनार्थे आचमनीयं जलं समर्पयेत्। मुखप्रक्षालनं समर्पयामि। इत्युक्त्वा मुखप्रक्षालनार्थे आचमनीयं जलं समर्पयेत् । करोद्वर्तनार्थे चन्दनं समर्पयामि। इत्युक्त्वा चन्दनं समर्पयेत् । मुखवासार्थे पूगीफलं ताम्बूलं च समर्पयामि । प्रार्थनापूर्वकं नमस्करोमि ।

हस्ते जलमदाय। अनेन यथाशक्तिपञ्चामृतपूर्वाराधनकृतेन श्रीसिद्धिबुद्धिसहित महागणपतिः प्रीयन्तां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

[९२]निर्माल्यं आघ्राय उत्तरे विसृज्य। हस्तं प्रक्षाल्य। पुनः गन्धाक्षतपुष्पाणि समर्पयेत्।

**अभिषेकस्नानम्।**

धारापात्रं गन्धादिभिः सम्पूज्य देवस्योपरि संततजलधारां पयोधारां वा कुर्वन् गणपत्यथर्वशीर्ष सूक्तेन अभिषेकमारभेत्।

## ०२/०१. अथ गणपत्यथर्वशीर्षम् ।[९३]

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम्।। ऋतं वच्मि। सत्यं वच्मि। अव त्वं माम्। अव वक्तारम्। अव श्रोतारम् । अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्। त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं

---

[९२] पूजायां पूर्वसमर्पित पुष्पाणिरूपम्।

[९३] अत्र यज्ञोपवीतरहितानां कृते पौराणिकं सङ्कष्टनाशनस्तोत्रं पठ्यते।

**०२/०२. अथ सङ्कष्टनाशनं गणेशस्तोत्रम् ।**

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्। भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये।। १।।
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्। तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्।। २।।
लम्बोदरं पञ्चमं च षष्ठं विकटमेव च। सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टकम्।। ३।।
नवमं भालचन्द्रं च दशमं तु विनायकम् । एकादशं गणपतिं द्वादशं तु गजाननम्।। ४।।
द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः। न च विघ्नभयं तस्य सर्वसिद्धिकरं परम्।। ५।।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्। पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम्।। ६।।
जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत्। संवत्सरेण सिद्धिं च लभते नात्र संशयः।। ७।।
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत्। तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः।। ८।।

**इति श्रीनारदपुराणे सङ्कष्टनाशनं गणेशस्तोत्रम्।**

सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वत्तोजायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोनिलो नभः। त्वं चत्वारि वाक् पदानि। त्वं गुणात्रयातीतः। त्वमवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम्।। गणादिन्पूर्वमुच्चार्य वर्णादिस्तदनन्तरम् । अनुस्वारः परतरः। अर्धेन्दुलसितम् । तारेण रुद्धम्। एतत्तव मनुस्वरूपम्। गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। सं हिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्रीछन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः। एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्।

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्।।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्।।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्।।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः।

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु
लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः।।[९४] ब्र०स०पृ. ४७२।।

ॐ सर्व्वेषां वाऽएष व्वेदानां रसो यत्सामसर्व्वेषामेवैनमेतद्वेदानां रसेनाभिषिञ्चति।। ब्रा०मन्त्रः।।

ॐ शान्तिः शान्तिः सुशान्तिर्भवतु । सर्वारिष्टशान्तिर्भवतु । ॐ अमृताभिषेकोऽस्तु । ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः अभिषेकस्नानं समर्पयामि । इत्युक्त्वा अभिषेकस्नानं सम्पन्नमिति वदेत्।

**शुद्धोदकस्नानम्।**

---

[९४] एतदथर्वशीर्षं योऽधीते। स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते। स पञ्चमहापापात्प्रमुच्यते। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायम्प्रातः प्रयुञ्जानोऽपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्ममर्थं कामं मोक्षं च विन्दति। इदमथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद्दास्यति स पापीयान्भवति। सहस्रावर्तनाद्यं य काममधीते। तं तमनेन साधयेत्। अनेन गणपतिमभिषिंञ्चति। स वाग्मी भवति। चतुर्थामनश्नञ्जपति। स विद्यावान्भवति। इत्यथर्वणवाक्यम्। ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचिनेति। यो दूर्वाङ्कुरैर्यजति। स वैश्रवणोपमो भवति। यो लाजैर्यजति। स यशोवान् भवति स मेधावान् भवति। यो मोदकसहस्रेण यजति। स वाञ्छितफलमवाप्नोति। यः साज्यसमिद्भिर्यजति। स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति। सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति। महाविघ्नात्प्रमुच्यते। महाप्रत्यवायात्प्रमुच्यते। स सर्वविद्भजति स सर्वविद्भजति। यं एवं वेद। इत्युपनिषत्।। ब्र०स०पृ. ४७३।।

शुद्धजलेन देवाय स्नपयेत्।

ॐ शुद्धवाल: सर्व्वशुद्धवालो मणिवालस्तऽआश्विना: श्येत: श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्णायामाऽअवलिप्तारौद्रानभोरूपा: पार्जन्न्या:।। शु०य० २४/०३।।[९५]

ॐ भूर्भुव: स्व: सिद्धिबुद्धिसहित महागणपतये नम: शुद्धोदकस्नानं समर्पयामि । इत्युक्त्वा देवाय शुद्धजलेन स्नपयेत्। तत् पश्चात् एकवारं जलं समर्पयेत्। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । गणेशं शुद्धवस्त्रेण प्रमृज्य रक्तवस्त्रप्रसारिते मृन्मये पीठे पट्टे वा कुङ्कुमाक्षतैर्गोधुमैर्वा कृतेऽष्टदले पद्मे गन्धानुलेपनपूर्वकं स्थापयेत्।

**वस्त्रम्।**

वस्त्रार्थे रक्तसूत्रं वा प्रत्यक्षं वस्त्रं रक्ताम्बरं गृहीत्वा।

ॐ तस्म्माद्द्यज्ञात्सर्व्वहुतऽऋच: सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्म्माद्यजुस्तस्म्मादजायत।। शु०य० ३१/०७।।[९६]

ॐ भूर्भुव: स्व: सिद्धिबुद्धिसहित महागणपतये नम: वस्त्रोपवस्त्रे समर्पयामि । इत्युक्त्वा देवाय रक्तसूत्रं रक्ताम्बरं वा समर्पयेत् । तत् पश्चात् एकवारं जलं समर्पयेत्। वस्त्रान्ते आचमनीयं जलं समर्पयामि।

**यज्ञोपवीतम्।**

यज्ञोपवीतं तदभावे अक्षतान् वा गृहीत्वा।

ॐ तस्मादश्वाऽअजायन्त ये के चोभयादत:।
गावो ह जज्ञिरे तस्म्मात्तस्म्माज्जाताऽअजावय:।। शु०य० ३१/०८।।[९७]

ॐ भूर्भुव: स्व: सिद्धिबुद्धिसहित महागणपतये नम: यज्ञोपवीतं समर्पयामि ।। इत्युक्त्वा देवाय यज्ञोपवीतं तदभावे अक्षतान् वा समर्पयेत् । तत् पश्चात् एकवारं जलं समर्पयेत्। यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि।

---

[९५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कावेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती। गङ्गा च यमुना तोयं मयास्नानार्थमर्पितम्।। बृ०प्र०पृ. ९५।।

[९६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे। मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम्।। ब्र०स०पृ. ४५।।

[९७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्। उपवीतं मया दत्तं गृहाण गणनायक।। या०र०पृ. १६।।

**गन्धम्।**

चन्दनं कुङ्कुमं वा गृहीत्वा तिलकार्थम् अनामिकया तिलकं कुर्यात्।

ॐ तँयज्ञम्बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवाऽअयजन्त साद्ध्याऽऋषयश्च ये।। शु०य० ३१/०९।।[९८]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा देवाय चन्दनेन कुङ्कुमेन वा गन्धं समर्पयेत्।

**अक्षताः।**

हस्ते अक्षतान् गृहीत्वा ।

ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽअधूषत।
अस्तोषत स्वभानवोविप्रा नविष्ठया मती योजान्विन्द्र ते हरी।। शु०य० ०३/५१।।[९९]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः अक्षतान् समर्पयामि । इत्युक्त्वा देवाय तिलकोपरि अक्षतान् समर्पयेत्।

**पुष्पाणि।**

हस्ते पुष्पाणि गृहीत्वा।

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किम्बाहू किमुरूपादाऽउच्येते।। शु०य० ३१/१०।।[१००]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः ऋतुकालोद्भवाणि पुष्पाणि समर्पयामि । इत्युक्त्वा देवाय पुष्पाणि समर्पयेत्।

---

[९८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् (केशरादिसमन्वित्यपि पाठ)।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्।। ब्र०स०पृ. ४६।।

[९९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ता सुशोभिताः। मया निवेदिता भक्त्वा गृहाण गणनायक।। ब्र०स०पृ. ४६।।

[१००] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
माल्यादीनि (सुमाल्यानित्यपि पाठः) सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाऽऽनीतानि पुष्पाणि गृहाण गणनायक।। ब्र०स०पृ. ४६।।

**दूर्वाङ्कुराः।**

दूर्वाङ्कुरान् गृहीत्वा।

ॐ काण्डात्त्काण्डात्प्ररोहन्तीपरुषः परुषस्परि।
एवानो दूर्व्वेप्प्रतनुसहस्रेणशतेन च।। शु०य० १३/२०।।[१०१]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः दूर्वाङ्कुरान् समर्पयामि । इत्युक्त्वा देवाय दुर्वाङ्कुरान् समर्पयेत्।

**सौभाग्यद्रव्याणि।**

अबीरादि चूर्णानि गृहीत्वा।

ॐ अहिरिवभोगैः पर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः।
हस्तघ्नोविश्वावयुनानिविद्वान् पुमान् पुमां सम्परिपातु विश्वतः।। शु०य० २९/५१।।[१०२]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः सौभाग्यद्रव्याणि समर्पयामि । इत्युक्त्वा देवायाऽबीरादि चूर्णानि समर्पयेत्।

**धूपः।**

धूपशलाकां प्रज्वाल्य। हस्ते जलमादाय।

ॐ ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्यः कृतः।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत।। शु०य० ३१/११।।[१०३]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः धूपमाघ्रापयामि । इत्युक्त्वा देवायाऽऽचमनीयम् प्रदर्श्य जलपात्रे जलं क्षिपेत्।

---

[१०१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दूर्वा ह्यमृतसम्पन्ना शतमूला शताङ्कुरा। शतं पातकसंहन्त्री शतमायुष्यवर्धिनी।। या०र०पृ. १७।।

[१०२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अबीरं च गुलालं च हरिद्रादिसमन्वितम्। नानापरिमलद्रव्यं च गृहाण गणनायक।। ब्र०स०पृ. ४८।।
अथवा
अबीरमायाषोवृद्धिर्गुलालं प्रीतिवर्धनम्। सिन्दूरं संतति प्राप्तिर्हरिद्रारोगनाशिनीम्।। परम्परा।।

[१०३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।। ब्र०स०पृ. ४८।।

**दीपः।**

दीपं प्रज्वाल्य। हस्ते जलमादाय।

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत।
श्रोत्राद्वायुश्च प्राणश्चमुखादग्निरजायत।। शु०य० ३१/१२।।[१०४]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः दीपं दर्शयामि।[१०५] इत्युक्त्वा देवायाऽऽचमनीयं प्रदर्श्य जलपात्रे जलं क्षिपेत्।

**नैवेद्यम्।**

गुडघृतादि निर्मितं मोदकं मोतिचूराख्यं वा (महाराष्ट्रीयाणां)मोदकाख्यं वा देवस्य पुरतो निधाय नैवेद्यं निवेदयेत्। हस्ते जलमादाय।

ॐ नाभ्याऽआसिदन्तरिक्षं शीर्ष्णोद्यौः समवर्तत।
पद्भ्यांभूमिर्दिशः श्रोत्रात्तथा लोकाँरऽअकल्प्ययन्।। शु०य० ३१/१३।।[१०६]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा देवायाऽऽचमनीयं प्रदर्श्य जलपात्रे जलं क्षिपेत्। गायत्रीमन्त्रेण वा ॐ गं गणपतये नमः इति दूर्वाङ्कुरेण जलं सम्प्रोक्ष्य दूर्वाङ्कुरं नैवेद्योपरि निधाय अस्त्रेण[१०७] संरक्ष्य धेनुमुद्रया[१०८] अमृतीकृत्य ग्रासमुद्रया[१०९] भोजयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।

---

[१०४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्।। ब्र०स०पृ. ४९।।

[१०५] समर्पयामीत्यपि पाठः।

[१०६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम्।। ब्र०स०पृ. ४९।।
अथवा- आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्।।

[१०७] मध्यमाम् अङ्गुष्ठेन फडिति ताडयित्वा नैवेद्यस्य परितो हस्तभ्रमणमिति अस्त्रमुद्रया संरक्ष्य।

[१०८] परिवृत्तकरौ पश्चात्तर्जनीमध्यमे युते। कनिष्ठानामिकाङ्गुष्ठं परस्पर युतं कुरु। धेनुमुद्रेयमाख्याता अमृतीकरणं भवेत्।

[१०९] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चाङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

ॐ ब्रह्मणे नमः ।

नैवेद्य मध्ये पानीय[११०] समर्पयामि। पुनः भोजयेत्।

ॐ प्राणाय स्वाहा।

ॐ अपानाय स्वाहा।

ॐ व्यानाय स्वाहा।

ॐ उदानाय स्वाहा।

ॐ समानाय स्वाहा।

ॐ ब्रह्मणे नमः।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः नैवेद्यान्ते उत्तरापोशनं समर्पयामि। हस्त प्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि। आचमनीयं जलं समर्पयामि। इत्युक्त्वा चतुर्वारं जलपात्रे जलं त्यजेत्। करोद्वर्तनार्थे गन्धं समर्पयामि । इत्युक्त्वा देवाय गन्धं समर्पयेत् ।

**मुखवासार्थे ताम्बूलम्।**

ताम्बूलं पूगिफलं लवङ्गम् एलादिचूर्णं च गृहीत्वा।

ॐ उतस्मास्यद्रवतस्तुरण्यतः पर्णन्नवेरनुवातिप्प्रगर्द्धिनः।

श्येनस्ये वद्ध्रजतोऽअङ्कसम्परिदधिक्क्राव्णः सहोर्ज्जातरित्रः स्वाहा।। शु०य० ०९/१५।।[१११]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः ताम्बूलं समर्पयमि। इत्युक्त्वा मुखवासद्रव्यं देवाय समर्पयेत्।

**फलम्।**

फलं गृहीत्वा।

ॐ याः फलिनीर्याऽअफलाऽअपुष्प्पायाश्च पुष्पिणीः।

बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वं हसः ।। शु०य० १२/८९।।[११२]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः फलं समर्पयामि। इत्युक्त्वा फलं देवाय समर्पयेत्।

---

[११०] अत्र ब्रह्मनित्यकर्मसमुच्चयकाराः

एलाशीरलवङ्गादिकर्पूरपरिवासितम्। प्राशनार्थे कृतं तोयं गृहाण गणनायक ।। इत्यधिकं पठन्ति।। (पृ. ४९)

[१११] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

पुगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।। ब्र०स०पृ. ५०।।

[११२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि।। ब्र०स०पृ. ५०।।

**दक्षिणा।**

सुवर्णं व्यावहारिकं वा द्रव्यं गृहीत्वा।

ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत्।
सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ।। शु०य० १३/०४।।[११३]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः दक्षिणां समर्पयामि। इत्युक्त्वा दक्षिणा देवाय समर्पयेत्।

**कर्पूरारार्तिक्यम्।**

कर्पूरं प्रज्वाल्य घण्टानादं कुर्वन् परितो भ्रामयेत्।

ॐ इदं हविः प्रजननम्मेऽअस्तुदशवीरं सर्व गणं स्वस्तये।
आत्मसनि प्रजासनि पशुसनि लोकसन्य भयसनि।
अग्निः प्रजां बहुलाम्मे करोत्वन्नं पयो रेतो ऽअस्मासु धत्त।। शु०य० १९/४८।।[११४]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः कर्पूरारार्तिक्यं समर्पयामि। इत्युक्त्वा नीराजनपात्र भूमौ निधाय। जलेन प्रदक्षिणिं कृत्य पुष्पैः ततश्च दक्षिणहस्तेन नीराजनं देवाय समर्पयेत्। स्वयं च गृहीत्वा। हस्तं प्रक्षाल्य।

**मन्त्रपुष्पाञ्जलिः।**

अञ्जलौ पुष्पाणि गृहीत्वा। उत्त्थाय–

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्प्रथमान्यासन्।
ते हनाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः।। शु०य० ३१/१६।।[११५]

---

[११३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः। अनन्त पुण्यफलदं ह्यतः शान्तिं प्रयच्छ मे।। ब्र०स०पृ. ५०।।

[११४]अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि।। ब्र०स०पृ. ५१।।
मङ्गलं भगवान्दुढिः मङ्गलं मूषकध्वजः। मङ्गलं पार्वतीपुत्रं मङ्गलाय तनं गणः।।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते।। स०श० ११/१०।।

[११५] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
त्वां विघ्नशत्रु दलनेति च सुन्दरेति भक्त प्रियेति सुखदेति वर प्रदेति।
विद्या प्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव।। ब्र०स०पृ. ३१९।।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः मन्त्रपुष्पाञ्जलिं समर्पयामि। इत्युक्त्वा पुष्पाणि देवाय समर्पयेत्।

**प्रदक्षिणाम्।**

करणाय अञ्जलिं बध्वा पूर्वादि क्रमेण परितो व्यावर्त्य।

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञन्तन्वानाऽअबद्ध्नन्पुरुषम्पशुम् ।। शु०य० ३१/१५।।[११६]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः प्रदक्षिणां समर्पयामि। इत्युक्त्वा पूवादारभ्य ऐशानपर्यन्तं त्रिर्भ्रमणं कुर्यात्।

**विशेषार्घः।**

अर्घपात्रे जलं प्रपूर्य गन्धाक्षतपुष्पसहितं नारिकेलं फलं वा धृत्वा।

ॐ यन्मेच्छिद्रञ्चक्षुषो हृदयस्यमनसो वातितृण्णम्बृहस्पतिर्म्मेतद्धातु।
शन्नो भवतु भुवनस्ययस्पतिः।। शु०य० ३६/०२।।[११७]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः विशेषार्घं समर्पयामि। इत्युक्त्वा अर्घपात्राज्जलं नारिकेलोपरि प्रक्षिप्य फलं देवाय समर्पयेत्।

**प्रार्थना।**

नमस्कारं कृत्वा।

---

संस्कारभास्करकारा इमं मन्त्रमत्र न गृह्णन्ति। किन्तु प्रार्थनापूर्वक नमस्कारे गृह्णन्ति।
नाना सुगन्धि पुष्पाणि यथा कालोद्भवाणि च। पुष्पाञ्जलिः मया दत्ता गृहाण गणनायक।। नै०प्र०पृ. ३९।।

[११६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यानि कानि च पापानि जन्मान्तकृतानि च (ज्ञाताज्ञातकृतानि चेत्यपि पाठ)।
तानि सर्वाणि नश्यन्तु प्रदक्षिण पदेपदे।। या०र०पृ. २०।।

[११७] संस्कारभास्कारकारा इमं मन्त्रं न गृह्णन्ति।
अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक। भक्तानमभयं कर्ता त्राता भव भवार्णवात्।। ब्र०स०पृ. ३१८।।
द्वैमातुरकृपासिन्धो षाण्मातुरग्रजः प्रभो। वरदं त्वं वरं देहि वाञ्छितं वाञ्छितार्थद।। ब्र०स०पृ. ३१९।।
गृहाणार्घ्यमिदं देव सर्वदेव नमस्कृत। अनेन सफलार्घेण फलदोऽस्तु सदा मम।। या०र०पृ. २०।।
गणेशाय नमस्तुभ्यं सर्वसिद्धि प्रदायक। संकष्टं हर मे देव गृहाणार्घ्य नमोऽस्तु ते।। परम्परा।।

ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो
व्रातेभ्यो व्रातपतिभ्यश्चवो नमो नमो
गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमो नमो
विरूपेभ्यो विश्वरूपेभ्यश्चवो नमः।। शु०य० १७/२५।।[११८]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः प्रार्थनापूर्वक नमस्कारान् समर्पयामि।

हस्ते जलमादाय। अनया पूजया सिद्धि बुद्धि सहितः महागणपतिः साङ्गः सपरिवारः प्रीयतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।।

**।। इति गणपतिपूजनम् ।।**

## ।। पुण्याहवाचनप्रयोगः।। ०३।।

स्वपुरतः शुद्धायां भूमौ पञ्चवर्णैस्तन्दुलैःअष्टदलं कृत्वा।

**तत्र भूमिं स्पृष्ट्वा।**

ॐ महीद्यौः पृथिविचनऽइमंय्यज्ञम्मीमिक्षताम्।
पिपृतान्नो भरीमभिः ।। शु०य० ०८/३२।।[११९]

**तत्र यवप्रक्षेप।**

हस्ते यवान् गृहीत्वा।

ॐ ओषधयः सोमवदन्त सोमेन सहराज्ञा।
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि।। शु०य० १२/९६।।[१२०]

---

[११८] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते।। ब्र०स०पृ. ३१९।।
भक्तार्तिनाशन पराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्न वरदाय नमो नमस्ते।। या०र०पृ. २०।।
नमस्ते बह्मरूपाय विष्णुरूपाय ते नमः। नमस्ते रुद्ररूपाय करिरूपाय ते नमः।। ब्र०स०पृ. ३१९।।
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे। भक्तप्रियाय देवाय नमस्तुभ्यं विनायक।। ब्र०स०पृ. ३१९।।
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।। ब्र०स०पृ. ३१९।।

[११९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विश्वाधाराऽसि धरणी शेषनागोपरिस्थिता। उद्धृतासि वराहेण कृष्णेन शतबाहुना।। या०र०पृ. २१।।

[१२०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

इत्युक्त्वा यवान् अष्टदलोपरि प्रक्षिपेत्।

**तत्र कलशस्थापनम् ।**

ॐ आजिघ्रकलशम्मह्यात्त्वाव्विशन्त्विन्दव।
पुनरुर्ज्जानिवर्त्तस्वसान: सहस्रन्धुक्क्ष्वो-
रुधारापयस्वती: पुनर्म्माविशताद्रयि:।। शु०य० ०८/४२।।[१२१]

इत्युक्त्वा अष्टदलोपरि कलशं स्थापयेत्।

**तत्र जलपूरणम्।**

कलशे जलं पूरयन्।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋत
सदन्यसि वरुणस्यऽऋत सदनमसिवरुणस्यऽऋत सदनमासीद ।। शु०य० ०४/३६।।[१२२]

**तत्र गन्धप्रक्षेप:।**

कलशे गन्धं प्रक्षिपन्।

ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पति:।
त्वामोषधेसोमो राजाव्विद्वान्यक्ष्मादमुच्यत।। शु०य० १२/९८।।[१२३]

**तत्र धान्यप्रक्षेप:।**[१२४]

---

यवोसि यवराजोसि सर्वोत्पत्तिकर: शुभ:। प्राणिनां जीवनोपायस्त्वां भूमौ स्थापयाम्यहम्।। कर्म०पृ. १८०।।

[१२१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हेमरौप्यादिसम्भूतं ताम्रजं सुदृढन्नवम्। कलशन्धौतकल्माषं छिद्रव्रणविवर्जितम्।। या०र०पृ. २१।।

[१२२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जीवनं सर्वजीवानां पावनं पावनात्मकम्। बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम्।। या०र०पृ. २१।।

[१२३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
केशरागरुकंकोलघनसार समन्वितम्। मृगनाभियुतङ्गन्धं कलशे प्रक्षिपाम्यहम्।। या०र०पृ. २१।।

[१२४] संस्कारभास्करकारा: पुण्याहवाचने धान्यप्रक्षेपविधिं न गृह्णन्ति।

कलशे धान्यानि[१२५] अक्षतान् वा प्रक्षिपन्।

ॐ धान्यमसिधिनुहिदेवान्प्राणायत्त्वोदानायत्त्वा व्यानायत्त्वा।
दीर्घामनुप्रसितिमायुषेधान्देवोव: सविता हिरण्यपाणि:
प्रतिगृब्भ्णात्त्वच्छिद्रेण–पाणिनाचक्षुषेत्त्वामहीनाम्पयोसि।। शु०य० ०१/२०।।[१२६]

**तत्र सर्वौषधीप्रक्षेप:।**

कलशे सर्वौषधि तुलसीदलानि सर्षपान् वा हरिद्रां च प्रक्षिपन्।

ॐ याऽओषधी: पूर्व्वाजातादेवेभ्यस्त्रियुगन्पुरा।
मनैनुबभ्रूणामहंशतन्धामानिसप्तच।। शु०य० १२/७५।।[१२७]

**तत्र दूर्वाप्रक्षेप:।**

कलशे दूर्वा: प्रक्षिपन्।

ॐ काण्डात्काणात्प्ररोहन्ती परुष: परुषस्प्परि।
एवानो दूर्व्वेप्प्रतनुसहस्त्रेणशतेन च।। शु०य० १३/२०।।[१२८]

**तत्र पञ्चपल्लवनिक्षेप:।**

कलशे पञ्चपल्लव निक्षिपन्।

ॐ अश्श्वत्थेवोनिषदनम्पर्ण्णेवोव्वसतिष्कृता।
गोभाजऽइत्किलासथयत्सनवथपुरुषम्।। शु०य० १२/७०।।[१२९]

---

[१२५] अत्र सामान्यतया अक्षतान् प्रक्षिपन्ति यजमाना:। किन्तु सप्तधान्यानां प्रक्षेपोऽपि कलशे विधीयते। तद्यथा–
(१) गोधूमा: (२) व्रीहि: (३) यवा: (४) तिला (५) मुद्गा: (६) चणका: (७) माषाश्च।

[१२६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
धान्योषधीमनुष्याणां जीवनं परमं स्मृतम्। क्षिप्तं यत्कार्य संभूतं कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८१।।

[१२७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
देवेभ्य: पूर्वतो जाता देवेभ्य स्त्रियुगं पुरा। शतं तनुं च या बभ्रुर्जीवनं जीवनाय च।। सु०वि०पृ. २९।।

[१२८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दूर्वेऽमृतसंपन्ने* शतमूले शतांकुरे। शतं पातक संहर्त्री शतमायुष्य वर्धिनी।। बृ०प्र० ११४।।
* अत्र दूर्वे ह्यमृत सम्पन्ना इति पाठ: याज्ञिकरत्ने प्रदत्त:।

[१२९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अश्वत्थोदुम्बरप्लक्षं चूतन्यग्रोधपल्लवा:। पञ्चभृङ्गा इति प्रोक्ता: सर्वकर्म सुशोभना:।। कर्म०पृ. १८२।।

**तत्र पुष्प प्रक्षेपः।**[१३०]

हस्ते पुष्पं गृहीत्वा।

ॐ ओषधिः प्रति मोदध्वं पष्पवतीः प्रसूवरीः।
अश्वाऽइव सजित्वरीर्वीरुधः पारयिष्णवः।। शु०य० १२/७७।।[१३१]

इत्युक्त्वा कलशे ऋतुकालोद्भव पुष्पं प्रक्षिपेत्।

**तत्र सप्तमृत्प्रक्षेपः।**

सप्तमृदः प्रक्षिपन्।

ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशनी।
यच्छानः शर्म्मसप्प्रथाः।। शु०य० ३६/१३।।[१३२]

**तत्र पूगीफलप्रक्षेपः।**

पूगीफलं प्रक्षिपन्।

ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः।
बृहस्पितप्प्रसूतास्तानोमुञ्चन्त्वंहसः।। शु०य० १२/८९।।[१३३]

**तत्र पञ्चरत्नप्रक्षेपः।**

---

(१) अश्वत्थ (२) उदुम्बर (३) प्लक्ष (४) आम्र (५) न्यग्रोधस्य च पल्लवान् निक्षिपेत्।

[१३०] ब्रह्मनित्यकर्मसमुच्चयकाराः इमं विधिं न स्वीकुर्वन्ति।

[१३१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विविधं पुष्प संजातं देवानां प्रीतिवर्धनम्। क्षिप्तं यत् कार्य सम्भूतं कलशे प्रक्षिपाम्यहम्।। सु०वि०पृ. ३०।।

[१३२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अश्वस्थानात्गजस्थानाद्वल्मीकात्संगमाद् ह्रदात्। राजद्वाराच्च गोष्ठाच्च मृदमानीय निःक्षिपेत्।। कर्म०पृ. १८२।।
(१) अश्वस्थान (२) गजस्थान (३) वल्मीक (४) सङ्गम (५) ह्रद (समुद्र) (६) राजद्वार (७) गोगोष्ठेत्यादि सप्त स्थानेभ्यः मृदमानीय कलशे प्रक्षिपेत्।

[१३३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पूगीफलमिदं दिव्यं पवित्रं पापनाशनम्। पुत्रपौत्रादिफलदं कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८२।।

पञ्चरत्नानि प्रक्षिपन् तदभावे अक्षतान् प्रक्षिपन्।

ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्।
दधद्रत्नानिदाशुषे।। शु०य० ११/२५।।[१३४]

**तत्र हिरण्यप्रक्षेपः।**

कलशे हिरण्यं व्यावहारिकं वा द्रव्यं प्रक्षिपन्।
ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत्।
सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम।। शु०य० १३/०४।।[१३५]

**तत्र रक्तसूत्रवेष्टनम्।**

रक्तसूत्रेण वस्त्रेण वा वेष्टयन्।

ॐ युवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः।
तंधीरासः कवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः।। पा०गृ० ०२/०२/०९।।[१३६]

**तत्र पात्र-श्रीफल स्थापनम्।**

कलशस्योपरि धान्य पूर्णपात्रं श्रीफल सहितं स्थापयन्। अथवा केवल श्रीफलं स्थापयन्।

ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत।
वस्नेवविक्क्रीणावहाऽइषमूर्जं शतक्रतो।। शु०य० ०३/४९।।[१३७]

**०३/०१. अथ वरुणावाहन्।**

---

[१३४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्। एतानि पञ्चरत्नानि कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८२।।
(१) कनक (२)कुलिश (३)नील (४)पद्मराग (५)मौक्तिकं च कलशे प्रक्षिपेत्।

[१३५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।अनन्तपुण्यफलदं कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८२।।

[१३६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सूत्रं कार्पाससंभूतं ब्रह्मणा निर्मितं पुरा। येन बद्धं जगत्सर्वं वेष्टनं कलशस्य च।। कर्म०पृ. १८१।।

[१३७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पिधानं सर्ववस्तूनां सर्वकार्यार्थ साधनम्। संपूर्णः कलशो येन पात्रं तत्कलशोपरि।। कर्म०पृ. १८३।।
अत्रपात्रमित्युच्यते किन्तु श्रीफलमेव कलशोपरि स्थापयेत्।

हस्ते जलमादाय। ॐ तत्त्वायामीत्यस्य शुन:शेपऋषि: त्रिष्टुप्छन्द: वरुणोदेवता वरुणावाहने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते अक्षतान् गृहीत्वा वरुणमावाहयेत्।

ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भि:।
अहेडमानोव्वरुणेहबोद्ध्युरुशं समानऽआयु: प्प्रमोषी:।। शु०य० १८/४९।।[१३८]

ॐ भूर्भुव: स्व: अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि। इत्युक्त्वा कलशस्योपरि अक्षतान् समर्पयेत्।

## ०३/०२. प्रतिष्ठापनम्।[१३९]

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मो३म्प्रतिष्ठ ।। शु०य० २/१३।।[१४०]

ॐभूर्भुव:स्व: वरुणाय नम: वरुण सुप्रतिष्ठितो वरदो भव। इत्युक्त्वा कलशे अक्षतान् समर्पयेत्।

## ०३/०३. अथ वरुणपूजनम्।

ततो पञ्चोपचारै:[१४१]वरुणं सम्पूजयेत्।

ॐ[१४२]भूर्भुव: स्व: वरुणाय नम: गन्धं समर्पयामि।
ॐ भूर्भुव: स्व: वरुणाय नम: पुष्पं समर्पयामि।
ॐ भूर्भुव: स्व: वरुणाय नम: धूपं आघ्रापयामि।
ॐ भूर्भुव: स्व: वरुणाय नम: दीपं दर्शयामि ।
ॐ वरुणाय नम: नैवेद्यं निवेदयामि।

---

[१३८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय।
सुपाशस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।। ब्र०स०पृ. ३२१।।

[१३९] संस्कारभास्करकारा: पुण्याहवाचने प्रतिष्ठाविधिं न गृह्णन्ति।

[१४०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतै: सह।। या०र०पृ. ०७।।

[१४१] संस्कारभास्करकारा: षोडशोपचारैरिति पठन्ति।

[१४२] पञ्चोपचारार्थे ॐ वं वरुणाय नम: गन्धं समर्पयामि। ॐ वं वरुणाय नम: पुष्पं समर्पयामि।
ॐ वं वरुणाय नम: धूपं आघ्रापयामि। ॐ वं वरुणाय नम: दीपं दर्शयामि ।
ॐ वं वरुणाय नम: नैवेद्यं निवेदयामि।

इत्यादि पञ्चोपचारैः संपूजयेत्। तत्त्वायामीत्युपरिनिर्दिष्टेन मन्त्रेण पुष्पाञ्जलिं समर्पयेत्। हस्ते जलमादाय। अनेन पञ्चोपचार पूजनेन वरुणः साङ्ग सपरिवारः प्रीयताम् । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**कलशाभिमन्त्रणम्।**

ततो[१४३]ऽनामिकया कलशं स्पृष्ट्वा अभिमन्त्रयेत्।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।। ३४अ।। ब्र०स०पृ. ३३।।
कुक्षौ तु सागराः सर्वे (सप्तसप्तेत्यपि पाठः) सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।। ३४ब।। ब्र०स०पृ. ३३।।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः।[१४४]
गायत्री चात्र सावित्री शान्तिः पुष्टिकरी तथा।। ३५।। ब्र०स०पृ. ३३।।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।
गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ।। ३६।। ब्र०स०पृ. ३३।।
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर।। ३७।। ब्र०स०पृ. ३३।।

**कलश प्रार्थना।**

अञ्जलिं बध्वा प्रार्थयेत्।

देवदानव संवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भो विधृतो विष्णुना स्वयम्।। ३८।। ब्र०स०पृ. ३४।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।। ३९।। ब्र०स०पृ. ३४।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः।। ४०।। ब्र०स०पृ. ३४।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा।। ४१।। ब्र०स०पृ. ३४।।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।

---

[१४३] अत्र संस्कारभास्करकारा गङ्गाद्यावाहनविधिमधिकं स्वीकृर्वन्ति।

[१४४] संस्कारभास्करकारा गायत्रीति, गङ्गेचेति, ब्रह्माण्डोदरेति च श्लोकत्रयं न पठन्ति।

सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।। ४२।। ब्र०स०पृ. ३२१।।
पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक।
पुण्याहवाचनं यावत्तावत्त्वं सन्निधौ भव।। ४३।। ब्र०स०पृ. ३२१।।

ॐ भुर्भुवःस्वः अपां पतये वरुणाय नमः। नमस्कारान् समर्पयामि।

ब्राह्मणा वदेयुः।

सम्पूज्य गन्ध माल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्।
धर्मकर्मणि माङ्गल्ये संग्रामेऽद्भुत दर्शने।। ४४।। सु०वि०पृ. ३४।।
पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते।
एतदेव निरोङ्कारं कुर्यात् क्षत्रिय वैश्ययोः।। ४५।। सु०वि०पृ. ३४।।

ततः स्वस्तिवाचनार्थं युग्मब्राह्मणान् सम्पूजयेत्।

अवनिकृतजानुमण्डलः[१४५] कमलमुकुलसदृशमञ्जलिं शिरस्याधाय[१४६] दक्षिणेन पाणिना स्वर्ण-पूर्णकलशं धारयित्वा वदेत्।

ॐ त्रीणिपदाविचक्क्रमेविष्णुर्गोपाऽअदाब्भ्यः।
अतोधर्म्माणिधारयन्।। शु०य० ३४/४३।।

यजमानो वदेत्। दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च। तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः। तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु।

ॐ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम्।। शु०य० २९/१५।।

यजमानो वदेत्। दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च। तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः। तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु।

ॐ त्रया देवा एकादश त्रयस्त्रिं शाः सुराधसः।

---

[१४५] अत्र केचित् क्षत्रियान् अवनिकृतदक्षिणजानुकं वैश्यां च अवनिकृतवामजानुकं उपवेष्टुमात्रहं धारयन्ति।

[१४६] सर्वत्र गृह्यसूत्रोक्त विधिषु शिरस्याधायेति पठित्वापि याज्ञिकाः कलशं यजमानस्य दक्षिण स्कन्ध आधानं कारयन्ति।

बृहस्पतिपुरोहिता देवस्य सवितुः सवे।
देवा देवैरवन्तु मा।। शु०य० २०/११।।

यजमानो वदेत्। दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च। तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः। तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु। इत्युक्त्वा कलशेन ललाटं स्पृशेत् । कलशं च पुण्याहवाचनस्य स्थापनोपरि स्थापयेत्।

## ०३/०४. अथ ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम्।

जलं दत्वा–यजमानो वदेत्। ॐशिवा आपः सन्तु । ब्राह्मणा वदेयुः।ॐसन्तु शिवा आपः।

पुष्पं दत्वा–यजमानो वदेत्।ॐसौमनस्यमस्तु। ब्राह्मणा वदेयुः। ॐअस्तु सौमनस्यम्।

अक्षतान् दत्वा–यजमानो वदेत्। ॐअक्षतं चारिष्टं चास्तु।
ब्राह्मणा वदेयुः। ॐअस्त्वक्षतमरिष्टं च।

गन्धं दत्वा–यजमानो वदेत्। ॐगन्धाः पान्तु सौमङ्गल्यं चास्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ गन्धाः पान्तु सौमङ्गल्यं चास्तु।

अक्षतान् दत्वा–यजमानो वदेत्। ॐ अक्षताः पान्तु आयुष्यमस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ अक्षताः पान्तु आयुष्यमस्तु।

पुष्पं दत्वा–यजमानो वदेत्। ॐपुष्पाणि पान्तु सौश्रियमस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ पुष्पाणि पान्तु सौश्रियमस्तु।

ताम्बूलं दत्वा–यजमानो वदेत्। ॐताम्बूलानि पान्तु ऐश्वर्यमस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐताम्बूलानि  पान्तु ऐश्वर्यमस्तु।

पूगीफलं दत्वा–यजमानो वदेत्। ॐपूगीफलानि पान्तु बहुफलमस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ पूगीफलानि[१४७] पान्तु बहुफलमस्तु।

व्यावहारिकं द्रव्यं दत्वा–यजमानो वदेत्। ॐदक्षिणाः पान्तु बहुदेयं चास्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ दक्षिणाः पान्तु बहुदेयं चास्तु।

जलं दत्वा–यजमानो वदेत्। ॐपुनरत्रा पान्तु स्वर्चितमस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ पुनरत्रा पान्तु स्वर्चितमस्तु।

यजमानो वदेत्। ॐ दीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशोर्विद्या विनयो वित्तं बहुपुत्रं[१४८] बहुधनं चायुष्यञ्चास्त्विति भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः। दीर्घमायुः श्रेयः शान्ति पुष्टिस्तुष्टिः श्रीर्यशोर्विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यञ्चाऽस्तु।

---

[१४७] संस्कारभास्करकारा पूगीफलानि पान्तु बहुफलमस्त्विति भवन्तो ब्रुवन्त्विति न पठन्ति।

[१४८] बहुधनं चायुष्यं चास्त्विति पाठः प्रायो गुजरातप्रदेशे प्रचलितोऽन्यत्र बहुधनं चायुष्यमिति न पठ्यते।

यजमानो वदेत्। यम् ओङ्कारङ्कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते। तमहमोङ्कारामादिङ्कृत्वा ऋग्यजुःसामाथर्वणाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये।

ब्राह्मणा वदेयुः। ॐ वाच्यताम्।

### ०३/०५. अथाऽऽशीर्वादः।

ब्राह्मणानां हस्तेषु अक्षतान् दद्यात्। तानक्षतान् मन्त्रान् पठन्तो ब्राह्मणाः यजमान दम्पती शिरसि विनिक्षिपेत्।

ॐ भद्द्रङ्कर्णेभिः शृणुयामदेवा भद्रम्पश्श्येमाक्षभिर्य्यजत्राः।।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहिदेवहितँय्यदायुः।। शु०य० २५/२१।।[१४९]

ॐ देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानां रातिरभिनो निवर्तताम्।
देवानां सक्ख्यमुसेदिमाव्वयन्देवानऽआयुःप्प्रतिरन्तु जीवसे।। शु०य० २५/१५।।

ॐ दीर्ग्घायुस्तऽओखधेखनियतायस्म्मेचत्त्वाखनाम्म्यहम्।
अथोत्त्वन्दीर्ग्घायुर्भूत्त्वाशतवल्शाव्विरोहतात्।। शु०य० १२/१००।।

ॐ द्रविणो दा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत्।
द्रविणोदावीरवतीमिषंतो द्रविणोदारासतेदीर्घमायुः।। ऋ० ०१/०७/०४।।

ॐ द्रविणोदाः पिपीषतिजुहोतप्प्रचतिष्ठत्।
नेष्ट्राद्दतुभिरिष्ष्यत।। शु०य० २६/२२।।

ॐ सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।
सवितानः सुवतुसर्वताति सवितानो रासतां दीर्घमायुः।। ऋ० ०७/०८/०१।।

ॐ सविताूत्त्वासवानां सुवतामग्निर्गृहपतीनां सोमोव्वनस्पतीनाम्।
बृहस्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठयायरुद्रः पशुब्भ्योमित्रः
सत्योव्वरुणो धर्म्मपतीनाम् ।। शु०य० ९/३९।।

ॐ नवो नवो भवति जायमानो हयां केतु रुषसामेत्यग्रम्।
भागं देवेभ्यो विदधात्यायन्प्रचन्द्रमास्तिरतेदीर्घमायुः।। ऋ० ०८/०३/२३।।

ॐ नतद्दक्षां सिनपिशाचास्तरन्तिदेवानामोजः प्रथमजं ह्येतत्।
योबिभर्त्तिदाक्षायणं हिरण्यं सदेवेषुकृणुते
दीर्ग्घमायुः समनुष्येषु कृणुतेदीर्ग्घमायुः।। शु०य० ३४/५१।।

---

[१४९] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
ब्रह्मनित्यकर्मसमुच्चये स्वस्त्यस्तु माविघ्नमिति च श्लोकद्वयं न पठ्येते।
स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्ति धनधान्य समृद्धिरस्तु।
ऐश्वर्यमस्तु बलमस्तु रिपोक्षयस्तु वंशे सदैव भवतां हरिभक्तिरस्तु।। या०र०पृ. २५।।
माविघ्नं मा च मे पापं मा सन्तु परिपन्थिनः। सौम्या भवन्तु सुखिनः सर्वे लोकाः सुखावहाः।। कर्म०पृ. १८७।।

ॐ उच्चादिविदक्षिणावन्तोऽअस्थुर्येऽअधदाः सहते सूर्येण।

हिरण्यदाऽअमृत्त्वं भजंतेवासोदाः सोमप्रतिरंतऽआयु।।ऋ० ०८/०६/०३।।

ॐ उच्चाते जातमन्धसो दिविद्भूम्म्यादद।

उग्रं शर्म्ममहिश्श्रवः।। शु०य० २६/१६।।

इत्याशीर्वादः।

यजमानो वदेत्। व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदान विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्।

ब्राह्मणा वदेयुः। समाहितमनसः स्मः।

यजमानो वदेत्। प्रसीदन्तु भवन्तः।

ब्राह्मणा वदेयुः। प्रसन्नाः स्मः।

अथाऽधुना ब्राह्मणा हस्ते अक्षतान् गृहीत्वा आशीर्वादं वदन्तो यजमानस्योपरि तान् अक्षतान् क्षिपेयुः।

यजमानो वदेत्। ॐ शान्तिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु शान्तिः।

यजमानो वदेत्। ॐ पुष्टिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु पुष्टिः।

यजमानो वदेत्। ॐ तुष्टिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु तुष्टिः।

यजमानो वदेत्। ॐ वृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु वृद्धिः।

यजमानो वदेत्। ॐ अविघ्नमस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु अविघ्नम्।

यजमानो वदेत्। ॐ आयुष्यमस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु आयुष्यम्।

यजमानो वदेत्। ॐआरोग्यमस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु आरोग्यम्।

यजमानो वदेत्। ॐ शिवं कर्मास्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु शिवं कर्म[१५०]।

यजमानो वदेत्। ॐ कर्मसमृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु कर्मसमृद्धिः।

यजमानो वदेत्। ॐ वेदसमृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु वेदसमृद्धिः।

यजमानो वदेत्। ॐ शास्त्रसमृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु शास्त्रसमृद्धिः।

यजमानो वदेत्। ॐ धनधान्यसमृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु धनधान्य-समृद्धिः।

यजमानो वदेत्। ॐ पुत्रपौत्रसमृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु पुत्रपौत्र-समृद्धिः।

यजमानो वदेत्। ॐ इष्टसंपदस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु इष्टसंपद्।।

यजमानो वदेत्। ॐ अरिष्टनिरसनमस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु अरिष्ट-निरसनम्।

यजमानो वदेत्। ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतम्।

यजमानो वदेत्। ॐ यच्छ्रेयस्तदस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु यच्छ्रेयः।।

यजमानो वदेत्। ॐ उत्तरे कर्मणि निर्विघ्नमस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु उत्तरे कर्मणि निर्विघ्नम्।

---

[१५०] अत्र केचित् ब्राह्मणवर्याः "अस्तु शिवं कर्मः" इति वदन्ति तत् संपूर्णं प्रामादिकमेव। कर्मदस्य नपुंसकत्वात्।

यजमानो वदेत्। ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु उत्तरोत्तरमहरहरभिवृद्धिः।

यजमानो वदेत्। ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम्। ब्राह्मणा वदेयुः। यजमानस्य गृहे सन्तु उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यमानाः।

यजमानो वदेत्। ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु। ब्राह्मणा वदेयुः। यजमानस्य गृहे अस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपद्।

### ०३/०६. अथ पात्रे उदकसेकः।[१५१]

वाम हस्तेन दक्षिण हस्ते जलपात्रे जलसेकं कुर्वन्तः ब्राह्मणा वदेयुः।

ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदेवते प्रीयेताम्।
ॐ दुर्गापाञ्चाल्यौ प्रीयेताम्।
ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्।
ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम्।[१५२]
ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम्।
ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्।
ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम्।
ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम्।
ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्।
ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्।
ॐ श्रीसरस्वत्यौ प्रीयेताम्।
ॐ श्रद्धामेधे प्रीयेताम्।
ॐ भगवती कात्यायनी प्रीयताम्।
ॐ भगवती माहेश्वरी प्रीयताम्।
ॐ भगवती सिद्धिकरी प्रीयताम्।
ॐ भगवती ऋद्धिकरी प्रीयताम्।
ॐ भगवती पुष्टिकरी प्रीयताम्।
ॐ भगवती तुष्टिकरी प्रीयताम्।
ॐ विघ्नविनायकः प्रीयताम्।[१५३]
ॐ सर्वाः कुलदेवताः प्रीयन्ताम्।
ॐ सर्वाः ग्रामदेवताः प्रीयन्ताम्।

---

[१५१] वामहस्तेन आचमनीयं जलं सततं गृहीत्वा दक्षिणहस्ततले देव तीर्थात् जलं पातयेत्।

[१५२] संस्कारभास्करकारा वसिष्ठपुरोगा ऋषिगणाः प्रीयन्तामिति न पठन्ति।

[१५३] बहुशः आचार्यपुरोहिताः ब्राह्मणाः अत्र "ॐ नमो भगवन्तौ विघ्नविनायकौ प्रीयेताम् इति भगवान् वदन्ति। तत् केवलं प्राचादिकमेव।

पात्राद् बहि:। पूर्वस्याम्[१५४] दिशिभूमौ जलं सततं पातयेत्।

ॐ हताश्च ब्रह्मद्विष:।

ॐ हताश्च परिपन्थिन:।

ॐ हताश्च विघ्नकर्तार:।

ॐ शत्रव: पराभवं यान्तु।

ॐ शाम्यन्तु घोराणि।

ॐ शाम्यन्तु पापानि।

ॐ शाम्यन्त्वीतय:।

पुनश्च पात्रे।

ॐ शुभानि वर्द्धन्ताम्।

ॐ शिवा आप: सन्तु।

ॐ शिवा ऋतव: सन्तु।

ॐ ओषधय: सन्तु।

ॐ शिवा नद्य: सन्तु।

ॐ शिवा गिरय: सन्तु।

ॐ शिवा अतिथय: सन्तु।

ॐ शिवा अग्नय: सन्तु।

ॐ शिवा आहुतय: सन्तु।

ॐ अहोरात्रे शिवे स्याताम्।

ॐ निकामेनिकामेन: पर्ज्जन्न्योवर्षतुफलवत्त्योनऽओषधय: पच्यतां योगक्षेमो न: कल्पताम्।। शु०य० २२/२२।।

ॐ निकामेनिकामेन: पर्ज्जन्न्योवर्षत्वितिनिकामेनिकामे वैतत्रपर्ज्जन्योवर्षति यत्रैतेनयज्ञेन यजन्ते फलवत्यो नऽओषधय: पच्यन्तामिति फलवत्यो वै तत्रौषधय: पच्यन्ते यत्रैतेनयज्ञेनयजन्ते योगक्षेमो न: कल्पयते यत्रैतेन यज्ञेनयजन्ते तस्माद्यत्रैतेन यज्ञेन यजन्ते क्लृप्त: प्रजानां योगक्षेमो भवति।। ब्राह्मणम्।।

ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगा: सर्वे ग्रहा: प्रीयन्ताम्।

ॐ भगवान्नारायण: प्रीयताम्।

ॐ भगवान्पर्जन्य: प्रीयताम्।

ॐ भगवान्स्वामी महासेन: प्रीयताम्।

ॐ पुरोनुवाक्यया[१५५] यत्पुण्यं तदस्तु।

ॐ याज्यया यत्पुण्यं तदस्तु।

ॐ वषट्कारेण यत्पुण्यं तदस्तु।

---

[१५४] हताश्च ब्रह्मद्विषेत्यादीनां शाम्यंत्वित्यंतानां पूर्वस्यां जल प्रक्षेप: इति प्रयोगचूडामणौ।(सं०भा०पृ. ३७)

[१५५] संस्कारभास्करकारा: पुरोनुवाक्ययायाज्यया यत्पुण्यं तदस्त्विति न पठन्ति।

ॐ प्रातः सूर्योदयो यत्पुण्यं तदस्तु।

ॐ पुण्याह कालान् वाचयिस्ये।

ब्राह्मणा वदेयुः। ॐ वाच्यताम्।

यजमानो वदेत्। [१५६]भो ब्राह्मणाः! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्ष- माणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः।[१५७] ॐ अस्तु पुण्याहम्। ॐ अस्तु पुण्याहम्। ॐ अस्तु पुण्याहम्।

ॐ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि।
वृषेववाजी शिशुमतीरपीत्या सर्वतो नः शकुने पुण्यमावद।।ऋ० ०२/१२/०८।।
ॐ पुनन्तुमादेवजनाः पुनन्तुमनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पनीहिमा।। शु०य० १९/३९।।
ॐ स यः कामयेत महत्प्राप्नुयामित्युदगयनऽआपूर्य्यमाणपक्षे पुण्याहे द्वादशाहमुप सद्-
व्रती भूत्वौदुम्बरेकं से चमसे वा सर्वोषधं फलानीति सम्भृत्य परिसमुह्य
परिलिप्याग्निमुपसमाधायावृताज्यं संस्कृत्य पुंसा नक्षत्रेण मन्थः सन्नीय जुहोति।।ब्राह्मणम्।।
ॐ पुनानः सोमा३ धारा२३४ या। आपोवसानो अर्षस्यारत्नधयो निमृस्यसा २ईद साई।
ओहा३ उवा। उत्सोदेवोहिरा २३। हाई। ओहा३ उवा। ण्यया। ओ। ३ होवा। हो ५
ई। डा।। सा० १४/०१/३५।।
ॐ पुनन्तु मा देवजनाः पुनन्तु मनवो धिया।
पुनन्तु विश्वाभूतानि पवमानः पनातु मा।। अ० ०६/०२/१९/०१।।

यजमानो वदेत्। [१५८]भो ब्राह्मणाः! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्ष-माणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः। ॐ अस्तु कल्याणम्। ॐ अस्तु कल्याणम्। ॐ अस्तु कल्याणम्।

ॐ अपाः सोमस्तमिन्द्र प्रयाहि कल्याणीर्जाया सुरणं गृहे ते।
यत्रारथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावतः।। ऋ० ०३/५३/०६।।
ॐ यथेमां व्वाचङ्कल्याणीमावदानिजनेब्भ्यः।
ब्रह्मराजन्न्याब्भ्यां शूद्रायचार्य्याय च स्वाय चारणाय च।

---

[१५६] ब्राह्म्यं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः।। ब्र०स०पृ. ३२५।।

[१५७] संस्कारभास्करकाराः पुण्याहवाचनस्येमं विधिं संक्षेपेणैवं दर्शयन्ति
पुण्याहादित्रिरभ्यास मन्त्रमध्योर्ध्वनिःस्वनैः। पुण्यंकल्याणसमृद्धिश्चस्वस्तिः श्रीत्यादिपंचकम्।।सं०भा०पृ० ३१।।

[१५८] पृथिव्यामुद्धृतायांतु यत्कल्याणं पुरा कृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः।। ब्र०स०पृ. ३२५।।

प्रियो देवानान्दक्षिणायैदातुरिह भूया समयम्मे काम:
समृद्धयतामुपमादोनमतु।। शु०य० २६/२।।

ॐ अथाध्वर्य्यो:प्रतिगरोरात् सुरिमे यजमाना भद्रमेभ्यो यजमानेभ्यो भूदिति
कल्याणमेवैतन्मानुष्यै व्वाचो वदति।।ब्राह्मणम्।।

ॐ काऽ ५ या। न श्चा ३ इत्रा ३ आभूवात्। उ। ती सदा वृधस्स। खा। ओ ३ हो हाई।
कया २३ शचा ३। छ्यौ हो ३। हुम्मा वाऽ२र्तो ३ ५ हाइ।।सा० ०५/०१/२५।।

ॐ विश्वजित् कल्याण्यै मा परिदेहि कल्याणि द्विपाच्च
सर्वन्नो रक्ष चतुष्पाद्यच्चन: स्वम् ।।अ० ०६/११/१०७/०३।।

यजमानो वदेत्। [१५९]भो ब्राह्मणा:! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्ष-माणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मण: ऋद्धिं भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयु:। ॐ कर्म ऋध्यताम्। ॐ कर्म ऋध्यताम्। ॐ कर्म ऋध्यताम्।

ॐ ऋध्याम स्तोमं सनुयाम बाजमानो मन्त्रं सरथे होपयातम्।
यशो न पक्वं मधुगोष्वन्तरा भूतांशोऽअश्विनो: काममप्रा:।।ऋ० १०/१०६/११।।

ॐ सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम।
दिवम्पृथिव्याऽअद्ध्या रुहा माविदामदेवास्वज्ज्योति:।। शु०य० ०८/५२।।

ॐ सर्वामृद्धिमृध्नुयामिति तं वै तेजसैव पुरस्तात् पर्यभवच्छन्दोभिर्मध्यतोऽक्षरैरुपरिष्टाद्
गायत्र्या सर्वतो द्वादशाहं परिभूय सर्वामृद्धिमाघ्नोत् सर्वामृद्धिमृघ्नोति य एवं वेद।।ब्राह्मणम्।।

ॐ औ हो वा औ हो वा औ हो ३ वा। अगन्म ज्योति:। अगन्म ज्योति:। अगन्म
ज्योति:। अमृता अभूम। अमृता अभूम। अमृता अभूमा। न्तरिक्षं पृथिव्या
अध्यारुहामा। न्तरिक्षं पृथिव्या अध्यारुहामा। न्तरिक्षं पृथिव्या अध्यारुहाम।
दिवमन्तरिक्षा दध्यारुहामा। दिवमन्तरिक्षा दध्यारुहामा। दिवमन्तरिक्षा दध्यारुहामा।
अविदाम देवान्। अविदाम देवान्। अविदाम देवान्। समुदे वैरगन्महि। समुदे
वैरगन्महि। समुदे वैरगन्महि।
औ हो वा। औ हो वा। औ हो ३ वा। सुवर्ज्योती २ ३ ४ ५:।।सा० ०४/०१/०४।।

ॐ ऋधङ्मन्त्रो योनिं य आबभूवामृतासुवर्धमान: सुजन्मा।
अदब्धा सु भ्राजमानो हेवत्रितो धर्ता दाधार त्रीणि।।अ० ०५/०१/०१/०१।।

यजमानो वदेत्।[१६०]भो ब्राह्मणा:! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्ष-माणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मण: स्वस्तिं भवन्तो ब्रुवन्तु।

---

[१५९] सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभि: कृता:। सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु न:।। ब्र०स०पृ. ३२६।।

[१६०] स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याण वृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु न:।।
ब्र०स०पृ. ३२६।।

ब्राह्मणा वदेयु:। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति।

ॐ स्वस्ति रिद्धि प्रपथे श्रेष्ठा रेक्णस्वस्त्यभिया वाममेति।
सा नोऽअमासोऽअरणे निपातु स्वावेशा भवतु देवगोपा।।ऋ० १०/६३/१६।।

ॐ स्वस्ति नऽइन्द्रोव्वृद्धश्रवा: स्वस्तिन: पूषा व्विश्व वेदा:।
स्वस्ति नस्ताक्र्ष्योऽ-अरिष्टनेमि: स्वस्तिनोबृहस्पतिर्दधातु।। शु०य० २५/१९।।

ॐ गातुव्यज्ञाय गातुव्यज्ञपतयऽइति गातुं ह्येष यज्ञायेच्छति गातुव्यज्ञपतये यो यज्ञस्य सं स्थान् दैवी स्वस्ति रस्तुन: स्वस्तिर्मानुषेभ्यऽइति स्वस्तिनो देवत्रास्तु स्वस्तिर्मानुष्यत्रे त्येवैतदाहोर्ध्वं जिगातु भेषजमित्यूर्ध्वो नो यव्यज्ञो देवलोकव्यजत्वित्ये वैतदाह शन्नोऽअस्तु द्विपदे शञ्चतुष्पदऽइत्ये तावद्वाऽइदं सर्वं यावद् द्विपाच्चवै चतुष्पाच्च तस्माऽएवैतद्यज्ञस्य सं स्थां गत्वा शंकरोति तस्मादाह शन्नोऽअस्तु द्विपदे शञ्चतुष्पदे।।ब्राह्मणम्।।

ॐ त्रातारमिन्द्रमविता। रमि २ ३ न्द्राम्। हवे हवे सुहवं शू। रमि २ ३ नद्राम्।
हुवाइ। नुशक्रं पुरुहू। तमी २ ३ न्द्राम्। इदं ह। वाई:। मघवा।
वा ३४३ इ। तू ३ वा ५ इन्द्रा ६५६:।। सा० ०९/०१/०३।।

ॐ स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्य:।
विश्वं सभूतं सुविदत्रं नो अस्तु ज्योगेव द्दशेम सूर्यम्।।अ० ०१/०६/३१/०४।।

यजमानो वदेत्।[१६१]भो ब्राह्मणा:! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्ष-माणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मण: श्रीरस्त्विति भवन्तो ब्रुवन्तु।।

ब्राह्मणा वदेयु:। ॐ अस्तु श्री:। ॐ अस्तु श्री:। ॐ अस्तु श्री:।

ॐ श्रिये जात: श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति।
श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ।।ऋ ०७/०४/०४।।

ॐ मनस: काममाकूतिंव्वाच: सत्यमशीय।
पशूनां रूपमन्नस्यरसोयश: श्री: श्रयताम्मयिस्वाहा।। शु०य० ३९/०४।।

ॐ तेनोहततऽईजे दक्ष: पार्वतिस्तऽईमेऽप्ये तर्हि दाक्षायणा राज्यवमिवैव प्राप्ता राज्यमिव हवै प्राप्नोति यऽएवं विद्वाने तेनयज्ञेन यजते तस्माद्वाऽएतन यजेत स वाऽएकैकऽएवानूचीनाहं पुराडाशो भवत्येतेनोहास्यासपत्नानुपबाधा श्रीभर्वति।।ब्राह्मणम्।।

---

[१६१] समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु न:।। ब्र०स०पृ. ३२७।।

ॐ श्रायन्त इव सू ४ रायां। विश्वा ५२ इदिन्द्रा ५२। स्यभा ५२ क्षाता। वासूनि जातो जनिमा। नियोजा १ सा ५२। प्रतिभागंनदी २ धिमः। प्रा २३ ती। भागानां ३ दा। हुं धिमा ३ः। ओ २३४ वा। हे २३४५।।सा० ०७/०२/०५।।

ॐ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु।
अस्य श्रियमुपसंयात सर्वऽउग्रस्य चेतुः संमनसः सजाताः।।अ० ०६/०८/७३/०१।।

हस्ते जलमादाय। यजमानो वदेत्। मया कृतेस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्त्विति भवन्तो ब्रुवन्तु।

ब्राह्मणा वदेयुः। अस्तु परिपूर्णः। इत्युक्त्वा यजमानो जलपात्रे जलं क्षिपेत्।

### ०३/०७. अथाऽभिषेकः।

भर्तृर्वामतः पत्नीम् उपवेश्य पात्रेपातितकलशोदकेन अविधुराश्चत्वारो ब्राह्मणा दूर्वाम्रपल्लव-रुदङ्मुखा[१६२]स्तिष्ठन्तः सपत्नीकं यजमानमभिषिञ्चेयुः।[१६३]

**तत्र मन्त्राः।** [१६४]

---

[१६२] अत्र ब्रह्मनित्यकर्मसमुच्चयकारेण (पृ०३२७/पं०२३)स्पष्टं लिखितं यद् ब्राह्मणाः उदङ्मुखाः तिष्ठन्तः- - । अतएव ग्रहादिस्थापनानि पूर्वस्यां दिशि भवन्तूत्तरस्यां वा दिशि भवन्तु। किन्तु अभिषेक कर्मणि ब्राह्मणाः उदङ्मुखाः तिष्ठेयुर्न प्राङ्मुखाः।

[१६३] एवं प्रसिद्धमस्ति -
सिंहासने रथारोहे दम्पत्यो पादक्षालने। अभिषेके सौख्यकृते तिष्ठेत् पत्नी तु वामतः।। सं०भा०पृ० ।।

[१६४] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
एतान् मन्त्रान् संस्कारभास्करकारा न गृहणन्ति।
सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।। १।।
प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा।। २।।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणाऽनन्त सहिताः दिक्पालाः पान्तु ते सदा।। ३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः।। ४।।
एतास्त्वामभिषिञ्चन्तु देव पत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुध-जीव-सिताऽर्कजाः।। ५।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देव-दानव-गन्धर्वा यक्ष-राक्षस-पन्नगाः।। ६।।
ऋषयो मुनयो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्यरसां गणाः।। ७।।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च। औषधानि च रत्नानि कालस्याऽवयवाश्च ये।। ८।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते स्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये।। ९।।
सहस्राक्षं शतधारं ऋषिभिः पावनं कृतम्। तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते।। १०।।
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो दधुः।। ११।।
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि। ललाटे कर्णयो रक्ष्णो रापो निघ्नन्तु ते सदा।। १२।।
या०र०पृ. ३२।।
सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।। १३।।

ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः।
पयस्वतीः प्प्रदिशः सन्तुमहयम्।। शु०य० १८/३६।।
ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्त्रोतसः।
सरस्वती तु पञ्चधासो देशे भवत्सरित्।। शु०य० ३४/११।।
ॐव्वरुणय्योत्तम्भसर्ज्जनीस्त्थोव्वरुणय्यऽऋतसदन्यसि-
व्वरुणस्यऽऋतसदनमासीद।। शु०य००४/३६।।
ॐ पुनन्तु मदेवजनाः पुनन्तुमनसाधिपः।
पुनन्तु व्विश्वाभूतानिजातवेदः पनीहिमा।। शु०य० १९/३९।।
ॐ देवस्यत्वासवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।
सरस्वत्यैव्वाचोयन्तुर्यन्त्रियेदधामिबृहस्पतेष्टवासाम्प्राज्ज्येनाभिषिञ्चाम्म्यसौ।।शु०य० ०९/३०।।
ॐ देवस्यत्वासवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।
सरस्वत्यव्वाचोयन्तुर्यन्त्रेणाग्नेः साम्राज्ज्येनाभिषिञ्चामि।। शु०य० १८/३७।।
ॐ देवस्यत्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।
अश्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यैभैषज्जयेन
व्वीर्यायान्नाद्द्यायाभिषिञ्चामीन्द्रस्यन्द्रियेणबलायश्रीयैयशसेभिषिञ्चामि।। शु०य० २०/३।।
ॐ व्विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रन्तन्नऽआसुव।। शु०य० ३०/३।।
ॐ धामच्छ्दग्निरिन्द्रोब्ब्रह्मादेवो बृहस्पतिः।
सुचेतसोव्विश्श्वेदेवा यज्ञम्प्रावन्तु नः शुभे।। शु०य० १८/७६।।
ॐ त्वं यविष्ठुदाशुषोर्नॄंपाहिः शृणुधीगिरः।
रक्षातो कमुतत्क्मना।। शु०य० १८/७७।।
ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः।
प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहि द्विपदेचतुष्पदे।। शु०य० ११/८३।।
ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः
सामाशान्तिरेधि।। शु०य० ३६/१७।।
ॐ यतोयतः समीहसेततोनोऽअभयं कुरु।
शन्नः कुरु प्प्रजाब्भ्योभयन्नः पशुब्भ्यः।। शु०य० ३६/२२।।
ॐ सर्व्वेषांवाऽएषव्वेदानां रसो यत्सामसर्व्वेषामेवैनमेतद्वेदानां रसेनाभिषिञ्चति।।
ॐ शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु। स्वस्थाने उपविश्य।

हस्ते जलमादाय। अभिषेककर्तृकेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये तेन श्रीकर्माधीशः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।[१६५]

---

[१६५] अत्र महाराष्ट्रीयाणां व्यवहारानुसारेण दम्पत्योः पुत्रवतीभिवृद्धसुवासिनीभिर्नीराजनं कार्यम्। तस्य मन्त्रः-

पुनर्जलमादाय। नेन पुण्याहवाचनेन कर्माङ्गदेवता श्रीप्रजापतिः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**।। इति पुण्याहवाचनप्रयोगः।।**

## ।। मातृकापूजनप्रयोगः।।०४।।

### ०४/ ०१. अथाऽविघ्नमातृका पूजनम्।

ततो गोधूमादिधान्यपूरिते हरिद्रादिरञ्जिते मृन्मये अविघ्नाख्यस्यकलशे मोदादिषड्विनायकानां प्रतिमाः कुङ्कुमादिना लिखित्वा आवाहयेत्। वाम हस्ते अक्षतान् गृहीत्वा तदक्षतैः देवानावाहयेत्।

ॐ मोदाय नमः। मोदम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ॐ प्रमोदाय नमः। प्रमोदम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ॐ सुमुखाय नमः। सुमुखम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ॐ दुर्मुखाय नमः। दुर्मुखम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ॐ अविघ्नाय नमः। अविघ्नम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ॐ विघ्नकर्त्रे नमः। विघ्नकर्तारम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

**प्रतिष्ठापनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्वे देवासऽइह मादयन्ता मोउँम्प्रतिष्ठ ।। शु०य० २/१३।।[१६६]

ॐ भूभुवःस्वः मोदादिषड्विनायकाः सुप्रतिष्ठा वरदा भवत। इत्युक्त्वा देवाय अक्षतान् समर्पयेत्। पञ्चोपचारैः षोडशोपचारैर्वा संपूजयेत्।

हस्ते जलमादाय। अनया पूजया मोदादिषड्विनायकाः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।
इत्यविघ्नमातृका पूजनम्।

---

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्ये प्रजाम्मेदाः।
सुखदापश्चाद्देवस्यसवितुराधिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्त्येरायष्पोषम्मेदाः।
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्त्यऽओजोमेदाविश्वाभ्योमानष्ट्राभ्यस्पाहिमनोरश्वासि।। शु०य० ३७/१३।।

[१६६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

## ०४/०२. अथ मण्डपमातृका स्थापनम्।

निश्चितकोणे गर्तं[१६७]खनेत्। गर्तसमीपे सभार्यो यजमानः पूर्वाभिमुखोपविश्य गोधूमनिर्मित गणपतिप्रतिमायां त्रीणि पूगीफलानी वा संस्थाप्य पूर्ववत् गणपतिं षोडशोपचारैः सम्पूजयेत्।

ततो यजमानश्चतुर्षु कोणेषु मध्ये च गर्तं कुर्यात्।[१६८] आचार्येण च दुर्वाशम्याम्रादिप्रशस्तवृक्षपत्राणां रक्तसूत्रेण पञ्च वेष्टनानि कार्याणि। एषां मण्डपमातृसंज्ञा। ताश्च मण्डपमातृः मण्डपे स्थापयेत्। तासां मध्ये एकां मदनफलेन युक्तां कुर्यात्। ततस्तासां तैलहरिद्राकुङ्कुमादिसुगन्धद्रव्येणोद्वर्तनम्। ततो यजमानो गर्तेषु अद्भिरासेचनं कुर्यात् दध्ना च। पञ्चपुरुषाः मण्डपस्तम्भं स्पृषन्ति। ततस्ता आग्नेयादिचतुर्षु मण्डपकोणस्तम्भेषु क्रमेण चतस्रो मध्ये चैकां एवं पञ्च कृत्वा ततः स्थिरोभवेति स्थिरीकरणम्।

ॐ स्थिरो भव विड्वङ्गऽआशुर्भववाज्यर्वन्।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः।। शु०य०११/४४।।

तत्र शाखास्तम्भे। वामहस्ते अक्षतान् गृहीत्वा तदक्षतान् दक्षिणहस्तेन मन्त्रान्ते आवाहनार्थे समर्पयेत्।

अग्निकोणे – ॐ नन्दिन्यै नमः। नन्दिनीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
नैऋत्यकोणे – ॐ नलिन्यै नमः। नलिनीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
वायव्यकोणे – ॐ मैत्र्यै नमः। मैत्रीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ईशानकोणे – ॐ उमायै नमः। उमामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
मध्ये – ॐ पशुवर्धिन्यै नमः। पशुवर्धिनीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

### प्रतिष्ठापनम्।

हस्ते अक्षतान् गृहीत्वा।

---

[१६७] वृषादित्रये वह्निकोणे शुभं स्यात्तथा सिंहिकादित्रये चेशकोणे।
भवेद् वृश्चिकादित्रये वायुकोणे घटादित्रये निर्ऋतो खातमाहुः।। ब्र०स०पृ. ३३०।।
एवं कोण निश्चयं कुर्यात्।

[१६८] अत्र संस्कारभास्करकारा अधिकं पठन्ति–
ततः आचार्यहस्तेषु प्रोक्षितादिकं कार्यम्। ॐअत्राः पान्तु सुप्रोक्षितमस्त्विति भवन्तो ब्रुवन्तु। ॐअत्राः पान्तुसुप्रोक्षितमस्तु। ॐगन्धाः पान्तु सौमंगल्यंचास्त्विति भवन्तो ब्रुवन्तु। ॐगन्धाः पान्तु सौमंगल्यंचास्तु। ॐअक्षताः पान्तु आयुष्यमस्त्विति भवन्तो ब्रुवन्तु। ॐअक्षताः पान्तु आयुष्यमस्तु। ॐपुष्पाणि पान्तु सौश्रियमस्त्विति भवन्तो ब्रुवन्तु। ॐपुष्पाणि पान्तु सौश्रियमस्तु। ॐताम्बूलानि पान्तु ऐश्वर्यमस्त्विति भवन्तो ब्रुवन्तु। ॐताम्बूलानि पान्तु ऐश्वर्यमस्तु। ॐदक्षिणाः पान्तु बहुधनमस्त्विति भवन्तो ब्रुवन्तु। ॐदक्षिणाः पान्तु बहुधनमस्तु। ॐअपूपाः पान्तु बह्वन्नंचास्त्विति भवन्तो ब्रुवन्तु। ॐअपूपाः पान्तु बह्वन्नंचास्तु। ॐशाखादूर्वाः पान्तु वृद्धिरस्त्विति भवन्तो ब्रुवन्तु। ॐशाखादूर्वाः पान्तु शाखापल्लवानां वृद्धिश्चास्तु इति ।। पृ०४२।।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० २/१३।।[१६९]

ॐ भूभुव:स्व: नन्दिन्यादिमण्डपमातृभ्यो नम: सुप्रतिष्ठा वरदा भवत। इत्युक्त्वा शाखास्तम्भे अक्षतान् समर्पयेत्। पञ्चोपचारै: षोडशोपचारैर्वा संपूजयेत्।

हस्ते जलमादाय। अनया पूजया नन्दिन्यादिमण्डपमातर: प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

इति मण्डपमातृका पूजनम्।

## ०४/०३. अथावस्कर(उकरडी)पूजनम्।[१७०]

पञ्च वा षट् सुवासिन्य: गृहात् कतिचिद्दूरम् अवस्करं (उकरडीं) मण्डपाद्बहिर्वा गत्वा खनित्रेण मृत्तिकाम् खनित्वा गर्तं च पञ्चोपचारै: पूजयित्वा तत्र च गोशकृन्निर्मित छाणां द्वयान्तराले कार्पास बिजानि रक्षित्वा छणौ च रक्तसूत्रेण वेष्टयित्वा गर्ते रक्षेयु: नैवेद्यं च स्थापयित्वा गर्तं मृत्तिकया पूरयेयु: पुन: गन्धाक्षतपुष्पाणि च समर्पयेत्। नमस्कृत्य च अस्माकं प्रसङ्गो निर्विघ्नेन समााप्तिं गच्छतु। इत्युक्त्वा प्रतिनिर्वतेरन्।

## ०४/०४. अथ गौरमृत्तिका(गोरमटी)समानयनम्।[१७१]

तत: कतिचित् सुवासिन्यो नदीतटं तडागं वा गत्वा खनित्रेण मृत्तिकाम् खनित्वा गर्तं च पञ्चोपचारै: पूजयित्वा तत्र पात्रे गौरमृत्तिकां समानययु:।

## ०४/०५. अथ गणेशमृत्पात्रादि(गुजरडा)समानयनम्।[१७२]

प्रसङ्ग निमित्तेन समागता: सुवासिन्य: समूहमेत्य कुम्भकारगृहं गत्वा तं च तच्चक्रं च गन्धाक्षतकुसुमैरर्चयित्वा तद् गृहात् वादित्र सङ्गीतम् पुरस्कृत्य ग्रहशान्त्यार्थं गणेशमृत् पात्रादि ससम्मानमानयेयु:।

## ०४/०६. अथ गणपतिपूजनम्।

---

[१६९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतै: सह।

[१७०] संस्कारभास्करकारा: इमं विधिं न गृहणन्ति।

[१७१] संस्कारभास्करकारा: इमं विधिं न गृहणन्ति।

[१७२] संस्कारभास्करकारा: इमं विधिं न गृहणन्ति।

श्रीमन्महागणाधिपतये नमः इत्यारभ्याग्रे(गणपतिपूजनम्।।०२।।) विस्तृतो विधिः प्रदत्तः। तदत्तः तत्सर्वमावाहनादि पुष्पाञ्जलि पर्यन्तं साधयेत्।

## ०४/ ०७. अथ गौर्यादिमातृणां पूजनम्।

अग्निकोणे गणेशस्थापनोत्तर पीठोपरि रक्तवस्त्रं प्रसार्य तदुपरि गोधूमाक्षतपुञ्जषु पूगीफलेषु वा सगणाधिपगौर्यादिषोडशमातृणा[१७३] दक्षिणोपक्रमाणाम् उदगपवर्गाणां प्रत्यगुपक्रमाणां प्रागप्वर्गाणां वा स्थापनम् विधेयम्। वाम हस्ते अक्षतान् गृहीत्वा तदक्षतान् दक्षिणहस्तेन तेभ्यो निम्नलिखितावाहनादि पूजासु प्रत्येकमन्त्रान्ते समर्पयेत्।

ॐ गणानान्त्वा गणपतिं हवामहे प्प्रियाणान्त्वा प्रियपतिं
हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसोमम्।
आहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भधम्।। शु०य०२३/१९।।[१७४]
ॐ भूर्भुवः स्वः गणेशाय नमः गणेशम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ आयं गौः पृश्निरक्रमीदसदन्मातरम्पुरः।
पितरञ्चप्प्रयन्त्स्वः।। शु०य० ०३/०६।।[१७५]
ॐ भूर्भुवः स्वः गौर्ये नमः। गौरीम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ हिरण्यरूपाऽउषसोव्विरोकऽउभाविन्द्रऽउदिथः सूर्य्यश्च।
आरोहतं वरुणमित्त्रगर्तन्ततश्चाक्षायाम-
दितिन्दितिञ्चमित्त्रो सिव्वरुणोसि।। शु०य० १०/१६।।[१७६]
ॐ भूर्भुवः स्वः पद्मायै नमः। पद्मामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ कदाचनस्तरीरसिनेन्द्रसञ्चसिदाशुषे।

---

[१७३] गौरी पद्मा शचीमेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।। ब्र०स०पृ. ३३१।।
धृति पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता। गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश(षोडश)।। ब्र०स०पृ. ३३१।।
अत्र चतुर्दशपदसमाहारान्मातरो लोकमातरः इति सर्वासां विशेषणं।
केचन मातृः लोकमातृरपि आवाहयन्ति तदयुक्तम्।

[१७४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गणेशः- वक्रतुण्ड माहाकाय सूर्यकोटि समप्रभ। निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा।। कर्म०पृ. १९४।।

[१७५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गौरी - हिमाद्रितनयां देवीं वरदां भैरवप्रियाम्। लम्बोदरस्य जननीं गौरीमावाहयाम्यहम्।। कर्म०पृ. १९४ ।।

[१७६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पद्मा: -पद्माभां पद्मवदनां पद्मनाभोपरिस्थिताम्। जगत् प्रियां पद्मवासां पद्मामावाहयाम्यहम्।। कर्म०पृ. १९५।।

उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्च्यऽआदित्येब्भ्यस्त्वा।। शु०य० ०८/०२।।[१७७]

ॐ भूर्भुवः स्वः शच्यै नमः। शचीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ मेधाम्मेव्वरुणो ददातु मेधामग्निः प्रजापतिः।

मेधामिन्द्रश्चवायुश्चमेधान्धाता ददातु मे स्वाहा।। शु०य० ३२/१५।।[१७८]

ॐ भूर्भुवः स्वः मेधायै नमः। मेधामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ उपयाम गृहीतोसि सावित्त्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि।

जिन्न्वयज्ञञ्जिन्न्वयज्ञपतिम्भगायदेवायत्त्वासवित्रे।। शु०य० ०८/०७।।[१७९]

ॐ भूर्भुवः स्वः सावित्र्यै नमः। सावित्रीम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ व्विज्ज्यन्धनुः कपर्द्दिनो व्विशल्यो बाणवाँऽउत।

अनेशन्नस्यजाऽइषवऽ आभुरस्य निषङ्गधिः।। शु०य० १६/१०।।[१८०]

ॐ भूर्भुवः स्वः विजयायै नमः। विजयाम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ यातेरुद्र शिवातनूरघोरा पापकाशिनि।

तयानस्तन्न्वासन्तमया गिरिशन्ता भिचाकशीहि।। शु०य० १६/०२।।[१८१]

ॐ भूर्भुवः स्वः जयायै नमः। जयाम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानां रातिरभिनोनिवर्तताम्।

देवानां सक्ख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्रतिरन्तुजीवसे।। शु०य० २५/१५।।[१८२]

ॐ भूर्भुवः स्वः देवसेनायै नमः। देवसेनाम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ पितृब्भ्यः स्वधायिब्भ्यः स्वधानमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधानमः

---

[१७७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
शची–दिव्यरुपां विशालाक्षिं शुक्लकुण्डल धारिणीम्। रक्तमुक्ताद्यलङ्कारां शचीमावाहयाम्यहम्।कर्म०पृ.१९५।।

[१७८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मेधा–मेधां विष्णुप्रियां नित्यां जगन्मोहनकारिणीम्। मम यज्ञे महाभागां मेधामावाहयाम्यहम्।। कर्म०पृ. १९५।।

[१७९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सावित्री –जगत्सृष्टिकरीं धात्रीं देवीं प्रणव मातृकाम्। वेदगर्भामृत मयीं सावित्रीं स्थापयाम्यहम्।।कर्म०पृ.१९५।।

[१८०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विजया –सर्वास्त्र धारिणीं देवीं सर्वाभरण भूषिताम्। सर्वदेवनुतां ध्यातां विजयां पापकाशिनी।।कर्म०पृ. १९५।।

[१८१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जया – सुरारिमथिनीं देवीं देवानामभयप्रदाम्। त्रैलोक्यवन्दितां देवीं जयामावाहयाम्यम्।। कर्म०पृ. १९६।।

[१८२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
देवसेना –मयूरवाहनां देवीं खड्गशक्तिधनुर्धराम्। आवाहये देवसेनां तारकासुरमर्दिनीम्।। कर्म०पृ. १९६।।

प्रपितामहेभ्य: स्वधायिभ्य: स्वधानम:।

अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितर: पितर: शुन्धध्वम्।। शु०य० १९/३६।।[१८३]

ॐ भूर्भुव: स्व: स्वधायै नम:। स्वधाम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ स्वाहायज्ञंमनस: स्वाहोरोरन्तरिक्षत्स्वाहाद्यावापृथिवीभ्यां

स्वाहाव्वातादारभेस्वाहा ।। शु०य० ०४/०६।।[१८४]

ॐ भूर्भुव: स्व: स्वाहायै नम:। स्वाहाम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।[१८५]

ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्र:।

विश्वे देवाऽअदिति: पञ्चजनाऽ अदितिर्ज्जातमदितिर्ज्जनित्वम्।। शु०य० २५/२३।।[१८६]

ॐ भूर्भुव: स्व: मातृभ्यो नम:। मातृ: आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ पृषदश्वा मरुत: पृश्निमातर: शुभँयावानो व्विदथेषु जग्मय:।

अग्निजिह्वा मनव: सूरचक्षसो व्विश्वे नो देवाऽअवसागमन्निह।। शु०य० २५/२०।।[१८७]

ॐ भूर्भुव: स्व: लोकमातृभ्यो नम:। लोकमातृ: आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ धृष्टिरस्यपाग्नेऽअग्निमामादञ्जहिनिष्क्रव्यादं सेधादेव यजंव्वह।

ध्रुवमसिपृथिवीन्दृं हब्रह्मवनित्त्वाक्षत्रवतिसजात-

वन्न्युपदधामिभ्भ्रातृव्व्यस्यव्वधाय।। शु०य० ०१/१७।।[१८८]

ॐ भूर्भुव: स्व: धृत्यै नम:। धृतिम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ त्वष्टातुरीपोऽअद्द्भुतऽइन्द्राग्नीपुष्टिवर्द्धना।

---

[१८३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

स्वधा–कव्यमादाय सततं पितृभ्यो या प्रयच्छति। पितृलोकार्चितां देवीं स्वधामावाहयाम्यहम्।। कर्म०पृ. १९६।।

[१८४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

स्वाहा –हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति। तां दिव्यरुपां वरदां स्वाहामावाहयाम्यहम्।। कर्म०पृ. १९६।।

[१८५] अत्र संस्कारभास्करकारा लिखन्ति। चतुर्दशसमाहारोन्मातरो लोकमातर इति सर्वासां विशेषणम् तथा च ब्रह्मनित्यसर्मसमुच्चयकाराणां स्पष्टो निर्देशो यत् केचन मातृ: लोकमातृरित्यावाहयन्ति तदुक्तम्। अत एव ॐ भूर्भुव: स्व: मातृभ्यो नम:। मातृ: आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्। ॐ भूर्भुव: स्व: लोकमातृभ्यो नम:। लोकमातृ: आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्। इत्येतद् द्वयं न निर्दिष्टम्।

[१८६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

मातर: –भूतग्राममिदं कृत्स्नं याभिरुपादितं पुरा। त्रैलोक्ये पूजिता देवी मातृरावाहयाम्यम्।।

[१८७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

लोकमातर: –आवाहमेल्लोकमातृर्जगत्पालन संस्थिताम्। शक्राद्यैरर्चिता देवी: स्तोत्रैराराधनैस्तथा ।।

[१८८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

धृति:– सर्वहर्षकरीं देवीं भक्तानामभयप्रदां। हर्षोत्फूल्लास्यकमलां धृतिमावाहयाम्यहम्।। कर्म०पृ. १९७।।

द्विपदाच्छन्दऽइन्द्रियमुक्षागौन्र–व्वयोदधुः।। शु०य० २१/२०।।[१८९]

ॐ भूर्भुवः स्वः पुष्ट्यै नमः। पुष्टिम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ बृहस्पतेऽअतियदर्यो अर्हाद्द्युमद्विभातिक्रतुमज्जनेषु।

यद्दीदयच्छवसऽऋत–प्रजाततदस्मासुद्रविणन्धेहि चित्रम्।। शु०य० २६/०३।।[१९०]

ॐ भूर्भुवः स्वः तुष्ट्यै नमः। तुष्टिम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन।

ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।। शु०य० २३/१८।।[१९१]

ॐ भूर्भुवः स्वः आत्मनः(=यजमानस्य)कुलदेवतायै नमः। आत्मनः(=यजमानस्य) कुल- देवताम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

**प्रतिष्ठापनम्।**

दक्षिण हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमन्दधातु।

व्विश्वेदेवा सऽइहमादयन्ता मोऽम्प्रतिष्ठ।। शु०य० ०२/१३।।[१९२]

ॐ भूर्भुवः स्वः सगणाधिपगौर्यादिमातरः सुप्रतिष्ठिताः वरदाः भवत। इत्यक्षतान् क्षिपेत्। इदम् इत्रम् चन्दनं च पुष्पम्। इत्युक्त्वा गन्धाक्षतपुष्पाणि मातृभ्यः समर्पयेत्।

## ०४/०८. अथ वैश्वदेव सङ्कल्पः।[१९३]

हस्ते वैष्वदेवहवनीयघृततण्डुलसहितं सदक्षिणां ताम्रपात्रमादाय। यजमानो हस्ते जलमादाय सङ्कल्पं कुर्यात्।

---

[१८९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

पुष्टिः– पोषयन्ती जगत्सर्वं स्वदेहं प्रभवाव्ययम्। बहुपुष्टि करीं देवीं पुष्टिमावाहयाम्यहम्।। कर्म०पृ. १९७।।

[१९०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

तुष्टीः– आवाहयाम्यहं तुष्टिं सूक्ष्मवस्त्रान्वितां शुभाम्। संतोषो भवने चैव रक्षणायाध्वरे शुभे।। कर्म०पृ. १९७।।

[१९१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

आत्मनः कुलदेवता– आवाहयाम्यहं देवीं ऐश्वर्यसुखदायिनीम्।

वंशवृद्धि करीं नित्यां कुलदेवीं नमाम्यहम्।। कर्म०पृ. १९८।।

[१९२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[१९३] अविघ्नो मण्डपश्चैव मातृणां पूजनं सकृत्। वैष्वदेवं वसोर्द्धारा नान्दीश्राद्धमतः परम्।।

अविघ्नपूजनात् पूर्वं वैश्वदेवं विधाय च।। ब्र०स०पृ. ३२९।।

यजमानो वदेत्। इदं वैश्वदेवहवनीय द्रव्यं सदक्षिणाकमत्रावसरे वैश्वदेवाकरणजनित प्रत्यवायपरिहारार्थं करणजनितफलप्राप्त्यर्थं तण्डुलपात्रं अमुकशर्मणे विष्णुरूपाय ब्राह्मणाय तुभ्यमहं संप्रददे। अनेन वैश्वदेवकरणजनितफलसिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। तण्डुलपात्रं ब्राह्मणाय समर्पयेत्।

ब्राह्मणा वदेयु:। एतेन वैश्वदेवकरणजनित शुभफलप्राप्तिरस्तु। प्रार्थयेत्।

ॐ आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐनद्राग्नश्च मे महावैश्वदेवश्च मे
मरुत्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे
हारियोजनश्च मे यज्ञेन कल्पन्ताम्।। शु०य० १८/२०।।[१९४]

## ०४/०९. अथ श्र्यादिसप्तवसोर्धारापूजनम्।[१९५]

पात्रस्थेन विलीनेन सगुडेन घृतेन मातृणां सन्निहतकुड्यलग्ना: दक्षिणद्युदपवर्गा: पश्चिमादि-प्रापवर्गा: नातिनीचा न चोच्छ्रिता: सप्तवसोर्द्धारा: कर्तव्या:।

ॐ व्वसो: पवित्त्रमसिशतधारंव्वसो: पवित्रमसिसहस्त्रधारम्।
देवस्त्वासवितापुनातु व्वसो: पवित्रेणशतधारेण सुप्वा कामधुक्ष:।। शु०य० ०१/०३।।

इत्यनेन सप्तधारा: कृत्वा तत: शिष्टाचारात् उर्ध्वभागे गुडेनैकीकरणम्।

श्रीपूर्वसप्तमातृश्च घृतमातृस्थैव च।
गुडेन मेलयिष्यामि ता: सर्वार्थप्रसाधिका:।। ४६।। ब्र०स०पृ. ३३४।।

इत्येनेनैकीकृत्य कुङ्कुमादिना बिन्दुकरणेनालङ्कृत्य प्रतिधारायामेकैकदेवतामावाहयेत्। वाम हस्ते अक्षतान् गृहीत्वा तदक्षतै: देवानावाहयेत्।

ॐ मनस: काममाकूतिं व्वाच: सत्यमशीय।
पशूनां रूपमन्नस्यरसो यश: श्री: श्रयता म्मयि स्वाहा।। शु०य०३९/०४।।[१९६]

ॐ भूर्भुव: स्व: श्रीयै नम:। श्रियम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

---

[१९४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित:। प्राणापान समायुक्त: पचाम्यन्नं चतुर्विधम्।। भ०गी० १५/१४।।

[१९५] मातृकापूजनविधौ मत्स्याद्या: सप्त जलमातर: ब्राह्म्याद्या सप्त स्थलमातर: जयन्ताद्या: पञ्च द्वारमातर: कीर्तिलक्ष्म्याद्याश्च गृहमातर: आवाह्यन्ते पूज्यन्ते च संस्कारभास्करकारा इत्यधिकं पठन्ति।

[१९६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्री:- सुवर्ण पद्महस्तां तां विष्णोर्वक्षस्थले स्थिताम्।
त्रैलोक्य वल्लभां देवीं श्रियमावाहयाम्यहम्।। कर्म०पृ. १९८।।

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यातम्।
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण।। शु०य० ३१/२२।।[१९७]

ॐ भूर्भुवः स्वः लक्ष्म्यै नमः। लक्ष्मीम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ ईहरतिरिहमध्वरमिहधृतिरिहस्वधृतिः स्वाहा।
उपसृजं घरुणं मात्रे धरुणो मातरन्धयन्। रायस्पोषमस्मासु दीधरत्स्वाहा।।[१९८]

ॐ भूर्भुवः स्वः धृत्यै नमः। धृतिम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ मेधाम्मेव्वरुणोददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्चव्वायुश्चमेधान्धाता ददातु मे स्वाहा।। शु०य० ३२/१५।।[१९९]

ॐ भूर्भुवः स्वः मेधायै नमः। मेधामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ देवी[२००] जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन्।
श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं
वसुवने वसुधेयस्य व्यन्तु यज।। शु०य० २१/५१।।[२०१]

ॐ भूर्भुवः स्वः पुष्टयै नमः। पुष्टिमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ व्व्रतेन[२०२]दीक्षामाप्नोतिदीक्षयाप्नोति दक्षिणाम्।

---

[१९७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
लक्ष्मीः– शुभलक्षणसम्पन्नां क्षीरसागर सम्भवाम्।
चन्द्रस्य भगिनीं सौम्यां लक्ष्मीमावाहयाम्यहम्।। कर्म०पृ. १९८।।

[१९८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
धृति–संसारधारणपरां धैर्य लक्षण संयुताम्। सर्वसिद्धि करीं देवीं धृतिमावाहयाम्यहम्।। कर्म०पृ. १९८।।

[१९९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मेधा–सदसत्कार्यकरिणीं क्षमां बुद्धिविशालिनीम्। ममकार्ये शुभकरीं मेधामावाहयाम्यहम्।। कर्म०पृ. १९९।।

[२००] अत्र याज्ञिकरत्नकारादयः पुष्ट्याः स्थाने स्वाहाया मन्त्रमेव पठन्ति।
ॐ स्वाहा प्राणेभ्यःसाधिपतिकेभ्यः।
पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा
वायवे स्वाहा दिवे स्वाहा सूर्याय स्वाहा।। शु०य० ३९/०१।।
अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
स्वाहा– हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति। तां दिव्यरुपां वरदां स्वाहामावाहयाम्यहम्।।

[२०१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पुष्टि–सोमरुपा सुवर्णाभां विद्युत् ज्वलित कुण्डलाम्। जननीं पुष्टिकरिणीं पुष्टिमावाहयाम्यहम्।। कर्म०पृ. १९९।।

[२०२] अत्र याज्ञिकरत्नकारादयः श्रद्धायाः स्थाने प्रज्ञाया मन्त्रमेव पठन्ति।
ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योति–रन्तरमृतं प्रजासु।

दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्त्यमाप्यते।। शु०य० १९/३०।।[२०३]

ॐ भूर्भुवः स्वः श्रद्धायै नमः। श्रद्धामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती।
यज्ञं व्वष्टुधियावसुः।। शु०य० २०/८४।।[२०४]

ॐ भूर्भुवः स्वः सरस्वत्यै नमः। सरस्वतीम् आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

**प्रतिष्ठापनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमन्दधातु।
व्विश्वेदेवा सऽइहमादयन्ता मो३ँम्प्रतिष्ठ।। शु०य० २/१३।।[२०५]

ॐ भूर्भुवः स्वः श्र्यादिसप्तवसोर्द्धाराः सुप्रतिष्ठिताः वरदा भवत। इत्यक्षतान् क्षिपेत्। इदम् इत्रम् चन्दनं च पुष्पम्। इत्युक्त्वा गन्धाक्षतपुष्पाणि मातृभ्यः समर्पयेत्।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः इत्यनेन षोडशोपचारैः पूजयेत्।

**ध्यानम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।। शु०य० २३/१८।।[२०६]

---

यस्मान्नऽऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु।। शु०य० ३४/०३।।

[२०३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्रद्धा–भूतग्राममिदं सर्वं अजेन श्रद्धया कृतम्। श्रद्धया प्राप्यते सत्यं श्रद्धामावाहयाम्यहम्।। कर्म०पृ. १९९।।

[२०४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सरस्वती – प्रणवस्यैव जननीं रसनाग्रस्थितां सदा।
प्रागल्भ्यदात्री चपलां वाणीमावाहयाम्यहम्।। कर्म०पृ. १९९।।

[२०५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[२०६] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
गौरी पद्मा शचीमेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।। ब्र०स०पृ. ३३१।।
धृति पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता। गणेशेनाधिकाह्येता वृद्धौपूज्याश्चतुर्दश।। ब्र०स०पृ. ३३१।।
श्री लक्ष्मी च धृतिर्मेधा पुष्टिः श्रद्धा (स्वाहा प्रज्ञा) सरस्वती।
माङ्गल्येषु प्रपूज्यन्ते सप्तैताः घृतमातरः।। या०र०पृ. ३५।।

विद्युद्दासमप्रभां मृगपतिस्कन्धस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितास्।

ॐ व्वसोः पवित्त्रमसिशतधारंव्वसोः पवित्रमसिसहस्त्रधारम्।
देवस्त्वासवितापुनातु व्वसोः पवित्रेणशतधारेण सुप्वा कामधुक्षः।। शु०य० ०१/०३।।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

**आवाहनम् ।**

हस्ते अक्षतान् गृहीत्वा।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोमऽआवह।। ऋ०खि० १२/०१।।[२०७]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः आवाहयामि । आवाहनार्थे अक्षतान् समर्पयामि। इत्युक्त्वा अक्षतान् समर्पयेत्।

**आसनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ तां म आवहजातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्दे यं गामश्वं पुरुषानहम्।। ऋ०खि०१२/०२ ।।[२०८]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमःआसनं समर्पयामि। आसनार्थे अक्षतान् समर्पयामि । इत्युक्त्वा अक्षतान् समर्पयेत्।

**पाद्यम्।**

हस्ते जलमादाय।

---

हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनी बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे।। स०श० ध्यानम्।।
कल्पलतादिसुरद्रुमवाटी कल्पितरत्नगृहाधिनिवासाम्।
कल्पशतार्जित पुण्यविशेषात् चेतसि भावनयाहमुपासे।। या०र०पृ. १०२।।

[२०७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
उषसि मागधमङ्गलगायकैर्झटिति जागृहि जागृहि जागृहि।
अतिकृपार्द कटाक्षनिरीक्षणैर्जगदिदं जगम्ब सुखीकुरु।। या०र०पृ. १०२।।

[२०८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
एणधराश्म-कृतोन्नतधिष्ण्यं हेमविनिर्मित-पादमनोज्ञम्।
शोणशिला फलकं च विशालं देवि सुखासनमद्य ददामि।। या०र०पृ. १०२।।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम्।। ऋ०खि०१२/०३।।[२०९]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः पादयोः पाद्यं समर्पयामि । इत्युक्त्वा जलम् समर्पयेत्।

**अर्घ्यम्।**

अर्घ्यपात्रे गन्धाक्षतपुष्पाणि सहित हस्ते जलं गृहीत्वा।

ॐ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्।। ऋ०खि० १२/०४।।[२१०]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः हस्तयोः अर्घ्यं समर्पयामि । इत्युक्त्वा अर्घ्यपात्राज्जलं समर्पयेत्।

**आचमनम्।**

हस्ते जलमादाय।

ॐ चन्द्रां प्रभासां यशसाज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतां त्वां वृणे।। ऋ०खि० १२/०५।।[२११]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः मुखे आचमनीयं जलं समर्पयामि । इत्युक्त्वा जलं समर्पयेत्।

**स्नानम्।**

---

[२०९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ईषमनोहररूपविलासे शीतलचन्दन कुङ्कुममिश्रम्।
हृद्य सुवर्णघटे परिपूर्णं पाद्यमिदं त्रिपुरेशि गृहाण।। या०र०पृ. १०३।।

[२१०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
लब्धभवत् करुणोऽहमिदानीं रत्नसुमाक्षतयुक्तमनर्घम्।
रुक्मविनिर्मितपात्रविशेषे-ष्वर्घमिदं त्रिपुरेशि ददामि।। या०र०पृ. १०३।।

[२११] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ह्रीमिति मन्त्रजपेन सुगम्ये हेमलतोज्वलदिव्यशरीरे।
योगिमनस्समशीतजलेन ह्याचमनं त्रिपुरेद्य विधेहि।। या०र०पृ. १०३।।

हस्ते तीर्थोदकमादाय।

ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तववृक्षोथबिल्वः।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः।। ऋ०खि० १२/०६।।[२१२]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः तीर्थोदक स्नानं समर्पयामि । इत्युक्त्वा तीर्थोदकं समर्पयेत्।

**पञ्चामृतस्नानम्।**

मिलित पञ्चामृतं गृहीत्वा।

ॐ पञ्चनद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधासोदेशेभवत्सरित् ।। शु०य० ३४/११।।[२१३]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः पञ्चामृतस्नानं समर्पयामि । इत्युक्त्वा पञ्चामृतं समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

**गन्धोदकस्नानम्।**

अष्टगन्धमिश्रितं वा कुङ्कुममिश्रितं वा केशरचन्दनमिश्रितं जलमादाय।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम्।। ऋ०खि०१२/०९।।[२१४]

---

[२१२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
एलाशीरसुवासितैः सुकुसुमैर्गङ्गादितीर्थोदकैः
माणिक्यादिक मौक्तिकामृतयुतैः स्वच्छैः सुवर्णोदकैः।
मन्त्रान्वैदिकतान्त्रिकान् परिपठन् सानन्दमत्यादरात्
स्नानं ते परिकल्पयामि जननि स्नेहात्वमङ्गीकुरु।। या०र०पृ. १०४।।

[२१३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४०।।

[२१४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मातः कुङ्कुमपङ्क निर्मितमिदं देहे तवोद्वर्तनम्
भक्त्याऽहं कलयामि हैमरजसा सम्मिश्रितं केसरैः।
केशानामलकैर्विशोध्य विशदान् कस्तूरिकाद्यर्चितैः
स्नानं ते नवरत्नकुम्भविधिना संवासितोष्णोदकैः।। या०र०पृ. १०४।।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः गन्धोदकस्नानं समर्पयामि । इत्युक्त्वा अष्टगन्धमिश्रितं वा कुङ्कुममिश्रितं वा केशरचन्दनमिश्रितं जलं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**उद्वर्तनस्नानम्।**

सुगन्धितैलमिश्रितं जलं गृहीत्वा।

ॐ अं शुनातेऽअं शुः पृच्यताम्परुषा परुः ।
गन्धस्ते सोममवतु मदायरसोऽअच्युतः ।। शु०य० २०/२७।।[२१५]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः उद्वर्तनस्नानं समर्पयामि । इत्युक्त्वा सुगन्धितैलमिश्रितं जलं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। उद्वर्तनस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयेत्। निर्माल्यं आघ्राय उत्तरे विसृज्य। हस्तं प्रक्षाल्य। पुनः गन्धाक्षतपुष्पाणि समर्पयेत्।

हस्ते जलमदाय। अनेन यथाशक्तिपञ्चामृतपूर्वाराधनकृतेन वसोर्द्धारा समन्वित सगणेशगौर्यादि-मातरः प्रीयन्तां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

**अभिषेकस्नानम्।**

धारापात्रं गन्धादिभिः सम्पूज्य देव्या उपरि संततं जलधारां पयोधारां वा कुर्वन् श्रीसूक्तेनाभिषेकमारभेत् ।

**०४/ १०. अथ श्रीसूक्तम्।**[२१६]

---

[२१५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
एतच्चम्पकतैलमम्ब विविधैः पुष्पैर्मुहुर्वासितं
न्यस्तं रत्नमये सुवर्णचषके भृङ्गैर्भ्रमद्भिर्वृतम्।
सानन्दं व्रजसुंदरीभिरभितो हस्तैधृतं चिन्मये
केशेषु भ्रमरप्रभेषु सकलेष्वङ्गेषु चालिप्यताम्।। या०र०पृ. १०४।।

[२१६] अत्र यज्ञोपवीतरहितानां कृतेऽपि सप्तसत्यन्तर्गत देवीसूक्तेनैवाभिषेकः कर्तव्य इति वैदिकविदुषां मतम्। एतदस्मान्यत्र श्रीसूक्तपाठेनैवाभिषेकः प्रशस्ते।
**०४/ ११. अथ मार्कण्डेयपुराणोक्तं देवीसूक्तम्।**

ॐ हिरण्यवर्णामितिपञ्चदशर्चस्य सूक्तस्य आनन्दकर्दमचिक्लीतेन्दिरासुता ऋषयः श्रीर्देवता आद्यास्तिस्रोऽनुष्टुभः चतुर्थी बृहती पञ्चमीषष्ठ्यौ ततोऽष्टावनुष्टुभः अन्त्या प्रस्तारपंक्तिः जपे विनियोगः।।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोमऽआवह।। १।।

---

नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।। १।।
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः।। २।।
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्म्यै नमो नमः। नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः।। ३।।
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै। ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः।। ४।।
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः। नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः।। ५।।
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। ६।।
या देवी सर्वभूतेषु चेतनेत्यभिधीयते। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। ७।।
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। ८।।
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। ९।।
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १०।।
या देवी सर्वभूतेषु छायारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। ११।।
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १२।।
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १३।।
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १४।।
या देवी सर्वभूतेषु जातिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १५।।
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १६।।
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १७।।
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १८।।
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। १९।।
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २०।।
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २१।।
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २२।।
या देवी सर्वभूतेषु दयारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २३।।
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २४।।
या देवी सर्वभूतेषु मातृरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २५।।
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २६।।
इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या। भूतेषु सततं तस्यै व्याप्यै देव्यै नमो नमः।। २७।।
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। २८।।
स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः।। २९।।
या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः।। ३०।।

**।। इति मार्कण्डेयपुराणोक्तं देवीसूक्तम्।।**

तां म आवहजातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्दे यं गामश्वं पुरुषानहम्।। २।।
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम्।। ३।।
कांसोस्मितां हिरण्यप्राकारामाद्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्।। ४।।
चन्द्रां प्रभासां यशसाज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतां त्वां वृणे।। ५।।
आदित्यवर्णे तपसोधिजातो वनस्पतिस्तववृक्षोथबिल्वः।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः।। ६।।
उपैतु मां देव सखःकीर्तिश्च मणिना सह।
प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे।। ७।।
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुदमेगृहात्।। ८।।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम्।। ९।।
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयिश्रीः श्रयतां यशः।। १०।।
कर्दमेन प्रजाभूता मयि संभवकर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्।। ११।।
आपःस्रजन्तुस्निग्धानि चिक्लीतव स मे गृहे।
निचदेवीं मातरं श्रियं वासय मे कुले।। १२।।
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोमऽआवह।। १३।।
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदोमऽआवह।। १४।।
तामऽआवहजातवेदोलक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्विन्दे यं पुरुषानहम्।। १५।।
यः शुचिः प्रयतो भूत्वा जुहूयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्।।१६।।
पद्मानने पद्म ऊरुपद्माक्षिपद्मसम्भवे।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम्।।
अश्वदायै गोदायै धनदायै महाधने।
धनं मे जुषतां देवि सुर्वकामांश्च देहि मे।।
पद्मानने पद्मविपद्म पत्रे पद्मप्रिये पद्मदलोयताक्षि।

विश्वप्रियेविश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व।।
पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम्।
प्रजानां भवसि माताऽआयुष्मन्तं करोतु मे।।
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः।
धनमिन्द्रोबृहस्पतिर्वरुणं धनमश्विनौ।।
वैनतेय सोमं पिब सोमंपिबतुवृत्रहा।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः।।
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्।।
सरसिजनिलये सरोजहस्ते धवलतरां शुकगन्धमाल्यशोभे।।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीदमह्यम्।।
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।।
लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम्।।
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि।।
तन्नो लक्ष्मीः प्रचोदयात्।।
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते।।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः।।

**।। इति श्रीसूक्तम्।।**

ॐ शान्तिः शान्तिः शान्तिः। सर्वारिष्टसुशान्तिर्भवतु । ॐ अमृताभिषेकोऽस्तु । ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः अभिषेकस्नानं समर्पयामि । इत्युक्त्वा अभिषेकस्नानं सम्पन्नमिति ब्राह्मणा वदेयुः।

**ततः शुद्धोदकस्नानम्।**

शुद्धजलेन स्नपयेत्।

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/६१ ।।[२१७]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः शुद्धोदकस्नानं समर्पयामि । इत्युक्त्वा शुद्धोदकेन स्नपयेत्। तत् पश्चात् एकवारं जलं समर्पयेत्। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । देवीं शुद्धवस्त्रेण प्रमृज्य पीठे गन्धानुलेपनपूर्वकं संस्थापयेत् ।

---

[२१७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हस्तलसत्कटकादिसुभूषा आदरतोऽम्ब वरोप्यनिधाय।
चन्दनवासित मन्त्रिततोयैः स्नानमयि त्रिपुरेशि विधेहि।। या०र०पृ. १०४।।

**वस्त्रम्।**

साटिकां रक्तसूत्रं वा तदभावे अक्षतान् गृहीत्वा ।

ॐ उपैतु मां देव सख:कीर्तिश्च मणिना सह।
प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे।। ऋ०खि० १२/०७।।[२१८]

ॐ भूर्भुव: स्व: वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नम: वस्त्रोपवस्त्रे समर्पयामि । इत्युक्त्वा देवीं वस्त्रोपवस्त्रे समर्पयेत्। तत् पश्चात् एकवारं जलं समर्पयेत्। वस्त्रान्ते आचमनीयं जलं समर्पयामि ।

**यज्ञोपवीतम् अलङ्कारं वा।**

यज्ञोपवीतमलङ्कारं वा तदभावे अक्षतान् गृहीत्वा।

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुदमेगृहात्।। ऋ०खि० १२/०८।।[२१९]

ॐ भूर्भुव: स्व: वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नम: यज्ञोपवीतं समर्पयामि । इत्युक्त्वा देवीं यज्ञोपवीतमलङ्कारं वा तदभावे अक्षतान् समर्पयेत् । तत् पश्चात् एकवारं जलं समर्पयेत्। अलङ्कारान्ते आचमनीयं जलं समर्पयामि।

**गन्धम्।**

चन्दनं कुङ्कुमं वा गृहीत्वा अनामिकया तिलकं कुर्यात्।
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम्।। ऋ०खि०१२/०९।।[२२०]

---

[२१८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सञ्चितमम्ब मया ह्यतिमूल्यं कुङ्कुमशोणमतीव मृदुत्वम्।
शङ्करतुङ्गतराङ्कनिवासे वस्त्रयुगं त्रिपुरे परिधेहि।। या०र०पृ. १०४।।

[२१९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कंदलदंशुकिरीटमनर्घम् कङ्कणकुण्डलनूपुरहारम्
अङ्गदमङ्गुलिभूषणमम्ब स्वीकुरु देवि पुराधिनिवासे।। या०र०पृ. १०५।।

[२२०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हस्तलसच्चतुरायुधजाले शस्ततरं मृगनाभिसमेतम्।
सद्घनसार सुकुङ्कुममिश्रं चन्दनपङ्कमिदं च गृहाण।। या०र०पृ. १०५।।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः गन्धं समर्पयामि । इत्युक्त्वा देवीं चन्दनेन कुङ्कुमेन वा गन्धं समर्पयेत्।

**अक्षताः।**

हस्ते अक्षतान् गृहीत्वा ।

ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽअधूषत ।
अस्तोषत स्वभानवोविप्रा नविष्ठया मती योजान्विन्द्र ते हरी ।। शु०य० ०३/५१।।[२२१]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः अक्षतान् समर्पयामि । इत्युक्त्वा अक्षतान् समर्पयेत्।

**पुष्पाणि।**

हस्ते पुष्पाणि गृहीत्वा।

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयिश्रीः श्रयतां यशः।। ऋ०खि० १२/१०।।[२२२]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः ऋतुकालोद्भवानि पुष्पाणि समर्पयामि । इत्युक्त्वा पुष्पाणि समर्पयेत्।

**सौभाग्यद्रव्याणि।**

अबीरादि चूर्णानि गृहीत्वा।

ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः।
अभित्वा रुद्रा व्वसवो गृणन्त्विमा ब्रह्मपीपिह सौभगायाश्विनध्वज्र्जू
सादयता मिहत्वा।। शु०य० १४/०२।।[२२३]

---

[२२१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
रत्नाक्षतैस्त्वां परिपूजयामि मुक्ताफलैर्वा रुचिरैरविद्धैः।
अखण्डितैर्देवि यवादिभिर्वा काश्मीरपङ्काङ्कितितंदुलैर्वा।। या०र०पृ. १०५।।

[२२२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
लब्धविकासकदम्बकजाती चम्पकपङ्कजकेतकयुक्तैः।
पुष्पचयैः मनसावचितैस्त्वाम्-अम्ब पुरेशि भवानि भजामि।। या०र०पृ. १०६।।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः सौभाग्यद्रव्याणि समर्पयामि । इत्युक्त्वा अबीरादि चूर्णानि समर्पयेत्।

**धूपः।**

धूपशलाकां प्रज्वाल्य। हस्ते जलमादाय।

ॐ कर्दमेन प्रजाभूता मयि संभवकर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्।। ऋ०खि०१२/११।।[२२४]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः धूपमाघ्रापयामि । इत्युक्त्वा आचमनीयम् जलं समर्पयेत् ।

**दीपः।**

दीपं प्रज्वाल्य। हस्ते जलमादाय।

ॐ आपःस्रजन्तुस्निग्धानि चिक्लीतव स मे गृहे।
निचदेवीं मातरं श्रियं वासय मे कुले।। ऋ०खि०१२/१२।।[२२५]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः दीपं दर्शयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत्।

**नैवेद्यम्।**

मीष्टान्नं फलं वा पुरतो निधाय नैवेद्यं निवेदयेत्। हस्ते जलमादाय।

---

[२२३] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
हरिद्रमोत्थामतिपीतवर्णां सुवासितां चन्दनपरिजातैः।
अनन्यभावेन समर्पितान्ते मातर्हरिद्रामुररीकुरुश्व।। या०र०पृ. १२७।।
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि।। अ०स्तो० १२।।

[२२४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ह्रीं पदशोभिमहामनुरूपे धूरसिमन्त्रवरेण मनोज्ञम्।
अष्टसुगन्धरजः कृतमाद्ये धूपमिदं त्रिपुरशि ददामि।। या०र०पृ. १२७।।

[२२५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सन्तमसापह मुज्वलपात्रे गव्यघृतैः परिवर्धित देहम्।
चम्पककुड्मलवृन्दसमानं दीपगणं त्रिपुरेऽद्य गृहाण।। या०र०पृ. १२८।।

ॐ आर्द्रां य: करिणीं यष्टिं सुवर्णां हेममालिनीम्।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदोमऽआवह।। ऋ०खि०१२/१३।।[२२६]

ॐ भूर्भुव: स्व: वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नम: नैवेद्यं निवेदयामि । इत्युक्त्वा आचमनीयं जलं समर्पयेत्। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नम: इति पुष्पै: जलं सम्प्रोक्ष्य पुष्पं नैवेद्योपरि निधाय अस्त्रेण[२२७] संरक्ष्य धेनुमुद्रया[२२८] अमृतीकृत्य ग्रासमुद्रया[२२९] भोजयेत्।

ॐ प्राणाय स्वाहा ।

ॐ अपानाय स्वाहा ।

ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा ।

ॐ समानाय स्वाहा ।

ॐ ब्रह्मणे नम: ।

नैवेद्य मध्ये पानीय[२३०] समर्पयामि। पुन: भोजयेत्।

ॐ प्राणाय स्वाहा।

ॐ अपानाय स्वाहा।

ॐ व्यानाय स्वाहा।

ॐ उदानाय स्वाहा।

ॐ समानाय स्वाहा।

ॐ ब्रह्मणे नम:।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। हस्त प्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि। आचमनीयं जलं समर्पयामि। इत्युक्त्वा चतुर्वारं जलपात्रे जलं त्यजेत्। करोद्वर्तनार्थे गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत् ।

## मुखवासार्थे ताम्बूलम्।

---

[२२६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

कल्पितमद्य धियाऽमृतकल्पं दुग्धसितायुतमन्नविशेषम्।

माषविनिर्मितपूपसहस्त्रं स्वीकुरु देवि निवेदनमाद्ये।। या०र०पृ. १२९।।

[२२७] मध्यमाम् अङ्गुष्ठेन फडिति ताडयित्वा नैवेद्यस्य परितो हस्तभ्रमणमिति अस्त्रमुद्रया संरक्ष्य।

[२२८] परिवृत्तकरौ पश्चात्तर्जनीमध्यमे युते। कनिष्ठानामिकाङ्गुष्ठं परस्पर युतं कुरु। धेनुमुद्रेयमाख्याता अमृतीकरणं भवेत्।।

[२२९] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभि: विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

[२३०] अत्र ब्रह्मनित्यकर्मसमुच्चयकारा:

एलाशीरलवङ्गादिकर्पूरपरिवासितम्।

प्राशनार्थे कृतं तोयं गृहाण गणनायक ।। इत्यधिकं पठन्ति।। ब्र०स०पृ. ४९।।

ताम्बूलं पूगिफलं लवङ्गम् एलादिचूर्णं च गृहीत्वा।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोमऽआवह।। ऋ०खि०१२/१४।।[२३१]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः मुखवासार्थे ताम्बूलं समर्पयमि। इत्युक्त्वा मुखवासद्रव्यं समर्पयेत्।

**दक्षिणा।**

सुवर्णं व्यावहारिकं वा द्रव्यं गृहीत्वा।

ॐ यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः।।
तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्।। ।। शु०य० १८/६४।।[२३२]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः दक्षिणां समर्पयामि। इत्युक्त्वा सुवर्णं व्यावहारिकं वा द्रव्यं समर्पयेत्।

**कर्पूरारार्तिक्यम्।**

कर्पूरं प्रज्वाल्य घण्टानादं कुर्वन् परितो भ्रामयेत्।

ॐ इदं हविः प्रजननम्मेऽअस्तुदशवीरं सर्व गणं स्वस्तये।
आत्मसनि प्रजासनि पशुसनि लोकसन्य भयसनि।
अग्निः प्रजां बहुलाम्मे करोत्वन्नं पयो रेतो ऽअस्मासु धत्त।। शु०य० १९/४८।।[२३३]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः कर्पूरारार्तिक्यं समर्पयामि। इत्युक्त्वा नीराजनपात्र भूमौ निधाय। जलेन प्रदक्षिणिं कृत्य पुष्पैः ततश्च दक्षिणहस्तेन नीराजनं समर्पयेत्। स्वयं च गृहीत्वा। हस्तं प्रक्षाल्य।

---

[२३१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
एलालवङ्गादिसमन्वितानि कङ्कोलकर्पूरसुमिश्रितानि।
ताम्बूलवल्लीदलसंयुतानि पूगानि ते देवि समर्पयामि।। या०र०पृ. १३०।।

[२३२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
लङ्घितकेतकवर्णविशेषैः शोधितकोमलनागदलैश्च।
मौक्तिकचूर्णयतैः क्रमुकाद्यैः पूर्णतराम्ब पुरस्तव पात्री।। या०र०पृ. १३०।।

[२३३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तु ते।। स०श० ११/१०।।

**प्रदक्षिणाम्।**

करणाय अञ्जलिं बध्वा पूर्वादि क्रमेण परितो व्यावर्त्य।

ॐ तामऽआवहजातवेदोलक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्विन्दे यं पुरुषानहम्।। ऋ०खि० १२/१५।।[२३४]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः प्रदक्षिणां समर्पयामि। इत्युक्त्वा पूवादारभ्य ऐशानपर्यन्तं त्रिर्भ्रमणं कुर्यात्।

**मन्त्रपुष्पाञ्जलिः।**

अञ्जलौ पुष्पाणि गृहित्वा। उत्त्थाय।

ॐ यः शुचिः प्रयतो भूत्वा जुहूयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्।। ऋ०खि०१२/१६ ।।[२३५]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि। इत्युक्त्वा पुष्पाणि समर्पयेत्।

**विशेषार्घः।**

अर्घपात्रे जलं प्रपूर्य गन्धाक्षतपुष्पसहितं नारिकेलं फलं वा धृत्वा।

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयिश्रीः श्रयतां यशः।। ऋ०खि०१२/१०।।[२३६]

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः विशेषार्घं समर्पयामि। इत्युक्त्वा अर्घपात्राज्जलं नारिकेलोपरि प्रक्षिप्य फलं समर्पयेत्।

---

[२३४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि।। या०र०पृ. १३०।।

[२३५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।। स०श००५/०९।।

[२३६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कलिङ्गकोशातकसंयुतानि जम्बीरनारिङ्गसमन्वितानि।
सुनारिकेलानि सदाडिमानि फलानि ते देवि समर्पयामि।। या०र०पृ. १३०।।

**प्रार्थना।**

नमस्कारं कृत्वा।

ॐ समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा।
मा मऽआयुः प्रमोषीर्म्मोऽअहन्तव व्वीरं व्विदेय तव देवि सन्दृशि।। शु०य० ०४/२४।।[२३७]
यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्।। ४७।। ब्र०स०पृ. ३३४।।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः प्रार्थनापूर्वक नमस्कारान् समर्पयामि।

हस्ते जलमादाय। अनया पूजया वसोर्द्धारा समन्वित सगणेशगौर्यादिमातरः प्रीयन्तां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**।। इति मातृकापूजनप्रयोगः।।**

**।। आयुष्यमन्त्रजपः।। ०५।।**

ब्राह्मणा वदेयुः।

ॐ आयुष्यं व्वर्च्चस्यं रायस्प्पो षमौद्भिदम्।
इदं हिरण्यं व्वर्च्चस्वज्जैत्राया विशतादुमाम्।। शु०य० ३४/५०।।[२३८]
ॐ नतद्द्रक्षां सिनपिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत्।
योबिभर्तिदाक्षायणं सदेवेषु कृणुते दीर्ग्घमायुः
समनुष्य्येषुकृणुतेदीर्ग्घमायुः ।। शु०य० ३४/५१।।
ॐ यदा बद्ध्नन्दाक्षायणाहिरण्यं शतानी कायसुमनस्यमानाः।

---

[२३७] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
विश्वेश्वरि त्वं परपासि विश्वं विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः।। स०श० ११/३३।।
दुर्गे स्मृता हरसि भितिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता।। स०श० ०४/१७।।

[२३८] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
अश्वत्थामा बलिर्व्यासो हनुमाँश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः।
सप्तैतान्संस्मरेन्नित्य मार्कण्डेयं तथाष्टमम्।। या०र०पृ. ३७।।
जिवेद्वर्षशतं साग्रमपमृत्यु विवर्जितः। नश्यन्ति व्याधयः सर्वे लुताविस्फोटकादयः।। दे०कवच. ४७।।
मृत्युञ्जय महादेव(महारुद्र) त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः।। ब्र०स०पृ. ३०७।।

तन्मऽआबद्ध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्।। शु०य० ३४/५२।।

आयुष्मान् भव। अखण्डसौभाग्यवती भव। इत्युक्त्वा यजमानस्य दक्षिण हस्ते रक्षासूत्रं बध्नीयात्।

## ।। नान्दीश्राद्धप्रयोगः।। ०६।।

अथ यज्ञोपवीती प्राङ्मुखो दक्षिणं जानु पातयित्वा[२३९]पात्रे दक्षिणतः त्रिषु स्थानेषु अक्षतान् विकीर्य तत्रोपरि एकैकं पूगीफलं संस्थाप्य। क्षणदानं कुर्यात्। दक्षिण हस्ते सताम्बूलयवान्गृहीत्वा वाम हस्तेन दक्षिणतः एकैकशः जलं पातयेत्।

ॐ सत्यवसुसंज्ञकानां विश्वेषां देवानां नान्दीमुखानाम् अद्य कर्तव्यप्रधानसङ्कल्पोक्त-कर्माङ्गसाङ्कल्पिकनान्दीश्राद्धे भवद्भ्यां क्षणः क्रियताम्। इति यवान्निक्षिप्य। ॐ तथा। प्राप्नुतां भवन्तौ । प्राप्नवाव। पुनर्यवान्गुहीत्वा।

ॐ अमुक गोत्राणां नान्दीमुखानां[२४०] पितृपितामहप्रपितामहानां सपत्नीकानाम् अद्य कर्तव्यप्रधानसङ्कल्पोक्तकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धे भवद्भ्यां क्षणः क्रियताम्। इति यवान्निक्षिप्य। ॐ तथा। प्राप्नुतां भवन्तौ। प्राप्नवाव। पुनर्यवान्गृहीत्वा।

ॐ द्वितीय अमुक गोत्राणां नान्दीमुखानां मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानाम् अद्य कर्तव्यप्रधानसङ्कल्पोक्तकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धे भवद्भ्यां क्षणः क्रियताम्। इति यवानन्निक्षिप्य।। ॐ तथा। प्राप्नुतां भवन्तौ। प्राप्नवाव।

### ०६/०१. अथ पाद्यदानम्।

वाम हस्तेन दक्षिणतः एकैकशः जलं पातयेत्।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदं वः पाद्यं पादावने जनं[२४१] पादप्रक्षालनं वृद्धिः।

ॐ अमुक गोत्राः नान्दीमुखाः पितृपितामहप्रपितामहवृद्धप्रपितामहाः सपत्नीकाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।

ॐ द्वितीय अमुक गोत्राः नान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः। इत्युक्त्वा जलं समर्पयेत्।

### ०६/०२. अथ सङ्कल्पः।

---

[२३९] अस्मिन् विषये प्राचिन ग्रन्थकाराः पात्रे उदङ्मुखान् प्राक्संस्थान् स्वयम् उदङ्मुखश्चेत् प्राङ्मुखान् उदक्संस्थान् विश्वेदेवस्थाने द्वौकुशबटुन् सपत्नीकपितृपार्वणस्थाने द्वौ सपत्नीकमातामहापर्वणस्थाने द्वौ च एवं षट् कुशबटून् दूर्वाकाण्डानि वा संस्थाप्येति पठन्ति।

[२४०] अत्र यस्य जनको जीवति तेन 'जनकस्य' इति पदम् अधिकं वक्तव्यम्।

[२४१] पादावनेजनम् = पाद+अवनेजनं पाद+प्रक्षालनम्।

हस्ते जलमादाय। अद्य पूर्वोच्चारित एवं ग्रहगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ करिष्यमाण कर्माङ्गतया सत्यवसुसंज्ञकविश्वेदेवपूर्वकं साङ्कल्पिकेन विधिना नान्दीश्राद्धं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

### ०६/०३. अथाऽऽसनदानम्।

हस्ते ताम्बूलोपरि अक्षतान् गृहीत्वा वाम हस्तेन दक्षिणतः एकैकशः जलं पातयेत्।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदं वः आसनम्। सुखासनम्।

ॐ अमुक गोत्राः नान्दीमुखाः पितृपितामहप्रपितामहाः सपत्नीकाः इदं वः आसनम्। सुखासनम्।

ॐ द्वितीय अमुक गोत्राः नान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः इदं वः आसनम्। सुखासनम्। इत्युक्त्वा साक्षतजलं समर्पयेत्।

### ०६/०४. गन्धादिदानम्।

हस्ते ताम्बूलोपरि गन्धं गृहीत्वा वाम हस्तेन दक्षिणतः एकैकशः जलं पातयेत्।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा[२४२]सम्पद्यतां वृद्धिः।

ॐ अमुक गोत्राः नान्दीमुखाः पितृपितामहप्रपितामहाः सपत्नीकाः इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः।

ॐ द्वितीय अमुक गोत्राः नान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः। इत्युक्त्वा सचन्दनं जलं समर्पयेत्।

### ०६/०५. अथ भोजननिष्क्रयभूतद्रव्यदानम्।

वाम हस्तेन दक्षिणतः एकैकशः जलं पातयेत्।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः युग्मब्राह्मणभोजनपर्याप्तमन्नं वा तन्निष्क्रयीभूतं किञ्चिद्धिरण्यं अमृतरूपेण वः स्वाहा सम्पद्यतां वृद्धिः।

ॐ अमुक गोत्राः नान्दीमुखाः पितृपितामहप्रपितामहाः सपत्नीकाः युग्मब्राह्मणभोजनपर्याप्तमन्नं वा तन्निष्क्रयीभूतं किञ्चिद्धिरण्यं अमृतरूपेण वः स्वाहा सम्पद्यतां वृद्धिः।

---

[२४२] अत उर्ध्वं श्रौते कर्मणि स्वाहा शब्दप्रयोगः। स्मार्ते तु नमः शब्दप्रयोगः इति आचार्याणां मतम्।

ॐ द्वितीय अमुक गोत्रा: नान्दीमुखा: मातामहप्रमातामहवृद्धप्रमातामहा सपत्नीका: युग्म–ब्राह्मणभोजनपर्याप्तमन्नं वा तन्निष्क्रयीभूतं किञ्चिद्धिरण्यं अमृतरूपेण व: स्वाहा सम्पद्यतां वृद्धि:। इत्युक्त्वा जलं समर्पयेत्।

**०६/०६. अथ सक्षीरयवमुदकदानम्।**

हस्ते यवान् गृहीत्वा वाम हस्तेन दक्षिणत: एकैकश: सक्षीरं जलं पञ्चामृतं वा पातयेत्।

ॐ सत्यवसुसंज्ञका: विश्वेदेवा: नान्दीमुखा: प्रीयन्ताम्।
ॐ अमुक गोत्रा: नान्दीमुखा: पितृपितामहप्रपितामहा: सपत्नीका: प्रीयन्ताम्।
ॐ द्वितीय अमुक गोत्रा: मातामहप्रमातामहवृद्धप्रमातामहा: सपत्नीका: प्रीयन्ताम्। इत्युक्त्वा सक्षीरं जलं समर्पयेत्।

**०६/०७. अथाऽऽशीषो ग्रहणम्।**

दक्षिण हस्ते ताम्बूलोपरि वामहस्तमाच्छाद्य।
यजमानो वदेत्। अघोरा: पितर: सन्तु। ब्राह्मणा वदेयु:। सन्त्वघोरा: पितर:।
यजमानो वदेत्। गोत्रं नो वर्धताम्। ब्राह्मणा वदेयु:। वर्धतां वो गोत्रम्।
यजमानो वदेत्। दातारो नोऽभिवर्द्धन्ताम्। ब्राह्मणा वदेयु:। अभिवर्द्धन्तां वो दातार:।
यजमानो वदेत्। वेदाश्च नोऽभिवर्द्धन्ताम्। ब्राह्मणा वदेयु:। अभिवर्द्धन्तां वो वेदा:।
यजमानो वदेत्। सन्ततिर्नोऽभिवर्द्धताम्। ब्राह्मणा वदेयु:। अभिवर्द्धन्तां व: सन्तति:।
यजमानो वदेत्। श्रद्धा च नो मा व्यगमत्। ब्राह्मणा वदेयु:। माव्यगमद्व: श्रद्धा।
यजमानो वदेत्। बहुदेयं च नोऽस्तु। ब्राह्मणा वदेयु:। अस्तु वो बहुदेयम्।
यजमानो वदेत्। अन्नं च नो बहु भवेत्। ब्राह्मणा वदेयु:। भवतु वो बह्वन्नम्।
यजमानो वदेत्। अतिथींश्च लभेमहि। ब्राह्मणा वदेयु:। अतिथींश्च लभध्वम्।
यजमानो वदेत्। याचितारश्च न: सन्तु। ब्राह्मणा वदेयु:। सन्तु वो याचितार:।
यजमानो वदेत्। एता आशिष सत्या: सन्तु। ब्राह्मणा वदेयु:। सन्त्वेता: सत्या आशिष:। गोत्रं गोत्रस्याऽभिवृद्धिरस्तु।

**०६/०८. अथ दक्षिणदानम्।**

हस्ते द्राक्षं आमलक यवमूलान् च गृहीत्वा वाम हस्तेन दक्षिणत: एकैकश: जलं पातयेत्।

ॐ सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्य: कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे।

ॐ अमुक गोत्रेभ्य: नान्दीमुखेभ्य: पितृपितामहप्रपितामहेभ्य: सपत्नीकेभ्य: कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्धियर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे।

ॐ द्वितीय अमुक गोत्रेभ्य: नान्दीमुखेभ्य: मातामहप्रमातामहवृद्धप्रमातामहेभ्य: सपत्नीकेभ्य: कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे। इत्युक्त्वा द्राक्षं आमलक यवमूलानि सजलं समर्पयेत्। करसम्पुटौ कृत्वा।

यजमानो वदेत्। नान्दी श्राद्धं सम्पन्नमस्तु। ब्राह्मणा वदेयु:। अस्तु सुसम्पन्नम्।

### ०६/ ०९. अथ विसर्जनम्।

ॐ व्वाजे वाजे वतव्वाजिनोनोधनेषुव्विप्प्राऽअमृताऽऋतज्ञा:।
अस्यमद्ध्व: पिबतमादयध्वन्तृप्तायातपथिभिर्देवयानै:।। शु०य० ०९/१८।।[२४३]

मन्त्रान्ते पात्रे शब्दं कुर्यात्।

### ०६/ १०. अथाऽऽनुव्रजनम्।

ॐ आमाव्वाजस्यप्प्रसवेजगम्म्यादेमेद्द्यावापृथिवीव्विश्वरूपे।
आमागन्ताम्पितरामातराचामासोमोऽअमृतत्त्वेनगम्म्यात्।। शु०य० ०९/१९।।

हस्ते जलमादाय। मया कृतेऽस्मिन्नान्दीश्राद्धे न्यूनातिरिक्तो यो विधि: स उपविष्ट ब्राह्मणानां वचनाच्छ्रीनान्दीमुखप्रसादाच्च सर्व: परिपूर्णोऽस्तु। ब्राह्मणा वदेयु:। अस्तु परिपूर्ण:। अनेन साङ्कल्पिकविधिना नान्दीश्राद्धकर्मणा नान्दीमुखा: पितर: प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।[२४४]

### ०६/ ११. अथ पितृस्मरणम्।

ॐ पितृभ्य: स्वधायिभ्य: स्वधा नम: पितामहेभ्य: स्वधायिभ्य: स्वधा नम:
प्रपितामहेभ्य: स्वधायिभ्य: स्वधा नम:।
अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितर: पितर: शुन्धध्वम्।। शु०य० १९/३६।।[२४५]

---

[२४३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आगमार्थं तु देवानां गमनार्थं तु पितृणाम्। पात्रे शब्दं प्रकुर्वीत ततो यजमारभेत्।। कर्म०पृ. २०४।।
मन्त्रान्ते पात्रे शब्दं कुर्यात्।

[२४४] केषुचित् स्थलेषु केचित् ब्राह्मणा: अत्र नान्दीश्राद्धप्रयोगस्य सम्पूर्णतां व्यावहरन्तीति न समीचीनम्।

[२४५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पिता पितामहश्चैव तथैव प्रपितामह:। मातामहश्च तत्पिता प्रमातामहकादय:।।
एते भवन्तु मे प्रीता प्रयच्छन्तु च मङ्गलम्।। कर्म०पृ. २०४।।

## ।। इति नान्दीश्राद्धप्रयोगः।।

## ।। आचार्यादिऋत्विग्वरणम्।। ०७।।[२४६]

### ०७/ ०१. अथाऽऽर्घकरणम्।

एकस्मिन्ताम्रपात्रे शरावे वा आपः क्षीरं कुशाग्राणि दधि चन्दनम् अक्षताः दूर्वाः सर्षपाश्चेत्यष्ट द्रव्याणि निक्षिप्य पात्रान्तरेण पिधाय रक्तसूत्रेण संवेष्टयेतत् साचार्यविप्राः ॐ पुण्याहमिति त्रिवारं वन्दतः यजमानहस्ते दद्युः। पत्नीहस्ते पुण्याहवाचनकलशं च दद्युः। सपत्निको यजमानः स्वासनादुत्थाय ब्राह्मणान्प्रार्थयेत्।

### ०७/ ०२. ब्राह्मणप्रार्थना।

पावनाः[२४७] सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः।
अनुगृह्णन्तु मामद्य ग्रहयागाख्यकर्मणि।। ४८।। ब्र०स०पृ. ३३८।।
स्वस्वकर्मरता नित्यं वेदशास्त्रार्थको विदाः।
श्रोत्रियाः सत्यवाचश्च ग्रहध्यानरताः सदा।। ४९।। ब्र०स०पृ. ३३८।।
यद्वाक्यामृतसंसिक्ता वृद्धिं यान्ति नरद्रुमाः।
अङ्गिकुर्वन्तु मत्कर्म कल्पद्रुमसमाशिषः।। ५०।। ब्र०स०पृ. ३३८।।
यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः।
यत्कृपा लोकनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः।। ५१।। ब्र०स०पृ. ३३८।।
आयुरारोग्यपुत्रादिसुखश्रीप्राप्तये मम।
आयुर्विघ्नविनाशाय शत्रुबुद्धिक्षयाय च।। ५२।। ब्र०स०पृ. ३३८।।
आदित्याद्याः ग्रहाः सर्वे राहुकेतुपुरःसराः।
ग्रहदेवाधिदेवैश्च नक्षत्राणां च देवतैः।। ५३।। ब्र०स०पृ. ३३८।।
इन्द्रादिभिश्च दिक्पालैर्ब्रह्माविष्णुमहेश्वरैः।
वास्तुदुर्गागणशैश्च क्षेत्रपालेन संयुतैः।। ५४।। ब्र०स०पृ. ३३८।।
भौमान्तरिक्षदेवैश्च कुलदेव्या च मातृभिः।
चतुर्भिश्चैव वेदैश्च रुद्रेण सहितास्तथा।। ५५।। ब्र०स०पृ. ३३८।।

---

[२४६] नान्दीश्राद्धानन्तरं आचार्यादिऋत्विग्वरणे यद्यप्यर्घकरणं ब्राह्मणप्रार्थनाऽऽचार्यवरणं रक्तसूत्रबन्धनं ब्रह्मादिवरणं तत् प्रार्थना चाऽऽधुनिके काले गुर्जरप्रदेशे ग्रहशान्त्यादि कर्मणि प्रचलिता न सन्ति तथापि शतचण्ड्यादिमहा– प्रयोगेषु क्रियन्ते। अत एवाऽत्र ग्रहशान्ति कर्मणि याज्ञिकानां सौकर्यार्थं प्रदत्ताः।

[२४७] पावनाः इत्येकादश मन्त्राणां स्थाने निम्नलिखितो मन्त्रो गुर्जरप्रदेशे पठ्यते।
नमो ब्राह्मण्य देवाय गो ब्राह्मण हिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।। सु०वि०पृ. ५१।।

स्वागतं वो द्विजश्रेष्ठा मदनुग्रहकारकाः।
अयमर्घ इदं पाद्यं भवद्भिः प्रतिगृह्यताम्।। ५६।। ब्र०स०पृ. ३३८।।
चरणाक्षालनोद्देवा स्तुष्यन्ति शुद्धमानसाः।
तज्जलेन च संसिक्ताः पूर्णाः कामा भवन्तु मे।। ५७।। ब्र०स०पृ. ३३८।।
इमं वोऽर्घं प्रयच्छामि गृह्णन्तु प्रीतमानसाः।
पावयन्तु च मां नित्यं पूरयन्तु मनोरथान्।। ५८।। ब्र०स०पृ. ३३८।।

इति सर्वान् ब्राह्मणान् प्रार्थयेत्।

## ०७/०३. अथाऽऽचार्यवरणम्।[२४८]

ततो यजमानः सपत्नीकः उदङ्मुख एवोपविश्य तत आचार्यत्वयोगस्य प्राङ्मुखोपविश्य। यजमानो हस्ते पूगीफलं गृहीत्वा विप्रस्य दक्षिणजानुमालभ्य वदेत्। अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः शुक्लयजुर्वेदान्तर्गतवाजसनेयिमाध्यन्दिनीशाखाध्यायी अमुकशर्मा यजमानोऽहमुकगोत्रोत्पन्नम् अमुक-प्रवरान्वितम् शुक्लयजुर्वेदान्तर्गतवाजसनेयिमाध्यन्दिनीशाखाध्यायीनम् अमुकशर्माणम् ब्राह्मणमस्मिन् ग्रहशान्त्याख्ये कर्मणि आचार्यत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात्। यजमानेन दत्त पूगीफलं गृहीत्वा विप्रो वदेत्। ॐ वृतोऽस्मि।

ॐ व्रतेन दीक्षामाप्नोतिदीक्षयाप्नोति दक्षिणाम्।
दक्षिणा श्रद्धा माप्नोति श्रद्धयासत्त्यमाप्यते।। शु०य० १९/३०।।[२४९]

वृताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनमेषतेऽर्घः। गन्धाक्षतपुष्पमालादिभिः संपूज्य हस्ते रक्तसूत्ररूपकङ्कणबन्धनम्।

ॐ यदाबद्ध्नन्दाक्षायणाहिरण्यं शतानीकायसुमनस्यमानाः।
तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्।। शु०य० ३४/५२।।[२५०]

यथाशक्ति सुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रादिवरणसाहित्यं दत्वा वदेत्।

आवाहयाम्यहं विप्रमाचार्यं यज्ञकारिणम्।

---

[२४८] गूर्जरप्रदेशान्यत्र प्रागाचार्यवरणा अर्घदान विधिः प्रचलितः। किन्तु गूर्जरप्रदेशे अर्घदानविधेः स्थाने मधुपर्कस्य विधिः प्रचलितः। स च गाणपत्यादि वरणानन्तरं प्राक् च ऋत्विक् प्रार्थनायाः प्रसिद्धः।

[२४९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
ग्रहशान्त्याख्ययज्ञेऽस्मिन् आचार्यस्य तथा भव।। ब्र०स०पृ. ३३९।।

[२५०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
येन बद्धो बलिराजा दानवेन्द्रो महाबलः। तेन त्वामपि बध्नामि रक्षे मा चल मा चल।। कर्म०पृ. १६८।।

पुराणन्यायमीमांसाधर्मशास्त्रार्थपारगम्।। ५९।। ब्र०स०पृ. ३३९।।
आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
ग्रहशान्त्याख्ययज्ञेऽस्मिन् आचार्यस्त्वं तथा भव।।
यावत्कर्म समाप्येत तावदाचार्यतां भव।। ६०।। ब्र०स०पृ. ३३९।।

आचार्यो वदेत्। भवामि।

ॐ बृहस्पतेऽअतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु।
यदीदयच्छवऽऋतप्रजा ततदस्मासु द्रविणन्धेहि चित्रम्।। शु०य० २६/०३।।[२५१]

## ०७/ ०४. अथ ब्रह्मर्त्विगवरणम्।

पूर्ववद्गोत्रोच्चारणं कृत्वा अस्मिन् कर्मणि ब्रह्मत्वेन त्वामहं वृणे। ॐ वृतोऽस्मि।

ॐ व्व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते।। शु०य० १९/३०।।[२५२]

वृताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनमेषतेऽर्धः। गन्धाक्षतपुष्पमालादिभिः संपूज्य हस्ते रक्तसूत्रकङ्कणबन्धनम्।

ॐ यदा बद्ध्नन्दाक्षायणा हिरण्यं शतानीकायसुमस्यमानाः।
तन्मऽआबद्ध्नामिशतशारदायायुष्माञ्जरदष्टि र्यथासम्।। शु०य० ३४/५२।।[२५३]
यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः।
ग्रहशान्त्याख्य यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम।।
यावत्कर्म समाप्येत तावद् ब्रह्मा भव द्विज।। ब्र०स०पृ. ३३९।।

ब्रह्मर्त्विगो वदेत्। भवामि।

ॐ ब्रह्मजज्ञानम्प्रथमपुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः।
सबुद्ध्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चव्विवः।। शु०य० १३/०३।।[२५४]

---

[२५१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वेदशास्त्रविधानेन सर्वकर्मकृतौ जनाः। आचार्यत्वेन कर्माहं करिष्ये धर्मपूर्वकम्।।
[२५२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वेदशास्त्रविधानेन सर्वकर्मकृतौ जनाः। कर्मब्रह्म स्वरूपेण करिष्ये विधिपूर्वकम्।।
[२५३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
येन बद्धो बलिराजा दानवेन्द्रो महाबलः। तेन त्वामपि बध्नामि रक्षे मा चल मा चल।। कर्म०पृ. १६८।।
[२५४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वेदशास्त्रविधानेन सर्वकर्मकृतौ जनाः। कर्मब्रह्म स्वरूपेण करिष्ये विधिपूर्वकम्।।

तदनन्तर गाणपत्यसदस्यवरणं कृत्वा ऋत्विग्वरणं पूर्ववद्गोत्रोच्चारणपूर्वकं कुर्यात्। एवं चतुरोऽअष्टौ वा ऋत्विजो वृणुयात्।

**०७/ ०५. अथ मधुपर्कः।**

मधुपर्कपात्रेण सहितो यजमानो ब्राह्मणान् गच्छेत्। कश्चिद् ब्राह्मणः वदति- मधुपर्को मधुपर्को मधुपर्कः इति। मधुपर्कं च दद्यात्। ते च एकैकसः सम्मील्य वा प्रतिगृह्णीयुः। तदा यजमानो वदति प्रतिगृह्णीमः।

**०७/ ०६. ऋत्विक् प्रार्थना।**

ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः।
देवानां चैव दातारः पातारः सर्वदेहिनाम्।। ६२।। ब्र०स०पृ. ३३९।।
जपयज्ञैस्तथा होमेर्दानैश्च विविधैः पुनः।
देवानां च ऋषीणां च तृप्त्यर्थं याजकाः कृताः।। ६३।। ब्र०स०पृ. ३३९।।
येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्।
रक्षन्तु सततं ते मां ग्रहयज्ञे व्यवस्थिताः।। ६४।। ब्र०स०पृ. ३३९।।
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम्।
येषां वाक्योदकेनैव शुद्धयन्ति मलिना जनाः।। ६५।। ब्र०स०पृ. ३३९।।
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः।
सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः।। ६६।। ब्र०स०पृ. ३३९।।
श्रोत्रियाः सत्यवाचश्च ग्रहध्यानरताः सदा।
यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः।। ६७।। ब्र०स०पृ. ३४०।।
अङ्गीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः।
यथोक्त नियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः।। ६८।। ब्र०स०पृ. ३४०।।
यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः।
ग्रहयज्ञे मया पूज्या सन्तु मे नियमान्विताः।। ६९।। ब्र०स०पृ. ३४०।।
अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
ग्रहध्यानरता नित्यं प्रसन्नमनसः सदा।। ७०।। ब्र०स०पृ. ३४०।।
अदुष्टभाषणाः सन्तु मा सन्तु परनिन्दकाः।
ममापि नियमा ह्येते भवन्तु भवतामपि।। ७१।। ब्र०स०पृ. ३४०।।
ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन्।
यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः।। ७२।। ब्र०स०पृ. ३४०।।
ग्रहयागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया।

सुप्रसन्नैः प्रकर्तव्यं शान्तिकं विधिपूर्वकम्।। ७३।। ब्र०स०पृ. ३४०।।

**०७/ ०७. अथ यजमानहस्ते कङ्कणबन्धनम्।**

ॐ यदाबद्ध्नन्दाक्षायणाहिरण्ण्यं शतानीकायसुमनस्यमानाः।
तन्म्मऽआबद्ध्नामिशतशारदा या युष्म्माञ्जरदष्टिर्यथासम्।। शु०य० ३४/५२।।[२५५]

**०७/ ०८. अथ यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम्।**

ॐ तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैब्भ्रातृभिरुतवाहिरण्यैः।
नाकङ्गृब्भ्णानाः सुकृतस्य लोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः।। शु०य० १५/५०।।[२५६]

ततो मण्डपे यजमानः आचार्यादीन् प्रति वदेत्। यथाविहितं कर्म कुरुध्वम्। यथाज्ञानं करवामः। इति ब्राह्मणा वदेयुः। अथाचार्यो आचम्य प्राणानायम्य। हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गता सिद्ध्यर्थं अमुकगोत्रः अमुकशर्माऽहम् अस्मिन् ग्रहशान्त्याख्ये कर्मणि यजमानेन वृतोऽहम् आचार्यकर्म करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**०७/ ०९. अथ पुनर्दिग्रक्षणम्।**

गौरसर्षपान् तदभावे अक्षतान् वा वामहस्ते गृहीत्वा स च दक्षिण जानौ संस्थाप्य तदुपरि दक्षिण हस्तं पिधाय।

ॐ कृणुष्वपाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२इभेन।
तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः।। शु०य० १३/०९।।[२५७]
ॐ रक्षोहणं व्वलगहनं वैष्णवीमिदमहं तं व्वलगमुत्त्किरामि
यं मे निष्ष्यो यमसमानो निचखानेदमहं तं व्वलगमुत्त्किरामि

---

[२५५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दाक्षायणा शतानीकमबध्नन्सुहिरण्यकम्। आबध्नामि तदेवाहमायुष्यस्याभिवृद्धये।। ब्र०स०पृ. ३४०।।

[२५६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पत्नी वामकरे सूत्रं बध्वा सौख्यं धनागमम्। बहुसम्पत्तिमारोग्यं रक्षार्थे कङ्कणं शुभम्।। कर्म०पृ. २०७।।

[२५७] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा। स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु।। ब्र०स०पृ. ३२।।
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।। ब्र०स०पृ. ३२।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन होमकर्म समारभे।। ब्र०स०पृ. ३२।।
भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन। ते सर्वेऽप्यगच्छन्तु ग्रहयागं करोम्यहम्।। ब्र०स०पृ. ३२।।

यं मे समानो यमसमानो निचखानेदमहं तं व्वलगमुत्किरामि
यं मे सबन्धुर्यमसबन्धुर्न्निचखानेदमहं तं व्वलगमुत्किरामि
यं मे सजातो यमसजातो निचखानो त्कृत्यां किरामि।। शु०य० ०५/२३।।
ॐ रक्षोहणो वो व्वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो
व्वलगहनोऽवनयामि व्वैष्णवान्रक्षोहणो वो
व्वलगहनोऽवस्तृणामि वैष्णवान्न्रक्षोहणो वां
व्वलगहनाऽउपदधामि वैष्णवी रक्षो हणो वां
व्वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवाः स्थः।। शु०य० ०५/२५।।
ॐ रक्षसां भागोऽसि निरस्तं रक्षऽइदमहं
रक्षोऽभितिष्ठामीदमं रक्षोऽवबाधऽइदमहं रक्षोऽधमन्तमोनयामि।
घृतेन द्यावापृथिवी प्रोर्णुवाथां व्वायो
व्वेस्तोकानामग्निराज्ज्यस्य व्वेतु स्वाहा
स्वाहा कृतेऽऊर्ध्वनभसां मारुतं गच्छतम्।। शु०य० ०६/१६।।
ॐ रक्षोहा व्विश्वचर्षणरभियोनिमयोहते। द्रोणे सधस्त्थमासदत्त।। शु०य० २६/२६।।

एतैर्मन्त्रैः सर्षपानक्षतान् वा तिष्ठन् सर्वदिक्षु विकिरेत्। वामपादेन भूमिं त्रिवारं ताडयेत्।

**उदकोपस्पर्शः।**

वामहस्ते जलमादाय दक्षिणमध्यमानामिकाभ्यां जलं संस्पृश्य प्रथमं दक्षिणवामनेत्रे संस्पृशं वदेत्। पुनश्च जलं संस्पृश्य दक्षिणवामकर्णौ संस्पृशं वदेत्।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरिकाक्षं स बाह्याभ्यन्तरः शुचिः।। ७४।। ब्र०स०पृ. ३४।।

## ०७/ १०. अथ पञ्चगव्यकरणम्।

कांस्यपात्रे मन्त्रान्ते गोमूत्रम् क्षिपेत्।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्।। शु०य० ३६/०३।।[२५८]

गोमयं मन्त्रान्ते क्षिपेत्।

---

[२५८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गोमूत्रं गोमयं क्षीरं दधि सर्पि कुशोदकम्। यज्ञस्थलविशुद्ध्यर्थं पञ्चगव्यं करोम्यहम्।। या०र०पृ. ४२।।

ॐ मान[२५९]स्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे।। शु०य०१६/१६।।

क्षीरं मन्त्रान्ते क्षिपेत्।

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्
भवा व्वाजस्य सङ्गथे।। शु०य० १२/११२।।

दधि मन्त्रान्ते क्षिपेत्।

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यव्वाजिनः।
सुरभिनोमुखाकरत्त्प्रणऽआयूं षितारिषत्।। शु०य० २३/३२।।

आज्यं मन्त्रान्ते क्षिपेत्।

ॐ तेजोऽसि शुक्रमस्यमृतमसिधामनामासिप्प्रियन्देवानामना–
धृष्टन्देवयजनमसि।। शु०य० ०१/३१।।

इति मन्त्रेण कुशोदकम् क्षिपेत्।

ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।। शु०य० ०१/१०।।

ॐ इति प्रणवेन यज्ञकाष्ठेन कुशैर्वाऽलोड्य प्रणवेनाभिमन्त्रयेत्। यज्ञभूमिं यज्ञसम्भारांश्च कुशैः सम्प्रोक्षेत्।

ॐ आपोहिष्ठामयोभुवस्तानऽउर्ज्जेदधातन। महेरणायचक्षसे।। शु०य० ११/५०।।[२६०]
ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः।। शु०य० ११/५१।।
ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः। शु०य० ११/५२।।

**०७/ ११. अथ भूमि प्रार्थना।**

अञ्जलिं बद्ध्वा भूमिं सम्प्रार्थयेत्।

---

[२५९] अत्र गोमयकरणे संस्कारभास्करकारा गन्धद्वारांदुराधर्षामिति मन्त्रं पठन्ति।

[२६०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरिकाक्षं स बाह्याभ्यन्तरः शुचिः।। ब्र०स०पृ. ३४।।

ॐ स्योनापृथिवीनो भवानृक्षरानिवेशनी।
यच्छान: शर्म्मसप्प्रथा: ।। शु०य० ३६/१३।।[२६१]

## ०७/ १२. अथ भूमिकूर्मानन्तपूजनम्।

भूमिकूर्मानन्तपूजनम् होममानतो यथार्हकृतचतुरस्रस्थण्डिलस्याग्रे अक्षतपुञ्जोपरि त्रीणि पूगी फलानि संस्थाप्यभूमिकुर्मानन्तानावाह्य पूजयेत्।वामहस्ते अक्षतान् गृहीत्वा भूमिकूर्मानन्तान् आवाहयेत्।

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।
पृथिवीं यच्छ पृथिवीन्दृं ह पृथिवीम्मा हिं सी:।। शु०य० १३/१८।।[२६२]
ॐ भूर्भुव: स्व: भूम्यै नम:। भूमीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम्।
तस्मै देवा अधि ब्रुवन्नयं च ब्रह्मणस्पति:।। शु०य० १७/५२।।
ॐ भूर्भुव: स्व: कूर्माय नम:। कूर्ममावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

ॐ स्योनापृथिवीनो भवानृक्षरानिवेशनी।
यच्छान: शर्म्मसप्प्रथा: ।। शु०य० ३६/१३।।
ॐ भूर्भुव: स्व: अनन्ताय नम:। अनन्तमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

## प्रतिष्ठापनम्।

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मोइँम्प्रतिष्ठ ।। शु०य० २/१३।।[२६३]

---

[२६१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरुचासनम्।। ब्र०स०पृ. १५।।
[२६२] अत्र यज्ञोपवीतरहितानां कृते नाममन्त्रै: आवाहयेत्।
ॐ भूर्भुव: स्व: भूम्यै नम:। भूमिं आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
ॐ भूर्भुव: स्व: कूर्माय नम:। कूर्मं आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्
ॐ भूर्भुव: स्व: अनन्ताय नम:। अनन्तं आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
[२६३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले देवतै: सह।। या०र०पृ.०७।।

ॐभूर्भुव:स्व: भूमिकूर्मानन्तदेवता: सुप्रतिष्ठिता: वरदा: भवत। इत्यक्षतान् क्षिपेत्।

ॐभूर्भुव:स्व: भूमिकूर्मानन्तदेवताभ्यो नम: गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्

**०७/ १३. अथ देवताऽऽवाहनम्।**

अञ्जलौ पुष्पाण्यादाय उत्थाय ऊर्ध्वं पश्यन्।

ॐ स्वस्ति नऽइन्द्रो व्वृद्धश्श्रवा: स्वस्ति न: पूषाव्विश्ववेदा:।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु।। शु०य० २५/१९।।[२६४]

ॐ देवा: आयान्तु। यातुधाना अपयान्तु। विष्णो देवयजनं रक्षस्व। इति पठित्वा। पुष्पाणि ऊर्ध्वं प्रक्षिप्य भूमौ प्रादेशं[२६५]कुर्यात्।

**।। इति आचार्यादिऋत्विग्वरणम्।।**

**।। स्थण्डिल(कुण्ड)पूजनपूर्वकमग्निस्थापनम्।। ०८।।**[२६६]

**०८/ ०१. अथ सङ्कल्प:।**

हस्ते जलमादाय। देशकालौ संकीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्मिन् स्थण्डिले देवतानां पूजनं तथा च पञ्चभूसंस्कारपूर्वकं अग्निप्रतिष्ठापनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**कुशै: स्थण्डिल सम्मार्जनम्।**

कुशोदकेन प्रोक्षयेत्।

ॐ आपोहिष्ठा मयो भुवस्तानऽउर्ज्जे दधातन।
महे रणाय चक्षसे ।। शु०य० ११/५०।।[२६७]

---

[२६४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
स्वस्त्यस्तुयाऽविनाशाख्या पुण्यकल्याण वृद्धिदा।
विनायक प्रिया नित्यं तां च स्वस्ति ब्रुवन्तु न:।। सु०वि०पृ. ०२।।

[२६५] प्रादेशमुद्रां दर्शयेत्। अङ्गुष्ठतर्जन्यौ प्रसार्य। अन्याङ्गुल्य: हस्ततलान्त: कृत्वा।

[२६६] गर्त–मेखला–कण्ठ–योनि–नाभिभिर्युक्त: कुण्ड उच्यते। अष्टाभिस्तन्यूनाभिर्वा इष्टकाभिर्युक्त: स्थण्डिल:।

[२६७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वेषां जीवनोपाया यादसां पतयस्तथा। पावना: सर्वलोकानां शुद्धाप: प्रणमाम्यहम्।। या०र०पृ० ५१।।

ॐ यो वः शिवतमो रसस्तस्य भाजयतेहनः ।
उशतीरिव मातरः ।। शु०य० ११/५१।।
ॐ तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा चनः ।। शु०य० ११/५२।।

स्थण्डिलं स्पृष्ट्वा आवाहयेत्।

आवाहयामि तत् कुण्डं विश्वकर्मविनिर्मितम्।
शरीरं यच्च ते दिव्यं अग्न्यधिष्ठानमद्भुतम्।। ७५।। या०र०पृ. ४२।।
ॐ भूर्भुवः स्वः कुण्डाय नमः। कुण्डमावाहयामि स्थापयामि। ततः प्रार्थयेत्।

ये च कुण्डे स्थिता देवाः कुण्डाङ्गे याश्च देवताः।
ऋद्धिं यच्छन्तु ते सर्वे यज्ञसिद्धिं ददन्तु नः।। ७६।। या०र०पृ. ४२।।।।

## ०८/०२. देवानावाहनम्।

हस्ते अक्षतान् गृहीत्वा।

ॐ विश्वकर्मन् हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम्।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत्।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते
योनिरिन्द्राय त्वा विश्वकर्मणे।। शु०य० ०८/४६।।[२६८]

ॐ भूर्भुवः स्वः विश्वकर्मणे नमः। विश्वकर्माणम् आवाहयामि स्थापयामि। इत्युक्त्वा अक्षतान् समर्पयेत्।

ततः प्रार्थयेत्।

ब्रह्मवक्त्रं भुजौ क्षत्रमूरु वैश्यः प्रकीर्तितः
पादौ यस्य तु शूद्रो हि विश्वकर्मात्मने नमः।। ७७।। या०र०पृ. ४२।।
अज्ञानाज्ज्ञानतो वापि दोषाःस्युः खननोद्भवाः।
नाशय त्वखिलास्ताँस्तु विश्वकर्मन्नमोस्तुते।। ७८।। या०र०पृ. ४२।।

## ०८/०३. अथ पञ्चभूसंस्काराः।

[२६८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हे कुण्ड तव निर्माणं रचितं विश्वकर्मणः। अस्माकं वाञ्छितं सिद्धिं यज्ञसिद्धिं ददातु मे।। नै०प्र०पृ. ८१।।

अचार्यः स्थण्डिल पश्चिमतः उपविशेत्। यजमानं स्वदक्षिणे ब्रह्मणः पश्चिमतः उपवेश्य आचम्य प्राणानायम्य । हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। प्रारब्धग्रहशान्त्याख्ये कर्मणि अस्मिन् स्थण्डिले पञ्चभूसंस्कारपूर्वकमग्निप्रतिष्ठापनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। उत्थाय।

**परिसमूहनम्**

दक्षिणहस्ते मूलधृतैस्त्रिभिर्दर्भाग्रैः दक्षिणत आरभ्योदक्संस्थं पश्चिमतः आरभ्य प्रागन्तं त्रिवारं परिसमूहनं कुर्यात्। तद्यथा–

दर्भैः परिसमूह्य परिसमूह्य परिसमूह्य। तान् कुशान् कुण्डाद्बहिः ईशान्यां प्राच्यां वा परित्यजेत्।

**उपलेपनम्।**

ततो दक्षिणहस्तेन गोमयमादाय पूर्ववत् दक्षिणत आरभ्योदक्संस्थं पश्चिमतः आरभ्य प्रागन्तं त्रिवारं गोमयेनोपलिम्पेत्। तद्यथा–

गोमयोदकेन उपलिप्य उपलिप्य उपलिप्य। हस्तं प्रक्षाल्य।

**उल्लेखनम्।**

ततो दक्षिणस्तेन स्रुव[२६९]मादाय पूर्ववत् दक्षिणत आरभ्योदक्संस्थं पश्चिमतः आरभ्य प्रागन्तं स्रुवमूलेन त्रिरुल्लेखनं कुर्यात्। तद्यथा–

स्रुवमूले उल्लिख्य उल्लिख्य उल्लिख्य।

**उद्धरणम्।**

ततो अनामिकाङ्गुष्ठेन यथोल्लिखिताभ्यो लेखाभ्यः पूर्ववत् कुण्डतः पांसूनामुद्धरणं विदध्यात्। तद्यथा–

अनामिकाङ्गुष्ठेन उद्धृत्य उद्धृत्य उद्धृत्य। तान् प्राच्यां क्षिप्त्वा।

**अभ्युक्षणम्।**

ततो प्रतिरेखं न्युब्जमुष्टिना प्राजापत्यतीर्थेन पूर्ववत् उदकेन त्रिवारं अभ्युक्षणं कुर्यात्। तद्यथा–

उदकेन अभ्युक्ष्य अभ्युक्ष्य अभ्युक्ष्य।

ततोऽग्निं स्थापयेत्।

**०८/०४. अथाऽग्निस्थापनम्।**

---

[२६९] अत्र स्रुवाभावे यज्ञकाष्ठेन वा कुशैर्वा यथोपलब्धं साधयेत्।

सुवासिन्या श्रोत्रियागारात्स्वगृहाद्वा समृद्धिं निर्धूमं तैजसेनासम्भवे मृण्मयेन वा पात्रयुग्मेन सम्पुटीकृतमाहृतमग्निं स्थिण्डिलस्याग्नेयां निदद्यात्। आच्छादितं पात्रमुद्घाट्य। तस्मादाचार्यो "हुं फट्" इति मन्त्रेण क्रव्यादांशं नैर्ऋत्यां दिशि परित्यज्याग्निं स्थण्डिलस्योपरि त्रिवारं भ्रामयन् वदेत्।

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे।
देवाँऽआसादयादिह।। शु०य० २२/१७।।[२७०]

इति मन्त्रं पठन् स्थण्डिले स्वाभिमुखं वरदनामाग्निं स्थापयेत्। ततोऽग्न्यानीतपात्रे साक्षतोदकं निषिच्य तत्र शिष्टाचारात् किञ्चिद्यथाशक्ति हिरण्यं रौप्यद्रव्यं वा निक्षिप्य तत् द्रव्यं यजमान पत्न्यै दद्यात्।

ततोऽग्नौ आवाहनादिमुद्राः प्रदर्शयेत्। भो अग्ने त्वम् अवाहितो भव। भो अग्ने त्वं सन्निरुद्धो भव। भो अग्ने त्वं सकलीकृतो भव। भो अग्ने त्वम् अवगुण्ठितो भव। भो अग्ने त्वम् अमृतीकृतो भव। भो अग्ने त्वं परमीकृतो भव। इति तस्ता मुद्राः प्रदर्श्य। अग्निम् इन्धनप्रक्षेपेण प्रज्वलितं कृत्वा  करसम्पुटौ विधाय अग्निमावाहयेत्।

### ०८/ ०५. अथाऽग्न्यावाहनम्।

हस्ते अक्षतान् गृहीत्वा।

ॐ एषोहदेवः प्रदिशोनुसर्वाः पूर्वोहजातः सऽउगर्भेऽअन्तः।
सऽएवजातः सजनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः।। शु०य० ३२/०४।।[२७१]

ॐ भूर्भुवः स्वः वरदनामाग्नये नमः वरदनामाग्निमावाहयामि। आवाहनार्थे अक्षतान् समर्पयामि। इत्युक्त्वा अक्षतान् कुण्डस्य नैर्ऋत्यकोणे पूगीफलोपरि मध्ये वा समर्पयेत्।

### ०८/ ०६. अथ प्रतिष्ठापनम्।

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु।
व्विश्श्वे देवासऽइह मादयन्ता मो३ँम्प्रतिष्ठ।। शु०य० ०२/१३।।[२७२]

ॐभूर्भुवःस्वः वरदनामाग्नये नमः। सुप्रतिष्ठितो वरदो भव। इत्यक्षतान् समर्पयेत्।

---

[२७०] अत्र यज्ञोपवीतरहितानां कृते ह्रीं अग्नये नमः इति नाममन्त्रेणाग्निं स्थापयेत्।

[२७१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।

[२७२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले  दैवतैः सह।। या०र०पृ. ०७।।

## ०८/ ०७. अथाऽग्निपूजनम्।

मुखं कृत्वा ध्यायेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ चत्वारि शृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य।
त्रिधाबद्धोवृषभोरोरवीति महोदेवोमर्त्यारँऽआविवेश।। शु०य० १७/९१।।[२७३]

अग्ने वैश्वानर शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेतितित्रिप्रवर भूमिमातः वरुणपितः मेषध्वज प्राङ्मुख मम सम्मुखो भव।

ॐभूर्भुवःस्वः वरदनामाग्नये नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। इति कुण्डस्य नैरृत्यकोणे मध्ये वा अग्निं सम्पूज्य प्रार्थयेत्।

**प्रार्थना।**

आग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। ७९।। या०र०पृ. ४६।।

**।। इति स्थण्डिल(कुण्ड)पूजनपूर्वकमग्निस्थापनम्।।**

**।। सरुद्रग्रहमण्डलदेवतापूजनम्।। ०९।।**

ततः स्थण्डिलस्य रुद्रदिग्भागे वेद्युपरि  सरुद्रग्रहमण्डलदेवता स्थापनम्। स्थापनोपरि पात्रे नवग्रहस्वरुपं रुद्रस्वरुपं च स्थापयेत्।

## ०९/ ०१. अथ सङ्कल्पः।

यजमानो हस्ते जलमादाय। अद्येत्यादि शुभपुण्यतिथौ  प्रारब्धकर्मणः साङ्गतासिद्ध्यर्थ सरुद्रमादित्यादिग्रहमण्डलदेवतानां स्थापनं पूजनं चाहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[२७३] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
सप्तहस्तश्चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः। त्रिपात्प्रसन्नवदनः सुखासीनः सुचिस्मितः।। ब्र०स०पृ. ३४२।।
स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा। बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं।। ब्र०स०पृ. ३४२।।
तोमरं व्यजनं वामे घृतपात्रं च धारयन्। आत्माभिमुखमासीन एवंरूपो हुताशनः।। ब्र०स०पृ. ३४२।।

**०९/०२. अथ नवग्रहाऽवाहनम्।**

वामहस्ते अक्षतान् पूगीफलं वा गृहीत्वा। तदक्षतान् पूगीफलं वा दक्षिणहस्तेन तेभ्यो निम्नलिखितावाहनादि पूजासु प्रत्येकमन्त्रान्ते समर्पयेत्।

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।। शु०य० ३३/४३।।[२७४]

प्राङ्मुखं सूर्यं पीठमध्ये वर्तुले द्वादशाङ्गुले मण्डले ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य इहागच्छ इहतिष्ठ। ॐ सूर्याय नमः सूर्यमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ इमं देवाऽअसपत्नं सुवध्वं महते क्षत्राय महते
ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इमममुख्य पुत्रमुष्यै पुत्रमस्यै विशऽएष वोऽमी
राजा सोमोऽस्माकं ब्राह्मणानां राजा।। शु०य० ९/४०।।[२७५]

प्रत्यङ्मुखं सोममाग्नेयां चतुरस्रे चतुर्विंशत्यिङ्गुले मण्डले ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र शुक्लवर्ण भो सोम इहागच्छ इहतिष्ठ । ॐ सोमाय नमः सोममावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्।
अपां रेतां सि जिन्वति।। शु०य० ०३/१२।।[२७६]

दक्षिणाभिमुखं भौमं दक्षिणस्यां दिशि त्रिकोणे त्र्यङ्गुले मण्डले ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम इहागच्छ इहतिष्ठ। ॐ भौमाय नमः भौममावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं सृजेथामयं च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत।। शु०य० १५/५४।।[२७७]

---

[२७४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जपाकुसुमसंकाशं काश्यपेयं महद्युतिम्। तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्।। या०र०पृ. ४९।।

[२७५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दधिशङ्खतुषाराभं क्षीरोदार्णव सम्भवम्। नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्।। या०र०पृ. ४९।।

[२७६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
धरणीगर्भसम्भूतं विद्युत्कान्ति समप्रभम्। कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम्।। या०र०पृ. ४९।।

[२७७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्। सौम्यं सौम्य-गुणोपेतं तं बुधं प्रणमाम्यहम्।। या०र०पृ. ४९।।

उदङ्मुखं बुधमैशान्यां दिशि बाणाकारे चतुरङ्गुले मण्डले ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण भो बुध इहागच्छ इहतिष्ठ। ॐ बुधाय नमः बुधमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्युमद्विबाति क्रतुमज्जनेषु।
यद्दीदयच्छवसऽऋतप्रजाततदस्मासु द्रविणं धेहि चित्रम्।। शु०य० २६/०३।।[२७८]

उदङ्मुखं बृहस्पतिमुत्तरस्यां दिशि लम्बदीर्घचतुरस्रे पट्टाकारे षडङ्गुले मण्डले ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो बृहस्पते इहागच्छ इहतिष्ठ। ॐ बृहस्पतये नमः बृहस्पतिमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रंपयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽ-
इन्द्रस्येन्द्रियमिदं पयोमृतं मधु।। शु०य० १९/७५।।[२७९]

प्राङ्मुखं शुक्रं पूर्वस्यां दिशि पञ्चकोणे नवाङ्गुले मण्डले ॐ भूर्भुवः स्वः भोजकट-देशोद्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र इहागच्छ इहतिष्ठ। ॐ शुक्राय नमः शुक्रमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।
शं य्योरभिस्रवन्तु नः।। शु०य० ३६/१२।।[२८०]

प्रत्यङ्मुखं शनिं पश्चिमायां दिशि धनुराकारेद्वयङ्गुले मण्डले ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर इहागच्छ इहतिष्ठ। ॐ शनैश्चराय नमः शनैश्चरमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा।
कया शचिष्ठयाऽवृता।। शु०य० २७/३९।।[२८१]

दक्षिणाभिमुखं राहुं नैर्ऋत्यां दिशि शूर्पाकारे द्वादशाङ्गुले मण्डले ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठिनसगोत्र नीलवर्ण भो राहो इहागच्छ इहतिष्ठ। ॐ राहवे नमः राहुमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

---

[२७८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
देवानाञ्च ऋषीणाञ्च गुरुङ्काञ्चन-सन्निभम्। बुद्धिभूतं त्रिलोकेशं तन्नमामि बृहस्पतिम्।। या०र०पृ. ४९।।

[२७९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हिमकुन्द-मृणालाभं दैत्यानां परमङ्गुरुम्। सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्।। या०र०पृ. ४९।।

[२८०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नीलाञ्जनसमाभासं रविपुत्रञ्यमाग्रजम्। छायामार्तण्डसम्भूतं तन्नमामि शनैश्चरम्।। या०र०पृ. ४९।।

[२८१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्। सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम्।। या०र०पृ. ४९।।

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे।

समुषद्भिरजायथा:।। शु०य० २९/३७।।[२८२]

दक्षिणाभिमुखं केतुं वायव्यां दिशि ध्वजाकारे षडङ्गुले मण्डले ॐ भूर्भुव: स्व: अन्तर्वेदिसमुद्भव जैमिनिसगोत्र धूम्रवर्ण भो केतो इहागच्छ इहतिष्ठ। ॐ केतवे नम: केतुमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

**०९/०३. अथाऽधिदेवतावाहनम्।**

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।। शु०य० ०३/६०।।[२८३]

ॐ भूर्भुव: स्व: भो ईश्वर इहागच्छ इहतिष्ठ। सूर्यदक्षिणपार्श्वे ॐ ईश्वराय नम: ईश्वरमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।

इष्णन्निषाणामुमऽइषाण सर्वलोकं मऽइषाण।। शु०य० ३१/२२।।[२८४]

ॐ भूर्भुव: स्व: भो उमे इहागच्छ इहतिष्ठ। सोमदक्षिणपार्श्वे ॐ उमायै नम: उमामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ यदक्रन्द: प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुतवा पुरीषात्।

श्येनस्य पक्षा हरिणस्यबाहू ऽउपस्तुत्यम्महिजातन्तेऽअर्वन्।। शु०य० २९/१२।।[२८५]

ॐ भूर्भुव: स्व: भो स्कन्द इहागच्छ इहतिष्ठ। भौमदक्षिणपार्श्वे ॐ स्कन्दाय नम: स्कन्दमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ विष्णो रराटमसि विष्णो: श्नप्त्रेस्थो विष्णो: स्यूरसि विष्णोर्धुवोसि।

वैष्णवमसि विष्णवे त्वा।। शु०य० ०५/२१।।[२८६]

---

[२८२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

पलाशपुष्पशङ्काशं तारकाग्रहमस्तकम्। रौद्रं रौद्रात्मकं घोरं तङ्केतुं प्रणमाम्यहम्।। या०र०पृ. ४९।।

[२८३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनै:।। या०र०पृ. ५०।।

[२८४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

हिमालयसुतां देवीं शङ्करप्राणवल्लभाम्। उमां सौभाग्यदात्रीं च वन्देऽहं जगदम्बिकाम्।। या०र०पृ. ५०।।

[२८५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

महादेवांश सम्भूतं कृत्तिकातनयं तथा। सेनानीं देवतानां च नमामि स्कन्दमद्भुतम्।। या०र०पृ. ५०।।

[२८६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

सृष्टिसंरक्षितारं च लक्ष्मीनाथं वरं विभुम्। वैकुण्ठवासिनं वन्दे विष्णुं जिष्णु परं प्रभुम्।। या०र०पृ. ५०।।

ॐ भूर्भुवः स्वः भो विष्णु इहागच्छ इहतिष्ठ। बुधदक्षिणपार्श्वे ॐ विष्णवे नमः विष्णुमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधामहारथो
जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्य्योषाजिष्णूरथेष्ठाः
सभेयोयुवास्ययजमानस्य वीरोजायतान्निकामे निकामे नः पर्जन्योवर्षतु–
फलवत्योनऽओषधयः पच्यन्तां य्योगक्षेमो नः कल्पताम्।। शु०य० २२/२२।।[२८७]

ॐ भूर्भुवः स्वः भो ब्रह्मन् इहागच्छ इहतिष्ठ। गुरुदक्षिणपार्श्वे ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ सजोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिबवृत्रहाशूरविद्वान्।
जहि शत्रूँ१ रपमृधोनुदस्वाथा भयङ्कृणुहि विश्वतो नः।। शु०य० ०७/३७।।[२८८]

ॐ भूर्भुवः स्वः भो इन्द्र इहागच्छ इहतिष्ठ। शुक्रदक्षिणपार्श्वे ॐ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ यमायत्वाङ्गिरस्वतेपितृमते स्वाहा।
स्वाहाघर्मायस्वाहाघर्मः पित्रे।। शु०य० ३८/०९।।[२८९]

ॐ भूर्भुवः स्वः भो यम इहागच्छ इहतिष्ठ। शनिदक्षिणपार्श्वे ॐ यमाय नमः यममावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ कार्षिरसिसमुद्रस्य त्वाक्षित्याऽउन्नयामि।
समापोऽअद्भिरग्मतसमोषधीभिरोषधीः।। शु०य० ०६/२८।।[२९०]

ॐ भूर्भुवः स्वः भो काल इहागच्छ इहतिष्ठ। राहुदक्षिणपार्श्वे ॐ कालाय नमः कालमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ चित्रावसोस्वस्तितेपारमशीय।। शु०य० ०३/१८।।[२९१]

---

[२८७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
चतुर्मुखं चतुर्बाहुं सृष्टे रुत्पत्तिकारकम्। सावित्री स्वामिनं देवं ब्रह्माणं प्रणमाम्यहम्।। या०र०पृ. ५०।।

[२८८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
स्वर्गाधिपं शचीनाथं देवानां प्रभुमीश्वरम्। त्रैलोक्याधिपतिं वन्दे देवेन्द्रं लोकपालकम्।। या०र०पृ. ५०।।

[२८९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
धर्माधर्मविवेक्तारं पुण्यपापफलप्रदम्। सर्वलोक नियन्तारं वन्दे वैवस्वतं यमम्।। या०र०पृ. ५०।।

[२९०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कालं कलयतां नाथं सर्वकाल स्वरूपिणम्। अद्भुतं भगवद्रूपं नमाम्यहमगोचरम्।। या०र०पृ. ५१।।

[२९१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
द्रष्टारं सर्वलोकानां सदसत्कर्मणां सदा। मन्त्रिणं यमराज्यस्य चित्रगुप्तं नमाम्यहम्।। या०र०पृ. ५१।।

ॐ भूर्भुवः स्वः भो चित्रगुप्त इहागच्छ इहतिष्ठ। केतुदक्षिणपार्श्वे ॐ चित्रगुप्ताय नमः चित्रगुप्तमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

## ०९/०४. अथ प्रत्यधिदेवतावाहनम्।

ॐ अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्रुवे।
देवाँ २ आसादयादिह।। शु०य० २२/१७।।[२९२]

ॐ भूर्भुवः स्वः भो अग्ने इहागच्छ इहतिष्ठ। सूर्यवामपार्श्वे ॐ अग्नये नमः अग्निमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ आपोहिष्ठा मयो भुवस्तानऽउर्ज्जे दधातन।
महे रणाय चक्षसे ।। शु०य० ११/५०।।[२९३]

ॐ भूर्भुवः स्वः भो आप इहागच्छ इहतिष्ठ। सोमवामपार्श्वे ॐ अद्भ्यो नमः  अपः आवाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।
यच्छा नः शर्म स प्रथाः।। शु०य० ३६/१३।।[२९४]

ॐ भूर्भुवः स्वः भो पृथिवि इहागच्छ इहतिष्ठ। भौमवामपार्श्वे  ॐ पृथिव्यै नमः पृथिवीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्।
समूढमस्य पां सुरेस्वाहा।। शु०य० ०५/१५।।[२९५]

ॐ भूर्भुवः स्वः भो विष्णो इहागच्छ इहतिष्ठ। बुधवामपार्श्वे ॐ विष्णवे नमः विष्णुमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
ह्वयामिशक्रम्पुरुहूतमिन्द्रं स्वस्तिनो मघवाधात्विन्द्रः।। शु०य० २०/५०।।[२९६]

---

[२९२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
चतुःशृङ्गं त्रिपादं च द्विशीर्षं सप्तहस्तकम्। वरुण–अरणिसञ्जातं वन्देऽग्निं मेषवाहनम्।।या०र०पृ. ५१।।

[२९३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वेषां जीवनोपाया यादसां पतयस्तथा। पावनाः सर्वलोकानां शुद्धापः प्रणमाम्यहम्।। या०र०पृ. ५१।।

[२९४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वराहेणोद्यतां देवीं सर्व संधारणक्षमाम्। पृथुना संस्कृतां सौम्यां धरां वन्दे वसुप्रदाम्।। या०र०पृ. ५१।।

[२९५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वत्र व्यापकं देवं प्रभुं लोकनमस्कृतम्। सर्वकल्याणकर्तारं वन्दे नारायणं विभुम्।। या०र०पृ. ५१।।

ॐ भूर्भुवः स्वः भो इन्द्र इहागच्छ इहतिष्ठ। गुरुवामपार्श्वे ॐ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः।
पूषासिघर्मायदीष्व।। शु०य० ३८/०३।।[२९७]

ॐ भूर्भुवः स्वः भो इन्द्राणि इहागच्छ इहतिष्ठ। शुक्रवामपार्श्वे ॐ इन्द्राण्यै नमः इन्द्राणीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ प्रजापतेनत्व देतान्यन्योविश्वरूपाणि परिता बभूव।
यत्कामस्ते जुहुमस्तन्नोऽअस्तु वयं स्यामपतयो रयीणाम्।। शु०य० २३/६५।।[२९८]

ॐ भूर्भुवः स्वः भो प्रजापते इहागच्छ इहतिष्ठ। शनिवामपार्श्वे ॐ प्रजापतये नमः प्रजापतिमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ नमोस्तु सर्पेभ्यो येके च पृथिवी मनु।
येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्यो नमः।। शु०य० १३/०६।।[२९९]

ॐ भूर्भुवः स्वः भो सर्पाः इहागच्छ इहतिष्ठ। राहुवामपार्श्वे ॐ सर्पेभ्यो नमः सर्पानावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।
सबुद्ध्याऽउपमाऽअस्यविष्ठाः सतश्च योनिमसतश्चविवः।। शु०य० १३/०३।।[३००]

ॐ भूर्भुवः स्वः भो ब्रह्मन् इहागच्छ इहतिष्ठ। केतोवामपार्श्वे ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

### ०९/०५. अथ पञ्चलोकपालदेवतावाहनम्।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं हवामहे
निधीनान्त्वा निधिपतिं हवामहे व्वसोमम्।

---

[२९६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कश्यपादितिसम्भूतं सहस्राक्षं पुरन्दरम्। जयन्तपितरं वन्दे देवेन्द्रं शतयाजिनम्।। या०र०पृ. ५१।।

[२९७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
इन्द्रपत्नीं सतीं देवीं सद्गुणालङ्कृतां सदा। देवांगनार्चिता शुद्धां इन्द्राणीं प्रणमाम्यहम्।। या०र०पृ. ५१।।

[२९८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रजापतिर्गणानां यो ह्यधिष्ठाता निरन्तरम्। वन्दे प्रजापतिं तं तु प्रजानां प्रतिमद्भुतम्।। या०र०पृ. ५१।।

[२९९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
महाफणाधरान् नित्यं पातालतलवासिनः। सर्वलोकहितार्थाय सर्पान् वन्दे शिवाय नः।। या०र०पृ. ५२।।

[३००] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विष्णोर्वरप्रदानेन तपः कर्तारमद्भुताम्। कर्म कर्तुं जगत् सृष्टेः ब्रह्माणं तं नमाम्यहम्।। या०र०पृ. ५२।।

आहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भधम्।। शु०य० २३/१९।।[३०१]

ॐ भूर्भुवः स्वः भो गणपत इहागच्छ इहतिष्ठ। राहोरुत्तरतः ॐ गणपतये नमः गणपतिमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन।
ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्।। शु०य० २३/१८।।[३०२]

ॐ भूर्भुवः स्वः भो दुर्गे इहागच्छ इहतिष्ठ। शनेरुत्तरतः ॐ दुर्गायै नमः दुर्गामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ वायोयेतेसहस्त्रिणो रथासस्तेभिरा गहि।
नियुत्वान्त्सोमपीतये।। शु०य० २७/३२।।[३०३]

ॐ भूर्भुवः स्वः भो वायो इहागच्छ इहतिष्ठ। रवेरुत्तरतः ॐ वायवे नमः वायुमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ घृतङ्घृतपावानः पिबतवसांव्वसापावानः
पिबतान्तरिक्षस्यहविरसिस्वाहा।
दिशः प्रदिशऽआदिशोव्विदिशऽउद्दिशो दिग्भ्यः स्वाहाः।। शु०य० ०६/१९।।[३०४]

ॐ भूर्भुवः स्वः भो आकाश इहागच्छ इहतिष्ठ। राहोर्दक्षिणे ॐ आकाशाय नमः आकाशमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ यावाङ्कशामधुमत्यश्विनासूनृतावती।
तयायज्ञम्मिमिक्षताम्।। शु०य० ०७/११।।[३०५]

ॐ भूर्भुवः स्वः भो अश्विनौ इहागच्छ इहतिष्ठ। केतोर्दक्षिणे ॐ अश्विभ्यां नमः अश्विनावावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

## ०९/०६. अथ क्षेत्रपालावाहनम्।

---

[३०१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पार्वतीशिव सत्पुत्रं गणानां पतिमीश्वरम्। सर्वेषां विघ्नहर्तारं गणेशं तं नमाम्यहम्।। या०र०पृ. ५२।।

[३०२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जगत्कल्याण सकर्त्री दुष्टदैत्यविनाशिनीम्। सर्वेषां मातरं नित्यं दुर्गां देवीं नमाम्यहम्।। या०र०पृ. ५२।।

[३०३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अनेकरूपभेदेन प्राणिनां जीवनं परम्। सर्वत्र सञ्चरन्तं तं वायुं वन्देह्यरूपकम्।। या०र०पृ. ५२।।

[३०४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नीरूपं निर्विकारं च सर्वत्र व्यापकं सदा। ब्रह्मस्वरूपंमॉ आसेयं आकाशं प्रणमाम्यहम्।। या०र०पृ. ५२।।

[३०५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अश्विन्यश्च स्वरूपोक्त संज्ञा सूर्यसुतौ परौ। देवानां भिषजौ वन्दे ह्यश्विनौ युग्मरूपकौ।। या०र०पृ. ५२।।

ॐ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः।
एमेनमवृधन्नमृताऽअमर्त्यं वैश्वानरऽक्षैत्रजित्याय देवा:।। शु०य० ३३/६०।।[३०६]

ॐ भूर्भुवः स्वः भो क्षेत्राधिपत इहागच्छ इहतिष्ठ। गरोरुत्तरे ॐ क्षेत्राधिपतये नमः क्षेत्राधिपतिमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

## ०९/०७. अथ वास्तुदेवातावाहनम्।

ॐ वास्तोष्पते प्रतिजानी ह्यस्मान्त्स्वावेशोऽअनमीवो भवानः।
यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।। ।।[३०७]

ॐ भूर्भुवः स्वः भो वास्तोष्पत इहागच्छ इहतिष्ठ। क्षेत्राधिपोत्तरे ॐ वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

## ०९/०८. अथेन्द्रादिदिक्पालावाहनम्।

मण्डलाद्बहिः प्रागादितः पीठस्य समन्तादिन्द्रादिदशदिक्पालानावाहयेत्।

ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवेसुहवं शूरमिन्द्रम्।
ह्वयामि शक्रम्पुरुहूतमिन्द्रं स्वस्तिनोमघवाधात्विन्द्रः।। शु०य० २०/५०।।[३०८]

ॐ भूर्भुवः स्वः इन्द्राय नमः भो इन्द्र इहागच्छ इहतिष्ठ। मण्डलाद्बहिः पूर्वे ॐ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य।
त्रातातोकस्यतनयेगवामस्यनिमेषं रक्षमाणस्तवव्रते।। शु०य० ३४/१३।।[३०९]

ॐ भूर्भुवः स्वः भो अग्ने इहागच्छ इहतिष्ठ। मण्डलाद्बहिः आग्नेयाम् ॐ अग्नये नमः अग्निमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

---

[३०६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
क्षेत्रपालं गणाधीशं चत्वाराधिष्ठितं सदा। पूजा सौख्यप्रदं नित्यं क्षेत्रपालं नमाम्यहम्।। या०र०पृ. ५२।।

[३०७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गृहेशं शिवकर्तारं गृहे स्थित्वा निरंतरम्। धनधान्यप्रदातारं वन्दे वास्तोष्पतिं मुदा।। या०र०पृ. ५३।।

[३०८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वज्रायुध देवदेवं पूर्वदिक्पालकं सदा। अनेकयज्ञकर्तारमिन्द्रं वन्दे सुरेश्वरम्।। या०र०पृ. ५३।।

[३०९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आग्नेयदिक्प्रभुं दीप्तं शक्तिप्रहरणं परम्। ज्वालाव्याप्त तनुं वन्दे ह्यग्निं लोक शुभं करम्।। या०र०पृ. ५३।।

ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा।

स्वाहा घर्म्मायस्वाहाघर्म्मः पित्रे।। शु०य० ३८/०९।।[३१०]

ॐ भूर्भुवः स्वः भो यम इहागच्छ इहतिष्ठ। मण्डलाद्बहिः दक्षिणे ॐ यमाय नमः यममावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य।

अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु।। शु०य० १२/६२।।[३११]

ॐ भूर्भुवः स्वः भो निर्ऋत इहागच्छ इहतिष्ठ। मण्डलाद्बहिः नैर्ऋत्याम् ॐ निर्ऋतये नमः निर्ऋतीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्ते यजमानोहविर्ब्भिः।

अहेडमानोव्वरुणेहबोद्ध्युरुशं समानऽआयुः प्रमोषीः।। शु०य० १८/४९।।[३१२]

ॐ भूर्भुवः स्वः भो वरुण इहागच्छ इहतिष्ठ। मण्डलाद्बहिः पश्चिमे ॐ वरुणाय नमः वरुणमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ आनोनियुद्भिः शतिनीभिरद्ध्वर गुं सहस्त्रिणीभिरुपयाहि यज्ञम्।

व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभीः सदा नः।। शु०य० २७/२८।।[३१३]

ॐ भूर्भुवः स्वः भो वायो इहागच्छ इहतिष्ठ। मण्डलाद्बहिः वायव्याम् ॐ वायवे नमः वायुमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ व्वयं सोमव्रतेतवमनस्तनूषुबिभ्रतः।

प्रजावन्तः सचेमहि।। शु०य० ०३/५६।।[३१४]

ॐ भूर्भुवः स्वः भो सोम इहागच्छ इहतिष्ठ। मण्डलाद्बहिः उत्तरे ॐ सोमाय नमः सोममावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहे व्वयम्।

---

[३१०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

सर्वप्राणि नियन्तारं याम्य दिक्पतिमीश्वरम्। महादण्डधरं देवं यमं तं प्रणमाम्यहम्।। या०र०पृ. ५३।।

[३११] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

राक्षसाधिपतिं शूरं नेऋत्याधीशमीश्वरम्। खड्गप्रहरणं वन्दे निर्ऋतिं लोकरक्षणम्।। या०र०पृ. ५३।।

[३१२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

पाशायुधधरं देवं प्रतीची दिक्प्रपालकम्। सर्वेषां जीवनं वन्दे वरुणं यादसां पतिम्।। या०र०पृ. ५३।।

[३१३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

इन्द्रकृतानेकरूपं दितिसम्भूतमद्भुतम्। वायव्यदिक्प्रभुं वन्दे वायुमङ्कुशधारिणम्।। या०र०पृ. ५३।।

[३१४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

यक्षराजं धनाध्यक्षंमुदीची दिक्पतिं प्रभुम्। लोकपालमहं वन्दे कुबेरं सुगदाधरम्।। या०र०पृ. ५३।।

पूषानो यथा वेदसामसद्द्वृधे रक्षितापायुरदब्धः स्वस्तये।। शु०य० २५/१८।।[३१५]

ॐ भूर्भुवः स्वः भो ईशान इहागच्छ इहतिष्ठ। मण्डलाद्बहिः ऐशान्याम् ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ अस्मेरुद्रा मेहनापर्व्वतासो वृत्र हत्ये भरहूतौ सजोषाः।
य: शं सतेस्तुवतेधायिपज्रऽइन्द्रज्ज्येष्ठाऽअस्माँ२ऽअवन्तु देवाः।। शु०य० ३३/५०।।[३१६]

ॐ भूर्भुवः स्वः भो ब्रह्मन् इहागच्छ इहतिष्ठ। मण्डलाद्बहिः ईशानेन्द्रयोर्मध्ये ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी।
यच्छानः शर्म्मसप्रथा।। शु०य० ३६/१३।।[३१७]

ॐ भूर्भुवः स्वः भो अनन्त इहागच्छ इहतिष्ठ। मण्डलाद्बहिः निर्ऋतिवरुणयोर्मध्ये ॐ भूर्भुवः स्वः अनन्ताय नमः अनन्तमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

### ०९/०९. अथैशानकलशे रुद्रावाहनम्।

ॐ असंख्याता सहस्राणि ये रुद्राऽअधि भूम्याम्।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि।। शु०य० १६/५४।।[३१८]

ॐ भूभुवः स्वः भो रुद्र इहागच्छ इहतिष्ठ। ग्रहमण्डले ग्रहवेदीशान दिग्भागे अष्टदलोपरि वा रुद्रमूर्ति सहितं रुद्रकलशे ॐ रुद्राय नमः रुद्रामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत् पूगीफलं वा मण्डले निधाय।

### ०९/१०. अथ प्रतिष्ठापनम्।

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टंयज्ञं समिमन्दधातु।

---

[३१५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ऐशान्यधिपतिं देवं सर्वदेव सुसेवितम्। सर्वेश्वरेश्वरं वन्दे शूलधारिणमीश्वरम्।। या०र०पृ. ५४।।

[३१६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ऊर्ध्व दिक्पालं नित्यं लोकसृष्टिविधायकम्। पितामहं प्रभुं देवं ब्रह्माणं प्रणमाम्यहम्।। या०र०पृ. ५४।।

[३१७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वकल्याण कर्तारं फणामण्डलमण्डितम्। अधो दिक्पालकं दिव्यं ह्यनन्तं प्रणमाम्यहम्।। या०र०पृ. ५४।।

[३१८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः।। या०र०पृ. ५०।।

विश्वेदेवा सऽ इह मादयन्तामोइँम्प्रतिष्ठ।। शु०य० ०२/१३।।[३१९]

सूर्याद्यावाहित ग्रहमण्डलदेवता: सरुद्रा: सुप्रतिष्ठिता: वरदा भवत। इत्यक्षतान् क्षिपेत्। रुद्रजपं कुर्यात्।

## ०९/ ११. अथाऽग्न्युत्तारणम्

ग्रहमूर्तिं रुद्रस्वरुपं च ताम्रपात्रे स्थापयेत्। हस्ते जलमादाय। आसाम् अमुकामुकमूर्तीनाम् अग्नितपनताडनावघातादिदोषपरिहारार्थं अग्न्युत्तारणपूर्वक प्राणप्रतिष्ठां करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत् । ततो मूर्तीर्घृतेनाऽभ्यज्य पात्रे निधाय तदुपरि दुग्धमिश्रितजलधारां पातयेत्।

ॐ समुद्रस्यत्वावकयाग्ने परिव्ययामसि।
पावकोऽअस्मभ्यं शिवो भव।।१।। शु०य० १७/०४।।[३२०]
ॐ हिमस्यत्वा जरायुणाग्ने परिव्ययामसि।
पावकोऽअस्मभ्यं शिवो भव।।२।। शु०य० १७/०५।।
ॐ उपज्मन्नुप वेतसेऽवतर नदीष्वा।
अग्ने पित्तमपामसि मण्डूकिताभिरागहि सेमं नो
यज्ञं पावावर्णं शिवं कृधि।।३।। शु०य० १७/०६।।
ॐ अपामिदं न्ययनं समुद्रस्य निवेशनम्।
अन्याँस्तेऽअस्मत्तपन्तु हेतय: पवाकोऽअस्मभ्यं शिवो भव।।४।। शु०य० १७/०७।।
ॐ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया।
आदेवान्वक्षि यक्षि च।।५।। शु०य० १७/०८।।
ॐ स न: पावक दीदिवोग्ने देवाँ२।। ऽइहावह।।
उपयज्ञं हविश्च न:।।६।। शु०य० १७/०९।।
ॐ पावकया यश्चितयन्त्या कृपा क्षामनृरुचऽउषसो न भानुना।।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणेन ततृषाणोऽअजर:।।७।। शु०य० १७/१०।।
ॐ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिर्षे।
अन्याँस्तेऽअस्मत्तपन्तु हेतय: पावको अस्मभ्यं शिवो भव।।८।। शु०य० १७/११।।
ॐ नृषदे वेडप्सुषदेवेड्बर्हिषदे वेड्वनसदे वेट्स्वर्विदेवेट्।।९।। शु०य० १७/१२।।
ॐ ये देवा देवानां यज्ञिया यज्ञियानां संवत्सरीणमुप भागमासते।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य।।१०।। शु०य० १७/१३।।
ॐ ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मण: पुरऽएतारोऽअस्य।।

---

[३१९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मित्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यत्र मण्डले दैवतै सह।। या०र०पृ. ०७।।

[३२०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अग्निर्वैश्वानरो वह्नि वितीहोत्रो धनञ्जय:। अग्न्युत्तारणार्थाय मूर्तिनां शुद्धिहेतवे।। सु०वि०पृ. ८०।।
इति मन्त्रं त्रिवारं जपेत्।

येभ्यो नऽऋते पवते धाम किञ्चन न ते
दिवो न पृथिव्या अधि स्नुषु।।११।। शु०य० १७/१४।।
ॐ प्राणदाऽअपानदा व्यानदावर्च्चोदा वरिवोदा:।
अन्याँस्तेऽअस्मत्तपन्तु हेतय: पावकोऽअस्मभ्यं शिवो भव।।१२।। शु०य० १७/१५।।
इत्यग्न्युत्तारणम्।

## ०९/१२. अथ प्राणप्रतिष्ठा।

हस्ते जलमादाय। अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषय:। ऋग्यजु: सामानि छन्दांसि। परा प्राणशक्तिर्देवता। आं बीजं। ह्रीं शक्ति:। क्रों कीलकम्। आसु नवग्रह–रुद्र मूर्तिषु प्राणप्रतिष्ठापने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

वाम हस्तं हृदये धृत्वा दक्षिण हस्तम् मूर्तिषु आच्छादयेत्।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं स: ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां प्राणा इह प्राणा:। इत्युक्त्वा अक्षतान् क्षिपेत्। पुन:

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं स: ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां जीवा इह स्थिता:। इत्युक्त्वा अक्षतान् क्षिपेत् । पुन:

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं स: ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षु: श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठतु स्वाहा। इत्युक्त्वा अक्षतान् क्षिपेत् ।

तत: प्रतिष्ठादिकं कुर्यात्। हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमन्दधातु।
विश्वेदेवासऽइहमादयन्तामो३प्रतिष्ठ।। शु०य० ०२/१३।।[321]
ॐ एषवै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति।। ।।
ॐ भूर्भुव: स्व: नवग्रहमण्डल समन्वित महारुद्र देवता: सुप्रतिष्ठिता वरदा भवत। इत्यक्षतान् क्षिपेत्।

## ०९/१३. अथ नेत्रोन्मीलनम्।

ॐ वृत्रस्यासिकनीनकश्चक्षुर्द्दाऽअसि चक्षुर्मे देहि।। शु०य० ०४/०३।।[322]

---

[321] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मित्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यत्र मण्डले दैवतै सह।। या०र०पृ. ०७।।
[322] गर्भाधानमतश्च पुंसवनकं सीमंतजाताभिधे नामाख्यं सहनिष्क्रमेण च तथान्नप्राशनं कर्म च।

गन्धादिपञ्चोपचारान्दत्वा षोडशसंस्कारसिद्धये षोडशप्रणवावृत्ती: कृत्वा।

हस्ते जलमादाय। आसाम् महारुद्रसहितनवग्रहमूर्तीनां षोडशसंस्कारा: सम्पद्यन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। प्रार्थयेत्।

रक्ताम्भोधिस्थ पोतोल्लसदरुण सरोजाधिरुढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान्।
बिभ्राणासृक्कपालं त्रिनयन लसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्ति: परा न:।। ८०।। सु०वि०पृ. ८१।।

**।। इति प्राणप्रतिष्ठा।।**

## ०९/ १४. अथ सरुद्रनवग्रहमण्डलदेवतापूजनम्।

**ध्यानम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ ग्रहाऽउर्ज्जा हुतयो व्यन्तो व्विप्राय मतिम्।
तेषां विशिप्रियाणां वोह मिषमूर्जं समग्रभमुपयाम
ग्रहीतोसीन्द्रायत्वा जुष्टं गृह्णाम्मेषते योनि रिन्द्रायत्वा जुष्टतमम्।। शु०य० ०९/०४।।[323]
ॐ नम:शम्भवाय च मयोभवाय च नम: शङ्कराय च
मयस्कराय च नम: शिवाय च शिवतराय च।। शु०य० १६/४१।।[324]

ॐ भूर्भुव: स्व: सरुद्रनवग्रहमण्डलदेवताभ्यो नम: ध्यायामि । ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

**आवाहनम् ।**

हस्ते अक्षतान् गृहीत्वा।

---

चूडाख्यं व्रतबंधकोप्यथचतुर्वेदव्रतानांपुर: केशांत: सविसर्गक: परिणय: स्यात्षोडशीकर्मणाम्।। स्मृत्यन्तरे।। सं०भा०पृ. २अ।।

[323] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च। ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्।।

[324] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते। पुराणोक्त मन्त्रा: व्रतोद्यापनचन्द्रिकाया: गृह्यन्ते।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनै:।। या०र०पृ. ५०।।

ॐ नमस्ते रुद्र मन्यवऽउतो त इषवे नमः।
बाहुभ्यामुत ते नमः।। शु०य० १६/०१।।[३२५]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः आवाहयामि । आवाहनार्थे अक्षतान् समर्पयामि। इत्युक्त्वा अक्षतान् समर्पयेत्।

**आसनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि।। शु०य० १६/०२।।[३२६]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः आसनं समर्पयामि। आसनार्थे अक्षतान् समर्पयामि । इत्युक्त्वा अक्षतान् समर्पयेत्। स्नानपात्रे देवस्य मूर्तिं स्थापयेत्।

**पाद्यम्।**

हस्ते जलमादाय।

ॐ जामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरत्रतां कुरु मा हिं सीः पुरुषं जगत्।। शु०य० १६/०३।।[३२७]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः पादयोः पाद्यं समर्पयामि । इत्युक्त्वा जलम् देवपादोपरि समर्पयेत्।

**अर्घ्यम्।**

---

[३२५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गन्धर्वकिन्नरमहर्षिसुरेन्द्रवृन्दैः संसेव्यमानमनिशं वृषभावरुढम्।
आवाहयामि गिरिजासहितं प्रसन्नं भक्त्या सुखागतमहं शिरसा नमामि।। शा०र०पृ. ८२।।

[३२६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सिंहासनं कनकरत्नमणिप्रभास्वत्छत्रध्वजालसितचामरतोरणाढ्यम्।
बालार्ककोटि सदृशं कनकाम्बराढ्यं श्रीविश्वनाथ मनसैव मयाऽर्पितं ते।। शा०र०पृ. ८२।।

[३२७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दूर्वाङ्कुराम्बुजमनोहरपुष्पयुक्तं शुद्धं जलं सुरभिचूर्ण समन्वितं च।
सौवर्णपात्रविलसत्पदयोर्विशुद्धं पाद्यं गृहाण जगदीश मयाऽर्पितं ते।। शा०र०पृ. ८३।।

अर्घ्यपात्रे गन्धाक्षतपुष्प सहित जलं गृहीत्वा।

ॐ शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मं सुमनाऽअसत्।। शु०य० १६/०४।।[३२८]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः हस्तयोः अर्घ्यं समर्पयामि । इत्युक्त्वा जलं देवस्य दक्षिण हस्ते समर्पयेत्।

**आचमनम्।**

हस्ते जलमादाय।

ॐ अध्यवोचदधिवक्ता प्रथमा दैव्यो भिषक्।
अहिंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव।। शु०य० १६/०५।।[३२९]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः मुखे आचमनीयं जलं समर्पयामि । इत्युक्त्वा आचमनीयं जलं देवस्य मुखे समर्पयेत्।

**स्नानम्।**

हस्ते तीर्थोदकमादाय।

ॐ असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः।
ये चैनं रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोऽवैषांहेडऽईमहे।। शु०य० १६/०६।।[३३०]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः तीर्थोदक स्नानं समर्पयामि । इत्युक्त्वा तीर्थोदकं समर्पयेत्।

**पयः।**

---

[३२८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दूर्वायवाक्षतसुगन्धि हिरण्यरत्नं दर्भाम्बुजं त्रिपथगाजलपुष्पयुक्तम्।
सौवर्णपात्ररचितंफलयुक्तमर्घ्यं त्वं स्वीकुरुष्व मनसार्पितमिन्दुमौले।। शा०र०पृ. ८३।।

[३२९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गङ्गाजलैरमृतमाधुरतामुपन्नैरेलालविंगशुभगन्धमनोभिरामम्।
गौरीपते कनकपात्रधृतंमया ते भक्त्यार्पितं सुचिरमाचमनं गृहाण।। शा०र०पृ. ८३।।

[३३०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दिव्यद्रुमेन्धनसमिद्धहुताशनाप्तैः शुद्धोदकैः सुविमलैश्च समुद्रजैश्च।
गौरिपते परिगृहाण यथासुखेन स्नानं मयैव विधिना विधिवत्प्रदिष्टम्।। शा०र०पृ. ८३।।

पञ्चामृतं दुग्धं वा गृहीत्वा।

ॐ आप्यायस्व समेतु ते विश्वतः वृष्ण्यम्।
भवावाजस्यसङ्गथे।। शु०य० १२/११२।।[३३१]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः पयः स्नानं समर्पयामि । इत्युक्त्वा पञ्चामृतं दुग्धं वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। पयः स्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

**दधिस्नानम्।**

पञ्चामृतं दधि वा गृहीत्वा।

ॐ धानाः करम्भः सक्तवः परीव्वापः पयो दधि।
सोमस्य रूपं हविष आमिक्षा वाजिनम्मधु।। शु०य० १९/२१।।[३३२]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः दधिस्नानं समर्पयामि । इत्युक्त्वा पञ्चामृतं दधि वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदक स्नानान्ते आचमनीयं जलं समर्पयामि।।

**घृतस्नानम्।**

पञ्चामृतं घृतं वा गृहीत्वा।

ॐ आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधुचारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा।। शु०य० ३५/१७।।[३३३]

---

[३३१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दिव्योषधिद्रवभवं नवनीतपूर्णं क्षीराब्धि सम्भृत सुधाधिकधामधारम्।
स्वर्धेनु सम्भवमपूर्वसुमिष्टमेतत् स्नानाय शुद्धमुररीकुरु देव दुग्धम्।। शा०र०पृ. ८३।।

[३३२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कर्पूरकुन्दकुमुदेन्दुकरावदान्तं मल्लिप्रफुल्ल कुसुमाकर कान्तिकान्तम्।
स्नानाय शुद्धरसराज सुकोमलार्चिः स्निग्धं शुभं दधि दयानिधयेऽर्पयामि।। शा०र०पृ. ८४।।

[३३३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
तेजोमयेन तपनद्युति पावितेन गव्येन भव्यविधिना परमन्त्रितेन।
वह्नौ श्रुतेन रचयामि रसावृतेन भौमामृतेन च घृतेन तवाभिषेकम्।। शा०र०पृ. ८४।।

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः घृतस्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं घृतं वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। घृतस्नानान्ते शुद्धोदक स्नानं समर्पयामि। शुद्धोदक स्नानान्ते आचमनीयं जलं समर्पयामि।

**मधुस्नानम्।**

पञ्चामृतं मधु वा गृहीत्वा।

ॐ तनूनपादसुरो विश्ववेदा देवो देवेषु देवः।
पथो अनवतु मध्वा घृतेन।। शु०य० २७/१२।।[३३४]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः मधुस्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं मधु वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**शर्करास्नानम्।**

पञ्चामृतं शर्करां वा गृहीत्वा।

ॐ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया।
इन्द्राय पातवे सुतः।। शु०य० २६/२५।।[३३५]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः शर्करास्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं शर्करां वा देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**पञ्चामृतस्नानम्।**

मीलित पञ्चामृतं गृहीत्वा।

ॐ उर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे

---

[३३४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नानाविधौषधिलतारस सम्भृतान्तं माधुर्यमिष्टममृतप्रतिमं गुणेन।
माणिक्यपात्र समपूरित भक्तिपूर्णमङ्गिकुरुष्व मधु देव महेश शम्भो।। शा०र०पृ. ८४।।

[३३५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पूर्णेक्षुसागरसमुद्भव याति निम्ना मुक्ताफलद्रव सुधाधिकया महिम्ना।
सर्वाङ्गशोधनविधौ वरया त्रिनेत्र सुस्नाहि सिद्धवरशर्करया महेश।। शा०र०पृ. ८४।।

मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे
जैत्रं च मऽऔद्भिद्यं च मे यज्ञेन कल्पन्ताम्।। शु०य० १८/०९।।[३३६]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः पञ्चामृतस्नानं समर्पयामि। इत्युक्त्वा पञ्चामृतं समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदक–स्नानान्ते आचमनीयं जलं समर्पयामि।

**गन्धोदकस्नानम्।**

चन्दनमिश्रितं जलं गृहीत्वा।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पति वेदनम्।
उर्वारुकमिवबन्धनादितो मुक्षीय मामुतः।। शु०य० ०३/६०।।[३३७]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः गन्धोदकस्नानं समर्पयामि । इत्युक्त्वा चन्दन मिश्रितं जलं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

**उद्वर्तनस्नानम्।**

सुगन्धितैलमिश्रितं जलं गृहीत्वा।

ॐ देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय।।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु
वाचस्पतिर्वाचं नः स्वदतु।। शु०य० ०९/०१।।[३३८]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः उद्वर्तनस्नानं समर्पयामि । इत्युक्त्वा सुगन्धितैलमिश्रितं जलं देवस्योपरि समर्पयेत्। तत् पश्चात् द्विवारं जलं समर्पयेत्। उद्वर्तनस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि देवाय समर्पयेत्। नमस्कारं कुर्यात्।

---

[३३६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पयो दधि घृतं चैव मधु च शर्करायुतम्। पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम्।। ब्र०स०पृ. ४०।।

[३३७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कङ्कोलकुङ्मलदलैललवङ्गमिश्रं जातिफलामलसुगन्धि समन्वितं च।
कर्पूरकेसरसुगन्धिभिरिन्दुमौले स्नानाय शुद्धतरगन्धमिदं गृहाण।। शा०र०पृ. ८४।।

[३३८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जातीजपाकनकपङ्कजमोगराद्यैरन्यैश्च कालभव पुष्पसमन्वितैश्च।
भक्त्या मया सुमनसैव सुवासितं च गौरीपते सुरभितैलमिदं गृहाण।। शा०र०पृ. ८४।।

ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च।
ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्।। ८१।। कर्म०पृ. २२४।।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्।
जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः।। ८२।। या०र०पृ. ५०।।

हस्ते जलमादाय। अनेन यथाशक्तिपञ्चामृतपूर्वाराधनकृतेन सरुद्रनवग्रहमण्डलदेवताः प्रीयन्तां न मम। इत्युक्त्वा जल पात्रे जलं क्षिपेत्। निर्माल्यं आघ्राय उत्तरे विसृज्य। हस्तं प्रक्षाल्य। पुनः गन्धाक्षतपुष्पाणि समर्पयेत्।

**अभिषेकस्नानम्।**

धारापात्रं गन्धादिभिः सम्पूज्य नवग्रहोपरि संतत जलधारां पयोधारां वा कुर्वन् अभिषेकमारभेत्।
पुरुषसूक्तम्[३३९] पठीत्वा नवग्रहस्योपरि अभिषेकः करणीयः।
रुद्रसूक्तम्[३४०] पठीत्वा रुद्रस्योपरि अभिषेकः करणीयः।

ॐ शान्तिः शान्तिः शन्तिः। सर्वारिष्टसुशान्तिर्भवतु। ॐ अमृताभिषेकोऽस्तु। ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः अभिषेकस्नानं समर्पयामि। इत्युक्त्वा अभिषेकस्नानं सम्पन्नमिति ब्राह्मणा वदेयुः।

**ततः शुद्धोदकस्नानम्।**

शुद्धजलेन स्नपयेत्।

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/६१।।[३४१]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः शुद्धोदकस्नानं समर्पयामि। इत्युक्त्वा देवस्य मूर्तीं शुद्धजलेन स्नपयेत्। शुद्धवस्त्रेण प्रमृज्य देवं पीठोपरि गन्धानुलेपनपूर्वकं पात्रे स्थापयेत्।

---

[३३९] परिशिष्टम्–०४ द्रष्टव्यम्।
अत्र यज्ञोपवीतरहितानां कृते नवग्रहस्तोत्रेण (परिशिष्टम्–०५ अनुसारेण) अभिषेक करणीयः।

[३४०] परिशिष्टम्–०६ द्रष्टव्यम्।
अत्र यज्ञोपवीतरहितानां कृते शिवमहिम्नस्तोत्रेण (परिशिष्टम्–०७ अनुसारेण) अभिषेक करणीयः।

[३४१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्रीजाह्नवीजलमिदं सरसं मयैव ह्येलालविङ्गशुभगन्धमनोऽभिरामम्।
गौरीपते कनकपात्रधृतं पदत्तं स्नानार्थमङ्गी कुरु देव महेश शम्भो।। शा०र०पृ. ८५।।

**वस्त्रम्।**

हस्ते रक्तसूत्रं धौतवस्त्रं वा गृहीत्वा ।

ॐ असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः।। शु०य० १६/०७।।[३४२]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः वस्त्रं समर्पयामि । इत्युक्त्वा देवाय वस्त्रं समर्पयेत्। वस्त्रान्ते आचमनीयं जलं समर्पयेत्।

**यज्ञोपवीतम्।**

हस्ते उपवीतम्  तदभावे अक्षतान् वा गृहीत्वा।

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो येऽअस्य सत्वानोऽहं तेभ्योऽकरं नमः।। शु०य० १६/०८।।[३४३]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः यज्ञोपवीतं समर्पयामि । इत्युक्त्वा देवाय यज्ञोपवीतमलङ्कारं वा तदभावे अक्षतान् समर्पयेत् । यज्ञोपवीतान्ते आचमनीयं जलं समर्पयेत्।

**गन्धम्।**

चन्दनं गृहीत्वा अनामिकया तिलकं कुर्यात्।

ॐ प्रमुञ्च धन्वनस्त्वमुभयोरार्क्त्न्योर्ज्याम्।
याश्च ते हस्तऽइषवः परा ता भगवो वप।। शु०य० १६/०९।।[३४४]

---

[३४२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कौशेयवस्त्रयुगलं कनकैर्विचित्रं बालार्ककोटिसदृशं च मनोभिरामम्।
भक्त्या मयार्पितमिदं परिधाय शम्भो सिंहासने त्वमुपविश्य गृहाण पूजाम्।। शा०र०पृ. ८५।।

[३४३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दत्तंमया सुमनसा वचसा करेण यद्ब्रह्मवर्चसमयं परमं पवित्रम्।
यत्धर्म कर्म निलयं परमायुषं च यज्ञोपवितमुररीकुरु दीनबन्धो।। शा०र०पृ. ८५।।

[३४४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यत्श्रेष्ठमस्ति मलयाचलचन्दनानां कर्पूरकेसरसुगन्धिरसेन घृष्टम्।
आमोदमानमनिशं मनसार्पितं च श्रीचन्दनं परिगृहाण महेश शम्भो।। शा०र०पृ. ८६।।

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः गन्धं समर्पयामि । इत्युक्त्वा देवाय चन्दनेन गन्धं समर्पयेत्।

**अक्षताः।**

हस्ते अक्षतान् गृहीत्वा ।

ॐ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे
खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे
गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्।। शु०य० १८/१२।।[३४५]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः अक्षतान् समर्पयामि । इत्युक्त्वा देवाय अक्षतान् समर्पयेत्।

**पुष्पाणि।**

हस्ते पुष्पाणि गृहीत्वा।

ॐ विज्यं धनुः कपर्दिनो विशल्ल्यो बाणवाँ२ उत।
अनेशन्नस्य याऽइषव आभुरस्य निषङ्गधिः।। शु०य० १६/१०।।[३४६]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः ऋतुकालोद्भव पुष्पाणि समर्पयामि । इत्युक्त्वा देवाय पुष्पाणि समर्पयेत्।

**सौभाग्यद्रव्याणि।**

अबीरादि चूर्णानि गृहीत्वा।

ॐ सिन्धोरिवप्राद्ध्वनेशूघनासोव्वात प्रमियः पतयन्तियह्व्वाः।
घृतस्यधाराऽअरुषो न व्वाजीकाष्ठाभिन्दन्नुर्मिभिः पिन्वमानाः।। शु०य० १७/९५।।[३४७]

---

[३४५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्वेतैरखण्डित मनोहर शालिबीजैः संक्षालितैः शुचिजलैश्च सुगन्धिमिश्रैः।
त्वामर्चयामि भगवन् मनसाक्षतैश्च गौरीपते मयि निधेहि कृपाकटाक्षम्।। शा०र०पृ. ८६।।

[३४६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सेवन्तिका बकुलचम्पकपाटलाब्जैः पुन्नागजाती करवीररसालपुष्पैः।
बिल्वप्रवाल तुलसीदलमालिकाद्यैस्त्वां पुजयामि जगदीश्वर मे प्रसीद।। शा०र०पृ. ८६।।

[३४७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
श्वेताबिरेण सहितं शुभरक्तचूर्णं सिन्दूरचूर्ण विपुलान्वितपीतचूर्णम्।

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः सौभाग्यद्रव्याणि समर्पयामि । इत्युक्त्वा देवस्योपरि अबीरादि चूर्णानि समर्पयेत्।

**धूपः।**

धूपं कृत्वा।

ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज।। शु०य० १६/११।।[३४८]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः धूपमाघ्रापयामि। इत्युक्त्वा देवाय धूपं समर्पयेत् ।

**दीपः।**

दीपं प्रज्वाल्य।

ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो यऽइषुधिस्तवारे अस्मन्नि धेहि तम्।। शु०य० १६/१२।।[३४९]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः दीपं दर्शयामि। इत्युक्त्वा देवाय दीपं दर्शयेत्।

**नैवेद्यम्।**

पीठोपरि मीष्ठान्नं फलं वा पुरतो निधाय नैवेद्यं निवेदयेत्।

ॐ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव।। शु०य० १६/१३।।[३५०]

---

कर्पूरकेसर सुगन्धि सुवासितं च सौभाग्यचूर्णमुररीकुरु दीनबन्धो।। शा०र०पृ. ८७।।

[३४८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कालागरोश्च घृतमिश्रित गुग्गुलस्य धूपो मया विरचितो भवतःपुरस्तात्।
आघ्रायतां शुचिमनोहरगन्धपूर्णं तूर्णं विनाशय महेश्वर मोहजालम्।। शा०र०पृ. ८७।।

[३४९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पूर्णे घृतेन गिरिजेश सुवर्णपात्रे कौसुम्भसूत्रदृढवर्ति विराजमानः।
दीपः पुरस्तव मया रचितो य एष शीघ्रं विनाशयतु मे दुरितान्धकारम्।। शा०र०पृ. ८७।।

[३५०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जिह्वा सुधा कनकपात्र विराजमानं मन्त्रादिकं मधुरशाक फलावलीढम्।
पञ्चामृतप्लुतमनेक विधं रसोघं सङ्कल्पितं त्वमुररीकुरु दीनबन्धो।। शा०र०पृ. ८८।।

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्योपरि ॐ नमःशिवायेति मन्त्रेण जलं सम्प्रोक्ष्य बिल्वपत्रं पुष्पं वा नैवेद्योपरि निधाय अस्त्रेण[३५१] संरक्ष्य धेनुमुद्रया[३५२] अमृतीकृत्य ग्रासमुद्रया[३५३] भोजयेत्।

ॐ प्राणाय स्वाहा ।

ॐ अपानाय स्वाहा ।

ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा ।

ॐ समानाय स्वाहा ।

ॐ ब्रह्मणे नमः ।

नैवेद्य मध्ये पानीय[३५४] समर्पयामि। पुनः भोजयेत्।

ॐ प्राणाय स्वाहा।

ॐ अपानाय स्वाहा।

ॐ व्यानाय स्वाहा।

ॐ उदानाय स्वाहा।

ॐ समानाय स्वाहा।

ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशानं समर्पयामि। हस्त प्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि। आचमनीयं जलं समर्पयामि। इत्युक्त्वा चतुर्वारं जलपात्रे जलं त्यजेत्। करोद्वर्तनार्थे गन्धं समर्पयामि । इत्युक्त्वा देवाय गन्धं समर्पयेत् ।

**मुखवासार्थे ताम्बूलम्।**

ताम्बूलं पूगिफलं लवङ्गम् एलादिचूर्णं च गृहीत्वा।

ॐ नमस्तऽआयुधायानातताय धृष्णवे।

---

३५१ मध्यमाम् अङ्गुष्ठेन फडिति ताडयित्वा नैवेद्यस्य परितो हस्तभ्रमणमिति अस्त्रमुद्रया संरक्ष्य।

३५२ परिवृत्तकरौ पश्चात्तर्जनीमध्यमे युते। कनिष्ठानामिकाङ्गुष्ठं परस्पर युतं कुरु। धेनुमुद्रेयमाख्याता अमृतीकरणं भवेत्।।

३५३ वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

३५४ अत्र ब्रह्मनित्यकर्मसमुच्चयकाराः

एलाशीरलवङ्गादिकर्पूरपरिवासितम्।

प्राशनार्थे कृतं तोयं गृहाण गणनायक ।। इत्यधिकं पठन्ति।। ब्र०स०पृ. ४९।।

उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।। शु०य० १६/१४।।[३५५]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः मुखवासार्थे ताम्बूलं समर्पयमि। इत्युक्त्वा मुखवासद्रव्यं देवाय समर्पयेत्।

**दक्षिणा।**

सुवर्णं व्यावहारिकं वा द्रव्यं गृहीत्वा।

ॐ व्रतेन दीक्षामाप्नोतिदीक्षयाप्नोति दक्षिणाम्।
दक्षिणा श्रद्धा माप्नोति श्रद्धयासत्त्यमाप्यते।। शु०य० १९/३०।।[३५६]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः दक्षिणां समर्पयामि। इत्युक्त्वा सुवर्णं व्यावहारिकं वा द्रव्यं देवाय समर्पयेत्।

**नीराजनम्।**

कर्पूरं प्रज्वाल्य घण्टानादं कुर्वन् परितो भ्रामयेत्।

ॐ मा नो महान्तमुत मा नोऽअर्भकं मा न उक्षन्तमुत मा नऽउक्षितम्।
मा नो वधीः पितरम्मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।। शु०य० १६/१५।।[३५७]

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः नीराजनं दर्शयामि। इत्युक्त्वा नीराजनपात्र भूमौ निधाय। जलेन प्रदक्षिणिं कृत्य पुष्पैः ततश्च दक्षिणहस्तेन नीराजनं देवाय समर्पयेत्। स्वयं च गृहीत्वा। हस्तं प्रक्षाल्य।

**प्रदक्षिणाम्।**

करणाय अञ्जलिं बध्वा पूर्वादि क्रमेण परितो व्यावर्त्य।

---

[३५५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पुगैः सपूर्णखदिरैर्नवजातिपत्रैर्जातिफलादिकलविंग समन्वितैश्च।
ताम्बूलवीटकमिदं मनसा धृतं यत् तत्स्वीकुरु प्रमथनाथ महेश शम्भो।। शा०र०पृ. ८८।।

[३५६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विभावसोर्बिजमिदं हिरण्यं दिव्यं प्रकाशं विधिगर्भसंस्थम्।
गृहाण भूताधिपते महेश मुद्रार्पणं वै मनसार्पितं ते।। शा०र०पृ. ८८।।

[३५७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कर्पूरखण्ड परिकल्पित पञ्चदीपैः आनम्र मौलिमुकुटद्युति संप्रवृद्धिः।
नीराजितं त्रिजगदेकगुरो मया ते पादाम्बुजं दिशतु वाञ्छित कार्यसिद्धिम्।। शा०र०पृ. ८८।।

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँ येषामन्नमिषव:।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा:।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्म:।। शु०य० १६/६६।।[३५८]

ॐ भूर्भुव: स्व: सरुद्रनवग्रहमण्डलदेवताभ्यो नम: प्रदक्षिणां समर्पयामि। इत्युक्त्वा पूवादारभ्य ऐशानपर्यन्तं त्रिर्भ्रमणं कुर्यात्।

**मन्त्रपुष्पाञ्जलि:।**

अञ्जलौ पुष्पाणि गृहीत्वा। उत्थाय।

ॐ मानस्तोके तनये मानऽआयुषि मानो गोषुमानोऽअश्वेषु रीरिष:।
मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्त: सदमित्वा हवामहे।। शु०य० १६/१६।।[३५९]

ॐ भूर्भुव: स्व: सरुद्रनवग्रहमण्डलदेवताभ्यो नम: मन्त्रपुष्पाञ्जलिं समर्पयामि। इत्युक्त्वा पुष्पाणि देवाय समर्पयेत्।

**विशेषार्घ:।**

अर्घपात्रे जलं प्रपूर्य गन्धाक्षतपुष्पसहितं नारिकेलं फलं वा धृत्वा।

ॐ या: फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणी:।
बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वं हस: ।। शु०य० १२/८९।।[३६०]

ॐ भूर्भुव: स्व: सरुद्रनवग्रहमण्डलदेवताभ्यो नम: विशेषार्घं समर्पयामि। इत्युक्त्वा अर्घपात्राज्जलं नारिकेलोपरि प्रक्षिप्य फलं देवाय समर्पयेत्।

---

[३५८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पापानि मे बहुविधानि भयान्वितानि प्राक्कोटि जन्म दुरितानि च यानि यानि।
शम्भो प्रदक्षिण पदेषु पदेषु नाथ शीघ्रं विनाशय विनाशय तानि तानि।। शा०र०पृ. ८८।।

[३५९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
धवलवपुषमिन्दोर्मण्डलेशं महेशं भुजगवलयहारं भस्मदग्धाङ्गमीशम्।
हरिणपरशुपाणिं चारुचन्द्रार्द्धमौलिं हृदयकमल मध्ये संततं चिन्तयामि।। शा०र०पृ. ८९।।

[३६०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नारङ्गरम्भाफलमातुलिङ्ग जम्बीरद्राक्षादिकनारिकेलम्।
कूष्माण्ड दाडिम फलान्वितं च गृहाण भो भूतपते महेश।। शा०र०पृ. ८९।।

**नमस्कारः।**

प्रार्थनां कृत्वा।

ॐ देवं देवं वोऽवसे देवं देवमभिष्टये।
देवं देवं हुवेम वाजसातये गृणन्तो देव्या धिया।। शु०य० ३३/९१।।[३६१]
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।। शु०य० ०३/६०।।

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः प्रार्थनापूर्वक नमस्कारान् समर्पयामि।

हस्ते जलमादाय। अनया पूजया सरुद्रनवग्रहमण्डलदेवाःप्रीयन्तां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**।। इति सरुद्रनवग्रहमण्डलदेवता पूजनम्।।**

**।। कुशकण्डिका।। १०।।**

तत्र वैकल्पिकपदार्थावधारणं देवताभिध्यानञ्च।

आचार्यः अग्नेः पश्चिमत उपविशेत्। यजमानस्तु दक्षिणतोऽग्ने ब्रह्मणःपश्चिमत उपविष्ट एवास्ते। आचार्यः आचम्य प्राणानायम्य सङ्कल्पं कुर्यात्।

**१०/०१. अथ सङ्कल्पः।**

देशकालौ सङ्कीर्त्य। करिष्यमाण कर्मणः साङ्गतासिद्ध्यर्थं ग्रहशान्त्याख्ये कर्मणि वैकल्पिकपदार्थावधारणं देवताभिध्यानं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**१०/०२. अथ वैकल्पिकपदार्थावधारणम्।**

पूर्वेण ब्रह्मणो गमन परेण वा। अग्नेः पश्चिमतः पात्रासादनमुत्तरतो वा। त्रीणी पवित्राणि। पवित्रे द्वे। प्रोक्षणीपात्रम्। आज्यस्थाली चरुस्थाली च तैजसी मृन्मयी वा। पालाश्यः समिधो यज्ञीयवृक्षोद्भवा अन्या वा। प्राञ्चावाघारौ विदिशो वा। समिद्धतमेऽग्नो आज्यभागौ आग्नेयमुत्तरपूर्वार्द्धे सौम्यं दक्षिणपूर्वार्द्धे। पूर्णपात्रं दक्षिणावरो वा। एतान्वैकल्पिकपदार्थानहमस्मिन्कर्मणि करिष्ये।

---

[३६१] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
ब्रह्मामुरास्त्रिपुरान्तकारिः भानुःशशिभूमिसुतोबुधश्च।
गुरुश्चशूक्रः शनिराहुकेतवः सर्वेग्रहा शान्तिकरा भवन्तु।। कर्म०पृ.२२४।।
वागर्थाविवसंपृक्तौ वागर्थ प्रतिपत्तये। जगतः पितरौ वन्दे पार्वती परमेश्वरौ।। रघु० ०१/०१।।

## १०/०३. अथ देवताभिध्यानपूर्वकमन्वाधानम्।

समिद्वयं गृहीत्वा प्रजापतिं इन्द्रं अग्निं सोमम् एकैकयाऽऽज्याहुत्या। आदित्यं सोमं भौमं बुधं बृहस्पतिं शुक्रं शनैश्चरं राहुं केतुम् इति नवग्रहान् मधुसर्पिर्दध्याक्ताभिः अर्कादि यथालाभ समिच्चरुतिलाज्यद्रव्यैः प्रत्येकं प्रतिद्रव्येण अष्टाष्टसङ्ख्याकाभिराहुतिभिः। ईश्वरम् उमां स्कन्दं विष्णुं ब्रह्माणम् इन्द्रं यमं कालं चित्रगुप्तमित्यधिदेवताः अग्निम् अपः धरां विष्णुम् इन्द्रम् इन्द्राणीं प्रजापतिं सर्पान् ब्रह्माणमेताः प्रत्यधिदेवताश्च तैरेव द्रव्यैः प्रतिद्रव्येण चतुश्चतुः सङ्ख्याकाभिराहुतिभिः। विनायकं दुर्गां वायुम् आकाशम् अश्विनाविति पञ्चलोकपालान् क्षेत्राधिपतिं वास्तोस्पतिम् इन्द्रम् अग्निं यमं निरृतिं वरुणं वायुं कुबेरम् ईशानं ब्रह्माणम् अनन्तं तैरेव द्रव्यैः प्रतिद्रव्येण द्वाभ्याम् आहुतिभ्यां न्यूनातिरिक्तदोषपरिहारार्थं घृताक्ततिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैः अष्टोत्तरशतैः अष्टाविंशतिराहुतिभिर्वा शेषेण स्विष्टकृत्। अग्निं वायुं सूर्यम् अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्कान्वरुणम् आदित्यम् अदितिं प्रजापतिम् एता अङ्गप्रधानार्थदेवताः एकैकयाऽऽज्याहुत्या अस्मिन्ग्रहशान्त्याख्ये कर्मण्यहं यक्ष्ये इति समिद्वयम् अग्नावादध्यात्। इति अन्वाधानम्।

## १०/०४. अथ पात्रासादनम्।

अग्नेर्दक्षिणतो ब्रह्मासनास्तरणम्। तत्र पञ्चाशत्कुशमयं यथासम्भवकुशमयं वा ब्रह्माणमुपवेश्य अस्मिन्कर्मणि त्वं ब्रह्मा भव। भवामीति प्रतिवचनम्। तत्र पूर्वेण ब्रह्मणो गमनम्। उत्तरतः प्रणीताप्रणयनम्। ब्रह्मन् अपः प्रणेष्यामि। ॐप्रणय। यंदेवतावर्द्धयत्वं नाकस्यपृष्ठेयजमानोऽस्तु। सप्तऋषीणां सृकृतांयत्रलोकस्तत्रेमंयजमानं च धेहि। ॐप्रणयः। इति ब्रह्मानुज्ञातःअग्नेरुत्तरतः प्रागग्रैः कुशैः आसनत्रयप्रकल्पनम्। तत्र एकम् अग्नेरुत्तरतः। द्वितीयं तदुत्तरतः तृतीयं तत्पश्चिमे (वायव्यामित्यर्थः)। वायव्याश्रितं वारणं चमसं दक्षिणहस्तेनादाय। वामपाणौ प्रागग्रं निधायादक्षिणहस्तौद्धृतपात्रोदकेन आत्माभिमुखं सम्पूर्य। पश्चिमासने निधाय दक्षिणानामिकया जलमालभ्य ब्रह्मणो मुखमवलोकयन्-अग्नेरुत्तरतःप्राक्कल्पिते प्रणीतासने निदध्यात्। ऐशान्यादिपूर्वाग्रैस्त्रिभिर्दर्भैः अग्नेः परिस्तरणम्। तच्च प्रागुदगग्रैः। दक्षिणतः प्रागग्रैः। प्रत्यगुदगग्रैः। उत्तरतः प्रागग्रैः। अग्नेरुत्तरतः पश्चाद्वा प्रयोजनवतां पात्राणां प्राक्संस्थमुदकसंस्थं वा प्रागग्रमुदगग्रं वा आसादनम्। पवित्रछेदना दर्भास्त्रयः। साग्रेऽनन्तगर्भे पवित्रे द्वे। प्रोक्षणीपात्रम्। आज्यस्थाली। चरुस्थाली। सम्मार्गकुशाः पञ्च। उपयमनकुशाः सप्त। समिधस्तिस्रः। स्रुवः। स्रुक्। आज्यम्। त्रिःप्रक्षालितास्तण्डुलाः। पूर्णपात्रम्। दक्षिणा वरो वा यथाशक्ति हिरण्यादिद्रव्यम्। अन्यान्युपकल्पनीयानि अर्कादिसमिधः तिलादिहवनीयद्रव्याणि। इति पत्रासादनम्।

## १०/०५. अथ कुशकण्डिका।

पवित्रे कृत्वा – प्रागग्रयोर्द्वयोः पवित्रयोरुपरि उदगग्राणि त्रीणि पवित्राणि निधाय उपरि प्रादेशमात्रमवशेषयित्वा अधोभागे द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य त्रयाणां मूलग्राणि एकीकृत्य

नखैरस्पृशन् अनामिकाङ्गुष्ठेन द्वयोरग्रे छेदयेत् द्वे ग्राह्ये द्वयोर्मूले त्रीण्युत्तरतः क्षिपेत्। प्रणीतोत्तरतः प्रोक्षणीपात्रं निधाय तत्र चुलूकेन प्रणीतोदकं त्रिः प्रपूर्य पवित्राभ्यामुत्पूय[३६२]पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये पाणौ कृत्वा दक्षिणहस्तमुत्तानं कृत्वा मध्यमानामिकाङ्गुल्योः मध्यमपर्वाभ्यामपामुद्दिङ्गनम्। ताभिस्तास[३६३]म्प्रोक्षणम्। आज्यस्थाल्याः प्रोक्षणम्। चरुस्थाल्याः प्रोक्षणम्। सम्मार्गकुशानां प्रोक्षणम्। उपयमनकुशानां प्रोक्षणम्। समिधां प्रोक्षणम्। स्रुवस्य प्रोक्षणम्। स्रुचः प्रोक्षणम्। आज्य प्रोक्षणम्। तण्डुलानां प्रोक्षणम्। पूर्णपात्रस्य प्रोक्षणम्। अन्येषामुपकल्पनीयहवनीयद्रव्याणां प्रोक्षणम्। असञ्चरे[३६४] प्रोक्षणीपात्रं निधाय। आज्यस्थाल्यां आज्यनिर्वापो ब्रह्मणा। चरुस्थाल्यां पवित्रे निधाय यजमान आचार्यो वा त्रिः प्रक्षालिताँस्तण्डुलान् प्रक्षिप्य तत्र प्रणितोदकमासिच्य अन्यदपि जलं निषिच्य चरुस्थालीस्थितपवित्रे प्रोक्षणीषु निधाय दक्षिणतः ब्रह्मणा आज्याधिश्रयणं युगपत्। आज्योत्तरतः गृहीतेन ज्वलदुल्मुकेन उभयोः ऐशानीमारभ्य ऐशानीपर्यन्तं पर्यग्निकरणम्। इतरथावृत्तिः। अर्धशृते चरौ स्रुवस्य प्रतपनम्। दक्षिणेन हस्तेन स्रुवमादाय तं प्राञ्चमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्गग्रैर्मूलतोऽग्रपर्यन्तं सम्मृज्य मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूववत्प्रतप्य दक्षिणतो निदध्यात् । सम्मार्गकुशानग्नौ प्रास्य आज्योद्वासनम्।

अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेणोत्तरतो नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः पश्चिमे निधाय चरुमुत्थाप्य पूर्वेणाग्नेरुत्तरतः आनीय आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः निधाय आज्यमग्नेः पश्चादानीय स्थापयेत्। चरुं च आज्यस्य पूर्वेण प्रदक्षिणमानीय आज्यस्योत्तरत आसादयेत्। पवित्राभ्यां आज्योत्पवनम्। अवेक्षणम्। अपद्रव्यनिरसनम्। ताभ्यामेवाज्यलिप्ताभ्यां पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम्। पवित्रे प्रोक्षण्यां निधाय दक्षिणहस्तेन उपयमनकुशानादाय सव्ये गृहीत्वा दक्षिणेन पाणिना घृताक्तास्तिस्रः समिधःतिष्ठन्नग्नावाधाय दक्षिणचुलूकगृहीतेन सपवित्रेण प्रोक्षण्युदकेन अग्नेः ईशानकोणादारभ्य ईशानपर्यन्तं प्रदक्षिणवत्पर्युक्षणम् इतरथावृत्तिः। पवित्रयोः प्रणीतासु निधानम्। अग्नेः प्रदीप्तिकरणम्।

### १०/०६. अथाऽऽघारहोमः।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

---

[३६२] केचन वामकरे पवित्राग्रं दक्षिणे पवित्रयोर्मूलं धृत्वा मध्यतः पवित्राभ्यामुत्पवनम् इति वदन्ति तत्र मूलं न पश्यामः।

[३६३] ताभिः प्रणीतापात्रस्थाभिरद्भिः तासां प्रोक्षणीपात्रस्थापानां प्रोक्षणमित्यर्थः विकल्पे प्रोक्षणीपात्र–स्थाभिरद्भिः प्रणीताास्थानामपां प्रोक्षणम्।

[३६४] असञ्चरः प्रणीताग्न्योरन्तरालः।

१. मनसा – ॐ प्रजापतये स्वाहा । (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत्।     इदं प्रजापतये न मम।

२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।

**१०/०७. अथाऽऽज्यभागः।**

३. अग्नेरुत्तरार्धपूर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत्। इदमग्नये न मम।

४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

**१०/०८. अथाऽग्निपूजनम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[३६५]
ॐ ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।
सबुद्ध्न्याऽउपमाऽअस्यविष्ठाः सतश्च योनिमसतश्चविवः।। शु०य० १३/०३।।

ॐभूर्भुवःस्वः शान्तिके वरदनामाग्नये नमः  ब्रह्मणे नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं ततश्च ब्रह्मणे समर्पयेत्।

ॐभूर्भुवःस्वः शान्तिके वरदनामाग्नये नमः  ब्रह्मणे नमः। धूपमाघ्रापयामि। दीपं दर्शयामि। नैवेद्यं निवेदयामि। इत्युक्त्वा त्रिवारं जलपात्रे जलं क्षिपेत्। आज्येन पञ्च प्राणाय स्वाहेत्याहुतीर्दद्यात्।

हस्ते जलमादाय। अनया पूजया अग्निर्ब्रह्माणौ प्रीयेतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। प्रार्थयेत्।

अग्ने त्वमैश्वरं तेजः पावनं परमं हि तत्।
तस्मात्त्वदीयहृत्पद्मे सूर्यादीन्तर्पयाम्यहम्।। ८३।। ब्र०स०पृ. ३५५।।

---

[३६५] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

**१०/०९. अथ द्रव्यत्यागः।**

यजमानो हस्ते जलमादाय वदेत्।

इदमुपकल्पितं समिच्चरुतिलाज्यादिहवनीयद्रव्यं या या यक्षमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम। ब्राह्मणा वदेयुः। यथा दैवतमस्तु।

**।। इति कुशकण्डिका।।**

**।। प्रधानहोमः।। ११।।**

आचार्यादयः सावधानाः यजमानाभीष्टसिद्ध्यर्थं मधुसर्पिर्दध्याक्ता[३६६]र्कादिसमिदाज्यचरुतिलद्रव्यं चाभिधार्य स्थापितदेवतानां होमं कुर्युः।

**११/०१. अथ वराहुतिः।**

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं-
हवामहे निधिनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु॰य॰२३/१९।।[३६७]

इति मन्त्रेण एकमाज्याहुतिं हुत्वा।

**११/०२. अथ नवग्रहहोमः।**

आकृष्णेनेत्याद्यावाहित मन्त्रैरादित्यादिनवग्रहान् क्रमेण पूर्वोक्तार्कादिसमिच्चरुतिलाज्यद्रव्यैरष्टाष्ट-सङ्ख्यया हुत्वा पूर्वोक्तग्रहहोमद्रव्येणाऽऽवाहितमन्त्रैरधिप्रत्यधिदेवताश्चतुश्चतुः सङ्ख्ययाहुत्वा[३६८] विना-यकादिदिक्पालान्तदेवताः पलाशोदुम्बरान्यतमसमिच्चरुतिलाज्यद्रव्येणाऽऽवाहितमन्त्रैर्द्विद्विसङ्ख्यया जुहुयात्।

**११/०३.अथ गुग्गुल[३६९]होमः।**

---

[३६६] अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः। उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्।। ब्र०स०पृ. ३५५।।

[३६७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

वक्रतुंड महाकाय सूर्यकोटिसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।। कर्म०पृ. १९४।।

[३६८] यस्य ग्रहस्य या समित्सातस्याधिदेवतायाः प्रत्यधिदेवताश्च योज्या।

[३६९] अत्र केचित् गुग्गुलहोमं सर्षपहोमं लक्ष्मीहोमं च विकल्पेन कुर्वन्ति।

हस्ते जलामदाय। यजमानो वदेत्। अद्य पूर्वोच्चारित एवं ग्रहगुण विशेषेण विशिष्टायां शुभपुण्यतिथौ मम गृहे भूतप्रेतपिशाचदोषपरिहारार्थं त्र्यम्बक(स्मार्तकर्मणि मृत्युञ्जयेति वा)मिति मन्त्रेण गुग्गुलहोममहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गुग्गुलं गृहीत्वा।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।। शु०य० ०३/६०।।[३७०]

स्वाहेति गुग्गुलहोमं कुर्यात्।

## ११/०४. अथ सर्षपहोमः।

हस्ते जलमादाय। यजमानो वदेत्। अद्य पूर्वोच्चारित एवं ग्रहगुण विशेषेण विशिष्टायां शुभपुण्यतिथौ मम गृहे सर्वारिष्टपरिहारार्थं सर्वशत्रुबलक्षयार्थं सजोषा इति(स्मार्तकर्मणि सर्वाबाधा प्रशमनमिति वा) मन्त्रेण सर्षपहोममहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते सर्षपान् गृहीत्वा।

ॐ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूर विद्वान्।
जहि शत्रूँऽरप मृधो नुदस्वाथाभयंकृणुहि विश्वतोनः।। शु०य० ०७/३७।।[३७१]

स्वाहेति सर्षपहोमं कुर्यात्। अथोदकस्पर्शः।

## ११/०५. अथ लक्ष्मीहोमः।

क्षीरदूर्वा[३७२]दाडिमादिहोमद्रव्याणि एकीकृत्य घृतेनाभिधार्य। हस्ते जलमादाय। यजमानो वदेत्। अद्य पूर्वोच्चारित एवं ग्रहगुण विशेषेण विशिष्टायां शुभपुण्यतिथौ मम गृहे अलक्ष्मीविनाशार्थं दशविधलक्ष्मीप्राप्त्यर्थं श्रीश्चते इति(स्मार्तकर्मणि महालक्ष्म्यै च विद्महे इति वा) मन्त्रेण लक्ष्मीहोममहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते क्षीरदूर्वादाडिमादिहोमद्रव्याणि गृहीत्वा।

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्।
इष्ण्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण।। शु०य० ३१/२२।।[३७३]

---

[३७०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
मृत्युञ्जय महादेव त्राहिमाम् शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्म बन्धनैः।। या०र०पृ. ५०।।

[३७१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वाबाधाप्रशमनं त्रैलोक्यस्याऽखिलेश्वरि। एवमेव त्वया कार्यमस्मद्वैरि विनाशनम्।। स०श० ११/३९।।

[३७२] सीताफलं क्षीरमाज्यं दाडिमं मधु शर्करा। शमीपत्राणि दूर्वा च बिल्वपत्राणि तण्डुलाः।।
कदलीफलमिश्राणि कृत्वा वै जुहुयात्ततः।। ब्र०स०पृ. ३५६।।

[३७३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
महालक्ष्म्यै च विद्महे विष्णुप्रियायै धीमहि। तन्नो लक्ष्मीः प्रचोदयात्।। श्रीसूक्तं० फलश्रुति- १०।।

स्वाहेति होमं कुर्यात्।

**११/०६. अथ व्याहृतिहोमः।**

हस्ते जलमादाय। यजमानो वदेत्। अस्मिन्ग्रहशान्त्याख्ये कर्मणि देशतः कालतस्तन्त्रतोमन्त्रतो वा ज्ञानतोऽज्ञानतो वा अयथाकरणन्यूनकरणचतुर्विधकर्मातिरिक्तकरण भ्रेषजातप्रत्यवायपरिहारद्वारा कर्म साद्गुण्यसिद्धये तथा प्रधानदेवताग्न्योश्च मध्ये गमने तथा समिदाज्यचरुतिलादिहविषां मध्ये अन्यतमस्याभावे होमस्वाहाकारयोः पूर्वपराभावे अग्निमध्ये हविर्गतकीटाद्युपघाते प्रणीताग्न्योर्मध्ये गमने प्रणीतास्कन्दे इध्मपरिस्तरणादिदाहे कुण्डाद्बहिरग्निपतने समिच्चरुतिलाज्यमध्ये कृमिकीटकादि संयोगे होममन्त्रपठनसमये स्वरवर्णादिविस्मृतो देवतावदानमन्त्रतन्त्रकर्मविपर्यासमक्षिकाकीट- केशादभिर्हविर्दुष्टदग्धपाकहितस्थाने होमाकरणादिज्ञाताज्ञातदोषपरिहारार्थं घृताक्तकृष्णतिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैरष्टोत्तरशतैरष्टाविंशतिभिराहुतिभिर्वा होमं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। भूर्भुवःस्वरिति तिसृणां महाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप्छन्दांसि क्रमेण अग्निवायुसूर्या देवताः सर्वासां वा प्रजापतिर्देवता प्रायश्चित्त होमे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। होमं कुर्यात्।

१. ॐ भूः स्वाहा।[३७४]
२. ॐ भुवः स्वाहा।
३. ॐ स्वः स्वाहा।
४. ॐ भूर्भुवः स्वः स्वाहा।

एवं सप्तवारं होमे अष्टाविंशत्याहुतयो भवन्ति। सप्तविंशतिवारं होमे अष्टोत्तरशताहुतयो भवन्ति। द्विपञ्चाशतधिकशतद्वयाहुति होमे अष्टोत्तरसहस्राहुतयो भवन्ति।

## ।। उत्तरपूजनम्।। १२।।[३७५]

**१२/०१. अथ सङ्कल्पः।**

---

[३७४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

अग्निवायुसूर्येभ्यः स्वाहा।

[३७५] उत्तरपूजने निम्नलिखितान्यङ्गानि भवन्ति।

पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा। श्रेयः सम्पाद्य दानं च ह्यभिषेको विसर्जनम्।। ब्र०स०पृ. ३५७।।

कल्पद्रुमानुसारेण उत्तरपूजनम् केचन अत्रावसरे केचित् च नवाहुतिहोमान्ते अन्ये तु यजमानाभिषेकान्ते मन्यन्ते।

हस्ते जलमादाय। अद्य पूर्वोच्चारित एवं ग्रहगुण विशेषेण विशिष्टायां शुभपुण्यतिथौ कृतस्य ग्रहशान्त्याख्यकर्मणः साङ्गतासिद्ध्यर्थं स्थापतिदेवतानां मृडाग्नेश्चोत्तरपूजनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १२/०२. अथ गणपतिपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं-
हवामहे निधिनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु॰य॰२३/१९।।[३७६]

ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहितमहागणपतये नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

## १२/०३. अथ मातृकापूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा।
मा मऽआयुः प्रमोषीर्म्मोऽअहन्तव व्वीरं
व्विदेय तव देवि सन्दृशि।। शु०य० ०४/२४।।[३७७]
ॐ व्वसोः पवित्त्रमसिशतधारंव्वसोः पवित्रमसिसहस्रधारम्।
देवस्त्वासवितापुनातु व्वसोः पवित्रेणशतधारेण सुप्वा कामधुक्षः।। शु०य० ०१/०३।।

ॐ भूर्भुवः स्वः वसोर्द्धारा समन्वित सगणेशगौर्यादिमातृभ्यो नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

## १२/०४. सरुद्रग्रहमण्डलदेवतापूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ ग्रहाऽउर्ज्जा हुतयो व्यन्तो व्विप्राय मतिम्।

---

[३७६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वक्रतुंड महाकाय सूर्यकोटिसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।। कर्म०पृ. १९४।।

[३७७] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
या देवि सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। स०श० ०५/५८।।
नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्।। स०श० ०५/०९।।

तेषां विशिप्रियाणां वोह मिषमूर्जं समग्रभमुपयाम
ग्रहीतोसीन्द्रायत्वा जुष्टं गृह्णाम्मेषते योनि रिन्द्रायत्वा जुष्टतमम्।। शु०य० ९/४।।[३७८]

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।। शु०य० ०३/६०।।

ॐ भूर्भुवः स्वः सरुद्रनवग्रहमण्डलदेवताभ्यो नमः । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

## १२/०५. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[३७९]

ॐभूर्भुवःस्वः स्वाहास्वधायुताय मृडाग्नये नमः[३८०]। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

## १२/०६. अथ स्थापितब्रह्मापूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।
सबुद्ध्न्याऽउपमाऽअस्यविष्ठाः सतश्च योनिमसतश्चविवः।। शु०य० १३/०३।।[३८१]

ॐभूर्भुवःस्वः ब्रह्मणे नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

---

[३७८] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च। ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्।। कर्म०पृ. २२४।।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः।। या०र०पृ. ५०।।

[३७९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।

[३८०] अग्नये गन्धादिकं बहिरेव देयमिति कल्पद्रुमकाराः। अन्ये तु मध्ये पूजनमिच्छन्ति। विष्णुधर्मोत्तरे-मध्येऽपि गन्धाक्षतपुष्पादीन्दद्यादग्नेर्नसंशयः। बहिर्नैवेद्यमात्रन्तु दातव्यमिति निश्चितम्।। ब्र०स०पृ. ३५८।।

[३८१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

ॐभूर्भुव:स्व: ब्रह्माग्निसहित गणेशादि स्थापित देवताभ्यो नमः। धूपमाघ्रापयामि। दीपं दर्शयामि। नैवेद्यं निवेदयामि। इत्युक्त्वा त्रिवारं जलपात्रे जलं क्षिपेत्। महानैवेद्योपरि ॐभूर्भुव:स्व: इति मूल मन्त्रेण जलं संप्रोक्ष्य ग्रासमुद्रया नैवेद्यं निवेदयेत्। अग्नये आज्यनैवेद्यं निवेदयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।
नैवेद्य मध्ये पानीय[३८२] समर्पयामि। पुन: भोजयेत्।
ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाहा।
ॐ समानाय स्वाहा।
ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। हस्त प्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि। आचमनीयं जलं समर्पयामि। इत्युक्त्वा चतुर्वारं जलपात्रे जलं क्षिपेत्। करोद्वर्तनार्थे गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत् ।

## **१२/०७. अथ नमस्कारः।**

ॐ विश्वानिदेव सवितर्दुरितानि परासुव।
यद्भद्रं तन्नऽआसुव।। शु०य० ३०/०३।।[३८३]

इति प्रार्थयेत्। हस्ते जलमादाय। अनया पूजया गणेशादि स्थापित देवा: प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। इत्युत्तरपूजनम्।

## **१२/०८. अथ स्विष्टकृद्धोमः।**

---

[३८२] अत्र ब्रह्मनित्यकर्मसमुच्चयकारा:
एलाशीरलवङ्गादिकर्पूरपरिवासितम्। प्राशनार्थे कृतं तोयं गृहाण गणनायक ।। इत्यधिकं पठन्ति।। (पृ. ४९)

[३८३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आकाशात् पतितं तोयं यथा गच्छति सागरम्। सर्वदेव नमस्कार: केशवं प्रति गच्छति।।

हविः शेषस्य[384] उत्तरार्धात् द्विर्द्विरवदानधर्मेणावदाय द्विरभिधार्य ब्रह्मणा अन्वारब्धो जुहुयात्।
ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। उदकोपस्पर्शः।

## १२/०९. अथ नवाहुतिहोमः।

ततः ब्रह्मणाऽन्वारब्धः-

१.ॐ भूः स्वाहा।[385] इदमग्नये न मम।

२.ॐ भुवः स्वाहा। इदं वायवे न मम।

३.ॐ स्वः स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः।
यजिष्ठोवह्नितमः शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/३।।
इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणंरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/४।।
इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञंवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्रंयज्ञियाः पाशावितताममहान्तः।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।

---

[384] अनेकदिनसाध्यहोमश्चेत्तदा पर्युषितदोष परिहारार्थं हविः शेषं स्विष्टकृदर्थं घृतमध्ये स्थापयेत्। नष्टे दुष्टे वा हविषि आज्येनैव स्विष्टकृद्धोमः।

[385] अत्र यज्ञोपवीतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतयः दीयन्ते।

१. अग्नये नमः स्वाहा। इदम् अग्नये न मम।
२. वायवे नमः स्वाहा। इदं वायवे न मम।
३. सूर्याय नमः स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नमः स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च नमः स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नमः स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।
९. प्रजापतये नमः स्वाहा। इदं प्रजापतये न मम।

अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।
९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

इति नवाहुतिहोमः।

## १२/१०. अथ बलिदानप्रयोगः।

हस्ते जलमादाय। प्रारब्धस्य ग्रहमखकर्मणः साङ्गतासिद्ध्यर्थं दिक्पालदेवतानां[३८६] स्थापितदेवतानां च पूजनपूर्वकं बलिदानं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १२/११. दिक्पालदेवताबलिदानम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०१. ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवेसुहवं शूरमिन्द्रम्।
ह्वयामि शक्रम्पुरुहूतमिन्द्रं स्वस्तिनोमघवाधात्विन्द्रः।। शु०य० २०/५०।।[३८७]

---

[३८६] दिक्पालेभ्यः एकतन्त्रेण बलिदानम्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।
ॐ प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा-
प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै
दिशे स्वाहार्वाच्यै दिशे स्वाहाऽवाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा।। शु०य० २२/२४।।
अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।।
ब्रह्मणाऽनन्त सहिताः दिक्पालाः पान्तु ते सदा।। या०र०पृ. ३२।।
इन्द्रादिदशदिक्पालान् साङ्गान् सपरिवारान् सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वः अहं पूजयामि। इत्युक्त्वा गन्धाद्युपचारैः सम्पूज्य।
हस्ते जलमादाय। इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्।
नमस्कारः। यजमानो वदेत्। भो भो इन्द्रादिभिर्दशदिक्पालाः दिशो रक्षत बलिं भक्षत मम सकुटुम्बस्याऽभ्युदयं कुरुत। आयुः कर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः कल्याणकर्तारः सुखदा वरदाः भवत।
हस्ते जलमादाय। अनेन बलिदानेन इन्द्रादिदशदिक्पालाः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

[३८७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कश्यपादिति सम्भूतं सहस्राक्षं पुरन्दरम्। जयन्तपितरं वन्दे देवेन्द्रं शतयाजिनम्।। या०र०पृ. ५१।।

प्राच्याम्- इन्द्रं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कार:। यजमानो वदेत्। भो इन्द्र दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयु: कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन इन्द्र: प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०२. ॐ त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य।
त्रातातोकस्यतनयेगवामस्यनिमेषं रक्षमाणस्तवव्रते।। शु०य० ३४/१३।।[३८८]

आग्नेयाम्- अग्निं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। अग्नये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कार:। यजमानो वदेत्। भो अग्ने दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयु: कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन अग्नि: प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०३. ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा।
स्वाहा घर्म्मायस्वाहाघर्म्म: पित्रे।। शु०य० ३८/०९।।[३८९]

दक्षिणस्याम्- यमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। यमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कार:। यजमानो वदेत्। भो यम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयु: कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन यम: प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०४. ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य।
अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु।। शु०य० १२/६२।।[३९०]

---

[३८८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आग्नेयदिक्प्रभुं दीप्तं शक्तिप्रहरणं परम्। ज्वालाव्याप्त तनुं वन्दे ह्यग्निं लोक शुभं करम्।। या०र०पृ. ५३।।

[३८९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वप्राणि नियन्तारं याम्य दिक्पतिमीश्वरम्। महादण्डधरं देवं यमं तं प्रणमाम्यहम्।। या०र०पृ. ५३।।

[३९०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
राक्षसाधिपतिं शूरं नेऋत्याधीशमीश्वरम्। खड्गप्रहरणं वन्दे निर्ऋतिं लोकरक्षणम्।। या०र०पृ. ५३।।

नैर्ऋत्याम्- निर्ऋतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। निर्ऋति साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो निर्ऋति दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन निर्ऋतिः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०५. ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्ते यजमानोहविर्ब्भिः।
अहेडमानोव्वरुणेहबोद्ध्युरुशं समानऽआयुः प्रमोषीः।। शु०य० १८/४९।।[३९१]

पश्चिमायाम्- वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो वरुण दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन वरुणः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०६. ॐ आनोनियुद्भिः शतिनीभिरद्ध्वरं सहस्रिणीभिरुपयाहि यज्ञम्।
व्वायोऽअस्मिन्त्सवनेमादयस्वयूपम्पातस्वस्तिभीः सदा नः।। शु०य० २७/२८।।[३९२]

वायव्याम्- वायुं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो वायो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन वायुः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०७. ॐ व्वयं सोमव्रतेतवमनस्तनूषुबिभ्रतः।
प्रजावन्तः सचेमहि।। शु०य० ०३/५६।।[३९३]

---

[३९१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पाशायुधधरं देवं प्रतीची दिक्प्रपालकम्। सर्वेषां जीवनं वन्दे वरुणं यादसां पतिम्।। या०र०पृ. ५३।।

[३९२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
इन्द्रकृतानेकरूपं दितिसम्भूतमद्भुतम्। वायव्यदिक्प्रभुं वन्दे वायुमङ्कुशधारिणम्।। या०र०पृ. ५३।।

[३९३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यक्षराजं धनाध्यक्षंमुदीची दिक्पतिं प्रभुम्। लोकपालमहं वन्दे कुबेरं सुगदाधरम्।। या०र०पृ० ५३।।

उदीच्याम्- सोमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। सोमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो सोम(कुबेर) दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन सोमः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०८. ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहे व्वयम्।
पूषानो यथा वेदसामसद्वृधे रक्षितापायुरदब्धः स्वस्तये।। शु०य० २५/१८।।[३९४]

ईशान्याम्- ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो ईशान दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन ईशानः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

०९. ॐ अस्मेरुद्रा मेहनापर्व्वतासो वृत्र हत्ये भरहूतौ सजोषाः।
यः शं सतेस्तुवतेधायिपज्रऽइन्द्रज्ज्येष्ठाऽअस्माँ२ऽअवन्तु देवाः।। शु०य० ३३/५०।।[३९५]

पूर्वेशानयोर्मध्ये उर्ध्वायाम्- ब्रह्माणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो ब्रह्मन् दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन ब्रह्मा प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

१०. ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी।
यच्छानः शर्म्मसप्रथा।। शु०य० ३६/१३।।[३९६]

नैर्ऋत्यपश्चिमयोर्मध्ये अधो दिशि- अनन्तं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं

[३९४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ऐशान्यधिपतिं देवं सर्वदेव सुसेवितम्। सर्वेश्वरेश्वरं वन्दे शूलधारिणमीश्वरम्।। या०र०पृ० ५४।।

[३९५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
ऊर्ध्व दिक्पालं नित्यं लोकसृष्टिविधायकम्। पितामहं प्रभुं देवं ब्रह्माणं प्रणमाम्यहम्।। या०र०पृ. ५४।।

[३९६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वकल्याण कर्तारं फणामण्डलमण्डितम्। अधो दिक्पालं दिव्यं ह्यनन्तं प्रणमाम्यहम्।। या०र०पृ. ५४।।

जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो अनन्त दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन अनन्तः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १२/ १२. अथ स्थापितदेवताबलिदानम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

### ०१. गणेशबलिः।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं-
हवामहे निधिनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु॰य॰२३/१९।।[३९७]

गणपतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। गणपतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो गणपते इमं बलिं गृहाण मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन गणपतिः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

### ०२. मातृकाबलिः।

ॐ समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा।
मा मऽआयुः प्रमोषीर्म्मोऽअहन्तव व्वीरं व्विदेय तव देवि सन्दृशि।। शु०य० ०४/२४।।[३९८]
ॐ व्वसोः पवित्त्रमसिशतधारंव्वसोः पवित्रमसिसहस्रधारम्।
देवस्त्वासवितापुनातु व्वसोः पवित्रेणशतधारेण सुप्वा कामधुक्षः।। शु०य० ०१/०३।।

वसोर्द्धासहितसगणेशगौर्याद्यावाहितमातृः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्धाद्युपचारैः युष्मानहं पूजयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। हस्ते जलमादाय। वसोर्द्धासहितसगणेशगौर्याद्यावाहितमातृभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं

---

[३९७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
वक्रतुंड महाकाय सूर्यकोटिसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।। कर्म०पृ. १९४।।

[३९८] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
या देवि सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। स०श० ०५/५८।।
नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्।। स०श० ०५/०९।।

सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो वसोर्द्धासहितसगणेशगौर्याद्यावाहितमातरः इमं बलिं गृह्णीत मम सकुटुम्बस्याऽभ्युदयं कुरुत। आयुः कर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः पुष्टिकर्त्र्यः तुष्टिकर्त्र्यः निर्विघ्नकर्त्र्यः कल्याणकर्त्र्यः सुखदा वरदा भवत। हस्ते जलमादाय। अनेन बलिदानेन वसोर्द्धासहितसगणेशगौर्याद्यावाहितमातरः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

### ०४. सरुद्रग्रहबलिः।

ॐ ग्रहाऽउर्ज्जा हुतयो व्यन्तो व्विप्राय मतिम्।
तेषां विशिप्रियाणां वोह मिषमूर्जं समग्रभमुपयाम
ग्रहीतोसीन्द्रायत्वा जुष्टं गृहणाम्मेषते योनि रिन्द्रायत्वा जुष्टतमम्।। शु०य० ९/४।।[399]
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।। शु०य० ०३/६०।।

आदित्याद्यावाहितसरुद्रग्रहमण्डलदेवान् साङ्गान् सपरिवारान् सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वः अहं पूजयामि। इत्युक्त्वा गन्धाद्युपचारैः सम्पूज्य। हस्ते जलमादाय। आदित्याद्यावाहितसरुद्रग्रहमण्डलदेवेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो भो आदित्याद्यावाहितसरुद्रग्रहमण्डलदेवाः दिशो रक्षत बलिं भक्षत मम सकुटुम्बस्याऽभ्युदयं कुरुत। आयुः कर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः कल्याणकर्तारः सुखदा वरदाः भवत। हस्ते जलमादाय। अनेन बलिदानेन आदित्याद्यावाहितसरुद्रग्रहमण्डलदेवाः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

### १२/१३. अथ क्षेत्रपालबलिदानम्।

मण्डपाद्बहिः वंशपात्रे मृण्मयपात्रे वा सदीपमाषभक्तदध्योदनताम्बूलदक्षिणाकूष्माण्डोदककुम्भयुतं[400] बलिं संस्थाप्य हरिद्राकुङ्कुमसिन्दूरपताकायुतं कृत्वा।

हस्ते जलमादाय। अद्य पूर्वोच्चारितशुभपुण्यतिथौ सकलारिष्टशान्तिपूर्वकं ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं क्षेत्रपालाय पूजनपूर्वकं बलिदानं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। बलिदानपात्रे पूगीफले क्षेत्रपालमावाहयेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

---

[399] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च। ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्।। कर्म०पृ. २२४।।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः।। या०र०पृ. ५०।।

[400] हेमाद्रिः–
सोदकुम्भं सकूष्माण्डं क्षेत्रपालबलिं हरेत्। चतुर्वर्तिसमायुक्तं दीपं तत्र निधापयेत्।। ब्र०स०पृ. ३६१।।

ॐ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः।
एमेनमवृधन्नमृताऽअमर्त्यं वैश्वानरङ्क्षेत्रजित्यायदेवाः।। शु०य० ३३/६०।।[४०१]

ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः क्षेत्रपालमावाहयामि स्थापयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्। ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः इत्यनेन षोडशोपचारैः पञ्चोपचारैर्वा सम्पूजयेत्।।

प्रार्थयेत्–

ॐ नमामि क्षेत्रपालं त्वां भूतप्रेतगणाधिप।
पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा।। ८४।। ब्र०स०पृ. ३६२।।
आयुरारोग्यदानेन निर्विघ्नं कुरु सर्वदा।
मा विघ्नं माऽस्तु मे पापं मा सन्तु परिपन्थिनः।।
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः।। ८५।। ब्र०स०पृ. ३६२।।
यं यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं
सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम्।
दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्वरेखाकपालं
पं पं पं पापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालम्।। ८६।। ब्र०स०पृ. ३६२।।

ॐ नमः क्षेत्रपालाय चित्रतुरङ्गवाहन सर्वभूतप्रेतपिशाचशाकिनीडाकिनीवेतालादिपरिवृत दध्योदनप्रियसकलशक्तिसहित इमां पूजां गृहाण।

हस्ते जलमादाय। क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि। इत्युक्त्वा एकवारं जलपात्रे जलं क्षिपेत्। नमस्कारः। यजमानो वदेत्। भो क्षेत्रपाल सर्वतो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याऽभ्युदयं कुरु। आयुः कर्त्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव। हस्ते जलमादाय। अनेन बलिदानेन क्षेत्रपालः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पश्चाद् अनवेक्षमाणेन दुर्ब्राह्मणेन शूद्रेण वा बलिं नीत्वा चतुष्पथे स्थापयेत्। ततो यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेत्।

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहाक्रन्दतेस्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा
प्रप्रोथाय स्वाहा गन्धायस्वाहाग्घ्रातायस्वाहा निविष्टाय स्वाहोपविष्टायस्वाहा
सन्दिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा
जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय
स्वाहासंहानायस्वाहोपस्थितायस्वाहायनाय स्वाहा प्रायणाय स्वाहा।। शु०य० २२/०७।।

पाणि पादं प्रक्षाल्य आचामेत् मण्डपं प्रविशेत्।

---

[४०१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
क्षेत्रपालं गणाधीशं चत्वराधिष्ठितं सदा। पूजा सौख्यप्रदं नित्यं क्षेत्रपालं नमाम्यहम्।। या०र०पृ० ५२।।

## ।। पूर्णाहुतिहोमः।। १३।।

तत्र उपकल्पनीयानि आज्यस्थाली होमावशिष्टादाज्यादन्यदाज्यं वैकङ्कती स्रुक् खादिरः स्रुवः सम्मार्गकुशाः पवित्रे नारिकेलफलं ताम्बूलवीटकं पूगीफलं पट्टवस्त्रखण्डं रक्तसूत्रं पुष्पाणि पुष्पमाला च इत्येतान्युपकल्प्य।

### १३/०१. अथ सङ्कल्पः।

हस्ते जलमादाय। अद्य पूर्वोच्चारित एवं ग्रहगुण विशेषेण विशिष्टायां शुभपुण्यतिथौ कृतस्य ग्रहशान्त्याख्यस्य कर्मणः सम्पूर्णतासिद्ध्यर्थं एकोनपञ्चाशत् मरुद्गणानां प्रीत्यर्थं वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

आज्यं निरूप्याग्नावधिश्रित्य स्रुवं स्रुचं च प्रतप्य सम्मार्गकुशैः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य अग्नेः पश्चिमतो याम्यायां निदध्यात्। आज्यमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य स्रुवेण चतुर्वारमाज्यं स्रुचि गृहीत्वा शिष्टाचारात्तस्यां सपूगीफलं ताम्बूलवीटकं निधाय तदुपरि रक्तवस्त्रवेष्टितं रक्तसूत्रबद्धं पुष्पमालापरिवेष्टितं सिन्दूरादिभिश्चर्चितं नारिकेलफलं निधाय अधोमुखस्रुवच्छन्नां तां स्रुचमादाय वामस्तनान्तमानीय यजमानान्वारब्धः आचार्यः[४०२] आसीन एव पूर्णाहुतिं जुहुयात्।

ॐ पूर्णाहुत्यै नमः। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ समुद्रादुर्मिर्मधुमाँ२ऽउदारदुपां शुनासममृतत्व मानट्।
घृतस्यनामगुह्यं यदस्तिजिह्वादेवानाममृतस्यनाभिः।। शु०य० १७/८९।।[४०३]
व्वयन्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः।
उपब्रह्माश्रृणवच्छस्यमानञ्चतुः शृङ्गोवमीद्गौरऽएतत।। शु०य० १७/९०।।

---

[४०२] रुद्रकल्पद्रुमहोमपरिच्छेदे– केचित्तिष्ठन् पूणाहुतिमाचरन्ति तन्निर्मूलन्।
परशुराममहारुद्रप्रयोगे–
होमोऽग्नौ द्विविधः प्रोक्तः श्रौतस्मार्तश्च होतृभिः। श्रौतो यजतिसंज्ञोऽसौ स्मार्तो जुहोति संज्ञकः।।
तिष्ठता हूयते यत्र याज्यया चानुवाक्यया। वष्टकारप्रदानेन स श्रौतः परिकीर्तितः।।
यत्र होत्रोपविष्टेन स्वाहाकारेण हूयते। स स्मार्त इति विज्ञेयः पूर्णाहुत्यादिकर्मसु।।
केचिदुत्थाय कुर्वन्ति कात्यायनमतं न तत्। तस्मादध्वर्युणा कार्या पूर्णासीनेन सर्वदा।।
कल्पद्रूमे तथा खण्डदीक्षितमहारुद्रपद्धतौ त त्र्यृचा एव पूर्णाहुतिः। अन्येषां मन्त्राणामपि विकल्पनैव पूर्णाहुतिः प्रोक्ता यथा–
सप्ततेअग्न इति मन्त्रेण वा अत्र इदमग्नये सप्तवत् इति त्यागः। मूर्धानन्दिव इत्यनेन वा अत्र इदमग्नये वैश्वानरायेति त्यागः। समुद्रादूर्मिरितित्र्यृचेन वा पुनस्त्वेति वा पूर्णादर्वीत्यनया वा त्रयाणामिदमग्नय इति त्यागः। केचन विकल्पं विहाय सर्वैरपि मन्त्रैः पूर्णाहुति होमं कुर्वन्ति तदेतत्करणं मन्त्राणां विकल्पानुगमात् समुच्चे च प्रमाणाभावात् चिन्त्यमिति कल्पद्रुमकाराः।

[४०३] अत्र यज्ञोपवीतरहितानां कृते १५वैदिक मन्त्राणां शतक्रतो स्वाहेन्त्यस्य ०१ब्राह्मण मन्त्रस्य स्थाने मार्कण्डेयपुराणान्तर्गतया शक्रादयस्तुत्या पूर्णाहुति होमः करणीयः। तदर्थम् परिशिष्टम्–०८ द्रष्टव्यम्।

चत्वारि शृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य।
त्रिधाबद्धोवृषभोरोरवीति महोदेवोमर्त्याँ २ऽआविवेश।। शु०य० १७/९१।।
त्रिधाहितम्पणिभिर्गुह्यमानङ्ग विदेवा सोघृतमन्वविन्दन्।
इन्द्रऽएकं सूर्य्यऽएकञ्जजानव्वेनादेकं स्वधयानिष्टतक्षुः।। शु०य० १७/९२।।
एताऽअर्षन्ति हृद्यात्समुद्द्राच्छतव्रजारिपुणानावचक्षे।
घृतस्य धाराऽअभिचाकशीमिहिरण्ययोवेतसोमध्यऽआसाम्।। शु०य० १७/९३।।
सम्यक् स्त्रवन्ति सरितोनधेनाऽअन्तर्हृदामनसापूयमानाः।
एतेऽअर्षन्त्यूर्म्मयोघृतस्य मृगाऽइवक्षिपणोरीषमाणाः।। शु०य० १७/९४।।
सिन्धोरिवप्राद्ध्वनेशूघनासोव्वात प्रमियः पतयन्तियह्वाः।
घृतस्यधाराऽअरुषो न व्वाजीकाष्ठाभिन्दन्नुर्मिभिः पिन्वमानाः।। शु०य० १७/९५।।
अभिप्रवन्तसमनेवयोषाः कल्याण्यः स्मयमानासोऽअग्निम्।
घृतस्यधाराः समिधोनसन्तताजुषाणोहय्यतिजातवेदाः।। शु०य० १७/९६।।
कन्याऽइव व्वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि।
यत्रसोमः सूयते यत्र यज्ञोघृतस्यधाराऽअभितत्पवन्ते।। शु०य० १७/९७।।
अभ्यर्षतसुष्टुतिङ्गव्यमाजिमस्मासुभद्राद्रविणानिधत्त।
इमं यज्ञन्नयतदेवतानो घृतस्यधारामधुमत्पवन्ते।। शु०य० १७/९८।।
धामन्ते विश्वम्भुवनमधिश्रितमन्तः समुद्रेहृद्यन्तरायुषि।
अपामनीकेसमिथेयऽआभृतस्तमश्यामममधुमन्ततऽउर्मिम्।। शु०य० १७/९९।।
पुनस्त्वादित्यारुद्रावसवः समिन्धताम्पुनर्ब्रह्माणोव्वसुनीथ यज्ञैः।
घृतेनत्वं तन्वं वर्द्धयस्वसत्याः सन्तु यजमानस्यकामाः।। शु०य० १२/४४।।
सप्ततेऽअग्नेसमिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधाम प्रियाणि।
सप्तहोत्राः सप्तधात्त्वा यजन्ति सप्त योनीरापृणस्वघृतेनस्वाहा।। शु०य० १७/७९।।
मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम्।
कविं सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः।। शु०य० ३३/८।।
पूर्णादर्विपरापतसुपूर्णापुनरापत।
वस्नेवविक्रीणावहाऽइषमूर्जं शतक्रतो।। शु०य० ०३/४९।।
अथ प्रातराहुतेवाहूतेवायतरथाकामयेतसोस्याऽअनिरसितायैकुंभ्यैदर्व्योपहन्ति
पूर्णादर्व्विपरा पत सुपूर्णापुनरापत।
वस्नेवविक्रीणावहाऽइषमूर्ज्जं शतक्रतो स्वाहा।। शु०य० ०३/४९।।

त्यागः-

इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नये अद्भ्यश्च न मम। संस्रवप्रक्षेपः। इति पूर्णाहुतिः।

**१३/०२. अथ वसोर्द्धाराहोमः।**

औदुम्बरीम् ऋज्वीमकोटरां बाहुमात्रप्रमाणां निर्मलघृतपूरितां स्रुचं धृत्वा अग्नेरुपरि वसोर्द्धारां पातयेत्। तस्यां च घृतधारायां स्रुक्प्रणालिकया अग्नौ पतन्त्यां सत्यां वक्ष्यमाणमन्त्रान्पठेत्।

ॐ सप्ततेऽअग्नेसमिधः[४०४] सप्तजिह्वाः सप्तऽऋषयः सप्तधाम प्रियाणि।
सप्तहोत्राः सप्तधात्त्वा यजन्ति सप्त योनीरापृणस्वघृतेनस्वाहा।। शु०य० १७/७९।।
शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्माँश्च।
शुक्रश्चऽऋतपाश्चात्यं हाः।। शु०य० १७/८०।।
ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च।
मितश्चसम्मितश्चसभराः।। शु०य० १७/८१।।
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च।
धर्ता च विधर्ता च विधारयः।। शु०य० १७/८२।।
ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च।
अन्तिमित्रश्चदूरेऽअमित्रश्चगणः।। शु०य० १७/८३।।
ईदृक्षासऽएतादृक्षासऽऊषुणःसदृक्षासः प्रतिसदृक्षासऽएतन।
मितासश्च सम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन्।। शु०य० १७/८४।।
स्वतवाँश्च प्रघासी च सान्तपनश्चगृहमेधी च।
क्रीडी च शाकी चोज्जेषी।। शु०य० १७/८५।।
इन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्त्मानो भवन्येथेन्द्रन्दैवीर्विशोमरुतोनुवर्त्त्मानोभवन्।
एवमिमँ य्यजमानन्दैवीश्चव्विशोमानुषीश्चानुवर्त्त्मानोभवन्तु।। शु०य० १७/८६।।
इमं स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्यमद्ध्ये।
उत्त्सञ्जुषस्वमधुमन्तमर्व्वन्त्समुद्रियं सदनमाविशस्व।। शु०य० १७/८७।।
घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्श्रितो घृतम्म्वस्य धाम।
अनुष्व धमावह मादयस्व स्वाहा कृतं वृषभव्वक्षि हव्व्यम्।। शु०य० १७/८८।।
व्वसोः पवित्रमसिशतधारं व्वसोः पवित्रमसि सहस्रधारम्।
देवस्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्प्वाकामधुक्षः।। शु०य० ०१/०३।।
ॐ यत्कर्मणात्यरीरिचं यद्वान्यूनमिहाकरम्।
अग्निं स्विष्टकृद्विद्वान्स्विष्टं सुहुतं करोतु स्वाहा।।
इदमग्नये न मम। नात्र संस्रप्रक्षेपः। अग्निप्रदक्षिणां कुर्यात्।

ॐ सहैषयज्ञऽउवाचनग्नतायावैबिभेमीतिकातेनग्नतेत्यभितएवमापरिस्तृणीयरिति
स्मादेतग्निमभितः परिस्तृणन्तितृष्णायावैबिभेमीतिकातेतृप्तिर्ब्राह्मणस्यैव-
तृप्तिमनुतृप्येयमितितस्मात्संस्थिते यज्ञे ब्राह्मणन्त-

[४०४] अत्र यज्ञोपवीतरहितानां कृते वसोर्द्धारा होमे रात्रिसूक्तेन होमः क्रीयते। तदर्थम् परिशिष्टम् -०९ द्रष्टव्यम्।

र्प्यितवैब्रूयाद्यज्ञमेवैत्तर्पयति।। ब्रा० ०१/०६/०१/२८।।

इत्यग्निं प्रदक्षिणीकृत्य अग्नेः पश्चात् प्राङ्मुखो यजमान उपविशेत्। ततः स्रुवेण भस्मानीय।

### १३/०३. अथ भस्मधारणम्।

ॐ त्र्यायुषं जमदग्नेः – ललाटे।[४०५]
ॐ कश्यपस्य त्र्यायुषम् – ग्रीवायाम्।
ॐ यद्देवेषु त्र्यायुषम् – बाह्वोः।
ॐ तन्नोऽअस्तु त्र्यायुषम् – हृदये।। शु०य० ०३/६२।।

ततः संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्पः। कृतस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।
अग्नेः पश्चात् प्रणीताविमोकः।
ॐ आपः शिवाः शिवतमाः शान्ताः
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

उपयमनकुशैर्मार्जयेत्। उपयमनकुशानामग्नौ प्रक्षेपः। आरार्तिक्यम्। तत आचार्यः श्रेयः सम्पाद्यदानं कुर्यात्।

### १३/०४. अथ श्रेयोदानम्।

ब्रह्मादय ऋत्विजादयश्च आचार्यद्वारा श्रेयोदानं कुर्युः। उदङ्मुख आचार्यः प्राङ्मुखस्थितयजमानहस्ते श्रेयोदानं कुर्यात्।

शिवा आपः सन्तु इति यजमानहस्ते उदकं दत्वा सौमनस्यमस्तु इति पुष्पाणि। अक्षतं चारिष्टं चास्तु इति अक्षतांश्च दत्वा ततो दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चास्तु इति पुनरुदकं दद्यात्।

तत आचार्यः। हस्ते साक्षतसोदकपूगीफलं गृहीत्वा। भवन्नियोगेन मया अस्मिन् ग्रहशान्त्याख्ये कर्मणि यत्कृतं आचार्यत्वं तथा च एभिर्ब्राह्मणैः सह यत्कृतं ब्रह्मत्वं गाणपत्यं सादस्यं च यः कृतौ जपः

---

[४०५] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
श्रद्धां मेधां यशःप्रज्ञां विद्यां बुद्धिं श्रियं बलम्। तेज आयुष्यमारोग्यं देहि मे हव्यवाहन।। या०र०पृ. १६३।।
यथा शस्त्रप्रहाराणां कवचं धारितं मया। तथा दैवोपघातानां शान्तिर्भवति वारणम्।। व्र०चं०पृ. १८८।।

होमस्तस्मात् आचार्यत्वात् ब्रह्मत्वात् गाणपत्यत्वात् सदस्यत्वाज्जापकत्वात्  होमात् यदुत्पन्नं श्रेयः तुभ्यमहं सम्प्रददे। तेन श्रेयसा त्वं श्रेयस्वी भव। प्रतिगृह्य। यजमानो वदेत्। भवामि।

## १३/०५. अथ दक्षिणादानम्।

सपत्नीको यजमानः अग्नेः पश्चिमतः उपविष्ट उदङ्मुखानाचार्यादीन्वरण क्रमेण[४०६] पूजापूर्विकां दक्षिणां दद्यात्। हस्ते जलमादाय। देशकालौ सङ्कीर्त्य मया आचरित्यस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्धये आचार्यादिवृतेभ्यो ब्राह्मणेभ्यः पूजन पूर्वकं दक्षिणाप्रदानं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १३/०६. अथाऽऽचार्यपूजनम्।

आचार्य एतत्ते पाद्यं शिष्टाचारत्पादौ प्रक्षाल्य इदमर्घ्यम् इमे तुभ्यं बार्हस्पतेय वाससी एष ते गन्धः। इमानि पुष्पाणि एष ते धूपः दीपः नैवेद्यताम्बूलादीनि इति दत्वा एतावतीं दक्षिणां तुभ्यमहं सम्प्रददे।

## १३/०७. अथाऽऽचार्याय गोप्रदानम्।

अमुकशर्मणे आचार्याय गां गोनिष्क्रयभूतमिदं वा हिरण्यम् अग्निदैवत्यं तुभ्यमहं सम्प्रददे। हिरण्यासम्भवे रजतं दद्यात्। ततो एतत्ते पाद्यमित्यादिनां पूर्वोक्त प्रकारेण पूजापूर्वकं ब्रह्मणे दक्षिणां दद्यात्। एवं सदस्याय उपद्रष्टे गाणपत्याय ऋत्विग्भ्यः ग्रहजापकेभ्यश्च यथोक्तदक्षिणां दत्वा आशिषो गृहणीयात्।

## १३/०८. अथ सुवर्णदानम्।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे।। ८७।। ब्र०स०पृ. ५०।।

इदं यथाशक्ति सुवर्णम् अग्निदैवत्यम् अमुकशर्मणे तुभ्यमहं सम्प्रददे। प्रतिगृह्णामि।

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।। शु०य० ०९/३०।।

## १४/०९. अथ भूमिदानम्।

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता।
अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छमे।। ८८।। ब्र०स०पृ. ३६८।।

[४०६] यज्ञयागादिकर्मणि दक्षिणाप्रदानक्रमः प्रायस एवं दृष्यते – आचार्यः। उपाचार्यः। ब्रह्मा। उपब्रह्मा। ततो वैदिकब्राह्मणा वरणिताः। ततश्च स्मार्तब्राह्मणा वरणिताः। ततश्च स्थानीयब्राह्मणाः।

इमां भूमिं विष्णुदैवत्यां वा तन्निष्क्रयीभूतयथाशक्तिरजतद्रव्यम् अमुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।। शु०य० ०९/३०।।

**१३/१०. अथ तिलपात्रदानम्।**

महर्षेर्गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः।
तस्मादेषां प्रदानेन मम दोषो व्यपोहतु।। ८९।। ब्र०स०पृ. ३६८।।

एतांस्तिलान् प्रजापतिदैवत्यान् आचार्याय तुभ्यमहं सम्प्रददे न मम।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।। शु०य० ०९/३०।।

**१३/११. अथाऽभिषेकः।**

आचार्यादयः सर्वे उदङ्मुखास्तिष्ठन्तः ग्रहवेदीशानस्थकलशोदकं पात्रान्तरे उद्धृत्य दूर्वापञ्च- पल्लवैर्वक्ष्यमाणैर्वैदिकैः मन्त्रैः प्राङ्मुखोपविष्टं सकुटुम्बं यजमानं तद्वाम उपविष्टां तेषां पत्नीश्च अभिषिञ्चेयुः।

**तत्र मन्त्राः।** [४०७]

---

[४०७] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
एतान् मन्त्रान् संस्कारभास्करकारा न गृहणन्ति।
सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।। १।।
प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा।। २।।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणाऽनन्त सहिताः दिक्पालाः पान्तु ते सदा।। ३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः।। ४।।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुध-जीव-सिताऽर्कजाः।। ५।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देव-दानव-गन्धर्वा यक्ष-राक्षस-पन्नगाः।। ६।।
ऋषयो मुनयो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्सरसां गणाः।। ७।।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च। औषधानि च रत्नानि कालस्याऽवयवाश्च ये।। ८।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते स्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये।। ९।।
सहस्राक्षं शतधारं ऋषिभिः पावनं कृतम्। तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते।। १०।।
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो दधुः।। ११।।
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि। ललाटे कर्णयो रक्ष्णो रापो निघ्नन्तु ते सदा।। १२।।
सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।। १३।।
या०र०पृ. ३२।।

ॐ पय: पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधा:।
पयस्वती: प्प्रदिश: सन्तुमहयम्।। शु०य० १८/३६।।
ॐ पञ्चनद्य: सरस्वतीमपियन्तिसस्रोतस:।
सरस्वती तु पञ्चधासो देशे भवत्सरित्।। शु०य० ३४/११।।
ॐव्वरुणस्योत्तम्भनमसिवरुणस्योस्कम्भर्जनीस्त्थोव्वरुणस्यऽऋतसदन्यसि–
व्वरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद।।शु०य० ०४/३६।।
ॐ पुनन्तु मदेवजना: पुनन्तुमनसाधिय:।
पुनन्तु व्विश्वाभूतानिजातवेद: पनीहिमा।। शु०य० १९/३९।।
ॐ देवस्यत्वासवितु: प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।
सरस्वत्यैव्वाचोयन्तुर्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ।। शु०य० ०९/३०।।
ॐ देवस्यत्वासवितु: प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।
सरस्वत्यव्वाचोयन्तुर्यन्त्रेणाग्ने: साम्म्राज्ज्येनाभिषिञ्चामि।। शु०य० १८/३७।।
ॐ देवस्यत्वा सवितु: प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।
अश्विनोर्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यैभैषज्जयेन
व्वीर्यायान्नाद्द्यायाभिषिञ्चामीन्द्रस्यन्द्रियेणबलायश्रीयैयशसेभिषिञ्चामि।। शु०य० २०/०३।।
ॐ व्विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रन्तन्नऽआसुव।। शु०य० ३०/०३।।
ॐ धामच्छ्दग्निरिन्द्रोब्ब्रह्मादेवो बृहस्पति:।
सुचेतसोव्विश्श्वेदेवा यज्ञम्प्रावन्तु न: शुभे।। शु०य० १८/७६।।
ॐ त्वं यविष्ठ्दाशुषोर्नृपाहि: शृणुधीगिर:।
रक्षातो कमुतत्क्मना।। शु०य० १८/७७।।
ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिण:।
प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहि द्विपदेचतुष्पदे।। शु०य० ११/८३।।
ॐ द्यौ: शान्तिरन्तरिक्षं शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति:।
व्वनस्पतय: शान्तिर्व्विश्वेदेवा: शान्तिर्ब्ब्रह्मशान्ति: सर्वं शान्ति: शान्तिरेव शान्ति:
सामाशान्तिरेधि।। शु०य० ३६/१७।।
ॐ यतोयत: समीहसेततोनोऽअभयं कुरु।
शन्न: कुरु प्प्रजाब्भ्योभयन्न: पशुब्भ्य:।। शु०य० ३६/२२।।
ॐ सर्व्वेषांवाऽएषव्वेदानां रसो यत्सामसर्व्वेषामेवैनमेतद्वेदानां रसेनाभिषिञ्चति।।
ॐ शान्ति: शान्ति: शान्ति: सुशान्तिर्भवतु। स्वस्थाने उपविश्य।

स्वस्थाने उपविश्य। हस्ते जलमादाय। अभिषेककर्तुकेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये तेन श्रीकर्माधीश: प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

एवमभिषिक्तः सपत्नीको यजमानः सर्वौषधीभिरुद्वर्तिताङ्गः गङ्गादिशुद्धोदकेन स्नात्वा उभाभ्यामभिषेक्ताभ्यां त्यक्तानि स्नानवस्त्राण्याचार्यायदत्वा शुक्लमाल्याम्बरधरो धृतमङ्गलतिलकः स्वासने उपविशेत्।

**१३/१२. अथ घृतपात्रदानम्।**

घृतपूरितकांस्यपात्रे मुखावलोकनं कुर्यात्।

ॐ रूपेण वो रूपमभ्यागान्तुथो वो विश्वेवेदा वि भजतु।
ऋतस्य प्रथा प्रेत चन्द्रदक्षिणा विस्वः पश्य
व्यन्तरिक्षं यतस्व सदस्यैः।। शु०य० ०७/४५।।[४०८]

इदम् आज्यपात्रं सदक्षिणाम् अचार्याय तुभ्यमहं सम्प्रददे।

**१३/१३. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। कृतस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् यथान्नेनाऽन्नेनाऽहं भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**१३/१४. भूयसीदक्षिणाप्रदानम्।**

हस्ते जलमादाय। कृतस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं नानावेदान्तर्गत नानाशाखा-ध्यायिभ्यो नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाशक्ति भूयसीं दक्षिणां दातुमह-मुत्सृजे। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ तत्सदिति वदन् भूयसीं दक्षिणां दत्वा तेषाम् आशिषो गृह्णीयात्।

**१३/१५. अथाऽऽशिर्वादः।**

ॐ पुनन्तुमादेवजनाः पुनन्तुमनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पनीहिमा।। शु०य० १९/३९।।[४०९]

---

[४०८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आज्यं तेजः समुद्भूतमाज्यं पाप हरं परम्। आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः।। व्र०चं०पृ. ६१२।।

[४०९] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
मन्त्रार्था सफलाः सन्तु सन्तु पूर्णा मनोरथाः। शत्रुणां बुद्धि नासोऽस्तु मित्राणामुदयस्तव।। बृ०प्र०पृ. १६८।।
यावद्भागीरथी गङ्गा यावद्देवो महेश्वरः। यावत् प्रकाशते भानुस्तावत्वं विजयी भव।। बृ०प्र०पृ. १६८।।

**१३/ १६. अथ देवताविसर्जनम्।**

पुष्पाक्षतप्रक्षेपेण स्थापितदेवान्विसर्जयेत्। हस्ते अक्षतान् गृहीत्वा

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्रयन्तु मरुतः सुदानवऽइन्द्र प्राशुर्भवा सचा।। शु०य० ३४/५६।।[४१०]

इत्युक्त्वा स्थापितदेवतानामुपरि अक्षतान् विकिरेत्। यजमानो वदेत् आवाहितदेवताः स्वस्थाने गच्छत।

**१३/ १७. अथ पीठादिदानम्।**

हस्ते जलमादाय। इमानि गणेशमातृकाग्रहपीठानि समूर्तिकानि सकलशानि सवस्त्राणि अवशिष्टपूजोपस्कराणि च आचार्याय तुभ्यमहं सम्प्रददे। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**१३/ १८. अथाऽग्निविसर्जनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः।
सर्ववीरस्तं जुषस्व स्वाहा।। शु०य० ०८/२२।।[४११]

इत्युक्त्वा अक्षत देवान् समर्पयेत्। यजमानो वदेत। हे यज्ञनारायण, स्वस्थाने गच्छ।

**१३/ १९. अथ क्षमाप्रार्थनम्।**

आवाहनं न जानामि न जानामि तवार्चनम्।
पूजां चैव न जानामि क्षमस्व परमेश्वर।। ९०।। ब्र०स०पृ. ५५।।
अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात् कारुण्यभावेन रक्षस्व परमेश्वर।। ९१।। ब्र०स०पृ. ५५।।
गतं पापं गतं दु:खं गतं दरिद्र्यमेव च।
आगता सुखसंपत्तिः पुण्योऽहं तव दर्शनात्।। ९२।। ब्र०स०पृ. ५५।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।

---

[४१०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यान्तु देवगणाः सर्वे स्वशक्त्या पूजिता मया। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च।। ब्र०स०पृ. ३६९।।

[४११] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गच्छ गच्छ सुरश्रेष्ठ स्वस्थान परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन।। ब्र०स०पृ. ३७०।।

तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर।। ९३।। ब्र०स०पृ. ५५।।
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर।। ९४।। ब्र०स०पृ. ५५।।
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर।। ९५।। ब्र०स०पृ. ५५।।
जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि।
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः।। ९६।।

**१३/ २०. अथ परिपूर्णतावाचनम्।**

अञ्जलिं बद्ध्वा। यजमानो वदेत्। मया यत्कृतं ग्रहशान्त्याख्यं कर्म तत् कालहीनं भक्तिहीनं शक्तिहीनं श्रद्धाहीनं च भवतां ब्राह्मणानां वचनात् सर्वं परिपूर्णमच्छिद्रं चास्तु। ब्राह्मणा वदेयुः। अस्तु परिपूर्णमच्छिद्रम्।

**१३/ २१. अथ प्रैशात्मकपुण्याहवाचनम्।**

स्वपुरतः शुद्धायां भूमौ पञ्चवर्णैस्तन्दुलैःअष्टदलं कृत्वा।

**तत्र भूमिं स्पृष्ट्वा।**

ॐ महीद्द्यौः पृथिविचनऽइमंय्यज्ञम्मीमिक्षताम्।
पिपृतान्नो भरीमभिः ।। शु०य० ०८/३२।।[४१२]

**तत्र यवप्रक्षेप।**

हस्ते यवान् गृहीत्वा।

ॐ ओषधयः सोमवदन्त सोमेन सहराज्ञा।
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि।। शु०य० १२/९६।।[४१३]

इत्युक्त्वा यवान् अष्टदलोपरि प्रक्षिपेत्।

---

[४१२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विश्वाधाराऽसि धरणी शेषनागोपरिस्थिता। उद्धृतासि वराहेण कृष्णेन शतबाहुना।। या०र०पृ. २१।।

[४१३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यवोसि यवराजोसि सर्वोत्पत्तिकरः शुभः। प्राणिनां जीवनोपायस्त्वां भूमौ स्थापयाम्यहम्।। कर्म०पृ. १८०।।

**तत्र कलशस्थापनम् ।**

ॐ आजिघ्रकलशम्मह्यात्त्वाव्विशन्त्विन्दव।
पुनरुर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्क्ष्वो-
रुधारापयस्वतीः पुनर्म्माविशताद्रयिः।। शु०य० ०८/४२।।[४१४]

इत्युक्त्वा अष्टदलोपरि कलशं स्थापयेत्।

**तत्र जलपूरणम्।**

कलशे जलं पूरयन्।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋत
सदन्यसि वरुणस्यऽऋत सदनमसिवरुणस्यऽऋत सदनमासीद ।। शु०य० ०४/३६।।[४१५]

**तत्र गन्धप्रक्षेपः।**

कलशे गन्धं प्रक्षिपन्।

ॐ त्वाङ्गन्धर्व्वाऽअखनंस्त्वामिन्द्रस्त्वाम्बृहस्पतिः।
त्वामोषधेसोमो राजाव्विद्वान्यक्ष्मादमुच्यत।। शु०य० १२/९८।।[४१६]

**तत्र धान्यप्रक्षेपः।**[४१७]

कलशे धान्यानि[४१८] अक्षतान् वा प्रक्षिपन्।

---

[४१४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हेमरौप्यादिसम्भूतं ताम्रजं सुदृढन्नवम्। कलशन्धौतकल्माषं छिद्रव्रणविवर्जितम्।। या०र०पृ. २१।।

[४१५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
जीवनं सर्वजीवानां पावनं पावनात्मकम्। बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम्।। या०र०पृ. २१।।

[४१६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
केशरागरुकंकोलघनसार समन्वितम्। मृगनाभियुतङ्गन्धं कलशे प्रक्षिपाम्यहम्।। या०र०पृ. २१।।

[४१७] संस्कारभास्करकाराः पुण्याहवाचने धान्यप्रक्षेपविधिं न गृह्णन्ति।

[४१८] अत्र सामान्यतया अक्षतान् प्रक्षिपन्ति यजमानाः। किन्तु सप्तधान्यानां प्रक्षेपोऽपि कलशे विधीयते। तद्यथा-
(१) गोधूमाः (२) व्रीहिः (३) यवाः (४) तिला (५) मुद्गाः (६) चणकाः (७) माषाश्च।

ॐ धान्यमसिधिनुहिदेवान्प्राणायत्त्वोदानायत्त्वा व्यानायत्त्वा।
दीर्घामनुप्रसितिमायुषेधान्देवोव: सविता हिरण्यपाणि:
प्रतिगृब्भ्णात्त्वच्छिद्रेण–पाणिनाचक्षुषेत्त्वामहीनाम्पयोसि।। शु०य० ०१/२०।।[४१९]

**तत्र सर्वौषधीप्रक्षेप:।**

कलशे सर्वौषधि तुलसीदलानि सर्षपान् वा हरिद्रां च प्रक्षिपन्।
ॐ याऽओषधी: पूर्व्वाजातादेवेभ्यस्त्रियुगन्पुरा।
मनैनुबभ्रूणामहंशतन्धामानिसप्तच।। शु०य० १२/७५।।[४२०]

**तत्र दूर्वाप्रक्षेप:।**

कलशे दूर्वा: प्रक्षिपन्।

ॐ काण्डात्काणात्प्ररोहन्ती परुष: परुषस्प्परि।
एवानो दूर्व्वेप्प्रतनुसहस्त्रेणशतेन च।। शु०य० १३/२०।।[४२१]

**तत्र पञ्चपल्लवनिक्षेप:।**

कलशे पञ्चपल्लव निक्षिपन्।

ॐ अश्वत्थेवोनिषदनम्पर्ण्णेवोव्वसतिष्कृता।
गोभाजऽइत्किलासथयत्सनवथपुरुषम्।। शु०य० १२/७०।।[४२२]

---

[४१९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
धान्योषधीमनुष्याणां जीवनं परमं स्मृतम्। क्षिप्तं यत्कार्य संभूतं कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८१।।
[४२०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
देवेभ्य: पूर्वतो जाता देवेभ्य स्त्रियुगं पुरा। शतं तनुं च या बभ्रुर्जीवनं जीवनाय च।। सु०वि०पृ. २९।।
[४२१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
दूर्वेऽमृतसंपन्ने* शतमूले शतांकुरे। शतं पातक संहर्त्री शतमायुष्य वर्धिनी।। बृ०प्र० ११४।।
* अत्र दूर्वे ह्यमृत सम्पन्ना इति पाठ: याज्ञिकरत्ने प्रदत्त:।
[४२२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अश्वत्थोदुम्बरप्लक्षं चूतन्यग्रोधपल्लवा:। पञ्चभृङ्गा इति प्रोक्ता: सर्वकर्म सुशोभना:।। कर्म०पृ. १८२।।
(१) अश्वत्थ (२) उदुम्बर (३) प्लक्ष (४) आम्र (५) न्यग्रोधस्य च पल्लवान् निक्षिपेत्।

**तत्र पुष्प प्रक्षेपः।**[४२३]

हस्ते पुष्पं गृहीत्वा।

ॐ ओषधि: प्रति मोदध्वं पष्पवती: प्रसूवरी:।
अश्वाऽइव सजित्वरीर्वीरुध: पारयिष्णव:।। शु०य० १२/७७।।[४२४]

इत्युक्त्वा कलशे ऋतुकालोद्भव पुष्पं प्रक्षिपेत्।

**तत्र सप्तमृत्प्रक्षेपः।**

सप्तमृद: प्रक्षिपन्।

ॐ स्योनापृथिविनोभवान्रृक्षरानिवेशनी।
यच्छान: शर्म्मसप्प्रथा:।। शु०य० ३६/१३।।[४२५]

**तत्र पूगीफलप्रक्षेपः।**

पूगीफलं प्रक्षिपन्।

ॐ या: फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणी:।
बृहस्पितप्प्रसूतास्तानोमुञ्चन्त्वंहस:।। शु०य० १२/८९।।[४२६]

**तत्र पञ्चरत्नप्रक्षेपः।**

पञ्चरत्नानि प्रक्षिपन् तदभावे अक्षतान् प्रक्षिपन्।

---

[४२३] ब्रह्मनित्यकर्मसमुच्चयकारा: इमं विधिं न स्वीकुर्वन्ति।

[४२४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
विविधं पुष्प संजातं देवानां प्रीतिवर्धनम्। क्षिप्तं यत् कार्य सम्भूतं कलशे प्रक्षिपाम्यहम्।। सु०वि०पृ. ३०।।

[४२५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अश्वस्थानात्गजस्थानाद्वल्मीकात्संगमाद् ह्रदात्। राजद्वाराच्च गोष्ठाच्च मृदमानीय नि:क्षिपेत्।। कर्म०पृ. १८२।।
(१) अश्वस्थान (२) गजस्थान (३) वल्मीक (४) सङ्गम (५) ह्रद (समुद्र) (६) राजद्वार (७) गोगोष्ठेत्यादि सप्त स्थानेभ्य: मृदमानीय कलशे प्रक्षिपेत्।

[४२६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पूगीफलमिदं दिव्यं पवित्रं पापनाशनम्। पुत्रपौत्रादिफलदं कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८२।।

ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्।
दधद्रत्नानिदाशुषे।। शु०य० ११/२५।।[४२७]

**तत्र हिरण्यप्रक्षेपः।**

कलशे हिरण्यं व्यावहारिकं वा द्रव्यं प्रक्षिपन्।
ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत्।
सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम।। शु०य० १३/०४।।[४२८]

**तत्र रक्तसूत्रवेष्टनम्।**

रक्तसूत्रेण वस्त्रेण वा वेष्टयन्।

ॐ युवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः।
तंधीरासः कवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः।। पा०गृ० ०२/०२/०९।।[४२९]

**तत्र पात्र-श्रीफल स्थापनम्।**

कलशस्योपरि धान्य पूर्णपात्रं श्रीफल सहितं स्थापयन्। अथवा केवल श्रीफलं स्थापयन्।

ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत।
वस्नेवविक्क्रीणावहाऽइषमूर्जं शतक्रतो।। शु०य० ०३/४९।।[४३०]

**वरुणावाहन्।**

---

[४२७] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्। एतानि पञ्चरत्नानि कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८२।।
(१) कनक (२)कुलिश (३)नील (४)पद्मराग (५)मौक्तिकं च कलशे प्रक्षिपेत्।

[४२८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।अनन्तपुण्यफलदं कलशे प्रक्षिपाम्यहम्।। कर्म०पृ. १८२।।

[४२९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
सूत्रं कार्पाससंभूतं ब्रह्मणा निर्मितं पुरा। येन बद्धं जगत्सर्वं वेष्टनं कलशस्य च।। कर्म०पृ. १८१।।

[४३०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
पिधानं सर्ववस्तूनां सर्वकार्यार्थ साधनम्। संपूर्णः कलशो येन पात्रं तत्कलशोपरि।। कर्म०पृ. १८३।।
अत्रपात्रमित्युच्यते किन्तु श्रीफलमेव कलशोपरि स्थापयेत्।

हस्ते जलमादाय। ॐ तत्त्वायामीत्यस्य शुन:शेपऋषि: त्रिष्टुप्छन्द: वरुणोदेवता वरुणावाहने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते अक्षतान् गृहीत्वा वरुणमावाहयेत्।

ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भि:।
अहेडमानोव्वरुणेहबोद्ध्युरुशं समानऽआयु: प्प्रमोषी:।। शु०य० १८/४९।।[४३१]

ॐ भूर्भुव: स्व: अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि। इत्युक्त्वा कलशस्योपरि अक्षतान् समर्पयेत्।

**प्रतिष्ठापनम्।**[४३२]

हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० २/१३।।[४३३]

ॐभूर्भुव:स्व: वरुणाय नम: वरुण सुप्रतिष्ठितो वरदो भव। इत्युक्त्वा कलशे अक्षतान् समर्पयेत्।

**वरुणपूजनम्।**

ततो पञ्चोपचारै:[४३४]वरुणं सम्पूजयेत्।

ॐ[४३५]भूर्भुव: स्व: वरुणाय नम: गन्धं समर्पयामि।
ॐ भूर्भुव: स्व: वरुणाय नम: पुष्पं समर्पयामि।
ॐ भूर्भुव: स्व: वरुणाय नम: धूपं आघ्रापयामि।
ॐ भूर्भुव: स्व: वरुणाय नम: दीपं दर्शयामि ।
ॐ वरुणाय नम: नैवेद्यं निवेदयामि।

---

[४३१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय।
सुपाशस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।। ब्र०स०पृ. ३२१।।

[४३२] संस्कारभास्करकारा: पुण्याहवाचने प्रतिष्ठाविधिं न गृह्णन्ति।

[४३३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतै: सह।। या०र०पृ. ०७।।

[४३४] संस्कारभास्करकारा: षोडशोपचारैरिति पठन्ति।

[४३५] पञ्चोपचारार्थे ॐ वं वरुणाय नम: गन्धं समर्पयामि। ॐ वं वरुणाय नम: पुष्पं समर्पयामि।
ॐ वं वरुणाय नम: धूपं आघ्रापयामि। ॐ वं वरुणाय नम: दीपं दर्शयामि ।
ॐ वं वरुणाय नम: नैवेद्यं निवेदयामि।

इत्यादि पञ्चोपचारैः संपूजयेत्। तत्त्वायामीत्युपरिनिर्दिष्टेन मन्त्रेण पुष्पाञ्जलिं समर्पयेत्। हस्ते जलमादाय। अनेन पञ्चोपचार पूजनेन वरुणः साङ्ग सपरिवारः प्रीयताम् । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**कलशाभिमन्त्रणम्।**

ततो[४३६]ऽनामिकया कलशं स्पृष्ट्वा अभिमन्त्रयेत्।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।। ९७।। ब्र०स०पृ. ३३।।
कुक्षौ तु सागराः सर्वे (सप्तसप्तेत्यपि पाठः) सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।। ९८।। ब्र०स०पृ. ३३।।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः।[४३७]
गायत्री चात्र सावित्री शान्तिः पुष्टिकरी तथा।। ९९।। ब्र०स०पृ. ३३।।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।
गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ।। १००।। ब्र०स०पृ. ३३।।
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर।। १०१।। ब्र०स०पृ. ३३।।

**कलश प्रार्थना।**

अञ्जलिं बध्वा प्रार्थयेत्।

देवदानव संवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भो विधृतो विष्णुना स्वयम्।। १०२।। ब्र०स०पृ. ३४।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।। १०३।। ब्र०स०पृ. ३४।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः।। १०४।। ब्र०स०पृ. ३४।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा।। १०५।। ब्र०स०पृ. ३४।।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।। १०६।। ब्र०स०पृ. ३२१।।

---

[४३६] अत्र संस्कारभास्करकारा गङ्गाद्यावाहनविधिमधिकं स्वीकुर्वन्ति।

[४३७] संस्कारभास्करकारा गायत्रीति, गङ्गेचेति, ब्रह्माण्डोदरेति च श्लोकत्रयं न पठन्ति।

पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक।
पुण्याहवाचनं यावत्तावत्त्वं सन्निधौ भव।। १०७।। ब्र०स०पृ. ३२१।।

ॐ भुर्भुव:स्व: अपां पतये वरुणाय नम:। नमस्कारान् समर्पयामि।

ब्राह्मणा वदेयु:।

सम्पूज्य गन्ध माल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्।
धर्मकर्म्मणि माङ्गल्ये संग्रामेऽद्भुत दर्शने।। १०८।। सु०वि०पृ. ३४।।
पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते।
एतदेव निरोङ्कारं कुर्यात् क्षत्रिय वैश्ययो:।। १०९।। सु०वि०पृ. ३४।।

ततो यजमान: युग्मब्राह्मणान् गन्धमाल्यवस्त्रदक्षिणादिभि: सम्पूज्य तान् उदङ्मुखानुपवेश्य पूजित कलशं कराभ्यामालभ्य।

यजमानो वदेत्। मम गृहे ॐ पुण्याहं भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयु:। ॐ अस्तु पुण्याहम्। ॐ अस्तु पुण्याहम्। ॐ अस्तु पुण्याहम्।
यजमानो वदेत्। मम गृहे ॐ कल्याणं भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयु:। ॐ अस्तु कल्याणम्। ॐ अस्तु कल्याणम्। ॐ अस्तु कल्याणम्।
यजमानो वदेत्। मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयु:। ॐ कर्म ऋध्यताम्। ॐ कर्म ऋध्यताम्। ॐ कर्म ऋध्यताम्।
यजमानो वदेत्। मम गृहे ॐ स्वस्ति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयु:। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति।
यजमानो वदेत्। मम गृहे ॐ श्रीरस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयु:। ॐ अस्तु श्री:। ॐ अस्तु श्री:। ॐ अस्तु श्री:।

इति पुण्याहं वाचयित्वा मन्त्राशिषो गृहीत्वा ।

**तिलकाऽऽशीर्वाद:।**

श्रीवर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायु:।। ११०।।
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णो: सम्पूर्णं स्यादित श्रुति:।। १११।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्।। ११२।। नै०प्र०पृ. १४७।।
यस्यस्मरणमात्रेण जन्मसंसार बन्धनात्।

विमुच्यते नमस्तस्मै विष्णवे प्रभ विष्णवे।। ११३।। वि०सह० ध्यानम्।।

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।
ॐ हरये नमः। ॐ हरये नमः। ॐ हरये नमः।

ततो ब्राह्मणान् भोजयित्वा दीनानाथाँश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः सन्तुष्टो हविष्यं[४३८] भुञ्जीत।।

**।। इति ग्रहशान्तिप्रयोगः।।**

**उपसंहारः।**

अयमत्राशयो यत् यस्मिन् कास्मिंश्चिदपि पूजनार्चनविधौ याज्ञिके श्रौते वा स्मार्ते वा कर्मणि प्रकाशितग्रन्थानामनुसारेण प्रतीकरूपेण मन्त्रा विधिजिज्ञासूनां च सौकर्यार्थं मन्त्रप्रतीकानि विहायाऽत्र सम्पूर्णमन्त्रा सम्पूर्णविधि वाक्यानि च सम्पादितानि। अतः समग्रो विधिःपूर्णो जात इति सम्।

---

[४३८] हविष्यमिति हविष्यभोजनं पवित्रं सात्विकं भोजनं यच्च पलाण्डुलशुनादिरहितं ब्राह्मणसूदेन च पक्वम्।

# चतुर्थी संस्कृतिः।

## गर्भाधानाद्युपनयनान्ताः संस्काराः।

## पृष्ठानि २१३ – २८२।

# चतुर्थी संस्कृतिः।
# गर्भाधानाद्युपनयनान्ताः संस्काराः।
# ।। अथ षोडशसंस्काराः।।

## ।। गर्भाधानसंस्कारप्रयोगः।। १४।।
## (संस्कारः ०१।)

ऋतुदर्शनमारभ्य आद्यरात्रिचतुष्कं पर्वादीनि षड्दिनानि च वर्जयित्वा ज्योतिःशास्त्रोक्ते शुभे दिने शुभे काले पुत्रकामिना युग्मासु रात्रिषु कन्यार्थिना तु अयुग्मासु रात्रिषु च गर्भाधानं कार्यम्। गर्भाधान-सीमन्तोन्नयने तु स्त्रीसंस्कारत्वाद् प्रतिगर्भंनावर्तेते। किन्तु प्रथमगर्भे एव कार्ये। इति धर्मसिन्धुकाराणां वचनं संस्कारभास्करकारा (पृ. ९८) गृह्णन्ति।

अथर्तुमती स्त्री नूतनवस्त्रादिकं परिधाय शुभासने प्राङ्मुखी समुपविशेत्। ततः पतिपुत्रवतिभिः कुलवृद्धसुमङ्गलस्त्रीभिर्गोधूमैर्नारिकेलादिनानाफलैस्तत्पल्लवैश्च प्रवेशनं यथावृद्धाचारं कारयेत्।
शान्त्यभावे पत्न्या सह कर्ता प्रातरभ्यङ्ग स्नानं कृत्वा तया सहोपविश्य आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

ब्राह्मणा वदेयुः। शुभमुहूर्तंक्षेमङ्कल्याणमारोग्यमैश्वर्यं निर्विघ्नेन शुभं भवतु।

अगजाननपद्मार्कं गजाननमहर्निशम्।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे।। ११४।।
गणनाथ-सरस्वती-रवि-शुक्र-बृहस्पतिन्।
पञ्चैतान् संस्मरेन्नित्यं वेदवाणिं प्रवर्तयेत्।। ११५।।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

### १४/ ०१. अथ सङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्या मम भार्यायाः प्रथमगर्भातिशयद्वारा अस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणार्थं गर्भाधानसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[४३९] मातृकापूजनं नान्दीश्राद्धं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघण्टार्चनं दीपपूजनं सूर्यपूजनं आसनादिविधिं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टा-पूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[४४०] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्य- मन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

कर्तुः क्षपाकर्मणो मन्त्राभिज्ञाने सति सूर्यमवलोक्य क्षपायामभिगमनादिकं कुर्यात्। मन्त्राणामभिज्ञाने तु सूर्यावलोकनोत्तरम्

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर।
दिवाकर नमस्तुभ्यं प्रभाकर नमोस्तुते।। ११६।।

इति मन्त्रजपमात्रं नाभिदेशाभिमर्शनादि हृदयालम्भनान्तं गर्भाधानाख्यं कर्म कृत्वा तदङ्गतया ब्राह्मणान् सम्भोज्य तेभ्यश्च दक्षिणां दत्वा तेषामाशिषो गृहीत्वा मातृगणं विसर्जयेदिति। आदित्यं गर्भमित्यादित्यमवेक्षेत्।

ॐ आदित्यं गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम्।
परिवृङ्ग्धि हरसा माभिमंस्थाः शतायुषं कृणुहि चीयमानः।। शु०य० १३/४१।।[४४१]

---

[४३९] अत्र पुण्याहवाचनान्ते प्रजापतिः प्रीयतामिति वदेत्।

[४४०] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका-(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

[४४१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नमः सवित्रे जगदेक चक्षुषे जगत्प्रसूति स्थिति नाश हेतवे।

अनेन मन्त्रेण दम्पतीभ्यां सूर्यावलोकनं नमस्कारश्च कार्य:।

**१४/०२. अथ नाभ्यभिमर्श:।**

तत: सायङ्कालीनं नित्यं सम्पाद्यौभौश्वेतवस्त्रधारणानुलेपनमाल्याभरणालङ्कृतो सदीप शयनागारे प्रविश्य तत्र सुप्रसारितशय्यामारुह्य सुमुहुर्ते प्राक्शिर: शयितस्त्रियमुत्तानां कृत्वा भर्ता तस्या: नाभिदेशे हस्तं दत्वाऽभिमृश्य जपेत्।

ॐ पूषा भगं सविता मे ददातु रुद्र: कल्पयतु ललामगुं विष्णुर्योनिं कल्पयतु।
त्वष्टा रूपाणि पिंशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु मे।। ब्रा० ।।[४४२]
गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टके।
गर्भं ते अश्विनौ देवा वाधत्तां पुष्करस्त्रजौ।।
तेजो वैश्वानरो दद्यात्। अथ ब्रह्मानुमन्त्रयते। ब्रह्मा गर्भं दधातु ते।।

**१४/०३. अथाऽभिगमनम्।**

ॐ गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा
मन्थामि जागतेन त्वा छन्दसा मन्थामि।। शु०य० ०५/०२।।[४४३]
ॐ रेतो मूत्रँ विजहाति योनिं प्रविशदिन्द्रियम्।
गर्भो जरायुणा वृत उल्बजहाति जन्मना।
ऋतेन सत्यमिन्द्रियंविपानं शुक्रमन्धसऽ-
इन्द्रस्येन्द्रियमिदं पयोमृतं मधु।। शु०य०१९/७६।।

**१४/०४. अथ हृदयालम्भनम्।**

अभिगमनोत्तरं तस्या: दक्षिणस्कन्धोपरि हस्तं नीत्वा तेन हृदयमालभेत्।

ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्।

---

त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चि नारायण शङ्करात्मने।। कर्म०पृ. १२।।

[४४२] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टके। गर्भं ते अश्विनौ देवा वाधत्तां पुष्करस्त्रजौ।।
तेजो वैश्वानरो दद्यात्। अथ ब्रह्मानुमन्त्रयते। ब्रह्मा गर्भं दधातु ते।। कर्म०पृ. २४८।।

[४४३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गायत्र्या त्रिष्टुभात्वाऽभि-मन्थामि जगती शुभै:। रेतो योनिं प्रविशति तदुल्बं जन्मना तथा।। परम्परया।।

वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं
जीवेम शरदः शतं शृणुयाम शरदः शतम्।। पा०गृ०सू० ०१/११/०९।।[444]

**१४/०५. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान् दशसङ्ख्याकान् ब्राह्मणान् भोजयिष्ये। ब्राह्मणेभ्यो दक्षिणां दत्वा तेषामाशिषो गृहीत्वा। हस्ते अक्षतान् गृहीत्वा।

यान्तु मातृगणाः सर्वे पूजामादाय माम किम्।
इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय च।। ११७।। कर्म०पृ. २४८।।

इत्युक्त्वा देवस्योपरि अक्षतान् समर्पयेत्। इति मातृगणं विसर्जयेत्।

**।। इति गर्भाधानसंस्कारप्रयोगः।।**

## ।। पुंसवनसंस्कारप्रयोगः।। १५।।[445]
## (संस्कारः ०२।)

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/१४/०२) "पुरा स्पन्दत इति मासे द्वतीये तृतीये वा।।" इति पुंसवनसंस्कारविषयेकं सार्वत्रिकं नियमं विदधाति।

तत्र गर्भाधानोत्तरं द्वितीये तृतीये मासि शुभेऽहनि गर्भिणीमुपवासं कारयित्वा शुचिः स्नात्वा भर्ता आचमनम् प्राणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

**१५/०१. अथ सङ्कल्पः।**

---

[444] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम्।
दारिद्र्य दुःख क्षयकारणं च पुनातुमां तत् सवितुर्वरेण्यम्।। कर्म०पृ. २६६।।

[445] पुंसवनं तु गर्भसंस्कारत्वात्प्रतिगर्भे कार्यमिति धर्मसिन्धौ। पुंसवनसंस्कारे गुरुशुक्रास्तमलमासादिदोषो नास्तीति संस्काररत्नमालायाम्।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्यां मम भार्यायामुत्पत्स्यमानस्य गर्भस्यबैजिकगार्भिकदोषपरिहारार्थं पुंरूपताज्ञानोदयप्रतिरोध–परिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[४४६] मातृकापूजनं नान्दीश्राद्धं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अत: परमावश्यकत्वेन करणीया विधय: तृतीयसंस्कृते: सर्वसंस्कार–सामान्यविधि(०१/–)–प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/–) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/–) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वाद: (०३/०५), पात्रे उदकसेक: (०३/०६), अभिषेक: (०३/०७), मातृकापूजने (०४/–)[४४७] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्प: (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजप: (०५/–), नान्दीश्राद्धप्रयोगे (०६/–) पाद्यदानम् (०६/०१), सङ्कल्प: (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

ततस्तस्मिन्नहनि गर्भिणीं स्नापयित्वाऽहते वाससी परिधाप्योपवासस्य रात्रौ न्यग्रोधावरोहा–ङ्कुराँश्चोदकेन पिष्ट्वा वस्त्रगालितं तदुदकं गर्भिणीदक्षिणनासिकायामासिञ्चति भर्ता।

## १५/०२. अथ न्यग्रोधाङ्कुररससेचनम्।

तत्र मन्त्रौ–

ॐ हिरण्यगर्भ: समवर्त्तताग्रेभूतस्यजात: पतिरेकऽआसीत्।
सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ।। शु०य० १३/०४।।[४४८]
ॐ अद्भ्य: सम्भृत: पृथिव्यै रसाच्च विश्वकर्मण: समवर्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमा जानमग्रे।। शु०य० ३१/१७।।

इत्युक्त्वा भर्ता गर्भिणीदक्षिणनासिकायाम् रसमासिञ्चेत्।

---

[४४६] अत्र पुण्याहवाचनान्ते प्रजापति: प्रीयतामिति वदेत्।

[४४७] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका–(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१–०६) न गृह्यन्ते।

[४४८] अत्र यज्ञोपवीतरहितानां कृते केवल नाममन्त्रा गृह्यन्ते।

ॐ हिरण्यगर्भाय नम:। ॐ पृथिव्यैनम:। ॐ विश्वकर्मणे नम:। ॐ त्वष्ट्रे नम:।

### १५/०३. अथ गर्भाभिमन्त्रणम्।

कूर्मपित्तं[४४९] चोपस्थे कृत्वा गर्भमभिमन्त्रयेत्।

ॐ सुपर्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ ।
स्तोमऽआत्माच्छन्दां स्यङ्गानि यजूंषि नाम ।
साम ते तनूर्वामदेव्यँ यज्ञायज्ञियं पुच्छन्धिष्ण्याः शफाः ।
सुपर्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ।। शु०य० १२/०४।।

### १५/०४. अथ ब्राह्मणभोजनसङ्कल्पः।

हस्ते जलमादाय। कृतस्यकर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान् दशसङ्ख्याकान् ब्राह्मणान् भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। ब्राह्मणेभ्यो दक्षिणां दत्वा तेषामाशिषो गृहीत्वा।
हस्ते अक्षतान् गृहीत्वा देवान् विसर्जयेत्।

यान्तु मातृगणाः सर्वे स्वशक्त्या पूजिता मया।
इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय च।। ११८।। कर्म०पृ. २४८।।

इत्युक्त्वा देवस्योपरि अक्षतान् समर्पयेत्। इति मातृगणं विसर्जयेत्।

**।। इति पुंसवनसंस्कारप्रयोगः।।**

## ।। सीमन्तोन्नयनसंस्कारप्रयोगः।। १६।।
## (संस्कारः ०३।)

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/१५/०३) "प्रथमगर्भे मासे षष्ठेऽष्टमे वा ।।" इति सीमन्तोन्नयनसंस्कारविषयेकं सार्वत्रिकं नियमं विदधाति।

प्रथमे गर्भे षष्ठेऽष्टमे वा मासे पुन्नक्षत्रे चन्द्रताराग्रहानुकूले दिने पत्न्या सह मङ्गलस्नानं कृत्वा अहतवासोयुगालङ्कृतः शुचिदर्भपाणिः पत्न्या सह बहिःशालायां शुभासने प्राङ्मुख उपविश्य। आचमनं प्रणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम्

---

[४४९] कूर्मपित्तमिति जलम्।

(०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

**१६/०१. अथ सङ्कल्पः।**

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्या मम भार्यायाः तनुरुधिरप्रियालक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदानभूतमहा-लक्ष्मीसमावेशनद्वारा प्रतिगर्भबीजसमुद्भववैनोनिबर्हणजनकातिशयद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्त्रीसंस्काररूपं सीमन्तोन्नयनसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[४५०] अविघ्नपूजनं मण्डपस्थापनं मातृकापूजनं वसोर्द्धारामायुष्यमन्त्रजपं नान्दीश्राद्धं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कारसामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[४५१] अविघ्नमातृकापूजनम् (०४/०१), मण्डपमातृकापूजनम् (०४/०२), गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

तत्र बहिःशालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं मङ्गलनामाग्नेः स्थापनं च कुर्यात्।

---

[४५०] अत्र पुण्याहवाचनान्ते प्रजापतिः प्रीयतामिति वदेत्।

[४५१] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

अत: परमावश्यकत्वेन करणीया विधय: तृतीयसंस्कृते: सर्वसंस्कारसामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विगवरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्या: वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/–) सङ्कल्प: (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्कारा: (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/–) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

ततो दक्षिणतो ब्रह्मासनादि आज्यसादनानन्तरं तण्डुलतिलमुद्गानां पृथक्पृथगासादनम्। तत्र उपकल्पनीयानि। मृदुपीठम्। युग्मान्यौदुम्बरफलान्यपकवान्येकस्तबकनिबद्धानि। त्रयोदशपरिमाणका- स्त्रयोदर्भपिञ्जुला:। त्र्येणी शलली। वीरतरशङ्कु:।(अश्वत्थो बैल्व: शारेषीको वा) पूर्णपात्रम्। वीणागाथिनौ चेति। आज्यनिर्वपणानन्तरं चरुपात्रे मुद्गप्रक्षेपं कृत्वाऽधिश्रयणम्। ईषच्छ्रृतेषु तिलतण्डुलप्रक्षेप:। पर्यग्निकरणान्ते आघारावाज्यभागौ स्रुवेण जुहुयात्।

### १६/०२. अथाऽऽघाराज्यहोम:।

स्थानोपविष्ट: दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्ध: उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेप:)
   यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेप:)
   यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेप:)
   यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेप:)
   यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्याग:।

### १६/०३. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[४५२]

ॐभूर्भुव:स्व: मङ्गलनाम्ने वैश्वानराय नम:। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

ततश्चरुमभिधार्य स्रुवेण चरुं जुहुयात्।

ॐ प्रजापतये। इदं प्रजापतये न मम।

इति हुत्वा सथालीपाकेनोत्तरार्द्धात्स्विष्टकृत्।

## १६/ ०४. अथ नवाऽहुतिहोम:।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।
तत: आज्येन भूराद्या नवाहुतय:।

१.ॐ भू: स्वाहा।[४५३] इदमग्नये न मम।
२.ॐ भुव: स्वाहा। इदं वायवे न मम।
३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।

---

[४५२] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामह:। तथा त्वम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

[४५३] अत्र यज्ञोपवीतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतय: दीयन्ते।
१. अग्नये नम: स्वाहा। इदम् अग्नये न मम।
२.वायवे नम: स्वाहा। इदं वायवे न मम।
३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।
९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः।
यजिष्ठोवह्नितमः शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।
इदमग्निवरुणाभ्यां न मम।
५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणंरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/०४।।
इदमग्निवरुणाभ्यां न मम।
६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषज स्वाहा।।
इदमग्नये अयसे न मम।
७. ॐ येते शतं वरुणये सहस्रंयज्ञियाः पाशाविततामहान्तः।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।
८. ॐ उदुत्तम वरुणपाशमस्मदवाधमविमध्यमश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।
९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

ततः संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्पः। कृतस्य सीमन्तोन्नयनसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।
अग्नेः पश्चात् प्रणीताविमोकः।
ॐ आपः शिवाः शिवतमाः शान्ताः
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

ततोऽग्नेः पश्चाद्भद्रपीठनिधानम्। तदुपरि गर्भवतीमुपवेशयेत्।

## १६/ ०५. अथ विनयनम्।

ततो युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जुलैस्त्रेण्या शलल्या वीरतरशङ्कुना पूर्णपात्रेण चेत्येतैः सर्वैः पुञ्जीकृतैः सीमन्तं मूर्ध्निं विनयति[४५४] भर्ता। ततो विनयनम्।

१. ॐ भूर्विनयामि।

[४५४] ललाटान्तरमारभ्य केशान्द्धिधा करोति भर्ता।

२. ॐ भुवर्विनयामि।
३. ॐ स्वर्विनयामि।
इति त्रिभिर्मन्त्रैस्त्रिर्विनयति।

**१६/०६. अथ वेणीबन्धनम्।**

तत औदुम्बरस्यादिपञ्चकस्य वेण्यां बन्धनम्।

ॐ अयमूर्जावतोवृक्षऽऊर्जीव फलिनी भव।। पा०गृ०सू० ०१/१५/०६।।

ततो भर्ता वीणागाथिनो राजानं सङ्गायेतामिति प्रैषमाह। ततश्च तौ सोत्साहौ गायेताम्।

**१६/०७. अथ गाथागानम्।**

गाथामन्त्रः-
ॐ सोमऽएवनो राजेमानुषीः प्रजाः।
अविमुक्तच्चक्रऽआसीरंस्तीरेतुभ्य**मसा**विति।। पा०गृ०सू ०१/१५/०८ ।।

असौ-स्थाने समीपावस्थितयाः नद्या नामग्रहणं स्त्र्येव करोति। सा च गङ्गायमुनेत्येवमा-दिप्रथमान्तं नाम गृह्णाति।

**१६/०८. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान्दशसङ्ख्याकान् ब्राह्मणान्भोजयिष्ये। तेन श्रीकर्माङ्गदेवताः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ब्राह्मणान् गन्धादिभिः सम्पूज्य। तेभ्यश्च दक्षिणां दत्वा तेषाम् आशिषो गृहीत्वा अग्निं विसृज्य मातृणां विसर्जनं कार्यम्।

हस्ते अक्षतान् गृहीत्वा देवान् विसर्जयेत्।

यान्तु मातृगणाः सर्वे स्वशक्त्या पूजिता मया।
इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय च।। ११९।। कर्म०पृ. २४८।।

इत्युक्त्वा देवस्योपरि अक्षतान् समर्पयेत्। इति मातृगणं विसर्जयेत्।

**।। इति सीमन्तोन्नयनसंस्कारप्रयोगः ।।**

**१६/०९. अथ शीघ्रप्रसवोपायः।**

हिमवत्युत्तरे पार्श्वे शबरीनाम यक्षिणी।
नूपुरशब्देन विशल्या स्यात्तु गर्भिणी स्वाहा।। १२०।। ब्र०स०पृ. ३७७।।

इति मन्त्रेणैकविंशतिदूर्वाङ्कुरैरकपलं तिलतैलं प्रदक्षिणमावर्तयन्नष्टशतं मन्त्रं जपयित्वा तत्तैलं कञ्चित्पाययेच्छेषमुदरे लेपयेदिति।

**१६/१०. अथ सुखप्रसवयन्त्रम्।**

यन्त्रप्रकाशनामके ग्रन्थे सुखप्रसवयन्त्रमेवं वर्णितम्।

गजाग्निवेदा[४५५] उडुराट्शराङ्का रसर्षिपक्षा इति हि क्रमेण।
लिखेत्प्रसूतेः समये गृहे वै सुखेन नार्यःप्रसवन्ति शीघ्रमिति।। १२१।। ब्र०स०पृ. ३७७।।

| | | |
|---|---|---|
| ८ | १ | ६ |
| ३ | ५ | ७ |
| ४ | ९ | २ |

इदं च यन्त्रं भूर्जपत्रे कर्गजपत्रे वा कुङ्कुमेन रक्तमष्या वा लिखित्वा प्रसवदिन पर्यन्तं गर्भिण्या उपधानस्याऽधः रक्षित्वा प्रसवान्ते नद्यां वा सरोवरे वा विसर्जनीयम्।

**।। इति शिघ्रप्रसवोपायः ।।**

**।। जातकर्मसंस्कारप्रयोगः ।। १७ ।।**

**(संस्कारः ०४।)**

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/१६/०३) "जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननाऽऽयुष्ये करोति।।" इति जातकर्मसंस्कारविषयेकं सार्वत्रिकं नियमं विदधाति।

जातकापत्यस्य तातः पुत्रं जातमात्रं श्रुत्वा सचैलं स्नायाज्जातकर्माख्यसंस्कारं कुर्यात्।[४५६]

[४५५] अत्र पञ्चदशाक्षर मेलन यन्त्रोद्धारः प्रदत्तः। तद्यथा यन्त्रस्य स्तम्भत्रयेऽधोगामिनः गज(=८) अग्नि(=३) वेदाः(=४) उडुराट्(=१) शर(=५) अङ्काः( =९) रस(=६) ऋषि(=७) पक्षाः(=२) इत्येवं पठ्यते।

बटुना सह यजमानो मङ्गलस्नातः आचमनं प्रणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

**१७/०१. अथ सङ्कल्पः।**

हस्ते जलामादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम कुमारस्य जातकर्मनामकर्मनिष्क्रमणान्नप्राशनचौलान्तानां संस्काराणां स्वस्व[४५७]काले अकरणजनितप्रत्यवायपरिहारार्थं अना[४५८]दिष्टं प्रायश्चित्तं होष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[४५९] मातृकापूजनं नान्दीश्राद्धं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[४६०] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६),

---

[४५६] यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते।। ब्र०स०पृ. ३७७।।

[४५७] यदि स्वस्वकाले क्रियते तदा प्रतिसंस्कारे आदौ गणपतिपूजनं पुण्याहवाचनं मातृकापूजनपूर्वकम् आभ्युदयिकं श्राद्धं विधेयम्। यदि कालान्तरे एकस्मिन् दिवसे क्रियते तदा पूर्वोक्तरीत्यापि मातृणां पूजनम् आभ्युदयिकं श्राद्धम् आदौ कर्तव्यं न पृथक् पृथक्।

[४५८] प्रतिसंस्कारं वाऽनादिष्टहोतव्यं नात्र ब्रह्मोपवेशनादि।

[४५९] अत्र पुण्याहवाचनान्ते प्रजापतिः प्रीयतामिति वदेत्।

[४६०] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

तत्र बहि:शालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं विट्नामाग्नेः स्थापनं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विगवरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/–) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/–) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

### १७/०२. अथाऽनादिष्टप्रायश्चित्तहोमः।

ततो यजमानः ग्रहयज्ञस्थण्डिले पञ्चभूसंस्कारपूर्वकम् विट्नामाग्निं स्थापयेत्। सुवासिन्या आनीतमग्निमाग्नेय्यां स्थापयित्वा यजमान आचार्यो वा ॐ हुं फट् इति क्रव्यादांशं नैर्ऋत्यां परित्यज्य वदेत् विट्नामानमग्निम् आवाहयामि स्थापयामि। इत्यग्निं संस्थाप्य। आज्यं निरूप्य। अधिश्रित्य। स्रुवं प्रतप्य। सम्मृज्य उद्वास्य उत्पूय अवेक्ष्य जुहुयात्। ततो नवाहुतीदद्यात्।

### १७/०३.अथाऽऽघाराज्यहोमः।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

## १७/ ०४. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[४६१]

ॐभूर्भुव:स्व: विट्नामाग्नये नम:। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

## १७/ ०५. अथ नवाऽहुतिहोम:।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।
तत: आज्येन भूराद्या नवाहुतय:।

१.ॐ भू: स्वाहा।[४६२] इदमग्नये न मम।
२.ॐ भुव: स्वाहा। इदं वायवे न मम।
३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।
४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठा:।
यजिष्ठोवह्नितम: शोशुचानोविश्वाद्द्वेषा सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/३।।

---

[४६१] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामह:। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

[४६२] अत्र यज्ञोपवीतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतय: दीयन्ते।
१. अग्नये नम: स्वाहा। इदम् अग्नये न मम।
२. वायवे नम: स्वाहा। इदं वायवे न मम।
३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।
९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणरराणोवीहिमृडीक सुहवोनऽएधिस्वाहा।। शु०य० २१/४।।
इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणं ये सहस्रंयज्ञिया: पाशावितताममहान्त:।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुत: स्वर्का: स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।

९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

तत: संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्ति:। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्प:। कृतस्य जातकर्मसंस्काराख्यस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।
अग्ने: पश्चात् प्रणीताविमोक:।
ॐ आप: शिवा: शिवतमा: शान्ता:
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

हस्ते जलमादाय। अनेन अनादिष्टप्रायश्चित्तहोमकृतेन अस्य मम कुमारस्य जातकर्मादि चौलान्तानां संस्काराणां कालातिक्रमदोषनिवृत्तिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्य मम कुमारस्य जातकर्मस्वकालातिक्रमदोषपरिहारार्थं पादकृच्छ्ररूपप्रायश्चित्तं रजतप्रत्याम्नायद्वारा अहमाचरिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। अनेन अनादिष्टप्रायश्चित्तकृतेन अस्य मम कुमारस्य जातकर्मस्वकालातिक्रमदोषनिवृत्तिपूर्वकजातकर्मकरणाधिकारसिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। इत्यनादिष्टप्रायश्चित्तहोम:।

**१७/०३. अथ जातकर्मसंस्कारविधि:।**

ततो यजमानः आचमनं प्राणायामं  सङ्कल्पं च कुर्यात्।

**१७/ ०४. अथ सङ्कल्पः।**

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अस्य मम कुमारस्य गर्भाम्बुपानजनितसकलदोषनिबर्हणा–युर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनि बर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्मसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**१७/ ०५. अथ गणपतिपूजनम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्।। १२२।। कर्म०पृ. ३२।।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

हस्ते जलामादाय। अनया पूजया सिद्धिबुद्धिसहितमहागणपतिः प्रीयताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**१७/ ०६. अथ मेधाजननम्।**

ततः अनामिकया सुवर्णान्तर्हितया कांस्यपात्रे मधु च घृतं च एकीकृत्य वा केवलं कुमारं प्राशयेत्।

ॐ भूस्त्वयि दधामि।[४६३]
ॐ भुवस्त्वयि दधामि।
ॐ स्वस्त्वयि दधामि।
ॐ भूर्भुवःस्वः सर्वं त्वयि दधामि। इति मन्त्रेण सकृत्प्राशयेत्।

इति मेधाजननम्।[४६४]

**१७/ ०७. अथाऽऽयुष्करणम्।**

---

[४६३] अत्र यज्ञोपवीतरहितानां कृते ह्रीं इति मन्त्रेण कुमारं प्राशयेत्।

[४६४] इदं नालच्छेदनात्प्राक् न कृतं चेत्कालान्तरे न भवत्येव।

कुमारस्य नाभिसमीपे दक्षिणकर्णसमीपे वा अग्निरायुष्मानित्याद्यधो लिखितान् मन्त्रान् जपेत्।

ॐ अग्निरायुष्मान्सवनस्पतिभिरायुष्मांस्तेन त्वाऽऽयुषायुष्मन्तं करोमि।।[४६५]
ॐ सोमऽआयुष्मान्सऽओषधिभिरायुष्मांस्तेन त्वा युषाऽऽयुष्मन्तं करोमि।।
ॐ ब्रह्माऽऽयुष्मत्तद्ब्राह्मणैरायुष्मतेन त्वा युषाऽऽयुष्मन्तं करोमि।।
ॐ देवाऽआयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वा युषाऽऽयुष्मन्तं करोमि।।
ॐ ऋषयऽआयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वा युषाऽऽयुष्मन्तं करोमि।।
ॐ पितरऽआयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वा युषाऽऽयुष्मन्तं करोमि।।
ॐ यज्ञऽआयुष्मान्स दक्षिणाभिरायुष्मन्तस्तेन त्वा युषाऽऽयुष्मन्तं करोमि।।
ॐ समुद्रऽआयुष्मान्स स्रवन्तीभिरायुष्मांस्तेन
त्वा युषाऽऽयष्मन्तं करोमि।। पा०गृ०सू० ०१/१६/०६।।

इत्येतावत्पर्यन्तम् अग्निरायुष्मानित्याद्यारभ्य त्रिर्जपेत्।
तत त्र्यायुषमिति च त्रिर्जपेत्।

ॐत्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषम् तन्नोऽअस्तु त्र्यायुषम्।। शु०य० ०३/६२।।[४६६]

---

[४६५] अत्र यज्ञोपवीतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
शरणागतदीनार्त परित्राण परायणे। सर्वस्यार्ति हरे देवि नारायणि नमोऽस्तुते।। स०श० ११/१२।।
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैःस्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता।। स०श० ०४/१७।।
रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान्।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति।। स०श० ११/२९।।
देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य।। स०श० ११/०३।।
या साम्प्रतं चोद्धतदैत्यतापितै रस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविम्रमूर्तिभिः।। स०श० ०५/८२।।
देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान्।। स०श० ११/३४।।
सर्वाबाधाप्रशमनं त्रैलोक्यस्याऽखिलेश्वरि। एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्।। स०श० ११/३९।।
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते।। स०श० ११/२४।।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते।। स०श० ११/१०।।
उपरि लिखितानां मन्त्राणां स्थाने सप्तसत्यन्तर्गतस्य रात्रिसूक्तस्य देवीसूक्तस्य वा पाठः क्रीयते इत्यऽपि परम्परा। इति शम्।

[४६६] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अश्वत्थामा बलिर्व्यासो हनुमाँश्च विभीषणः। कृपः परशुरामश्च सप्तै ते चिरजीविनः।। कर्म०पृ. २००।।
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेय तथाष्टमम्। एतांश्च प्रणमेन्नित्यं आयुः कामार्थ सिद्धये।। कर्म०पृ. २००।।

पिता यदि कामयेदयं कुमारः सर्वमायुरियादिति तदा कुमारं दिवस्परीत्येकादशभिः ऋग्भिरभिमृशेत्।

ॐ दिवस्परि प्रथमं जज्ञेऽअग्निरस्मद् द्वितीयं परि जातवेदाः।
तृतीयमप्सु नृमणाऽअजस्रमिन्धानऽएनं जरते स्वाधीः।। ऋ० १४/४५/०१,शु०य० १२/१८।।[४६७]
विद्मा तेऽअग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यतऽआजगन्थ।। ऋ० १४/४५/०२,शु०य० १२/१९।।
समुद्रे त्वा  नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवोऽअग्न ऊधन्।
तृतीये त्वा रजसि तस्थिवां समपामुपस्थे महिषा अवर्धन्।। ऋ० १४/४५/०३,शु०य० १२/२०।।
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जनम्।
सद्यो जज्ञानो वि हीमिद्धोऽअख्यदारोदसी भानुना भात्यन्तः।। ऋ० १४/४५/०४,शु०य० १२/२१।।
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः।
वसुः सूनुः सहसो अप्सु राजा विभात्यग्रे उषसामिधानः।। ऋ० १४/४५/०५,शु०य० १२/२२।।
विश्वस्य केतुर्भुवनस्य गर्भऽआ रोदसीऽअपृणाज्जायमानः।
वीळुं चिदद्रिमभिनत् परायञ्जना यदग्निमयजन्त पञ्च।। ऋ० १४/४५/०६,शु०य० १२/२३।।
उशिक् पावकोऽअरतिः सुमेधा मर्तेष्वग्निरमृतो निधायि।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन्।। ऋ० १४/४५/०७,शु०य० १२/२४।।
दृशानो रुक्मऽउर्विया व्यद्यौद् दुर्मर्षमायुः श्रिये रुचानः।
अग्निरमृतोऽअभवद्वयोभिर्यदेनं द्यौर्जनयत् सुरेता।। ऋ० १४/४५/०८,शु०य० १२/२५।।
यस्तेऽअद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने।
प्र तं नय प्रतरं वस्योऽअच्छाभि सुम्नं देवभक्तं यविष्ठ।। ऋ० १४/४५/०९,शु०य० १२/२६।।
आ तं भज सौश्रवसेष्वग्नऽउक्थऽआ भज शस्यमाने।
प्रियः सूर्ये प्रियोऽअग्ना भवात्युज्जातेन भिनददुज्जनित्वैः।। ऋ० १४/४५/१०,शु०य० १२/२७।।
त्वामग्ने यजमानाऽअनु द्यून्विश्वा वसु दधिरे वार्याणि।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः।। ऋ० १४/४५/११,शु०य० १२/२८।।

इममनुप्राण। प्राण इति पूर्वः।
इममनुव्यान। व्यानेति दक्षिणः।
इममन्वपान। अपानेति अपरः।
इममनूदान। उदानेत्युत्तरः।
इममनुसमान। समानेति पञ्चमः उपरिष्टादवेक्षमाणो ब्रूयात्।।पा०गृ०सू०१/१६/११-१५।।[४६८]
स बालो यस्मिन्भूभागे जातो भवतितमभिमन्त्रयते।

---
[४६७] अत्र विधौ ऋग्भिरिति स्पष्टोल्लेखत्वात् ऋग्वेद मन्त्राणां सङ्ख्यानिर्देशोऽपि कृतः। सर्वत्र तु शुक्लयजुवेदस्यैव सङ्ख्या निर्देशो यथावत् प्रदत्त एव।
[४६८] अविद्यमानेषु विप्रेषु स्वयमेव पूर्वादिदिशं परिक्रम्य प्राणेत्यादि ब्रूयात्। नात्र प्रैषः।

ॐ वेद ते भूमिहृदयं दिवि चन्द्रमसि श्रितम्।
वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं
जीवेम शरदः शतं शृणुयाम शरदः शतम्।। पा०गृ०सू० ०१/१६/१७।।[४६९]

अथैनं शिशुमभिमृशति।

ॐ अश्मा भव परशुर्भव हिरण्यमस्रुतम्भव।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्।। पा०गृ०सू० ०१/१६/१८।।

**१७/ ०८. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलामादाय। कृतस्य जातकर्मणः साङ्गतासिद्ध्यर्थं समृत्युक्तान् दशसंङ्ख्याकान् ब्राह्मणान् भोजयिष्ये तेन श्रीकर्माङ्गदेवताः प्रीयन्ताम्। इत्युक्त्वा जलापात्रे जलं क्षिपेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रीयम्।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा।। १२३।। ब्र०स०पृ. ३१९।।

हस्ते जलमादाय। यथाशक्ति जातकर्मसंस्कारविधेः परिपूर्णताााऽस्तु। अस्तु परिपूर्णता। इत्युक्त्वा जलापात्रे जलं क्षिपेत्।

**।। इति जातकर्मसंस्कारप्रयोगः।।**

**१७/ ०९. अथ षष्ठीपूजनप्रयोगः।**

अत्र जातकर्मसंस्कारान्तर्गतं षष्ठीदेवीपूजनं जन्मनः षष्ठे[४७०] दिवसे सायंकाले क्रीयते तत्र नवशिशोः भाले भाग्य लेखनाय विधात्री रूपेण षष्ठीदेवी आगत्य लिखति। यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

**१७/ १०. अथ सङ्कल्पः।**

---

[४६९] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि।
अपां स्वरूप स्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्य वीर्ये।। स०श० ११/०४।।

[४७०] पारस्करगृह्यसूत्रे अथ षष्ठीपूजा। पञ्चमे षष्ठे च दिवसे षष्ठ एव वा पूर्वरात्रौ। (पृ. १९४)

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अनयोः सूतिकाबालकयोः आरोग्याभिवृद्ध्यर्थं सकलारिष्टशान्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विघ्नेशस्य जन्मदायाः षष्ठीदेव्या जीवन्तिकाश्च यथा मिलितोपचारैः पूजनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

एतत् प्रतिमाः कुङ्कुमादिना कुड्ये लेखनीयाः पीठादौ वाऽक्षतपुञ्जेषु पूगीफलेषु विनिवेश्याः। हस्ते अक्षतान् गृहीत्वा।

विघ्नेश इहागच्छ इहतिष्ठ विघ्नेशाय नमः। विघ्नेशमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

जन्मदे इहागच्छ इहतिष्ठ जन्मदायै नमः। जन्मदामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

षष्ठीदेवी इहागच्छ इहतिष्ठ षष्ठीदेव्यै नमः। षष्ठीदेवीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

जीवन्तिके इहागच्छ इहतिष्ठ जीवन्तिकायै नमः। जीवन्तिकामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

**प्रतिष्ठापनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्वे देवासऽइह मादयन्ता मोइँम्प्रतिष्ठ ।। शु०य० ०२/१३।।[४७१]

इत्युक्त्वा अक्षतान् समर्पयेत्। विघ्नेशजन्मदाषष्ठीदेवीजीवन्तिकाभ्यो नमः इति मूलमन्त्रेण षोडशोपचारैः[४७२] पूजनं कुर्यात्।

**१७/ ११. अथ प्रार्थनामन्त्राः।**

षष्ठीदेवि नमस्तुभ्यं सूतिकागृहशालिनी।
पूजिता परमा भक्त्या दीर्घमायुः प्रयच्छ मे।। १२४।। ब्र०स०पृ. ३८२।।
जननी जन्मसौख्यानां वर्धिनी धनसम्पदाम्।
साधिनी सर्वभूतानां जन्मदे त्वां नता वयम्।। १२५।। ब्र०स०पृ. ३८२।।
गौरीपुत्रो यथा स्कन्दः शिशुत्वे रक्षितः पुरा।
तथा ममाप्यमुं बालं षष्ठिके रक्ष ते नमः।। १२६।। ब्र०स०पृ. ३८२।।
सर्व विघ्नानपाकृत्य सर्वसौख्यप्रदायिनि।

[४७१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[४७२] एतेषां षोडशोपचाराणां सविस्तरं पूजनं अस्य महानिबन्धस्य ग्रहशान्त्याख्यस्य ---प्रकरणे मातृकापूजनवर्णने द्रष्टव्यम्।

जीवन्तिके जगन्मातः पाहि नः परमेश्वरि।। १२७।। ब्र०स०पृ. ३८२।।

इति सम्प्रार्थ्य।

हस्ते जलमादाय। अनया पूजया विघ्नेशजन्मदाषष्ठीदेवीजीवन्तिकाः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १७/ ११. अथ बलिदानम्।

ततः सूतिकागृहे सोपस्करं बलिं दद्यात्। बलिद्रव्याय नमः गन्धाक्षतपुष्पाणि समर्पयामि। हस्ते जलमादाय।

क्षेत्रस्याधिपते देवि सर्वारिष्ट विनाशिनि।
बलिं गृहाण मे रक्ष क्षेत्रं सूतिं च बालकम्।। १२८।। ब्र०स०पृ. ३८२।।

इमं सोपस्करबलिं क्षेत्राधिपत्यै देव्यै समर्पयामि। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। गन्धाक्षतपुष्पैः सम्पूजयेत्।

## १७/ १२. अथ राकादिदेवतापूजनम्।

ततः खड्गदेवताः अक्षतपुञ्जेषु आवाहयेत्।

राकायै नमः। राकामावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
अनुमत्यै नमः। अनुमतीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
सिनीवाल्यै नमः। सिनीवालीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
कूह्वै नमः। कुहूमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।
वातघ्न्यै नमः वातघ्नीमावाहयामि स्थापयामि। इत्यक्षतान् क्षिपेत्।

**प्रतिष्ठापनम्।**

हस्ते अक्षतान् गृहीत्वा।

ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मो३ँम्प्रतिष्ठ ।। शु०य० ०२/१३।।[४७३]

[४७३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

इत्युक्त्वा अक्षतान् समर्पयेत्। राकाद्यावाहितदेवताभ्यो नमः इति मूलमन्त्रेण पञ्चोपचारैः सम्पूजयेत्। हस्ते जलमादाय।

अनेन पञ्चोपचारैः पूजनाख्येन कर्मणा राकाद्यावाहितदेवताः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ततो बहिरागत्य द्वारस्योभयतः कज्जलेन द्वे द्वे मातरौ लिखेत्। तासां नामानि।

धिषणा वृद्धिमाता च तथा गौरी च पूतना।
आयुर्दात्र्यो भवन्त्वेता अद्य बालस्य मे शिवाः।। १२९।। ब्र०स०पृ. ३८३।।

धिषणादिचतसृभ्यो मातृभ्यो नमः इति मूलमन्त्रेण पञ्चोपचारैः सम्पूजयेत्। हस्ते जलमादाय।

अनया पूजया धिषणादिचतस्रो मातरः प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। कृतस्य षष्ठीपूजनकर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति सुवासिनीः भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ब्राह्मणेभ्यश्च खाद्यताम्बूलदक्षिणाकं दद्यात्। तेभ्य आशिषो गृह्णीयात्। दशमदिने षष्ठ्यादिदेवता विसर्जयेत्।

**।। इति षष्ठीपूजाविधिः।।**

## ।। नाम[४७४]करणसंस्कारप्रयोगः।। १८।।
## (संस्कारः ०५।)

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/१७/०१) "दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति।।" इति नामकरणसंस्कारविषयेकं सार्वत्रिकं नियमं विदधाति।

जातकस्य एकादशरात्रेव्युष्टे कुमारस्य द्वादशरात्रेव्यष्टे कुमार्याः नामकरणसंस्कार इष्टः।[४७५] ततो शिशोः पिता आचमनं प्राणायामं  सङ्कल्पं च कुर्यात्।

---

[४७४] मन्वादिस्मृतिकारा वर्णधर्मानुसारेण नाम्नां लक्षणानि प्रदर्शयन्ति। यथा मनुस्मृतौ (०२/३१,३२,३३)।

[४७५] यद्यपि मनुस्मृति मते

नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत्। पुण्ये तिथौ मुहुर्ते वा नक्षत्रे वा गुणान्विते।। २/३०।।

दशमे वा द्वादशेऽहनि पारस्करमतानुसारेण

दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति।। ०१/१७/०१।।

तु एकादशेऽहनि नामकरणसंस्कारो विहितः। अथवा कुल परम्परानुसारेण योग्ये दिवसे प्रातः काले नामकरण-संस्कार इति केषांचित पण्डितानां मतम्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९)।

## १८/०१. अथ प्रायश्चित्तसङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम कुमारस्य (कुमार्या वा) नामकरणसंस्कारस्य स्वकालाकृतजनितदोषप्रत्यवायपरिहारार्थं पादकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वारा अहमाचरिष्ये। अनेन पादकृच्छ्ररूपप्रायश्चित्तकृतेन अस्य मम कुमारस्य (कुमार्या वा) नामकरणसंस्कारकरणे अधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। अस्य मम कुमारस्य (कुमार्या वा) नामकरणसंस्कार कर्मणि अधिकारार्थं सूत्रोक्तान् त्रिभ्योऽधिकान् ब्राह्मणान् यथाकाले भोजयिष्ये । तेन अस्य मम कुमारस्य (कुमार्या वा) नामकर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १८/०२. अथ नामकरणविधिः।

ततो यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

## १८/०३. अथ सङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम शिशोः बीजगर्भ समुद्भवैनोनिबर्हणायुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकरणसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९)।

पुनर्जलमादाय। तदङ्गत्वेन पञ्चोपचारैः गणपतिपूजनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १८/०४. अथ पञ्चोपचारगणपतिपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं–
हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु०य० २३/१९।।[४७६]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पुष्पं समर्पयामि । इत्युक्त्वा पुष्पं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः धूपं आघ्रापयामि । इत्युक्त्वा धूपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दीपं दर्शयामि । इत्युक्त्वा दीपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्यं समर्पयेत्।

फलं नैवेद्यं गुड नैवेद्यं वा पूरतो निधाय। ॐ गं गणपतये नमः इत्युक्त्वा जलं संप्रोक्षेत्।
ग्रासमुद्रया[४७७] भोजयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।

नैवेद्य मध्ये पानीयं समर्पयामि। पुनः भोजयेत्।

ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाहा।
ॐ समानाय स्वाहा।
ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत् । हस्त प्रक्षालनं समर्पयामि। इत्युक्त्वा हस्तप्रक्षालनार्थे आचमनीयं जलं समर्पयेत्। मुखप्रक्षालनं समर्पयामि। इत्युक्त्वा मुखप्रक्षालनार्थे

---

[४७६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्।। कर्म०पृ. ३२।।

[४७७] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

आचमनीयं जलं समर्पयेत् । करोद्वर्तनार्थे चन्दनं समर्पयामि । इत्युक्त्वा चन्दनं समर्पयेत् । प्रार्थनापूर्वकं नमस्करोमि ।

हस्ते जलमदाय। अनेन पञ्चोपचारपूजन कृतेन श्रीसिद्धिबुद्धिसहित महागणपति: प्रीयतां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

तत: शिष्टाचारात् कांस्यपात्रे तण्डुलान् प्रसार्य तदुपरि सुवर्णशलाकया गणपतिनामकुलदेवतानाम च लिखेत्। ततो[४७८] मासनाम लेख्यम्। ततो ज्योति:शास्त्रोक्तावकहडाचक्रानुसारेण[४७९] नक्षत्रनाम लेख्यम्। ततो व्यवहारनाम लेख्यम्।

## १८/०५. अथ नामदेवतापूजनम्।

हस्ते जलमादाय। अस्य मम शिशो: बह्वायुष्यप्राप्त्यर्थं नामदेवतापूजनमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

प्रतिष्ठापनार्थे हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
विश्श्वे देवासऽइह मादयन्ता मो३ँम्प्रतिष्ठ ।। शु०य० ०२/१३।।[४८०]

ॐभूर्भुव:स्व: नामदेवतायै नम:। सुप्रतिष्ठितो वरदो भव। इत्यक्षतान् समर्पयेत्।

ॐभूर्भुव:स्व: नामदेवतायै नम: इति मन्त्रेण आवाहनं आसनं पाद्यं अर्घ्यं आचमनीयं स्नानं वस्त्रं यज्ञोपवीतं गन्धपुष्पधूपदीपनैवेद्यफलताम्बूलं हिरण्यदक्षिणां प्रदक्षिणां नमस्कारान्मन्त्रपुष्पाञ्जलिं समर्पयेत्। इति षोडशोपचारै: पञ्चोपचारैर्वा सम्पूजयेत्।

हस्ते जलमादाय। अनया पूजया नामदेवता: प्रीयन्ताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १८/०६. अथाऽभिवादनम्।

ततो दक्षिणतो मातुरुत्सङ्गस्य शिशोर्दक्षिणकर्णे पिता कथयति।

---

[४७८] कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दन:। उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरि:।।
योगीश: पुण्डरीकाक्षो मासनामान्यनुक्रमात्। मार्गशीर्षादिक्रमतो मासनामलेख्यम्।
(कर्मकौशलकारस्तु कार्तिकम् मासम् प्रथमं गृहीत्वा पुण्डरीकाक्षमारभ्य आश्विनमासान्तं योगीशं गणयति (पृ. २५८)। कार्तिकादि मासानां एकादश्यधिष्ठित विष्णु नाम्नां कोष्टकं परिशिष्टम्-११ इत्यत्र प्रदत्तम्।

[४७९] अस्य अवकहडाचक्रस्य झेरोक्ष प्रतिकृति: परिशिष्टम्-१२ इत्यत्र प्रदत्तम्।

[४८०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतै: सह।। या०र०पृ. ०७।।

हे कुमार, त्वं गणपतिभक्तोसि। सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि।
ब्राह्मणा वदेयु:। आयुष्मान् भव सौम्य।
हे कुमार, त्वं कुलदेव्या भक्तोसि। सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि।
ब्राह्मणा वदेयु:। आयुष्मान् भव सौम्य।
हे कुमार, त्वं मासनाम्ना अमुकशर्मासि। सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि।
ब्राह्मणा वदेयु:। आयुष्मान् भव सौम्य।
हे कुमार, त्वं नक्षत्रनाम्ना[४८१] अमुकशर्मासि। सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि।
ब्राह्मणा वदेयु:। आयुष्मान् भव सौम्य।
हे कुमार, त्वं व्यवहारनाम्ना अमुकशर्मासि। सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि।
ब्राह्मणा वदेयु:। आयुष्मान् भव सौम्य।

ॐ वेदोऽसि येन त्वं देव वेद देवेभ्यो
वेदोऽभवस्तेन मह्यं वेदो भूयाः।। शु०य० ०२/२१।।[४८२]

इति मन्त्रेणाशिषं शिशवे दद्यु:। हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० ०२/१३।।[४८३]
ॐ एषवै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति।। ।।

अमुकनाम्ना प्रतिष्ठितं भवतु । इत्युक्त्वा ब्राह्मणाः शिशोः उपरि अक्षतान् विकिरेयु:।

हे कुमार, त्वं सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि।
ब्राह्मणा वदेयु:। आयुष्मान् भव सौम्य।
अथैनं शिशुमभिमृशति।

ॐ अश्मा भव परशुर्भव हिरण्यमस्तुतम्भव।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्।। पा०गृ०सू० ०१/१६/१८।।

## १८/०७. अथ ब्राह्मणभोजनसङ्कल्पः।

हस्ते जलमादाय। कृतस्य नामकरणसंस्काराख्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान्दशसङ्ख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवता प्रीयतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[४८१] नक्षत्राणां नामस्वाम्यादि १२ परिशिष्टे द्रष्टव्यम्। (नै०प्र०पृ. १८४)

[४८२] बाकी

[४८३] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रीयम्।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा।। १३०।। ब्र०स०पृ. ३१९।।

यथाशक्त्या नामकरणसंसकारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति नामकरणसंस्कारप्रयोगः।।**

## ।। निष्क्रमणसंस्कारप्रयोगः।। १९।।
## (संस्कारः ०६।)

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/१७/०५) "चतुर्थे मासि निष्क्रमणिका।।"इति निष्क्रमणसंस्कारविषयेकं सार्वत्रिकं नियमं विदधाति।

ततः चतुर्थे मासि शिशोर्निष्क्रमणं विहितम्। ततो कुमारस्य पिता आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९)।

### १९/०१. अथ प्रायश्चित्तसङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः कुमारस्य निष्क्रमणसंस्कारस्य स्वकालाकृतजनितदोषप्रत्यवायपरिहारार्थं पादकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वाराऽहमाचरिष्ये। अनेन पादकृच्छ्ररूपप्रायश्चित्तकृतेन अस्य मम अमुकशर्मणः सुतस्य निष्क्रमणकाले अकृतनिष्क्रमणसंस्कारजनितदोषनिवृत्तिपूर्वक निष्क्रमण- संस्कारकर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

### १९/०२. अथ नामकरणविधिः।

ततो यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

### १९/०३. अथ सङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मण:कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणायुश्रीर्वृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृहनिष्क्रमणसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९)।

पुनर्जलमादाय। तदङ्गत्वेन पञ्चोपचारैः गणपतिपूजनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## १९/०४. अथ पञ्चोपचारगणपतिपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं-
हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु०य०२३/१९।।[४८४]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पुष्पं समर्पयामि । इत्युक्त्वा पुष्पं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः धूपं आघ्रापयामि । इत्युक्त्वा धूपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दीपं दर्शयामि । इत्युक्त्वा दीपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्यं समर्पयेत्।

फलं नैवेद्यं गुड नैवेद्यं वा पूरतो निधाय। ॐ गं गणपतये नमः इत्युक्त्वा जलं संप्रोक्षेत्। ग्रासमुद्रया[४८५] भोजयेत्।

ॐ प्राणाय स्वाहा ।

[४८४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्।। कर्म०पृ. ३२।।

[४८५] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चाङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।
नैवेद्य मध्ये पानीयं समर्पयामि। पुनः भोजयेत्।
ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाया।
ॐ समानाय स्वाहा।
ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत् । हस्त प्रक्षालनं समर्पयामि। इत्युक्त्वा हस्तप्रक्षालनार्थे आचमनीयं जलं समर्पयेत्। मुखप्रक्षालनं समर्पयामि। इत्युक्त्वा मुखप्रक्षालनार्थे आचमनीयं जलं समर्पयेत् । करोद्वर्तनार्थे चन्दनं समर्पयामि । इत्युक्त्वा चन्दनं समर्पयेत् । प्रार्थनापूर्वकं नमस्करोमि ।

हस्ते जलमादाय। अनेन पञ्चोपचारपूजन कृतेन श्रीसिद्धिबुद्धिसहित महागणपतिः प्रीयन्तां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

ततः पिता मातृगृहीतमलङ्कृतकुमारं सवाद्यघोषं गृहाद्बहिरानीय सूर्यमुदीक्षयति सूर्यं पूजयेत्।

## १९/ ०५. अथ सूर्यदर्शनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम
शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।। शु०य० ३६/२४।।[४८६]

ॐ भूर्भुवः स्वः सवित्रे सूर्यनारायणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत।

[४८६] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
नमः सवित्रे जगदेक चक्षुषे जगत्प्रसूति स्थितीनाश हेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने।। कर्म०पृ. १२।।

**१९/०६. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। कृतस्य निष्क्रमणसंस्काराख्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान्दशसङ्ख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवता प्रीयतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा।। १३१।। ब्र०स०पृ. ३१९।।

यथाशक्त्या निष्क्रमणसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति निष्क्रमणसंस्कारप्रयोगः।।**

## ।। अन्नप्राशनसंस्कारप्रयोगः।। २०।।
## (संस्कारः ०७।)

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/१९/०१) "षष्ठे मासेऽन्नप्रासनम्।" इत्यन्नप्राशन संस्कार-विषयकं सार्वत्रिकं नियमं विदधाति। ततो कुमारस्य पिता आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९)।

**२०/०१. अथ प्रायश्चित्तसङ्कल्पः।**

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य।

अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः सुतस्य अन्नप्राशननियतकालातिक्रमदोषप्रत्यवायपरिहारार्थं पादकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वाराऽ-हमाचरिष्ये। अनेन पादकृच्छ्ररूपप्रायश्चित्तकृतेन अस्य मम अमुकशर्मणः सुतस्य अन्नप्राशननियत-कालातिक्रमदोषनिवृत्तिपूर्वकमन्नप्राशनसंस्कारकर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**२०/०२. अथाऽन्नप्राशनसंस्कारविधिः।**

ततो यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

**२०/०३. अथ सङ्कल्पः।**

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः सुतस्य मातृगर्भमलप्राशनविशुद्ध्यर्थम् अन्नाद्यब्रह्मवर्चसतेजइन्द्रियायुर्बल-लक्षणफलसिद्ध्यर्थं बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशनसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[४८७] मातृकापूजनं वैश्वदेवसङ्कल्पं वसोर्द्धारामायुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिऋग्विरणं पुनर्दिग्रक्षणं पञ्चगव्यकरणं पृथ्विकूर्मानन्तपूजनं देवतावाहनं कुण्डपूजनं पञ्चभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[४८८] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

तत्र बहिःशालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं शुचिनामाग्नेः स्थापनं पूजनं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/-) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विगवरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/-)

---

[४८७] यदा एकाधिकसंस्काराणाम् एकतन्त्रेण विधिः सम्पाद्यते तदा पुण्याहवाचनादि-कुण्डपूजनान्तानि कर्माणि एकवारमेव कुर्यात्। यदा तु तेषां संस्काराणां पृथक् पृथग् विधिः सम्पाद्यते तदा एतानि कर्माणि प्रत्येकस्मिन् संस्कारविधौ पृथग्तया करणीयानि।

[४८८] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका-(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/–) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

**२०/ ०४. अथाऽऽघाराज्यहोमः।**

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

**२०/ ०५. अथाऽग्निपूजनम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[४८९]

ॐभूर्भुवःस्वः शुचिनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

**२०/ ०६. अथ प्रधानहोमः।**

---

[४८९] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

ततः आज्याहुति द्वयं दद्यात्। (षष्ठे मासेऽन्नप्राशनं स्थालिपाकं श्रपयित्वाज्यभाग-विष्ट्वाज्याहुतीर्जुहोति।)

ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा।। पा०गृ०सू० ०१/१९/०२।।[४९०]

इदं वाचे न मम।

ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा।। पा०गृ०सू० ०१/१९/०२।।

इदं वाचे न मम।

ॐ वाजो नो अद्य प्रसुवाति दानं वजो देवाँ२ऽऋतुभिः कल्पयाति।
वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयं स्वाहा।। पा०गृ०सू० ०१/१९/०३ ।।

इदं वाचे न मम।

ततः स्थालिपाकेन चतस्र आहुतीर्दद्यात्।

ॐ प्राणेनान्नमशीय स्वाहा। इदं प्राणाय न मम।
ॐ अपानेन गन्धानशीय स्वाहा। इदमपानाय न मम।
ॐ चक्षुषा रूपाण्यशीय स्वाहा। इदं चक्षुषे न मम।
ॐ श्रोत्रेण यशोऽशीय स्वाहा। इदं श्रोत्राय न मम।। पा०गृ०सू० ०१/१९/०४।।

चरुशेषेण स्विष्टकृत्।

## २०/०७. अथ नवाऽहुतिहोमः।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।
ततः आज्येन भूराद्या नवाहुतयः।

१.ॐ भूः स्वाहा।[४९१] इदमग्नये न मम।

---

[४९०] अत्र यज्ञोपवीतरहितानां कृते वेदच्छन्दांसि संस्मरेत् स्वाहा।

[४९१] अत्र यज्ञोपवीतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतयः दीयन्ते।

२.ॐ भुव: स्वाहा। इदं वायवे न मम।

३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठा:।
यजिष्ठोवह्नितम: शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।
इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/०४।।
इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्त्रंयज्ञिया: पाशाविततामहान्त:।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुत: स्वर्का: स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।

९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

तत: संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्ति:। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्प:। कृतस्य अन्नप्राशनसंस्काराख्यस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ।। पा०गृ०सू० ०३/१५/२१।।
अग्ने: पश्चात् प्रणीताविमोक:।

---

१. अग्नये नम: स्वाहा। इदम् अग्नये न मम।

२. वायवे नम: स्वाहा। इदं वायवे न मम।

३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।

४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।

५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।

६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।

७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।

८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।

९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

ॐ आप: शिवा: शिवतमा: शान्ता:
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

**२०/ ०८. अथ षड्रसप्राशनम्।**

प्राशनान्ते सर्वान् रसान् सर्वमन्नमेकत: उद्धृत्याथैनं प्राशयेत्। तत: कट्वम्ललवणमधुर-तिक्तकषायाणि सर्वान्नानि[४९२] शाल्यादीनि च यथासम्भवं कांस्यपात्रे एकीकृत्य सकृदेवं "हंत" इतिमन्त्रेण कुमारं प्राशयेत्।

ॐ हंत।

तत: कुमारं भूमौ उपवेश्य तदग्रे पुस्तकशस्त्रहिरण्यवस्त्रादिशिल्पानि विन्यस्य जीविकापरीक्षां कुर्यात्। शिशु: स्वेच्छया यत्प्रथमं स्पृशेत् साऽस्य जीविकेति विद्यात्। ततो ब्राह्मणभोजनम्।

**२०/ ०९. अथ ब्राह्मणभोजनसङ्कल्प:।**

हस्ते जलमादाय। कृतस्य निष्क्रमणसंस्काराख्य कर्मण: साङ्गतासिद्ध्यर्थं स्मृत्युक्तान्दशसङ्ख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवता प्रीयतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रीयम्।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा।। १३२।। ब्र०स०पृ. ३१९।।

यथाशक्त्या अन्नप्राशनसंस्कारविधे: परिपूर्णताऽस्तु। अस्तु परिपूर्णता।[४९३]

**।। इति अन्नप्राशनसंस्कारप्रयोग:।।**

**।। चौलसंस्कारप्रयोग:।। २१।।**
**(संस्कार: ०८।)**

पारस्कराचार्य: पारस्करगृह्यसूत्रे (०२/०१/०१-०२,०४) "सांवत्सरिकस्य चूडाकरणम्। तृतीये वाऽप्रतिहते। यथामङ्गलं वा सर्वेषाम्।।" इति चौलसंस्कारविषयकं नियमं विदधाति।
ततो कुमारस्य पिता आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

---

[४९२]

[४९३] अस्मिन् स्थले जन्मन: तिथौ प्रतिमासं ततश्च प्रतिवर्षं वर्धापनप्रयोगोपरनाम मार्कण्डेयपूजनप्रयोग: शिशोर्दीर्घायुष्यारोग्यादिनिमित्ते विधीयते।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९)।

### २१/०१. अथ प्रायश्चित्तसङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः सुतस्य चौलसंस्कारस्य स्वकालातिक्रमदोषप्रत्यवायपरिहारार्थं अर्धकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वाराऽहमाचरिष्ये। अनेन अर्धकृच्छ्ररूपप्रायश्चित्तकृतेन अस्य मम अमुकशर्मणः सुतस्य चौलसंस्कारस्य स्वकालातिक्रमदोषनिवृत्तिपूर्वकं चौलसंस्कारकर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः सुतस्य चौलसंस्कार कर्मण्यधिकारार्थं सूत्रोक्तान् त्रिभ्योधिकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

### २१/०२. अथ चौलसंस्कारविधिः।

ततो यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

### २१/०३. अथ सङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः सुतस्य बीजगर्भसमुद्भवैनोनिबर्हणेन बलायुर्वर्चोभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चौलसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[४९४] मातृकापूजनं वैश्वदेवसङ्कल्पं वसोर्द्धारामायुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिऋत्विग्वरणं पुनर्दिग्रक्षणं पञ्चगव्यकरणं पृथ्विकूर्मानन्तपूजनं देवतावाहनं कुण्डपूजनं पञ्चभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[४९४] यदा एकाधिकसंस्काराणाम् एकतन्त्रेण विधिः सम्पाद्यते तदा पुण्याहवाचनादि-कुण्डपूजनान्तानि कर्माणि एकवारमेव कुर्यात्। यदा तु तेषां संस्काराणां पृथक् पृथग् विधिः सम्पाद्यते तदा एतानि कर्माणि प्रत्येकस्मिन् संस्कारविधौ पृथग्तया करणीयानि।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि(०१/–)–प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/–) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/–) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/–)[४९५] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/–), नान्दीश्राद्धप्रयोगे (०६/–) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

तत्र बहिःशालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं सभ्यनामाग्नेः स्थापनं पूजनं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक– मग्निस्थापने (०८/–) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/–) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

ततो माता कुमारमादायाप्लाव्याहते वाससी परिधाप्यङ्के आधाय पश्चादग्नेरुपविशति।

ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनान्तं कुर्यात्। पात्रासादनानन्तरमुप–कल्पनीयानीमानिशीतोदकमुष्णोदकम्। नवनीतपिण्डो घृतपिण्डो दधिपिण्डो वा त्र्येणि शलली साग्राणि सप्तविंशतिकुशतरुणानि ताम्रपरिष्कृत आयसः क्षुरः आनडुहो गोमयपिण्डो वरणितो नापितश्चेति। पवित्रीकरणादि पवित्रयोः प्रणीतासु निधानम्। दक्षिणं जान्वाच्य ब्रह्मान्वारब्धः आघारावाज्यभागौ जुहुयात्।

**२१/०४. अथाऽऽघाराज्यहोमः।**

---

[४९५] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका–(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१–०६) न गृह्यन्ते।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

## २१/०५. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[४९६]

ॐभूर्भुवःस्वः सभ्यनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

## २१/०६. अथ नवाऽहुतिहोमः।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।
ततः आज्येन भूराद्या नवाहुतयः।

१.ॐ भूः स्वाहा।[४९७] इदमग्नये न मम।

---

[४९६] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

[४९७] अत्र यज्ञोपवीतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतयः दीयन्ते।
१. अग्नये नमः स्वाहा। इदम् अग्नये न मम।
२. वायवे नमः स्वाहा। इदं वायवे न मम।

२.ॐ भुव: स्वाहा। इदं वायवे न मम।

३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठा:।
यजिष्ठोवह्नितम: शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।
इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/०४।।
इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्रंयज्ञिया: पाशावितताममहान्त:।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुत: स्वर्का: स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।

९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

तत: संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्ति:। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्प:। कृतस्य सीमन्तोन्नयनसंस्काराख्यस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।
अग्ने: पश्चात् प्रणीताविमोक:।
ॐ आप: शिवा: शिवतमा: शान्ता:

---

३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।
९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

## २१/०७. अथ मुण्डनम्।[४९८]

हस्ते जलमादाय। । देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः कुमारस्य चूडाकर्मकर्तुमधिकारार्थं दक्षिणगोदानं मुण्डनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ततः एकस्मिन्पात्रे शीतास्वप्सूष्णाऽअपः (= शीतजले उष्णजलम्) आसिञ्चति।

ॐ उष्णेन वाय उदकेनेह्यदिते केशान्वप।। पा०गृ०सू० ०२/०१/०६।।

अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा पिण्डं प्रास्यति। तत उदकमादाय दक्षिणगोदानमुंदति।

**उन्दनम्।**

ॐ सवित्रा प्रसूता दैव्याऽआपऽउन्दन्तु ते तनूम्।
दीर्घायुत्वाय वर्चसे।। पा०गृ०सू० ०२/०१/०९।।

ततस्त्र्येण्या शलल्या केशान् विनीय। त्रीणि कुशतरुणान्यन्तर्दधाति।

ॐ ओषधेत्रायस्वधिते मैनं हीं सीः।। पा०गृ०सू० ०२/०१/१०।।
इत्यनेन मन्त्रेण।

ॐ शिवोनामासिस्वधिस्तेपितानमस्तेऽअस्तु मा मा हीं सीः।
इति लोहक्षुरमादाय।

निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय सुवीर्याय।। शु०य० ०३/६३।।
इति केशकुशक्षुरसंलग्नीकरणम्।

ततः छेदनम्। छेदनमन्त्रः।

ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्।

[४९८] अत्र यज्ञोपवीतरहितानां मुण्डनविधेरमन्त्रकः।

तेन ब्रह्मणोवपतेदमस्यायुष्यं जरदष्टिर्यथासम्।। पा०गृ०सू० ०२/०१/११।।

अनेन सकेशानि कुशतरुणानि प्रच्छिद्याऽऽनडुहे गोमयपिण्डे प्रास्यत्यग्नेरुत्तरतो ध्रियमाणे।

एवं द्विरपरं तूष्णीम्। तद्यथा उन्दनम्। विनयनम्। त्रिकुशतरुणान्तर्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। आनडुहे गोमयपिण्डे प्रासनम्। इति दक्षिणगोदानम्।

पुनर्जलमादाय। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मण: कुमारस्य चूडाकर्मकर्तुमधिकारार्थं पश्चिमगोदानं मुण्डनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ सवित्रा प्रसूता दैव्याऽआपऽउन्दन्तु ते तनूम्।
दीर्घायुत्वाय वर्चसे।। पा०गृ०सू० ०२/०१/०९।।

ततस्त्र्येण्या शलल्या विनयनम्। त्रिकुशतरुणान्तर्धानम्।

ॐ ओषधेत्रायस्वधिते मैनं हीं सी:।। पा०गृ०सू० ०२/०१/१०।।
इत्यनेन मन्त्रेण।

ॐ शिवोनामासिस्वधिस्तेपितानमस्तेऽअस्तु मा मा हीं सी:।
इति लोहक्षुरमादाय।

निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय सुवीर्याय।। शु०य० ०३/६३।।
इति लोहक्षुरं केशानामुपरि निधाय केशच्छेदने मन्त्रमिमं पठेत्।

ॐत्र्यायुषं जमदग्ने: कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषम् तन्नोऽअस्तु त्र्यायुषम्।। शु०य० ०३/६२।।

एवं तूर्ष्णी वारद्वयम्। यथा उन्दनम्। विनयनम्। त्रिकुशतरुणान्तर्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। गोमयपिण्डे प्रासनम्। इति पश्चिमगोदानं मुण्डनम्।

पुनर्जलमादाय। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मण: कुमारस्य चूडाकर्मकर्तुमधिकारार्थमुत्तरगोदानं मुण्डनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ सवित्रा प्रसूता दैव्याऽआपऽउन्दन्तु ते तनूम्।
दीर्घायुत्वाय वर्चसे।। पा०गृ०सू० ०२/०१/०९।।

ततस्त्र्येण्या शलल्या विनयनम्। त्रिकुशतरुणान्तर्धानकरणम्।

ॐ ओषधेत्रायस्वधिते मैनं हीं सीः।। पा०गृ०सू० ०२/०१/१०।।
इत्यनेन मन्त्रेण।

ॐ शिवोनामासिस्वधिस्तेपितानमस्तेऽअस्तु मा मा हीं सीः।
इति लोहक्षुरमादाय।

निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय सुवीर्याय।। शु०य० ०३/६३।।
इति लोहक्षुरं केशानामुपरि निधाय केशच्छेदने मन्त्रमिमं पठेत्।

ॐ येन भूरिश्चरा दिवं ज्योक्च पश्चाद्धि सूर्यं।
तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये।। पा०गृ०सू० ०२/०१/१६।।

एवं तूष्णीं वारद्वयम्। यथा उन्दनम्। विनयनम्। त्रिकुशतरुणान्तर्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। आनडुहे गोमयपिण्डे प्रासनम्। इत्युत्तरगोदानम्।

ततस्त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति।

ॐ यत्क्षुरेण मज्जयतासुपेशसा वप्त्वा वाऽवपति
केशाञ्छिन्धि शिरो माऽस्यायुः प्रमोषीः।। पा०गृ०सू० ०२/०१/१८।।

इति सकृन्मत्रेण द्विस्तूष्णीम्। ततस्तेनैवोदकेन सर्वं शिर आर्द्रं कृत्वा क्षुरं नापिताय प्रयच्छेत्।

आचार्यो वा यजमानो वा वदेत्।

ॐ अक्षुण्वन्परिवप।। पा०गृ०सू० ०२/०१/२०।।

नापितो वदेत्। वपामी।

नापित उदङ्मुखस्थितस्य कुमारस्य प्राक्संस्थं प्राङ्मुखस्थितस्योदक्संस्थं केशवपनं कुर्यात्। कुलव्यवस्थया शिखास्थापनं केशशेषं करोति। ततः सर्वान् केशान् गोमयपिण्डे वस्त्रादिनाऽऽवेष्ट्याऽ-नुगुप्तं कृत्वा गवां गोष्ठे स्थापयेत् अथवा तडागे जलमध्ये वा प्रक्षिपेत्।

ततः कुमारं स्नापयित्वा मस्तके स्वस्तिकं तथा च ललाटे तिलकं कुर्यात्। आचार्याय वरं ददाति। (गां केशान्ते संवत्सरं ब्रह्मचर्यमवपनं च। केशान्ते द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः।)

**२१/०८. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। कृतस्य चौलसंस्काराख्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान्दशसङ्ख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवता प्रीयतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रीयम्।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा।। १३३।। ब्र०स०पृ. ३१९।।

यथाशक्त्या चौलसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।[४९९]

**।। इति चौलसंस्कारप्रयोगः।।**

**।। उपनयनसंस्कारप्रयोगः।।२२।।**
**(संस्कारः०९।)**

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०२/०२/०१-०४) "अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा। एकादशवर्षं राजन्यम्। द्वादशवर्षं वैश्यम्। यथा मङ्गलं वा सर्वेषाम्।।" इत्युपनयनसंस्कारविषयेकं सार्वत्रिकं नियमं विदधाति।

तत्रोत्तरायणे ज्योतिः शास्त्रोक्त शुभे मासे शुभे दिने सुमुहूर्ते उपनयनं कर्तुं तत्पूर्वेद्युः यजमानः पत्नीकुमाराभ्यां सह मङ्गलस्नानं कुर्यात्। अहतवाससी परिधायाऽलंकृत्य सतिलको बहिःशालायां शुभासने प्राङ्मुख उपविशति। स्वदक्षिणतः पत्नीं तद्दक्षिणतः संस्कार्यं बटुं चोपवेशयति। यजमानः आचमनं प्राणायामं संकल्पं च कुर्यात्। (अत्र उपनयनसंस्कारस्य पूर्वदिने वा तद्दिने वा पूर्वाङ्गोविधिः तृतीयसंस्कृतेः सर्वसंस्कारसामान्यविधेः ०१/०१तः १३/२१ पर्यन्तः सम्पूर्ण ग्रहशान्तिप्रयोगः स्वीकर्तव्यः।)

**२२/०१. अथ प्रायश्चित्तसंकल्पः।**

देशकालौ संकीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थम् अस्य मम अमुकशर्मणः सुतस्य उपनयनसंस्कारकर्मण्यधिकारसिद्ध्यर्थं त्रीन्संख्याकान् प्राजापत्यान्

[४९९] अस्मिन् स्थले संस्कारभास्करकारैः चौलसंस्कारानन्तरं कर्णवेधवर्धापनाक्षरारम्भविधयः स्वीकृताः। किन्तु गुर्जरप्रदेशे प्रचलिता न सन्ति।

रजतप्रत्याम्नायद्वाराऽहमाचरिष्ये। अनेन मम अमुकशर्मण: सुतस्योपनयनसंस्कारकर्मण्यधिकार–सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

एवं कुमारस्याऽपि[५००] प्रायश्चित्तं कारयेत्।

बटुको हस्ते जलमादाय सङ्कल्पं कुर्यात्। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ मम कामचारकामवादकामभक्षणादिदोषनिवृत्तिपूर्वकोपनयनसंस्कारकर्माधिकारार्थं त्रीन्संख्याकान् प्राजा–पत्यान् रजतप्रत्याम्नायद्वारा अहमाचरिष्ये। तेन मम कामचारकामवादकामभक्षणादिदोषनिवृत्ति–पूर्वकोपनयनसंस्कारकर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

आचार्यो हस्ते जलमादाय सङ्कल्पं कुर्यात्। देशकालौ संकीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अमुकशर्मा आचार्योऽहं अमुकशर्मणो यजमानसुतस्य उपनयनसंस्कारकर्माधिकारार्थं द्वादशसहस्त्रगायत्रीजपमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**२२/०२. अथोपनयनसंस्कार:।**

ततो यजमान:आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

**२२/०३. अथ सङ्कल्प:।**

हस्ते जलमादाय। देशकालौ संकीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गता–सिद्ध्यर्थम् अस्य मम अमुकशर्मण: सुतस्य द्विजत्वसिद्धये वेदाध्ययनाधिकारार्थम् उपनयनाख्यं कर्म करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। अद्येत्यादि शुभपुण्यतिथौ करिष्यमाणोपनयनकर्माङ्गभूतं निर्विघ्नतासिद्ध्यर्थं षोडशोपचारै: पञ्चोपचारैर्वा महागणपतिपूजनमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

**२२/०४. अथ पञ्चोपचारगणपतिपूजनम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं–

---

[५००] इदं प्रायश्चित्तम् –

कृच्छ्रमयं चोपनेता त्रीन्कृच्छ्रांश्च बहुश्चरेत्। आचार्यो दशसाहस्त्रं गायत्रीं प्रजपेत्तथा।। ब्र०स०पृ. ३९३।।

हवामहे निधिनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु०य० २३/१९।।[५०१]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पुष्पं समर्पयामि । इत्युक्त्वा पुष्पं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः धूपं आघ्रापयामि । इत्युक्त्वा धूपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दीपं दर्शयामि । इत्युक्त्वा दीपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्यं समर्पयेत्।

फलं नैवेद्यं गुड नैवेद्यं वा पूरतो निधाय। ॐ गं गणपतये नमः इत्युक्त्वा जलं संप्रोक्षेत्। ग्रासमुद्रया[५०२] भोजयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।
नैवेद्य मध्ये पानीय[५०३] समर्पयामि। पुनः भोजयेत्।
ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाहा।
ॐ समानाय स्वाहा।
ॐ ब्रह्मणे नमः।

---

[५०१] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्।। कर्म०पृ. ३२।।

[५०२] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

[५०३] अत्र ब्रह्मनित्यकर्मसमुच्चयकाराः
एलोशीरलवङ्गादिकर्पूरपरिवासितम्। प्राशनार्थे कृतं तोयं गृहाण गणनायक ।। इत्यधिकं पठन्ति।। (पृ. ४९)

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत् । हस्त प्रक्षालनं समर्पयामि। इत्युक्त्वा हस्तप्रक्षालनार्थे आचमनीयं जलं समर्पयेत्। मुखप्रक्षालनं समर्पयामि। इत्युक्त्वा मुखप्रक्षालनार्थे आचमनीयं जलं समर्पयेत् । करोद्वर्तनार्थे चन्दनं समर्पयामि । इत्युक्त्वा चन्दनं समर्पयेत् । प्रार्थनापूर्वकं नमस्करोमि ।

हस्ते जलमादाय। अनेन पञ्चोपचारपूजन कृतेन श्रीसिद्धिबुद्धिसहित महागणपतिः प्रीयन्तां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

ततः कुमारस्य वपनं कारयेत्।

**२२/०५. अथ वपनम्।**

यजमानो हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ अस्य मम अमुकशर्मणः सुतस्य उपनयनं कर्तुं तत्पूर्वाङ्गभूतं वपनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। एवं वपनं कारयित्वा स्नापयेत्। ततो ब्राह्मणत्रयं भोजयेत्। यजमानो हस्ते जलमादायसङ्कल्पं कुर्यात्।

अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः सुतस्य उपनयनसंस्कारकर्मण्यधिकारार्थं त्रिभ्योऽधिकान् ब्राह्मणान् भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। तेन मम अमुकशर्मणः सुतस्योपनयनसंस्कारकर्मण्यधिकारसिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ततो ब्राह्मणपङ्क्तौ मुण्डितशिरसं कुमारमपि भोजयेत्। मात्रासह भुञ्जीत यथाचारं वा।[५०४]

ततः कुमारस्य पिता बहिःशालायां वेद्युपरि पञ्चभूसंस्कारपूर्वकं समुद्भवनामानं लौकाग्निं स्थापयेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/–) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७)।

---

[५०४] उपनयने मात्रासह भोजनमनुज्ञातं संग्रहकारेण। मात्रा सहोपनयने विवाहे भार्ययासह। अन्यत्र सह भुक्तिश्चेत्पातित्यं प्राप्नुयान्नर इति ब्रह्मनित्यकर्मसमुच्चयकाराः। (पृ० ३९४)

ततः पुष्पमालादिभिरलङ्कृतं बटुम् आचार्यसमीपमानयेत्। ततः आचार्य आनीतं कुमारम् अग्नेः पश्चात्स्वदक्षिणतः अवस्थापयेत्। ततो मध्येऽन्तरपटं धारयित्वा। ब्राह्मणा सुमङ्गलपद्यानि पठेयुः।

भास्वान्काश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः
षट्त्रिस्थो दशशोभनो गुरुशशीभौमेषुमित्रं सदा।
शुक्रो मन्दरिपुः कलिङ्गजनितश्चाग्नीश्वरौ देवते
मध्ये वर्तुलपूर्वदिग्दिनकरः कुर्यात् बटोर्मङ्गलम्।। १३४।। ब्र०स०पृ. ३९४।।

**प्रतिष्ठापनम्**

हस्ते अक्षतान् गृहीत्वा।

ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० ०२/१३।।[५०५]
एषवै प्रतिष्ठानामयज्ञोयत्रैतेन यज्ञेनयजन्ते सर्वमेव प्रतिष्ठितं भवति।। ब्रा० ।।

ॐ सुमुहूर्ते सुप्रतिष्ठितमस्तु। इत्युक्त्वा बटुकोपरि अक्षतान् विकिरेत्।

ततः आचार्योऽन्तरपटं निःसार्य कुमारो यदाऽऽचार्यपादौ प्रणमति तदा स्वदक्षिणतः पश्चादग्नेस्तमवस्थापयेत्। ततः प्रेषद्वयम् –
ब्रह्मचर्यमागामिति ब्रूहीति कुमारं प्रति आचार्यो वदति।
ब्रह्मचर्यमागामिति बटुको वदेत्।
ब्रह्मचारी असानीति ब्रूहीति आचार्यो वदति।
ब्रह्मचारी असानीति बटुको वदेत्।

अथैनं बटुकम् आचार्यो वासः परिधापयेत्।

## २२/०६. अथ वासः परिधानम्।

आचार्यो हस्ते जलमादाय। येनेन्द्रायेतिमन्त्रस्य आङ्गिरस ऋषिः बृहतीच्छन्दः बृहस्पतिर्देवता वासःपरिधाने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधामृतम्।

---

[५०५] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।।

तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे।। पा०गृ०सू० ०२/०२/०७।।[५०६]

ततः आचार्यो ब्रह्मचारिणः कटिप्रदेशे यथोक्तमेखलां यथाप्रवर ग्रन्थियुतां प्रदक्षिणं त्रिर्वेष्टयित्वा बध्नाति।

## २२/ ०७. अथ मेखलाबन्धनम्।

आचार्यो हस्ते जलमादाय। इयं दुरुक्तमिति वामदेव ऋषिः त्रिष्टुप् छन्दः मेखला देवता मेखलाबन्धने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ इयं दुरुकतं परिबाधमाना वर्णं पवित्रं पुनती मऽआगात्।
प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्।। पा०गृ०सू० ०२/०२/०८।।[५०७]
ॐ युवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः।
तंधीरासः कवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः।। पा०गृ०सू० ०२/०२/०९।।

इति बटुकस्य मन्त्रपाठः। इत्यनेन युवासुवासा इति मन्त्रेण वा बन्धनं तूष्णीं वा कुर्यात्। यथाचारमाचार्याय यज्ञोपवीतदानम्।

## २२/ ०८. अथ यज्ञोपवीतधारणम्।

तत्रादावाचार्येण आपोहिष्ठेतित्रिभिर्मन्त्रैर्यज्ञोपवीतं प्रक्षालयेत्।

हस्ते जलमादाय। आपोहिष्ठेति तिसृणां सिन्धुद्विप ऋषिः गायत्री छन्दः आपो देवता यज्ञोपवीतप्रक्षालने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ आपोहिष्ठामयोभुवस्तानऽउर्ज्जेदधातन। महेरणायचक्षसे।। शु०य० ११/५०।।[५०८]
ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः।। शु०य० ११/५१।।
ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः। शु०य० ११/५२।।
इति यज्ञोपवीतं प्रक्षाल्य करसम्पुटे धृत्वा दशवारं गायत्रीमन्त्रेण अभिमन्त्र्य।

---

[५०६] ब्राह्मणेतराणां वर्णानां कृतेऽयं विधिरमन्त्रको भवति।

[५०७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
देवी दुरुक्तं परिबाधमाना वर्णं पवित्रं च पवित्रयन्ति।
प्राणौस्यानैश्च वरं ददाना मेखलामागात् सुभगास्वसेयम्।। कर्म०पृ. २६४।।

[५०८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरिकाक्षं स बाह्याभ्यन्तरः शुचिः।। ब्र०स०पृ. ३४।।

ॐ ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमत: सुरुचो व्वेनऽआव:।
सबुद्ध्न्याऽउपमाऽअस्यविष्ठा: सतश्च योनिमसतश्चविव:।। शु०य० १३/०३।।[५०९]
ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्।
समूढमस्य पां सुरेस्वाहा।। शु०य० ०५/१५।।[५१०]

ॐ नमस्ते रुद्र मन्यवऽउतो त इषवे नम:।
बाहुभ्यामुत ते नम:।। शु०य० १६/०१।।[५११]
इति त्रिभिर्मन्त्रैरङ्गुष्ठमुपवीते भ्रामयित्वा ततो नवतन्तुषु देवता अक्षतैरावाहयेत्।

प्रथमतन्तौ – ॐकाराय नम:। ॐकारमावाहयामि स्थापयामि।[५१२]
द्वितीयतन्तौ – ॐ अग्नये नम:। अग्निमावाहयामि स्थापयामि।
तृतीयतन्तौ – ॐ नागेभ्यो नम:। नागानावाहयामि स्थापयामि।
चतुर्थतन्तौ – ॐ सोमायनम:। सोममावाहयामि स्थापयामि।
पञ्चमतन्तौ – ॐ पितृभ्यो नम:। पितृनावाह्यामि स्थापयामि
षष्ठतन्तौ – ॐ प्रजापतये नम:। प्रजापतीमावाहयामि स्थापयामि।
सप्तमतन्तौ – ॐ अनिलाय नम:। अनिलमावाहयामि स्थापयामि।
अष्टमतन्तौ – ॐ यमाय नम:। यममावाहयामि स्थापयामि।
नवमतन्तौ – ॐ विश्वेभ्यो देवेभ्यो नम:। विश्वान् देवानावाहयामि स्थापयामि।
तत: यज्ञोपवीतग्रन्थिदेवता अक्षतैरावाहयेत्।

ॐ ब्रह्मणे नम:। ब्रह्माणमावाहयामि स्थापयामि।
ॐ विष्णवे नम:। विष्णुमावाहयामि स्थापयामि।

---

[५०९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
विष्णोर्वरप्रदानेन तप: कर्तारमद्भुताम्। कर्म कर्तुं जगत् सृष्टे: ब्रह्माणं तं नमाम्यहम्।। या०र०पृ. ५२।।
[५१०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वत्र व्यापकं देवं प्रभुं लोकनमस्कृतम्। सर्वकल्याणकर्तारं वन्दे नारायणं विभुम्।। या०र०पृ. ५१।।
[५११] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनै:।। या०र०पृ. ५०।।
[५१२] अत्र ब्राह्मणेतरवर्णानां कृते कर्मकौशलकारा नवतन्तुषु देवतावाहनमेवं पठन्ति।
१. नारायणाय नम:। नारायणमावाहयामि स्थापयामि। २. अग्नये नम:। अग्निमावाहयामि स्थापयामि।
३. नागेभ्यो नम:। नागानावाहयामि स्थापयामि। ४. सोमाय नम:। सोममावाहयामि स्थापयामि।
५. इन्द्राय नम:। इन्द्रमावाहयामि स्थापयामि। ६. वायवे नम:। वायुमावाहयामि स्थापयामि।
७. प्रजापतये नम:। प्रजापतीमावाहयामि स्थापयामि। ८. सूर्याय नम:। सूर्यमावाहयामि स्थापयामि।
९. विश्वेभ्यो देवेभ्यो नम:। विश्वान् देवानावाहयामि स्थापयामि।

ॐ रुद्राय नमः। रुद्रमावाहयामि स्थापयामि।

ततो ध्यानम्।

ॐ प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम्।
ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम्।। ब्र०नि०स०पृ. ३९५।।

इति ध्यात्वा। ॐ प्रणवादिनवतन्तुदेवतासहितब्रह्मविष्णुरुद्रेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इति सम्पूज्य। उदुत्यमिति सूर्याय दर्शयेत्।

बटुको हस्ते जलमादाय। उदुत्यमिति प्रस्कण्व ऋषिः गायत्री छन्दः सूर्यो देवता सूर्यावलोकने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ उदुत्यं जातवेद सन्देवं वहन्ति केतवः।
दृशे विश्वाय सूर्य्यम्।। शु०य० ०८/४१।।[५१३]

इति सूर्याय यज्ञोपवीतं दर्शयेत्।

बटुको हस्ते जलमादाय। यज्ञोपवीतमितिमन्त्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता यज्ञोपवीतधारणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः।।
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि।। पा०गृ०सू० ०२/०२/११।।[५१४]
इति मन्त्रं पठीत्वा दक्षिणबाहुमुद्धृत्य वामस्कन्धोपरि यज्ञोपवीतं धारयेत्। बटुकः त्रिवारमाचामेत्।

## २२/०९. अथाऽजिनधारणम्।

आचार्यो बटुकमजिनं धारयति।

---

[५१३] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
नमः सवित्रे जगदेक चक्षुषे जगत्प्रसूति स्थितिनाश हेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने।। कर्म०पृ. १२।।

[५१४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यज्ञोपवीतं परमं षण्णवति तन्तुकम्। परिधास्याम्यहं शुद्धं ह्रीमादिदशदैवतम्।। कर्म०पृ० २६५।।

बटुको हस्ते जलमादाय। मित्रस्य चक्षुरितिमन्त्रस्य परमेष्ठी ऋषिः त्रिष्टुप् छन्दः लिङ्गोक्ता देवता अजिनधारणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं समिद्धम्।
अनाहनस्यं वसनं जरिष्णुः परिदम्वाज्य जीनन्दधेहम्।। पा०गृ०सू० ०२/०२/११।।[५१५]

इति बटुकस्य मन्त्रपाठः। त्रिवारं चाऽऽचामेत्।

## २२/१०. अथ दण्डधारणम्।

ततः आचार्यो बटुकाय दण्डं प्रयच्छति।

बटुको हस्ते जलमादाय। योमेदण्ड इत प्रजापतिर्ऋषिः यजुश्छन्दः दण्डो देवता दण्डग्रहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ योमेदण्डः परापतद्वैहायसोधिभूम्याम्।
तमहं पुनरादधाम्यायुषे ब्रह्मणे ब्रह्मवर्चसाय।। पा०गृ०सू० ०२/०२/१२।।[५१६]

इति बटुकस्य मन्त्रपाठः। दण्डं प्रतिगृह्णामि।

## २२/११. अथ सूर्योदिक्षणम्।

ततः आचार्यः स्वाञ्जलिना अद्भिर्बटोरञ्जलिं पूरयति। आचार्यपठितस्त्रिभिर्मन्त्रैः बटुकः सूर्यायाऽर्घ्यत्रयं दद्यात्।

ॐ आपोहिष्ठामयोभुवस्तानऽउर्ज्जेदधातन। महेरणायचक्षसे।। शु०य० ११/५०।।[५१७]
श्रीसूर्याय नमः इदमर्घ्यं दत्तं न मम। इति प्रथमोऽर्घ्यः।

ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः।। शु०य० ११/५१।।
श्रीसूर्याय नमः इदमर्घ्यं दत्तं न मम। इति द्वितीयोऽर्घ्यः।

---

[५१५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मित्रस्य चक्षुर्धरुणं दधाम्यजं समुद्भवम्। अनाहनस्य वसनं यशस्विनं स्थविरं ध्रूवम्।। कर्म०पृ० २६६।।
[५१६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
दण्डवैहायसः प्राप्तं ब्रह्मवर्चस्वमाप्यते। धारयाम्यथ तं दण्डं ब्रह्माणं प्रणमाम्यहम्।। कर्म०पृ० २६६।।
[५१७] अत्र ब्राह्मणेतरवर्णानां कृते श्रीसूर्याय नमः इदमर्घ्यं दत्तं न मम। इत्युक्त्वा त्रिवारं अर्घ्यं समर्पयेत्।

ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः। शु०य० ११/५२।।

श्रीसूर्याय नमः इदमर्घ्यं दत्तं न मम। इति तृतीयोऽर्घ्यः।

ततः आचार्यो बटुकं प्रेषयति सूर्यमुदीक्षयति ततो बटुकस्तच्चक्षुरिति पठन् सूर्यं पश्यति। बटुको हस्ते जलमादाय।

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम
शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।। शु०य० ३६/२४।।[५१८]

इति बटुकस्य मन्त्रपाठः।

## २२/१२. अथ हृदयालम्भनम्।

ततः आचार्यो बटुकस्य दक्षिणस्कन्धोपरि हस्तं नीत्वा तस्य हृदयमालभते। आचार्यो हस्ते जलमादाय।

मम व्रते इति मन्त्रस्य प्रजापतिर्ऋषिः त्रिष्टुप् छन्दः बृहस्पतिर्देवता हृदयालम्भने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। आचार्यो वदेत्।

ॐ ममव्रतेते हृदयं दधामि ममचित्तमनुचित्तन्तेऽअस्तु।
मम वाचमेकमनाजुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्।। पा०गृ०सू० ०२/०२/१६।।[५१९]

इत्याचार्यस्य मन्त्रपाठः। ततः आचार्यो बटुकस्य दक्षिणहस्तं गृहीत्वाऽऽह।

को नामासि?
एवं पृष्टे बटुकः प्रत्याह।
अमुक[५२०] शर्माऽहं भोः।

पुनराचार्यो बटुकम् पृच्छति।

---

[५१८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम्।
दारिद्र्य दुःख क्षयकारणं च पुनातुमांतत् सवितुर्वरेण्यम्।। कर्म०पृ० २६६।।

[५१९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
ममव्रतेते हृदयं दधामि ममचित्तमनुचित्तन्तेऽअस्तु।
मम वाचमेकमनाजुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्।। कर्म०पृ० २६७।।

[५२०] अत्र मासानुसारं पक्षानुसारं च नामानी पठन्ति। विशेषस्तु परिशिष्टम् – ११ द्रष्टव्यम्।

कस्य ब्रह्मचार्यसि ? इति।
भवतः इत्युच्यमाने बटुके तं प्रत्याचार्यो ब्रूयात्।
इनद्रस्य ब्रह्मचार्यस्याग्निराचार्यस्तवासौ अमुकशर्मन्निति।

अथैनं बटुकं भूतेभ्यः परिददात्याचार्यः। आचार्यो हस्ते जलमादाय।

प्रजापतयेत्वा इत्यादीनां मन्त्राणां प्रजापतिर्ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता कुमाररक्षणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः
परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः
परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै।। पा०गृ०सू० ०२/०२/२१।।[५२१]

इत्याचार्यपठितमन्त्रेण बटुकरक्षणम् करणीयम्।

प्रदक्षिणमग्निं पर्युक्ष्याऽऽचार्योत्तरतो बटुक उपविशति। ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनान्तं कुर्यात्।

## २२/ १३. अथ कुशकण्डिका।

ततः बटुकः पवित्रे कृत्वा – प्रागग्रयोर्द्वयोः पवित्रयोरुपरि उदगग्राणि त्रीणि पवित्राणि निधाय उपरि प्रादेशमात्रमवशेषयित्वा अधोभागे द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य त्रयाणां मूलग्राणि एकीकृत्य नखैरस्पृशन् अनामिकाङ्गुष्ठेन द्वयोरग्रे छेदयेत् द्वे ग्राह्ये द्वयोर्मूले त्रीण्युत्तरतः क्षिपेत्। प्रणीतोरत्तरतः प्रोक्षणीपात्रं निधाय तत्र चुलूकेन प्रणीतोदकं त्रिः प्रपूर्य पवित्राभ्यामुत्पूय[५२२]पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये पाणौ कृत्वा दक्षिणहस्तमुत्तानं कृत्वा मध्यमानामिकाङ्गुल्योः मध्यमपर्वाभ्यामपामुद्दिङ्गनम्। ताभिस्तास[५२३]म्प्रोक्षणम्। आज्यस्थाल्याः प्रोक्षणम्। चरुस्थाल्याः प्रोक्षणम्। सम्मार्गकुशानां प्रोक्षणम्। उपयमनकुशानां प्रोक्षणम्। समिधां प्रोक्षणम्। स्रुवस्य प्रोक्षणम्। स्रुचः प्रोक्षणम्। आज्य प्रोक्षणम्। तण्डुलानां प्रोक्षणम्। पूर्णपात्रस्य प्रोक्षणम्। अन्येषामुपकल्पनीयहवनीयद्रव्याणां प्रोक्षणम्।

---

[५२१] अत्र ब्राह्मणेतरवर्णानां कृते ह्रीं प्रजापतये नमः इति पौराणिको मन्त्रो गृह्यते।

[५२२] केचन वामकरे पवित्राग्रं दक्षिणे पवित्रयोर्मूलं धृत्वा मध्यतः पवित्राभ्यामुत्पवनम् इति वदन्ति तत्र मूलं न पश्यामः।

[५२३] ताभिः प्रणीतापात्रस्थाभिरद्भिः तासां प्रोक्षणीपात्रस्थानां प्रोक्षणमित्यर्थः विकल्पे प्रोक्षणीपात्र-स्थाभिरद्भिः प्रणीताास्थानामपां प्रोक्षणम्।

असञ्चरे[५२४] प्रोक्षणीपात्रं निधाय। आज्यस्थाल्यां आज्यनिर्वापो ब्रह्मणा। चरुस्थाल्यां पवित्रे निधाय यजमान आचार्यो वा त्रिः प्रक्षालितान्ँस्तण्डुलान् प्रक्षिप्य तत्र प्रणितोदकमासिच्य अन्यदपि जलं निषिच्य चरुस्थालीस्थितपवित्रे प्रोक्षणीषु निधाय दक्षिणतः ब्रह्मणा आज्याधिश्रयणं युगपत्। आज्योत्तरतः गृहीतेन ज्वलदुल्मुकेन उभयोः ऐशानीमारभ्य ऐशानीपर्यन्तं पर्यग्निकरणम्। इतरथावृत्तिः। अर्धशृते चरौ स्रुवस्य प्रतपनम्। दक्षिणेन हस्तेन स्रुवमादाय तं प्राञ्चमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्गाग्रैर्मूलतोऽग्रपर्यन्तं सम्मृज्य मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत्प्रतप्य दक्षिणतो निदध्यात् । सम्मार्गकुशानग्नौ प्रास्य आज्योद्वासनम्।

अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेणोत्तरतो नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः पश्चिमे निधाय चरुमुत्थाप्य पूर्वेणाग्नेरुत्तरतः आनीय आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः निधाय आज्यमग्नेः पश्चादानीय स्थापयेत्। चरुं च आज्यस्य पूर्वेण प्रदक्षिणमानीय आज्यस्योत्तरत आसादयेत्। पवित्राभ्यां आज्योत्पवनम्। अवेक्षणम्। अपद्रव्यनिरसनम्। ताभ्यामेवाज्यलिप्ताभ्यां पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम्। पवित्रे प्रोक्षण्यां निधाय दक्षिणहस्तेन उपयमनकुशानादाय सव्ये गृहीत्वा दक्षिणेन पाणिना घृताक्तास्तिस्रः समिधःतिष्ठन्नग्नावाधाय दक्षिणचुलूकगृहीतेन सपवित्रेण प्रोक्षण्युदकेन अग्नेः ईशानकोणादारभ्य ईशानपर्यन्तं प्रदक्षिणवत्पर्युक्षणम् इतरथावृत्तिः। पवित्रयोः प्रणीतासु निधानम्। अग्नेः प्रदीप्तिकरणम्।

### २२/१४. अथाऽऽघाराज्यहोमः।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

---

[५२४] असञ्चरः प्रणीताग्न्योरन्तरालः।

## २२/ १५. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[५२५]

ॐ भूर्भुव: स्व: व्रतादौ जातवेदस्नाम्ने वैश्वानराय नम:। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

## २२/ १६. अथोपनयनाङ्गप्रधानहोम:।

बटुको हस्ते जलमादाय। ॐ भूर्भुव: स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषि: गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निवायुसूर्या देवता उपनयनाङ्गप्रधानहोमे विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

तत: आज्येन भूराद्या नवाहुतय:।

१.ॐ भू: स्वाहा।[५२६] इदमग्नये न मम।
२.ॐ भुव: स्वाहा। इदं वायवे न मम।
३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।
४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठा:।

---

[५२५] अत्र यज्ञोपवीतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामह:। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

[५२६] अत्र यज्ञोपवीतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतय: दीयन्ते।
१. अग्नये नम: स्वाहा। इदम् अग्नये न मम।
२. वायवे नम: स्वाहा। इदं वायवे न मम।
३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।
९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

यजिष्ठोवह्नितमः शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।

इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।

अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/४।।

इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।

अयानोयज्ञंवहास्ययानोधेहिभेषजं स्वाहा।।

इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्त्रंयज्ञिया: पाशावितताममहान्तः।

तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा।।

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।

अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।

इदं वरुणायाऽऽदित्यायाऽदितये च न मम।

मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।

९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

ततः संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्पः। कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।

अग्नेः पश्चात् प्रणीताविमोकः।

ॐ आपः शिवाः शिवतमाः शान्ताः

शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

## २२/ १७. अथ बटुकशिक्षा।

आचार्यः कुमारं शिक्षयति।

ब्रह्मचार्यसीत्याचार्य आह। भवामीति ब्रह्मचारी वदति। अपोशानेत्याचार्य आह। अश्नानीति ब्रह्मचारी वदति। कर्म कुरु इत्याचार्य आह। करवाणीति ब्रह्मचारी वदति। मा दिवा सुषुप्थाः इत्याचार्य आह। न स्वपानीति ब्रह्मचारी वदति। वाचं यच्छेत्याचार्य आह। यच्छामीति ब्रह्मचारी वदति। समिधमाधेहीत्याचार्य आह। आदधानीति ब्रह्मचारी वदति। अपोऽशानेत्याचार्य आह। अश्नानीति ब्रह्मचारी वदति।

## २२/ १८. अथ गायत्रीमन्त्रोपदेशः।

अस्मै असीनाय ब्रह्मचारिणे अग्नेरुत्तरतः प्रत्यङ्मुखोपविष्टाय उपसन्नम् असमीक्षमाणाय समीक्षिताय (आचार्यः) सावत्रीं ब्रूयात्।

तत्रादौ आचारात्कांस्यपात्रे तण्डुलान्प्रसार्य तत्र सुवर्णशलाकया ॐकारव्याहृतिपूर्वकं गायत्रीमन्त्रं लिखित्वा।

## २२/१९. अथ सङ्कल्पः।

बटुको हस्ते जलमादाय। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं मम ब्रह्मवर्चससिद्धिपूर्वकवेदाध्ययनाधिकासिद्ध्यर्थं गायत्र्युपदेशाङ्गत्वेन[५२७] विहितं गायत्रीपूजन-माचार्यपूजनं चाहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ गणपतेः पञ्चोपचारैः पूजनमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## २२/२०. अथ पञ्चोपचारगणपतिपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं-
हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु०य०२३/१९।।[५२८]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पुष्पं समर्पयामि । इत्युक्त्वा पुष्पं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः धूपं आघ्रापयामि । इत्युक्त्वा धूपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दीपं दर्शयामि । इत्युक्त्वा दीपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्यं समर्पयेत्।

---

[५२७] अत्र ब्रह्मनित्यकर्मसमुच्चयकारा गायत्र्युपदेशाङ्गविहितमिति पठन्ति। किन्तु उपदेशाङ्गस्याऽधिक सङ्ग्चया अभावेऽस्माभिरत्र शुद्धिः कृता वर्तते।

[५२८] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्।। कर्म०पृ. ३२।।

फलं नैवेद्यं गुड नैवेद्यं वा पूरतो निधाय। ॐ गं गणपतये नमः इत्युक्त्वा जलं संप्रोक्षेत्। ग्रासमुद्रया[५२९] भोजयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।
नैवेद्य मध्ये पानीयं समर्पयामि। पुनः भोजयेत्।
ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाया।
ॐ समानाय स्वाहा।
ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत् । हस्त प्रक्षालनं समर्पयामि। इत्युक्त्वा हस्तप्रक्षालनार्थे आचमनीयं जलं समर्पयेत्। मुखप्रक्षालनं समर्पयामि। इत्युक्त्वा मुखप्रक्षालनार्थे आचमनीयं जलं समर्पयेत् । करोद्वर्तनार्थे चन्दनं समर्पयामि । इत्युक्त्वा चन्दनं समर्पयेत् । प्रार्थनापूर्वकं नमस्करोमि ।

हस्ते जलमादाय। अनेन पञ्चोपचारपूजन कृतेन श्रीसिद्धिबुद्धिसहित महागणपतिः प्रीयतां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।
इति गणपतिं सम्पूज्य मनोजूतिरिति गायत्रीं प्रतिष्ठाप्य। बटुको हस्ते अक्षतान् गृहीत्वा।

ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० ०२/१३।।[५३०]

इत्युक्त्वा अक्षतान् समर्पयेत्। ततो नाममन्त्रेण यथालाभोपचारैः गायत्रीं सम्पूज्याचार्यं पूजयेत्। ततो बटुकाय क्षौमं कार्पासकं वा वस्त्रमवगुण्ठ्य उपदेशं दद्यात्।

---

[५२९] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

[५३०] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

हस्ते जलमादाय। ॐ तत्सवितुरिति विश्वामित्र ऋषिः गायत्री छन्दः सूर्यो देवता उपदेशग्रहणे विनियोगः। इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

तत आचार्यो गायत्रीं[५३१] ब्रूयात्। (आचार्येण मन्त्रोपदेश एकैकपादतः ततश्च पूर्णोमन्त्रः पाठयितव्य इति शास्त्रीयो वाकोऽनुवाकः।)

(ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि।
धीयोयोनः प्रचोदयात्।। शु०य० ३६/०३।।)

ॐ भूर्भुवः सवः ॐ तत्सवितुर्वरेण्यम्।।
ॐ स्वस्तीति बटुको वदेत्।

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि।।
ॐ स्वस्तीति बटुको वदेत्।

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि।
धीयोयोनः प्रचोदयात्।।
ॐ स्वस्तीति बटुको वदेत्।

## २२/ २१. अथ सन्धुक्षणहोमः।

ततो यथोक्तमुपविश्य प्रकृतेऽग्नौ समिदाधानं करोति ब्रह्मचारी। तत्र पूर्वमग्नेः पञ्चभिः शुष्कगोमयखण्डैः पञ्चभिर्मन्त्रैरिन्धनैः बटुकः प्रक्षेपं करोति।

बटुको हस्ते जलमादाय। अग्ने सुश्रवादीनां ब्रह्मा ऋषिः यजुश्छन्दः अग्निर्देवता सन्धुक्षणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ अग्नेः सुश्रवः सुश्रवसम्माकुरु।। इति प्रक्षेपः।[५३२]

---

[५३१] अत्र यज्ञोपवीतरहितानां ब्राह्मणक्षत्रियवैश्यानां कृते गायत्रीमन्त्र एवं पठ्यते।
यो देवः सविताऽस्माकं मनः प्राणेन्द्रियक्रियाः।
प्रचोदयति तद्भर्गं वरेण्यं समुपास्महे।। कर्म०पृ. २६८।।
स्त्रीशूद्रयोः कृते तु श्रीमद्देवीभागवतमहापुराणस्य मङ्गलश्लोको गायत्रीमन्त्र इति शास्त्रीयटीकाकारा वदन्ति।
सर्वचैतन्यरूपां तामाद्यां विद्यां च धीमहि। बुद्धिं या नः प्रचोदयात्।। ०१/०१/०१।।

[५३२] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. सुश्रवः सुश्रवाग्ने सम्माकुरु।। इति प्रक्षेपः। २. त्वमग्नये यथादेवानां सुश्रवः सुश्रवा असि।। इति

२. ॐ यथात्वमग्ने सुश्रव: सुश्रवाऽअसि।। इति प्रक्षेप:।

३. ॐ एवं मां सुश्रव: सौश्रवसं कुरु।। इति प्रक्षेप:।

४. ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपोऽअसि।। इति प्रक्षेप:।

५.ॐएवमहं मनुष्याणां वेदस्य निधिपो भूयासम्।। पा०गृ०सू००२/०४/०२।।इति प्रक्षेप:।।

**२२/ २२. अथ समिदाधानम्।**

प्रदक्षिणमग्निम् इतरथावृत्ति:। उत्थाय समिधमादधाति।

बटुको हस्ते जलमादाय। अग्नेसमिधमिति प्रजापतिर्ऋषि: आकृतिच्छन्द: सविता देवता समिदाधाने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अग्नये समिधमहार्षं बृहते जातवेदसे।
यथा त्वमग्ने समिधा समिध्यसऽएवमहमायुषा मेधया वर्चसा प्रजया
पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णु-
र्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा।। पा०गृ०सू० ०२/०४/०३।।[५३३]

इत्यनेन मन्त्रेण प्रथमां समिधं ततो द्वितीयां तृतीयां च जुहुयात्। एषात् इति वा।

ॐ ऐषा तेऽअग्ने समित्तया वर्द्धस्व चा च प्यायस्व।
वर्धिषीमहि च वयमा च प्यासिषीमहि।
अग्ने वाजजिद्वाजं त्वा ससृवां सं वाजजितं सम्मार्ज्मि।। शु०य० ०२/१४।।[५३४]

अनयोर्मन्त्रयो: समुच्चयो वा। बटुक उपविश्य पुन: पूर्वोक्तपाञ्चभिर्मन्त्रै: अग्ने: सन्धुक्षणं पर्युक्षणं च समिदाधानं च कुर्यात्। यथा-

**सन्धुक्षणहोमम्।**

१. ॐ अग्ने: सुश्रव: सुश्रवसम्माकुरु।। इति प्रक्षेप:।[५३५]

---

प्रक्षेप:। ३. सुश्रव सौश्रवसं मामेव कुरु।। इति प्रक्षेप:। ४. देवानां यथात्वमग्ने यज्ञस्याऽसिर्निधिप:।। इति प्रक्षेप:। ५. मनुष्याणामहमेवमुपवेदस्य निधिपो भूयासम्।। इति प्रक्षेप:।

[५३३] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५३४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५३५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

२. ॐ यथात्वमग्ने सुश्रव: सुश्रवाऽअसि।। इति प्रक्षेप:।
३. ॐ एवं मां सुश्रव: सौश्रवसं कुरु।। इति प्रक्षेप:।
४. ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपोऽअसि।। इति प्रक्षेप:।
५.ॐएवमहं मनुष्याणां वेदस्य निधिपो भूयासम्।। पा०गृ०सू००२/०४/०२।।इति प्रक्षेप:।।

**समिदाधानम्।**

प्रदक्षिणमग्निम् इतरथावृत्ति:। उत्थाय समिधमादधाति।

बटुको हस्ते जलमादाय। अग्नेसमिधमिति प्रजापतिर्ऋषि: आकृतिच्छन्द: सविता देवता समिदाधाने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अग्नये समिधमहार्षं बृहते जातवेदसे।
यथा त्वमग्ने समिधा समिध्यसऽएवमहमायुषा मेधया वर्चसा प्रजया
पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णु-
र्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा।। पा०गृ०सू० ०२/०४/०३।।[५३६]

इत्यनेन मन्त्रेण प्रथमां समिधं ततो द्वितीयां तृतीयां च जुहुयात्। एषात् इति वा।

ॐ ऐषा तेऽअग्ने समित्तया वर्द्धस्व चा च प्यायस्व।
वर्धिषीमहि च वयमा च प्यासिषीमहि।
अग्ने वाजजिद्वाजं त्वा ससृवां सं वाजजितं सम्मार्ज्मि।। शु०य० ०२/१४।।[५३७]

इत्येतै: पञ्चभिर्मन्त्रै: प्रतिमन्त्रं समिन्धनप्रक्षेप:। अग्ने: पर्युक्षणम्। तत: तूष्णीं पाणी प्रतप्य। तनूपाऽअग्नेसि इत्यादिसप्तभिर्मन्त्रै: बटुक: प्रतिमन्त्रं मुखविमर्शनं करोति।

**२२/२३. अथ मुखविमर्शनम्।**

---

१. सुश्रव: सुश्रवाग्ने सम्माकुरु।। इति प्रक्षेप:। २. त्वमग्नये यथादेवानां सुश्रव: सुश्रवा असि।। इति प्रक्षेप:। ३. सुश्रव सौश्रवसं मामेव कुरु।। इति प्रक्षेप:। ४. देवानां यथात्वमग्ने यज्ञस्याऽसिर्निधिप:।। इति प्रक्षेप:। ५. मनुष्याणामहमेवमुपवेदस्य निधिपो भूयासम्।। इति प्रक्षेप:।

[५३६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५३७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

बटुको हस्ते जलमादाय। तनूपाऽअग्नेत्यादि सप्तमन्त्राणां बृहद्देवा ऋषय: यजुंषि छन्दांसि अग्निर्देवता मुखविमर्शने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ तनूपाऽअग्नेऽसि तन्वं मे पाहि।।[५३८]
२. ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि।।
३. ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि।।
४. ॐ अग्ने यन्मे तन्वा ऊनन्तम आपृण।। पा०गृ०सू० ०२/०४/०७।।
५. ॐ मेधां मे देव: सविता आदधातु।।
६. ॐ मेधां मे देवी सरस्वती आदधातु।।
७. ॐ मेधां मेऽश्विनौ देवावाधत्तां पुष्करस्रजौ।। पा०गृ०सू० ०२/०४/०८।।

अत्र शिष्टाचारतोऽनुष्ठेया: पदार्था:।

## २२/२४. अथाऽङ्गाप्यायनम्।

बटुको हस्ते जलमादाय। अङ्गानिचेत्यादिनां प्रजापतिऋषि: यजुश्छन्द: लिङ्गोक्ता देवता अङ्गाप्यायने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ अङ्गानिचमऽआप्यायन्तामिति सर्वाङ्गे।[५३९]
२. ॐ वाक्चमऽआप्यायतामिति मुखालम्भनम्।
३. ॐ प्राणश्चमऽआप्यायतामिति नासिकयोरालम्भनम्।
४. ॐ चक्षुश्चमऽआप्यायतामिति नेत्रयोरालम्भनम्।
५.ॐ श्रोत्रञ्चमऽआप्यायतामिति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामकर्णालम्भनम्।
६. ॐ यशोबलञ्चमऽआप्यायतामिति। हस्तयोरालम्भनम्।

ततस्त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणांसे हृदि च।

---

[५३८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. अग्ने मे तनुं पाहि।। २. अग्ने मे आयुर्देहि।। ३. अग्ने मे वर्च्चोदेहि।। ४. अग्ने मे यदूनं तन्म आपृणीहि।। ५. अग्ने मे मेधां आदधातु।। ६. मेधाम्मे सरस्वती आदधातु। ७. मेधाम्मे देवावश्विनौ पुष्कर-स्रजावाधत्ताम्।। कर्म०पृ. २७०।।

[५३९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. मेअङ्गानि आप्यायन्ताम्।। इति सर्वाङ्गे। २. मम वाक् आप्यायताम्।। इति मुखालम्भनम्। ३. मम प्राणश्च आप्यायताम्।। इति नासिकयोरालम्भनम्। ४. मम चक्षुषी आप्यायताम्।। इति नेत्रयोरालम्भनम्। ५. मम श्रोत्रे आप्यायेताम्।। इति दक्षिणकणमालभ्यानेनैव मन्त्रेण वामकर्णालम्भनम्। ६. मम बलं यशश्चाप्यायेताम्।। इति हस्तयोरालम्भनम्।। कर्म०पृ. २७०।।

**२२/ २५. अथ भस्मधारणम्।**

बटुको हस्ते जलमादाय। त्र्यायुषमितिनारायण ऋषिः उष्णिक् छन्दः अग्निर्देवता भस्मना तिलककरणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ त्र्यायुषं जमदग्नेरिति ललाटे।[५४०]
ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम्।
ॐ यद्देवेषु त्र्यायुषमिति बाह्वोः।
ॐ तन्नोऽअस्तु त्र्यायुषमिति हृदये।। शु०य० ०३/६२।।

इति मन्त्रेण भस्मं धारयेत्।

**२२/ २६. अथाऽभिवादनम्।**

ततो बटुकः स्वस्तिकाकारहस्ताभ्यां कर्णौ स्पृष्ट्वा स्वस्य नामगोत्रप्रवरोच्चारणपूर्वकं वैश्वानरादीनामभिवादयेत्।

अमुकगात्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्माऽहं[५४१]

भो वैश्वानर त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो गुरो त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो आचार्य त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो मातापितरौ युवामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो सूर्याचन्द्रमसौ युवामभिवादयामि। आयुष्मान्भव सौम्य इति मातापितृ स्थाने आचार्यो वदेत्।
सर्वान्ब्राह्मणान् अभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।

इत्यभिवादनम्। सन्ध्या वंदनाधिकारोऽस्तु।[५४२]

**२२/ २७. अथ भिक्षाचर्याचरणम्।**

ब्रह्मचारी दण्डं भिक्षापात्रं च प्रतिगृह्य सावित्र्या आदित्यमुपस्थाय अग्निं प्रदक्षिणीकृत्य प्रथमं मातरं भिक्षेत्।

---

[५४०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यथाग्निर्दहते भस्म तृणकाष्ठादिसंचयम्। तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिम्।। कर्म०पृ. ११।।

[५४१] अत्र ब्राह्मणेतरवर्णानां कृते अभिवादने काश्यपगोत्रोत्पन्नः वेदशाखा प्रवररहितः अमुकनामाऽहमिति वदेत्।

[५४२] यावद् ब्रह्मोपदेशो न तावत्सन्ध्यादिकं च न। ततो मध्याह्नसन्ध्यादि सर्वकर्म समाचरेत्।। ब्र०स०पृ. ४०१।।

ॐ भवति भिक्षां देहि[५४३]। ॐ स्वस्ति। इति बटुको वदेत्।

तिस्रः षट् द्वादश वा अपरिमिता भिक्षा ग्राह्या। आचार्याय भैक्ष्यं निवेदयित्वा भुङ्क्ष्व इति आचार्यानुज्ञातो भिक्षां स्वीकुर्यात्। वाग्यतोऽहश्शेषं तिष्ठेदित्येके।

**सन्धुक्षणहोमः।**[५४४]

अहिंसन् अरण्यात् (स्वयंभग्नाः) समिध आहृत्य तस्मिन्नग्नौ पूर्ववत् आधाय। ततः पाणिनाऽग्निं परिसमूहति।

बटुको हस्ते जलमादाय। अग्नेसुश्रवादीनां ब्रह्माऋषिः यजुश्छन्दः अग्निर्देवता समिन्धने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ अग्नेः सुश्रवः सुश्रवसम्माकुरु।। इति प्रक्षेपः।[५४५]
२. ॐ यथात्वमग्ने सुश्रवः सुश्रवाऽअसि।। इति प्रक्षेपः।
३. ॐ एवं मां सुश्रवः सौश्रवसं कुरु।। इति प्रक्षेपः।
४. ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपोऽअसि।। इति प्रक्षेपः।
५.ॐएवमहं मनुष्याणां वेदस्य निधिपो भूयासम्।। पा०गृ०सू००२/०४/०२।।इति प्रक्षेपः।।

**समिदाधानम्।**

प्रदक्षिणमग्निम् इतरथावृत्तिः। उत्थाय समिधमादधाति।

बटुको हस्ते जलमादाय। अग्नेसमिधमिति प्रजापतिर्ऋषिः आकृतिच्छन्दः सविता देवता समिदाधाने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अग्नये समिधमहार्षं बृहते जातवेदसे।
यथा त्वमग्ने समिधा समिध्यसऽएवमहमायुषा मेधया वर्चसा प्रजया

---

[५४३] ब्राह्मणक्षत्रियवैश्यबटुकानां भिक्षाकाले समुच्चार्यमाणस्य वाक्यस्य प्रकारो भगवता मनुना लिखित।
भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः। भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम्।। ०२/४९।।

[५४४] अद्यावधि प्रकाशितेषु ब्रह्मनित्यकर्मसमुच्चयादि ग्रन्थेषु सन्धुक्षणहोमः (२२/१७)तः अभिवादनम् (२२/२२) पर्यन्ताः षट् विधयः पुनरुक्तिभयात् न प्रदर्श्यन्ते। अत्र तु शोधनिबन्धत्वात् पुनरुक्तिभयं न गण्यते।

[५४५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. सुश्रवः सुश्रवाग्ने सम्माकुरु।। इति प्रक्षेपः। २. त्वमग्नये यथादेवानां सुश्रवः सुश्रवा असि।। इति प्रक्षेपः। ३. सुश्रव सौश्रवसं मामेव कुरु।। इति प्रक्षेपः। ४. देवानां यथात्वमग्ने यज्ञस्याऽसिर्निधिपः।। इति प्रक्षेपः। ५. मनुष्याणामहमेवमुपवेदस्य निधिपो भूयासम्।। इति प्रक्षेपः।

पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णु–
यर्शस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा।। पा०गृ०सू० ०२/०४/०३।।[५४६]

इत्यनेन मन्त्रेण प्रथमां समिधं ततो द्वितीयां तृतीयां च जुहुयात्। एषात् इति वा।

ॐ ऐषा तेऽअग्ने समित्तया वर्द्धस्व चा च प्यायस्व।
वर्धिषीमहि च वयमा च प्यासिषीमहि।
अग्ने वाजजिद्वाजं त्वा ससृवां सं वाजजितं सम्मार्ज्मि।। शु०य० ०२/१४।।[५४७]

पूर्ववत्परिसमूहनम्।

१. ॐ अग्ने: सुश्रव: सुश्रवसम्माकुरु।। इति प्रक्षेप:।[५४८]
२. ॐ यथात्वमग्ने सुश्रव: सुश्रवाऽअसि।। इति प्रक्षेप:।
३. ॐ एवं मां सुश्रव: सौश्रवसं कुरु।। इति प्रक्षेप:।
४. ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपोऽअसि।। इति प्रक्षेप:।
५.ॐएवमहं मनुष्याणां वेदस्य निधिपो भूयासम्।। पा०गृ०सू००२/०४/०२।।इति प्रक्षेप:।।

इत्येतै: पञ्चभिर्मन्त्रै: प्रतिमन्त्रं समिन्धनप्रक्षेप:। अग्ने: पर्युक्षणम्। तत: तूष्णीं पाणी प्रतप्य। तनूपाऽअग्नेसि इत्यादिसप्तभिर्मन्त्रै: बटुक: प्रतिमन्त्रं मुखविमर्शनं करोति।

## मुखविमर्शनम्।

बटुको हस्ते जलमादाय। तनूपाऽअग्नेत्यादि सप्तमन्त्राणां बृहद्देवा ऋषय: यजुंषि छन्दांसि अग्निर्देवता मुखविमर्शने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ तनूपाऽअग्नेऽसि तन्वं मे पाहि।।[५४९]

---

[५४६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५४७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५४८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. सुश्रव: सुश्रवाग्ने सम्माकुरु।। इति प्रक्षेप:। २. त्वमग्नये यथादेवानां सुश्रव: सुश्रवा असि।। इति प्रक्षेप:। ३. सुश्रव सौश्रवसं मामेव कुरु।। इति प्रक्षेप:। ४. देवानां यथात्वमग्ने यज्ञस्याऽसिर्निधिप:।। इति प्रक्षेप:। ५. मनुष्याणामहमेवमुपवेदस्य निधिपो भूयासम्।। इति प्रक्षेप:।

[५४९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. अग्ने मे तनुं पाहि।। २. अग्ने मे आयुर्देहि।। ३. अग्ने मे वर्च्चोदेहि।। ४. अग्ने मे यदूनं तन्म

२. ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि।।
३. ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि।।
४. ॐ अग्ने यन्मे तन्वा ऊनन्तम आपृण।। पा०गृ०सू० ०२/०४/०७।।
५. ॐ मेधां मे देव: सविता आदधातु।।
६. ॐ मेधां मे देवी सरस्वती आदधातु।।
७. ॐ मेधां मेऽश्विनौ देवावाधत्तां पुष्करस्रजौ।। पा०गृ०सू० ०२/०४/०८।।

अत्र शिष्टाचारतोऽनुष्ठेया: पदार्था:।

**अङ्गाप्यायनम्।**

बटुको हस्ते जलमादाय। अङ्गानिचेत्यादिनां प्रजापतिऋषि: यजुश्छन्द: लिङ्गोक्ता देवता अङ्गाप्यायने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ अङ्गानिचमऽआप्यायन्तामिति सर्वाङ्गे।[५५०]
२. ॐ वाक्चमऽआप्यायतामिति मुखालम्भनम्।
३. ॐ प्राणश्चमऽआप्यायतामिति नासिकयोरालम्भनम्।
४. ॐ चक्षुश्चमऽआप्यायतामिति नेत्रयोरालम्भनम्।
५.ॐ श्रोत्रञ्चमऽआप्यायतामिति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामकर्णालम्भनम्।
६. ॐ यशोबलञ्चमऽआप्यायतामिति। हस्तयोरालम्भनम्।

ततस्त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेंसे हृदि च।

**भस्मधारणम्।**

बटुको हस्ते जलमादाय। त्र्यायुषमितिनारायण ऋषि: उष्णिक् छन्द: अग्निर्देवता भस्मना तिलककरणे विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ त्र्यायुषं जमदग्नेरिति ललाटे।[५५१]

---

आपृणीहि।। ५. अग्ने मे मेधां आदधातु।। ६. मेधाम्मे सरस्वती आदधातु। ७. मेधाम्मे देवावश्विनौ पुष्कर-स्रजावाधत्ताम्।। कर्म०पृ. २७०।।

[५५०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

१. मेअङ्गानि आप्यायन्ताम्।। इति सर्वाङ्गे। २. मम वाक् आप्यायताम्।। इति मुखालम्भनम्। ३. मम प्राणश्च आप्यायताम्।। इति नासिकयोरालम्भनम्। ४. मम चक्षुषी आप्यायताम्।। इति नेत्रयोरालम्भनम्। ५. मम श्रोत्रे आप्यायेताम्।। इति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामकर्णालम्भनम्। ६. मम बलं यशश्चा-प्यायेताम्।। इति हस्तयोरालम्भनम्।। कर्म०पृ. २७०।।

ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम्।
ॐ यद्देवेषु त्र्यायुषमिति बाह्वोः।
ॐ तन्नोऽअस्तु त्र्यायुषमिति हृदये।। शु०य० ०३/६२।।

इति मन्त्रेण भस्मं धारयेत्।

## अभिवादनम्।

ततो बटुकः स्वस्तिकाकारहस्ताभ्यां कर्णौ स्पृष्ट्वा स्वस्य नामगोत्रप्रवरोच्चारणपूर्वकं वैश्वानरादीनामभिवादयेत्।

अमुकगात्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्माऽहं[५५२]

भो वैश्वानर त्वामभिवादयामि। आयुषमान्भव सौम्य इति आचार्यो वदेत्।
भो गुरो त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो आचार्य त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो मातापितरौ युवामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो सूर्याचन्द्रमसौ युवामभिवादयामि। आयुष्मान्भव सौम्य इति मातापितृ स्थाने आचार्यो वदेत्।
सर्वान्ब्राह्मणान् अभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।

इत्यभिवादनम्। वाग्विसर्गः। यावद् व्रतं तावदग्निरक्षणं त्रिरात्रं वा।

## २२/२८. अथ ब्रह्मचारिनियमाः।

अत आरभ्य आ ब्रह्मचर्यसमाप्तेर्ब्रह्मचारिणो नियमाः कथ्यन्ते आचार्येण। एते नियमाः–
अधः शयीत। अक्षारलवणाशी स्यात्। दण्डधारणम्। अग्निपरिचरणं समिदाधानं कर्तव्यम्। मधुमांसाशनं न कर्तव्यम्। मज्जनं नकर्तव्यम्। पर्यासने नोपविशेत्। स्त्रीणां मध्येऽवस्थानं न कर्तव्यम्। अदत्तं न गृह्णीयात्। अनृतं न वदेत्। अस्तसमये भास्करावलोकनं न कुर्यात्। कांस्यपात्रे मृण्मयपात्रे वा भोजनं न कुर्यात्। अभ्यङ्गमक्ष्णोरञ्जनमुपानच्छत्रादर्शं च वर्जयेत्। इति नियमाः।

## २२/२९. अथ ब्राह्मणभोजनसङ्कल्पः।

हस्ते जलमादाय। कृतस्य मम पुत्रस्योपनयनसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान् पञ्चाशत्सङ्ख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम् । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[५५१] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यथाग्निर्दहते भस्म तृणकाष्ठादिसंचयम्। तथा मे दह्यतां पापं कुरु भस्म शुचः शुचिम्।।कर्म०पृ. ११।।

[५५२] अत्र ब्राह्मणेतरवर्णानां कृते अभिवादने काश्यपगोत्रोत्पन्नः वेदशाखा प्रवररहितः अमुकनामाऽहमिति वदेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा।। १३५।। ब्र०स०पृ. ३१९।।

यथाशक्त्या उपनयनसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति उपनयनसंस्कारप्रयोगः।।**

**उपसंहारः।**

पूर्वस्यां संस्कृत्यां पूजनार्चनविधौ साहजिकरूपेण विधिसम्पादनार्थं सर्वसामान्यविधिः समग्रा-ङ्गतया प्रस्तुतः। अत्र च चतुर्थ्यां संस्कृत्यां गर्भाधानादारभ्योपनयनान्तानां संस्काराणां सम्पूर्णो विधिः वेदविदुषां पण्डितानां पुरोहितानां विद्यार्थिनां च सूकरतया शुलभतया च प्राप्त्यर्थं समायोजितो वर्त्तते।

## पञ्चमी संस्कृतिः।

## ऋग्वेदव्रतादिविवाहान्ताः संस्काराः।

## पृष्ठानि २८३ – ३६२।

## पञ्चमी संस्कृतिः।
## ऋग्वेदव्रतादिविवाहान्ताः संस्काराः।

### ।। वेदारम्भसंस्कारप्रयोगः।। २३।।
### (संस्कारः १०-१३)

ततो आचार्यः उपनयनान्ते वा अनध्याय दिनरहित ज्योतिःशास्त्रोक्त शुभे दिवसे वा प्राङ्मुखः उदङ्मुखो वा उपविशेत् आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

**२३/०१. अथ सङ्कल्पः।**

आचार्यो हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य मम अमुकशर्मणः ब्रह्मचारिणः स्वशाखापूर्वकम् वेदारम्भमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं पञ्चोपचारैः गणपतिपूजनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[५५३] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६),

[५५३] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका-(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

### २३/०२. अथ पञ्चोपचारगणपतिपूजनम्।

ब्रह्मचारी हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं-
हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु०य०२३/१९।।[५५४]

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि। ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः गन्धं समर्पयामि । इत्युक्त्वा गन्धं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः पुष्पं समर्पयामि । इत्युक्त्वा पुष्पं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः धूपं आघ्रापयामि । इत्युक्त्वा धूपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः दीपं दर्शयामि । इत्युक्त्वा दीपं समर्पयेत्।
ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः नैवेद्यं निवेदयामि । इत्युक्त्वा नैवेद्यं समर्पयेत्।
फलं नैवेद्यं गुड नैवेद्यं वा पूरतो निधाय। ॐ गं गणपतये नमः इत्युक्त्वा जलं संप्रोक्षेत्। ग्रासमुद्रया[५५५] भोजयेत्।

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे नमः ।
नैवेद्य मध्ये पानीयं समर्पयामि। पुनः भोजयेत्।
ॐ प्राणाय स्वाहा।

---

[५५४] अत्र ब्राह्मणेतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्।। कर्म०पृ. ३२।।

[५५५] वाम हस्तेन नासाग्रचारिणौ श्वासोच्छ्वासौ अवरुध्य दक्षिणहस्तेन च (पञ्चङ्गुलिभिः विहितया ग्रासमुद्रया नैवेद्यं निवेदयेत्)।

ॐ अपानाय स्वाहा।

ॐ व्यानाय स्वाहा।

ॐ उदानाय स्वाया।

ॐ समानाय स्वाहा।

ॐ ब्रह्मणे नमः।

नैवेद्यान्ते उत्तरापोशनं समर्पयामि। इत्युक्त्वा आचमनीयं जलं समर्पयेत् । हस्त प्रक्षालनं समर्पयामि। इत्युक्त्वा हस्तप्रक्षालनार्थे आचमनीयं जलं समर्पयेत्। मुखप्रक्षालनं समर्पयामि। इत्युक्त्वा मुखप्रक्षालनार्थे आचमनीयं जलं समर्पयेत् । करोद्वर्तनार्थे चन्दनं समर्पयामि । इत्युक्त्वा चन्दनं समर्पयेत् । प्रार्थनापूर्वकं नमस्करोमि ।

हस्ते जलमदाय। अनेन पञ्चोपचारपूजन कृतेन श्रीसिद्धिबुद्धिसहित महागणपतिः प्रीयतां न मम । इत्युक्त्वा जल पात्रे जलं क्षिपेत्।

ततो द्वितीयस्थण्डिले पञ्चभूसंस्कारपूर्वकं लौकिकाग्नेः स्थापनं कृत्वा ततो दक्षिणतो ब्रह्मासनादिचरुवर्ज्यं प्रकृतिवत्सर्वं।

अ़तः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/–) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/–) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

### २३/०३. अथाऽऽघारहोमः।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
   यजमानो वदेत्। इदमग्नये न मम।

४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेप:)
यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्याग:।

## २३/०४. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[५५६]
ॐ भूभुव: स्व: व्रतादेशे समुद्भवनाम्ने वैश्वानराय नम:। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

ततश्च सर्वाश्च वेदाहुतयो होतव्या:। यथा–

## २३/०५. अथर्ग्वेदाहुतय:।[५५७]

ॐ पृथिव्यै स्वाहा। इदं पृथिव्यै न मम।
ॐ अग्नये स्वाहा। इदमग्नये न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्य: स्वाहा। इदं छन्दोभ्यो न मम।

## २३/०६. अथ यजुर्वेदाहुतय:।

ॐ अन्तरिक्षाय स्वाहा। इदमन्तरिक्षाय न मम।
ॐ वायवे स्वाहा। इदं वायवे न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्य: स्वाहा। इदं छन्दोभ्यो न मम।

## २३/०७. अथ सामवेदाहुतय:।

ॐ दिवे स्वाहा। इदं दिवे न मम।

---

[५५६] अत्र ब्राह्मणेतरहितानां कृते पौराणिको मन्त्रो गृह्यते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।

[५५७] बृहद् ब्रह्मनित्यकर्मसमुच्चय–कर्मकौशल–श्रीनैमित्तिककर्मप्रकाशेत्वादि प्रकाशितेषु ग्रन्थेषु शुक्लयजुर्वेदाहुतीनां प्राथम्यमृगवेदाहुतीनां द्वितीयत्वं सामवेदाहुतीनां च तृतीयत्वं लभ्यन्ते।

ॐ सूर्याय स्वाहा। इदं सूर्याय न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्य: स्वाहा। इदं छन्दोभ्यो न मम।

## २३/०८. अथऽथर्ववेदाहुतय:।

ॐ दिग्भ्य: स्वाहा। इदं दिग्भ्यो न मम।
ॐ चन्द्रमसे स्वाहा। इदं चन्द्रमसे न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्य: स्वाहा। इदं छन्दोभ्यो न मम।
ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।
ॐ देवेभ्य: स्वाहा। इदं देवेभ्यो न मम।
ॐ ऋषिभ्य: स्वाहा। इदं ऋषिभ्यो न मम।
ॐ श्रद्धायै स्वाहा। इदं श्रद्धायै न मम।
ॐ मेधायै स्वाहा। इदं मेधायै न मम।
ॐ सदसस्पतये स्वाहा। इदं सदसस्पतये न मम।
ॐ अनुमतये स्वाहा। इदमनुमतये न मम।

## २३/०९. अथ नवाऽहुतिहोम:।

तत: ब्रह्मणाऽन्वारब्ध:–
१.ॐ भू: स्वाहा।[५५८] इदमग्नये न मम।
२.ॐ भुव: स्वाहा। इदं वायवे न मम।
३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।

---

[५५८] अत्र ब्राह्मणेतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. अग्नये नम: स्वाहा। इदम् अग्नये न मम।
२. वायवे नम: स्वाहा। इदं वायवे न मम।।
३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।
९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठा:।
यजिष्ठोवह्नितम: शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।
इदमग्निवरुणाभ्यां न मम।
५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/०४।।
इदमग्निवरुणाभ्यां न मम।
६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।
७. ॐ येते शतं वरुणंये सहस्रंयज्ञिया: पाशाविततामहान्त:।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुत: स्वर्का: स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।।
८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।
९. ॐ प्रजापतये स्वाहा।
इदं प्रजापतये न मम।
ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। उदकोपस्पर्श:।

संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्ति:। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्प:। कृतस्य वेदारम्भसंस्काराख्यस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।
अग्ने: पश्चात् प्रणीताविमोक:। तज्जलेन मार्जनम्।
ॐ आप: शिवा: शिवतमा: शान्ता:
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

## २३/१०. अथ सरस्वतीपूजनम्।

हस्ते जलमादाय। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मवर्चससिद्ध्यर्थं वेदसरस्वतीपूजनमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ वेदोसि येन त्वन्देव वेददेवेभ्यो वेदोभवस्तेनमह्यं वेदोभूया:।। शु०य० ०२/२१।।[५५९]

ॐ पावका न: सरस्वती व्वाजेभिर्व्वाजिनीवती।
यज्ञं व्वष्टुधियावसु:।। शु०य० २०/८४।।

ॐभूर्भुव: स्व: भगवते वेदनारायणाय नम:। भगवत्यै महासरस्वत्यै नम: इति षोडशोपचारै: पञ्चोपचारैर्वा सम्पूज्य अञ्जलौ पुष्पाण्यादाय।

नमस्ते शारदे देवी सरस्वतिमतिप्रदे।
वस त्वं मम जिह्वाग्रे सर्वविद्या प्रदा भव।। १३६।।

ॐभूर्भुव: स्व: भगवत्यै महासरस्वत्यै नम: प्रार्थनां समर्पयामि। हस्ते जलमादाय।
अनया पूजया वेदसरस्वत्यौ प्रीयेतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ततो ऋग्वेदादिमारभेत्।

ॐ भूर्भुव: स्व:[५६०] ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि।
धियोयोन: प्रचोदयात्।। शु०य० ३६/०३।।

## २३/ ११. अथर्ग्वेदारम्भ:।

ॐ इषे त्वोर्ज्जे त्वा वायव स्थ देवो व: सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्या-
यध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मावस्तेनऽईशत माघशंसो
ध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि।। शु०य० ०१/०१।।

ॐ स्वस्ति इति बटुको वदेत्। ॐ ऋग्वेदाय नम:।

## २३/ १२. अथ यजुर्वेदारम्भ:।

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।। ऋ० ०१/०१/०१।।

---

[५५९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीम्
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतिं पद्मासने संस्थिताम्
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्।। ब्र०स०पृ. ४०६।।

[५६०] प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्। सावित्रीं चानुपूर्वेण ततो वेदान् समारभेत्।। ब्र०नि०पृ० ४०६।।

ॐ स्वस्ति इति बटुको वदेत्। ॐ यजुर्वेदाय नमः।

**२३/ १३. अथ सामवेदारम्भः।**

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये।
निहोता सत्सि बर्हिषि।। साम० ०१/०१/ ।।

ॐ स्वस्ति इति बटुको वदेत्। ॐ सामवेदाय नमः।

**२३/ १४. अथऽथर्ववेदारम्भः।**

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।
शंय्योरभिस्त्रवन्तु नः।। अथ० ०१/०१।।

ॐ स्वस्ति इति बटुको वदेत्। ॐ अथर्ववेदाय नमः।

एवं वेदाध्ययनं कृत्वा ।

**२३/ १५. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। कृतस्य वेदारम्भसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान् यथाशक्ति ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम् । इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा।। १३७।। ब्र०स०पृ. ३१९।।

यथाशक्त्या वेदारम्भसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति वेदारम्भसंस्कारप्रयोगः।।**

## ।। केशान्तसंस्कारप्रयोगः।। २४।।

**(संस्कारः १४।)**

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०२/०१/०३) "षोडशवर्षस्य केशान्तः।।" इति केशान्त–संस्कारविषयकं सार्वत्रिकं नियमं विदधाति।

अस्य केशान्तसंस्कारस्य चौलसंस्कारतुल्यत्वात् तस्य मुहूर्तविषयेऽपि चौलसंस्कारप्रकरणे (अग्रे २१/चौलसंस्कारः ।।०८।।) चर्चितः कालः स्वीकर्तव्यः। कुलाचारशिष्टाचारानुसारेण वा मुहूर्त– विचारः कर्तव्यः। अयं संस्कारविधिर्बहिःशालायां क्रियते। ततो ब्रह्मचारिणः पिता आचमनं प्रणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि(०१/–)–प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९)।

## २४/०१. अथ प्रायश्चित्तसङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिणः केशान्तसंस्काराख्यस्य कर्मणः गुरुगृहे वेदाध्ययनकाले कृताऽकृत ज्ञाताऽज्ञात सकल दोष परिहारार्थं पादकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वाराऽहमाचरिष्ये। अनेन पादकृच्छ्ररूप–प्रायश्चित्तकृतेन अस्य ब्रह्मचारिणः केशान्तसंस्काराख्यस्य सकलदोषनिवृत्तिपूर्वक केशान्तसंस्कार कर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिणः केशान्तसंस्कार कर्मण्यधिकारार्थं सूत्रोक्तान् त्रिभ्योधिकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## २४/०२. अथ केशान्तसंस्कारविधिः।

ततो यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

## २४/०३. अथ सङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिणः केशान्तसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[५६१] मातृकापूजनं वैश्वदेवसङ्कल्पं वसोर्द्धारामायुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिऋत्विग्वरणं पुनर्दिग्रक्षणं पञ्चगव्यकरणं पृथ्विकूर्मानन्तपूजनं देवतावाहनं कुण्डपूजनं पञ्चभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[५६२] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

तत्र बहिःशालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं सभ्यनामाग्नेः स्थापनं पूजनं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/-) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/-) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/-) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

---

[५६१] यदा एकाधिकसंस्काराणाम् एकतन्त्रेण विधिः सम्पाद्यते तदा पुण्याहवाचनादि-कुण्डपूजनान्तानि कर्माणि एकवारमेव कुर्यात्। यदा तु तेषां संस्काराणां पृथक् पृथग् विधिः सम्पाद्यते तदा एतानि कर्माणि प्रत्येकस्मिन् संस्कारविधौ पृथग्तया करणीयानि।

[५६२] अत्र गर्भाधानसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका (गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनान्तं कुर्यात्। पात्रासादनानन्तरमुप–कल्पनीयानीमानिशीतोदकमुष्णोदकम्। ताम्रपरिष्कृत आयसः क्षुरः वरणितो नापितश्चेति। पवित्री– करणादि पवित्रयोः प्रणीतासु निधानम्। दक्षिणं जान्वाच्य ब्रह्मान्वारब्धः आघारावाज्यभागौ जुहुयात्।

**२४/०४. अथाऽऽघाराज्यहोमः।**

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

**२४/०५. अथाऽग्निपूजनम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[५६३]

ॐभूर्भुवःस्वः सभ्यनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

**२४/०६. अथ नवाऽहुतिहोमः।**

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।
ततः आज्येन भूराद्या नवाहुतयः।

---

[५६३] अत्र ब्राह्मणेतरहितानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः। तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

१.ॐ भू: स्वाहा।[५६४] इदमग्नये न मम।

२.ॐ भुव: स्वाहा। इदं वायवे न मम।

३.ॐ स्व: स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठा:।

यजिष्ठोवह्नितम: शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/३।।

इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।

अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/४।।

इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।

अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।

इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्रंयज्ञिया: पाशावितताममहान्त:।

तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुत: स्वर्का: स्वाहा।।

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।

अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।

इदं वरुणायाऽऽदित्यायाऽदितये च न मम।

मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।

९. ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

तत: संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्ति:। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्प:। कृतस्य सीमन्तोन्नयनसंस्काराख्यस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। यजमानो वदेत्। प्रतिगृह्यताम्। ब्रह्मा वदेत। प्रतिगृह्णामि।

---

[५६४] अत्र ब्राह्मणेतरहितानां कृते पौराणिकमन्त्रैर्नवाहुतय: दीयन्ते।

१. अग्नये नम: स्वाहा। इदम् अग्नये न मम।

२. वायवे नम: स्वाहा। इदं वायवे न मम।

३. सूर्याय नम: स्वाहा। इदं सूर्याय न मम।

४. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।

५. अग्निवरुणाभ्यां नम: स्वाहा। इदमग्निवरुणाभ्यां न मम।

६. अग्नये अयसे नम: स्वाहा। इदमग्नये अयसे न मम।

७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च नम: स्वाहा।

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।

८. वरुणायाऽऽदित्यायाऽदितये नम: स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।

मनसा प्रजापतये इत्युच्चार्यमाण: आचार्य:।

९. प्रजापतये नम: स्वाहा। इदं प्रजापतये न मम।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ।। पा०गृ०सू० ०३/१५/२१।।
अग्ने: पश्चात् प्रणीताविमोक:।
ॐ आप: शिवा: शिवतमा: शान्ता:
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

उपकल्पनीये वरस्थाने गौ: उष्णेन वा उदकेनेह्यदितेकेशश्मश्रुवप इत्युदकासेक: त्रि: क्षुरेण शिर: प्रदक्षिणं परिहरति सम्मुखं केशान्त:।

**२४/ ०७. अथ वपनम्।**[५६५]

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मण: साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिण: केशान्तकर्तुमधिकारार्थं केशश्मश्रुवपनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

तत: एकस्मिन्पात्रे शीतास्वप्सूष्णाऽअप: (= शीतजले उष्णजलम्) आसिञ्चति।

ॐ उष्णेन वाय उदकेनेह्यदिते केशश्मश्रुवप।। पा०गृ०सू० ०२/०१/०७।।

ततस्त्रि: क्षुरेण शिर: प्रदक्षिणं परिहरति।

ॐ यत्क्षुरेण मज्जयतासुपेशसा वप्त्वा वाऽवपति
केशाञ्छिन्धि शिरो माऽस्यायु: प्रमोषी:।। पा०गृ०सू ०२/०१/१८।।

ततस्तेनैवोदकेन सर्वं केशश्मश्रुमस्तक आर्द्रं कृत्वा क्षुरं नापिताय प्रयच्छेत्।

आचार्यो वा यजमानो वा वदेत्।

ॐ अक्षुण्वन्परिवप।। ०२/०१/२०।।
नापितो वदेत्। वपामि।
नापित उदङ्मुस्थितस्य ब्रह्मचारिण: प्राक्संस्थं प्राङ्मुखस्थितस्योदक्संस्थं केशवपनं कुर्यात्। कुलव्यवस्थया शिखास्थापनं केशशेषं करोति। तत: सर्वान् केशान् गोमयपिण्डे वस्त्रादिनाऽऽवेष्ट्याऽनुगुप्तं कृत्वा गवां गोष्ठे स्थापयेत् अथवा तडागे जलमध्ये वा प्रक्षिपेत्।

[५६५] अत्र ब्राह्मणेतरहितानां वपनविधेरमन्त्रक:।

ततः ब्रह्मचारिणः स्नापयित्वा मस्तके स्वस्तिकं तथा च ललाटे तिलकं कुर्यात्। आचार्याय गोदानं ददाति।

### २४/ ०८. अथ गोदानसङ्कल्पः।

ब्रह्मचारिणः पिता हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। कृतस्य केशान्तसंस्काराख्य कर्मणः साङ्गतासिद्ध्यर्थं अस्मै अमुकगोत्रोत्पन्नाय अमुकवेदान्तर्गत अमुकशाखाध्यायिने अमुकशर्मणे अस्मदाचार्याय गोदानमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। गोदानं स्वीकृत्याऽऽचार्यो प्रतिगृह्णामीति बूयात्। ततश्चाऽऽचार्यो ब्रह्मचारिणं संवत्सरमेकं दशरात्रं षड्रात्रं त्रिरात्रं वा ब्रह्मचर्यपालनं केशश्मश्रुवपनत्यागं च निर्दिशेत्।

### २४/ ०९. अथ ब्राह्मणभोजनसङ्कल्पः।

हस्ते जलमादाय। कृतस्य केशान्तसंस्काराख्य कर्मणः साङ्गतासिद्ध्यर्थं स्मृत्युक्तान्दशसङ्ख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवता प्रीयतां न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा।। १३८।। ब्र०स०पृ. ३१९।।

यथाशक्त्या केशान्तसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति केशान्तसंस्कारप्रयोगः।।**

## ।। समावर्तनसंस्कारप्रयोगः।। २५।।
## (संस्कारः १५।)

पारस्कराचार्यः पारस्करगृह्यसूत्रेषु स एवं वर्तमानोऽमुत्राद्य वसत्यमुत्राद्य वसतीति तस्य स्नातकस्य कीर्तिर्भवति। त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति। समाप्य वेदसमाप्य व्रतं यःसमावर्त्तते स विद्यास्नातकः। समाप्य व्रतसमाप्य वेदं यः समावर्त्तते स व्रतस्नातकः। उभयं समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इति। आषोडशाद्वर्षाद् ब्राह्मणस्यानीतः कालो भवति। आद्वाविंशाद् राजन्यस्य। आचतुर्विंशाद् वैश्यस्य। (०२/०५/३१-३८)। वेदं समाप्य स्नायात्। (०२/०६/०१)। इति समावर्त्तनसंस्कारे सार्वत्रिकं नियमान् विदधाति।

ततो ब्रह्मचारिणः पिता आचमनं प्रणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि(०१/–)–प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९)।

## २५/०१. अथ प्रायश्चित्तसङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिणः समावर्तनसंस्काराख्यस्य कर्मणः गुरुगृहे वेदाध्ययनकाले कृताऽकृत ज्ञाताऽज्ञात सकल दोष परिहारार्थं पादकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वाराऽहमाचरिष्ये। अनेन पादकृच्छ्ररूपप्रायश्चित्तकृतेन अस्य ब्रह्मचारिणः समावर्तनसंस्काराख्यस्य सकलदोषनिवृत्तिपूर्वक–समावर्तनसंस्कारकर्मण्यधिकार सिद्धिरस्तु। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिणः समावर्तनसंस्कार कर्मण्यधिकारार्थं सूत्रोक्तान् त्रिभ्योधिकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## २५/०२. अथ समावर्तनसंस्कारविधिः।

ततो यजमानः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

## २५/०३. अथ सङ्कल्पः।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं अस्य ब्रह्मचारिणः पश्चाद् गृहस्थाश्रमप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनसंस्काराख्यं कर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं[५६६] मातृकापूजनं वैश्वदेवसङ्कल्पं वसोर्द्धारामायुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिऋत्विग्वरणं पुनर्दिग्रक्षणं पञ्चगव्यकरणं पृथ्विकूर्मानन्तपूजनं देवतावाहनं कुण्डपूजनं पञ्चभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

[५६६] यदा एकाधिकसंस्काराणाम् एकतन्त्रेण विधिः सम्पाद्यते तदा पुण्याहवाचनादि–कुण्डपूजनान्तानि कर्माणि एकवारमेव कुर्यात्। यदा तु तेषां संस्काराणां पृथक् पृथग् विधिः सम्पाद्यते तदा एतानि कर्माणि प्रत्येकस्मिन् संस्कारविधौ पृथग्तया करणीयानि।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७), मातृकापूजने (०४/-)[५६७] गौर्यादिमातृणां पूजनम् (०४/०७), वैश्वदेव सङ्कल्पः (०४/०८), श्र्यादिसप्तवसोर्धारापूजनम् (०४/०९), श्रीसूक्तम् (०४/१०), आयुष्यमन्त्रजपः (०५/-), नान्दीश्राद्धप्रयोगे (०६/-) पाद्यदानम् (०६/०१), सङ्कल्पः (०६/०२), आसनदानम् (०६/०३), गन्धादिदानम् (०६/०४), भोजननिष्क्रयभूतद्रव्यदानम् (०६/०५), सक्षीरयवमुदकदानम् (०६/०६), आशीषो ग्रहणम् (०६/०७), दक्षिणादानम् (०६/०८), विसर्जनम् (०६/०९), अनुव्रजनम् (०६/१०), पितृस्मरणम् (०६/११)।

### २५/ ०४. अथ समावर्तनम्।

ततो ब्रह्मचारि वदेत् स्नायामि किं अहं भो आचार्यः? इति। आचार्यो वदेत् स्नाहि इति। पूर्ववदुपसङ्गृह्य गुरुम्।

तत्र बहिःशालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं व्रतविसर्गे सूर्यनामाग्नेः स्थापनं पूजनं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/-) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/-) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/-) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनान्तं कुर्यात्। पात्रासादनानन्तरमुपकल्पनीयानि। सन्धुक्षणानि। पर्युक्षणार्थमुदकम्। तिस्रः समिधः। हरिताः कुशाः। अष्टौ

---

[५६७] अत्र समावर्तननसंस्कारविधौ अविघ्नमातृकापूजनं मण्डपमातृकापूजनं अवस्कर(उकरडी)पूजनं गौरमृत्तिका(गोरमटी)समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं गणपतिपूजनं (०४/०१-०६) न गृह्यन्ते।

वारिकुम्भाः। दधि तिला वा। धौतवस्त्रम्। नापितः। स्नानार्थमुदकम्।[५६८] उद्वर्तनद्रव्यम्। स्नानार्थमुष्णोदकम्। चन्दनम्। अहते वाससी। यज्ञोपवीते द्वे त्रीणि वा। पुष्पाणि। उष्णिग्। कर्णालङ्कारौ। अञ्जनम्। आदर्शः। छत्रम्। उपानहौ। वैष्णवदण्डः। पवित्रीकरणादि पवित्रयोः प्रणीतासु निधानम्। दक्षिणं जान्वाच्य ब्रह्मान्वारब्धः आघारावाज्यभागौ जुहुयात्।

### २५/ ०५. अथाऽऽघारहोमः।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा – ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत्। इदं प्रजापतये न मम।

२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।

३. अग्नेरुत्तरार्धपुर्वार्द्धे– ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत्। इदमग्नये न मम।

४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः) यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

### २५/ ०६. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[५६९]

ॐ भूभुवः स्वः व्रतविसर्गे सूर्यनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

### २५/ ०७. अथ वेदाहुतयः।

---

[५६८] औदुम्बरं कनिष्ठाग्रवत्स्थूलं द्वादशाङ्गुलं दीर्घं सरलं सत्वचं दन्तधावनकाष्ठं ब्राह्मणस्य। दशाङ्गुलं राजन्यस्य। अष्टाङ्गुलं वैश्यस्य।

[५६९] अत्र ब्राह्मणेतरहितानां कृते पौराणिकाो मन्त्रो गृह्यते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।।

ततश्च सर्वाश्च वेदाहुतयो होतव्याः। यथा–

**ऋग्वेदाहुतयः।**[५७०]

ॐ पृथिव्यै स्वाहा। इदं पृथिव्यै न मम।
ॐ अग्नये स्वाहा। इदमग्नये न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्यः स्वाहा। इदं छन्दोभ्यो न मम।

**यजुर्वेदाहुतयः।**

ॐ अन्तरिक्षाय स्वाहा। इदमन्तरिक्षाय न मम।
ॐ वायवे स्वाहा। इदं वायवे न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्यः स्वाहा। इदं छन्दोभ्यो न मम।

**सामवेदाहुतयः।**

ॐ दिवे स्वाहा। इदं दिवे न मम।
ॐ सूर्याय स्वाहा। इदं सूर्याय न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्यः स्वाहा। इदं छन्दोभ्यो न मम।

**अथर्ववेदाहुतयः।**

ॐ दिग्भ्यः स्वाहा। इदं दिग्भ्यो न मम।
ॐ चन्द्रमसे स्वाहा। इदं चन्द्रमसे न मम।
ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम।
ॐ छन्दोभ्यः स्वाहा। इदं छन्दोभ्यो न मम।
ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।
ॐ देवेभ्यः स्वाहा। इदं देवेभ्यो न मम।
ॐ ऋषिभ्यः स्वाहा। इदं ऋषिभ्यो न मम।
ॐ श्रद्धायै स्वाहा। इदं श्रद्धायै न मम।

---

[५७०] बृहद् ब्रह्मनित्यकर्मसमुच्चय–कर्मकौशल–श्रीनैमित्तिककर्मप्रकाशेत्वादि प्रकाशितेषु ग्रन्थेषु शुक्लयजुर्वेदाहुतीनां प्राथम्यमृगवेदाहुतीनां द्वितीयत्वं सामवेदाहुतीनां च तृतीयत्वं लभ्यन्ते।

ॐ मेधायै स्वाहा। इदं मेधायै न मम।

ॐ सदसस्पतये स्वाहा। इदं सदसस्पतये न मम।

ॐ अनुमतये स्वाहा। इदमनुमतये न मम।

## २५/०८. अथ नवाऽहुतिहोमः।

ततः ब्रह्मणाऽन्वारब्धः-

१.ॐ भूः स्वाहा।[५७१] इदमग्नये न मम।

२.ॐ भुवः स्वाहा। इदं वायवे न मम।

३.ॐ स्वः स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः।
यजिष्ठोवह्नितमः शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।
इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/०४।।
इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्रंयज्ञियाः पाशाविततामहान्तः।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।

---

[५७१] अत्र ब्राह्मणेतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।

१. अग्नये नमः स्वाहा। इदम् अग्नये न मम।

२. वायवे नमः स्वाहा। इदं वायवे न मम।।

३. सूर्याय नमः स्वाहा। इदं सूर्याय न मम।

४. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।

५. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।

६. अग्नये अयसे नमः स्वाहा। इदमग्नये अयसे न मम।

७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च नमः स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।

८. वरुणायाऽऽदित्यायाऽदितये नमः स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।
मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।

९. प्रजापतये नमः स्वाहा। इदं प्रजापतये न मम।

इदं वरुणायाऽऽदित्यायाऽदितये च न मम।

मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।

९. ॐ प्रजापतये स्वाहा।

इदं प्रजापतये न मम।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। उदकोपस्पर्शः।

संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्पः। कृतस्य समावर्तनसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ।। पा०गृ०सू० ०३/१५/२१ ।।

अग्नेः पश्चात् प्रणीताविमोकः। तज्जलेन मार्जनम्।

ॐ आपः शिवाः शिवतमाः शान्ताः

शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

## २५/०९. अथ सन्धुक्षणहोमः।[५७२]

अहिंसन् अरण्यात् (स्वयंभग्नाः) समिध आहृत्य तस्मिन्नग्नौ पूर्ववत् आधाय। ततः पाणिनाऽग्निं परिसमूहति।

ब्रह्मचारी हस्ते जलमादाय। अग्नेसुश्रवादीनां ब्रह्माऋषिः यजुश्छन्दः अग्निर्देवता समिन्धने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ अग्नेः सुश्रवः सुश्रवसम्माकुरु।। इति प्रक्षेपः।[५७३]

२. ॐ यथात्वमग्ने सुश्रवः सुश्रवाऽअसि।। इति प्रक्षेपः।

३. ॐ एवं मां सुश्रवः सौश्रवसं कुरु।। इति प्रक्षेपः।

४. ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपोऽअसि।। इति प्रक्षेपः।

५.ॐएवमहं मनुष्याणां वेदस्य निधिपो भूयासम्।। पा०गृ०सू००२/०४/०२।।इति प्रक्षेपः।।

## २५/१०. अथ समिदाधानम्।

---

५७२ अद्यावधि प्रकाशितेषु ब्रह्मनित्यकर्मसमुच्चयादि ग्रन्थेषु सन्धुक्षणहोमः (२२/१७)तः अभिवादनम् (२२/२२) पर्यन्ताः षट् विधयः पुनरुक्तिभयात् न प्रदर्श्यन्ते। अत्र तु शोधनिबन्धत्वात् पुनरुक्तिभयं न गण्यते।

५७३ अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

१. सुश्रवः सुश्रवाग्ने सम्माकुरु।। इति प्रक्षेपः। २. त्वमग्नये यथादेवानां सुश्रवः सुश्रवा असि।। इति प्रक्षेपः। ३. सुश्रव सौश्रवसं मामेव कुरु।। इति प्रक्षेपः। ४. देवानां यथात्वमग्ने यज्ञस्याऽसिर्निधिपः।। इति प्रक्षेपः। ५. मनुष्याणामहमेवमुपवेदस्य निधिपो भूयासम्।। इति प्रक्षेपः।

प्रदक्षिणमग्निम् इतरथावृत्तिः। उत्थाय समिधमादधाति। ब्रह्मचारी हस्ते जलमादाय।

अग्नेसमिधमिति प्रजापतिर्ऋषिः आकृतिच्छन्दः सविता देवता समिदाधाने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अग्नये समिधमहार्षं बृहते जातवेदसे।
यथा त्वमग्ने समिधा समिध्यसऽएवमहमायुषा मेधया वर्चसा प्रजया
पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णु-
र्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा।। पा०गृ०सू० ०२/०४/०३।।[५७४]

इत्यनेन मन्त्रेण प्रथमां समिधं ततो द्वितीयां तृतीयां च जुहुयात्। एषात् इति वा।

ॐ ऐषा तेऽअग्ने समित्तया वर्द्धस्व चा च प्यायस्व।
वर्धिषीमहि च वयमा च प्यासिषीमहि।
अग्ने वाजजिद्वाजं त्वा ससृवां सं वाजजितं सम्मार्ज्मि।। शु०य० ०२/१४।।[५७५]

पूर्ववत्परिसमूहनम्।

१. ॐ अग्नेः सुश्रवः सुश्रवसम्माकुरु।। इति प्रक्षेपः।[५७६]
२. ॐ यथात्वमग्ने सुश्रवः सुश्रवाऽअसि।। इति प्रक्षेपः।
३. ॐ एवं मां सुश्रवः सौश्रवसं कुरु।। इति प्रक्षेपः।
४. ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपोऽअसि।। इति प्रक्षेपः।
५.ॐएवमहं मनुष्याणां वेदस्य निधिपो भूयासम्।। पा०गृ०सू००२/०४/०२।।इति प्रक्षेपः।।

इत्येतैः पञ्चभिर्मन्त्रैः प्रतिमन्त्रं समिन्धनप्रक्षेपः। अग्नेः पर्युक्षणम्। ततः तूष्णीं पाणी प्रतप्य। तनूपाऽअग्नेसि इत्यादिसप्तभिर्ममन्त्रैः ब्रह्मचारी प्रतिमन्त्रं मुखविमर्शनं करोति।

---

[५७४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५७५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मामग्नावा दग्धनीश समिधं जातवेदसि। मेधां प्रजां पशुं चैव यशस्तेजश्च वर्धताम्।। कर्म०पृ. २६९।।

[५७६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. सुश्रवः सुश्रवाग्ने सम्माकुरु।। इति प्रक्षेपः। २. त्वमग्नये यथादेवानां सुश्रवः सुश्रवा असि।। इति प्रक्षेपः। ३. सुश्रव सौश्रवसं मामेव कुरु।। इति प्रक्षेपः। ४. देवानां यथात्वमग्ने यज्ञस्याऽसिर्निधिपः।। इति प्रक्षेपः। ५. मनुष्याणामहमेवमुपवेदस्य निधिपो भूयासम्।। इति प्रक्षेपः।

## २५/ ११. अथ मुखविमर्शनम्।

ब्रह्मचारी हस्ते जलमादाय। तनूपाऽअग्नेत्यादि सप्तमन्त्राणां बृहद्देवा ऋषय: यजुंषि छन्दांसि अग्निर्देवता मुखविमर्शने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ तनूपाऽअग्नेऽसि तन्वं मे पाहि।।[५७७]
२. ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि।।
३. ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि।।
४. ॐ अग्ने यन्मे तन्वा ऊनन्तम आपृण।। पा०गृ०सू० ०२/०४/०७।।
५. ॐ मेधां मे देव: सविता आदधातु।।
६. ॐ मेधां मे देवी सरस्वती आदधातु।।
७. ॐ मेधां मेऽश्विनौ देवावाधत्तां पुष्करस्रजौ।। पा०गृ०सू० ०२/०४/०८।।

अत्र शिष्टाचारतोऽनुष्ठेया: पदार्था:।

## २५/ १२. अथाऽङ्गाप्यायनम्।

ब्रह्मचारी हस्ते जलमादाय। अङ्गानिचेत्यादिनां प्रजापतिऋषि: यजुश्छन्द: लिङ्गोक्ता देवता अङ्गाप्यायने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

१. ॐ अङ्गानिचमऽआप्यायन्तामिति सर्वाङ्गे।[५७८]
२. ॐ वाक्चमऽआप्यायतामिति मुखालम्भनम्।
३. ॐ प्राणश्चमऽआप्यायतामिति नासिकयोरालम्भनम्।
४. ॐ चक्षुश्चमऽआप्यायतामिति नेत्रयोरालम्भनम्।
५.ॐ श्रोत्रञ्चमऽआप्यायतामिति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामकर्णालम्भनम्।
६. ॐ यशोबलञ्चमऽआप्यायतामिति। हस्तयोरालम्भनम्।

ततस्त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेंसे हृदि च।

---

[५७७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

१. अग्ने मे तनुं पाहि।। २. अग्ने मे आयुर्देहि।। ३. अग्ने मे वर्च्चोदेहि।। ४. अग्ने मे यदूनं तन्म आपृणीहि।। ५. अग्ने मे मेधां आदधातु।। ६. मेधाम्मे सरस्वती आदधातु। ७. मेधाम्मे देवावश्विनौ पुष्कर-स्रजावाधत्ताम्।। कर्म०पृ. २७०।।

[५७८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

१. मेअङ्गानि आप्यायन्ताम्।। इति सर्वाङ्गे। २. मम वाक् आप्यायताम्।। इति मुखालम्भनम्। ३. मम प्राणश्च आप्यायताम्।। इति नासिकयोरालम्भनम्। ४. मम चक्षुषी आप्यायताम्।। इति नेत्रयोरालम्भनम्। ५. मम श्रोत्रे आप्यायेताम्।। इति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामकर्णालम्भनम्। ६. मम बलं यशश्चाप्यायेताम्।। इति हस्तयोरालम्भनम्।। कर्म०पृ. २७०।।

## २५/१३. अथ भस्मधारणम्।

ब्रह्मचारी हस्ते जलमादाय। त्र्यायुषमितिनारायण ऋषिः उष्णिक् छन्दः अग्निर्देवता भस्मना तिलककरणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ त्र्यायुषं जमदग्नेरिति ललाटे।[५७९]
ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम्।
ॐ यद्देवेषु त्र्यायुषमिति बाह्वोः।
ॐ तन्नोऽअस्तु त्र्यायुषमिति हृदये।। शु०य० ०३/६२।।

इति मन्त्रेण भस्मं धारयेत्।

## २५/१४. अथाऽभिवादनम्।

ततो ब्रह्मचारी स्वस्तिकाकारहस्ताभ्यां कर्णौ स्पृष्ट्वा स्वस्य नामगोत्रप्रवरोच्चारणपूर्वकं वैश्वानरादीनामभिवादयेत्।

अमुकगात्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्माऽहं[५८०]
भो वैश्वानर त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो गुरो त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो आचार्य त्वामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो मातापितरौ युवामभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।
भो सूर्याचन्द्रमसौ युवामभिवादयामि। आयुष्मान्भव सौम्य इति मातापितृ स्थाने आचार्यो वदेत्।
सर्वान्ब्राह्मणान् अभिवादयामि। आयुष्मान्भव सौम्य इति आचार्यो वदेत्।

इत्यभिवादनम्।

## २५/१५. अथोदककुम्भदेवतापूजनम्।

ततः आचार्यः परिश्रितस्योत्तरतः भूरसीत्यादिना क्रमेण अष्टानामुदककुम्भानां दक्षिणोत्तरागतानां स्थापनं कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः पुण्याहवाचनप्रयोगे (०३/-) प्रकरणात् गृहीतव्या। तद्यथा वरुणावाहनम् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३)।

---

[५७९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यथाग्निर्दहते भस्म तृणकाष्ठादिसंचयम्। तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिम्।।कर्म०पृ. ११।।

[५८०] अत्र ब्राह्मणेतरवर्णानां कृते अभिवादने काश्यपगोत्रोत्पन्नः वेदशाखा प्रवररहितः अमुकनामाऽहमिति वदेत्।

तत उदककुम्भानां पुरस्तात्प्रागग्रकुशास्तरणम्। तेषु स्नानकर्ता उदङ्मुखः स्थित्वा स्वयं च दक्षिणकलशादारभ्य प्रथमकलशात्।

**२५/ १६. अथ स्नानम्।**

ॐ येऽअप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूषोमनोहास्खलो
वरुजस्तनृदूषुरिन्द्रियहातान्वुजहामि यो रोचनस्तमहि गृह्णामि।। पा०गृ०सू० ०२/०६/१०।।[५८१]

इति मन्त्रेण प्रथम कलशादुदकं गृहीत्वा। तेनोदकेन–

ॐ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय।। पा०गृ०सू० ०२/०६/११।।

इति मन्त्रेण स्वस्य मस्तकेऽभिषिञ्चेत्। पुनः–

ॐ येऽअप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूषोमनोहास्खलो
वरुजस्तनृदूषुरिन्द्रियहातान्वुजहामि यो रोचनस्तमहि गृह्णामि।। पा०गृ०सू० ०२/०६/१०।।[५८२]

इति मन्त्रेण द्वितीय कलशादुदकं गृहीत्वा। तेनोदकेन–

ॐ येन श्रियमकृणुतां येनावमृशतां सुराम्।
येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यशः।। पा०गृ०सू० ०२/०६/१२।।

इति मन्त्रेण स्वस्य मस्तकेऽभिषिञ्चेत्। पुनः–

ॐ येऽअप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूषोमनोहास्खलो
वरुजस्तनृदूषुरिन्द्रियहातान्वुजहामि यो रोचनस्तमहि गृह्णामि।। पा०गृ०सू० ०२/०६/१०।।[५८३]
इति मन्त्रेण तृतीय कलशादुदकं गृहीत्वा। तेनोदकेन–

ॐआपो हि ष्ठा मयोभुवस्ता नऽउर्ज्जे दधातन ।
महे रणायचक्षसे।। शु०य० ११/५०।।

---

[५८१] अत्र क्षत्रियवैश्यौ वरुणाय नमः इत्युक्त्वा स्नानं कुर्याताम्।
[५८२] अत्र क्षत्रियवैश्यौ वरुणाय नमः इत्युक्त्वा स्नानं कुर्याताम्।
[५८३] अत्र क्षत्रियवैश्यौ वरुणाय नमः इत्युक्त्वा स्नानं कुर्याताम्।

इति मन्त्रेण स्वस्य मस्तकेऽभिषिञ्चेत्। पुनः-

ॐ येऽअप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूषोमनोहास्खलो
वरुजस्तनृदूषुरिन्द्रियहातान्वुजहामि यो रोचनस्तमहि गृह्णामि।। पा०गृ०सू० ०२/०६/१०।।[५८४]

इति मन्त्रेण चतुर्थ कलशादुदकं गृहीत्वा। तेनोदकेन-

ॐ यो वः शिवतमो रसस्तस्य भाजयतेहनः । उशतीरिव मातरः।। शु०य० ११/५१।।

इति मन्त्रेण स्वस्य मस्तकेऽभिषिञ्चेत्। पुनः-

ॐ येऽअप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूषोमनोहास्खलो
वरुजस्तनृदूषुरिन्द्रियहातान्वुजहामि यो रोचनस्तमहि गृह्णामि।। पा०गृ०सू० ०२/०६/१०।।[५८५]

इति मन्त्रेण पञ्चम कलशादुदकं गृहीत्वा। तेनोदकेन-

ॐ तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः।। शु०य० ११/५२।।

इति मन्त्रेण स्वस्य मस्तकेऽभिषिञ्चेत्। पुनः-

ॐ येऽअप्स्वन्तरग्नयः प्रविष्टा गोह्यऽउपगोह्यो मयूषोमनोहास्खलो
वरुजस्तनृदूषुरिन्द्रियहातान्वुजहामि यो रोचनस्तमहि गृह्णामि।। पा०गृ०सू० ०२/०६/१०।।[५८६]

इत्यनेन मन्त्रेण स्नानकर्ताऽऽत्मानम् षष्ठसप्तमाष्टमोदककुम्भेभ्यः उदकं गृहीत्वा तूष्णीं वारत्रयमभिषिञ्चेत्। ततश्चाऽऽचार्य प्रणमेत्।[५८७]

## २५/ १७. अथ मेखलोन्मोचनम्।

हस्ते जलमादाय। उदुत्तममिति शुनःशेप ऋषिः त्रिष्टुप् छन्दः वरुणो देवता मेखलोन्मोचने विनियोगः इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[५८४] अत्र क्षत्रियवैश्यौ वरुणाय नमः इत्युक्त्वा स्नानं कुर्याताम्।

[५८५] अत्र क्षत्रियवैश्यौ वरुणाय नमः इत्युक्त्वा स्नानं कुर्याताम्।

[५८६] अत्र क्षत्रियवैश्यौ वरुणाय नमः इत्युक्त्वा स्नानं कुर्याताम्।

[५८७] अस्मादभिषेकस्नानविधेरारभ्यः दण्डग्रहणविधि पर्यन्तं प्रतिविध्यन्ते स्नानकर्ताऽऽचार्यं प्रणमेत्।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथावयमादित्य व्रते तवानागसो अदितये स्याम।।शु०य० १२/१२।।

इति पठित्वा शिरोमार्गेण मेखलामुन्मुञ्चेत्। तूष्णिं दण्डं ततश्चाऽजिनं निधाय स्नानकर्ताऽऽदित्यमुपतिष्ठेत्।

**२५/१८. अथ सूर्योपस्थानम्।**

स्नानकर्ता ऊर्ध्वबाहुः स्थित्वा।

ॐ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दृशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवायावभिरस्था च्छतसनिरसि-शतसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्था-त्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय।। पा०गृ०सू० ०२/०६/१६।।[५८८]

ततस्तूर्ष्णीं दधितिलान्वा प्राश्य। आचम्य जटालोमनखान् संहृत्य। औदुम्बरेण काष्ठेन दन्तधावनं कुर्यात्।

**२५/१९. अथ दन्तधावनम्।**

हस्ते जलमादाय। अन्नाद्येति मन्त्रस्य अथर्वण ऋषिः अनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अन्नद्याय व्यूहध्वं सोमो राजायमागमत्।
स मे मुखं प्रमाक्ष्यर्ते यशसा च भगेन च।। पा०गृ०सू० ०२/०६/१७।।[५८९]

तत उदकेन मुखशोधनम्। ततः पुनः उष्णोदकेन स्नानम्। गन्धेन अनुलेपनं भाले। चन्दनाद्यनुलेपनं हस्ते गृहीत्वा। नासिकयोर्मुखे चोपगृह्णीयात्।

**२५/२०. अथ चन्दनोपग्रहणम्।**

[५८८] अत्र ब्राह्मणेतरवर्णानाकृते पौराणिको मन्त्रो गृह्यते।
नमो भगवते वासुदेवाय।

[५८९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते।। कर्म०पृ. ०३।।

हस्ते जलमादाय। प्राणापानौमेति मन्त्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः प्रणापानौ देवते चन्दनोपग्रहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ प्राणापानौ मे तर्पय। ॐ चक्षुर्मे तर्पय। ॐ श्रोत्रम्मे तर्पय।। पा०गृ०सू० ०२/०६/१८।।

ततः पाण्योरवनेजनं कृत्वा तदुदकमादाय। अपस्वयं कृत्वा। दक्षिणाभिमुखो भूत्वा तदुदकं दक्षिणस्यां दिशि निनयेत्।

**२५/ २१. अथ जल निषेकः।**

हस्ते जलमादाय। ॐपितरः शुन्धध्वमिति प्रजापतिर्ऋषिः यजुश्छन्दः अश्विन्द्रासरस्वतीदेवताः पाण्यावनेजनस्य दक्षिणस्यां दिशि निषेके विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ पितरः शुन्धध्वमिति पितरः शुन्धध्वम्।। पा०गृ०सू० ०२/०६/१९।।

सव्यम्। उदकस्पर्शः। ततश्चन्दनादिनाऽऽत्मानमनुलिप्य जपेत्।

**२५/ २२. अथ चन्दनानुलेपनम्।**

हस्ते जलमादाय। सुचक्षा इति मन्त्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः आशीर्देवता जपे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन।
सुश्रुत्कर्णाभ्यां भूयासम्।। पा०गृ०सू० ०२/०६/१९।।

ततः अहतं वासो धौतं वा परिधेयात्।

**२५/ २३. अथ वस्त्रपरिधानम्।**

हस्ते जलमादाय। परिधास्य इति मन्त्रस्य आलम्बायन ऋषिः पंक्तिश्छन्दः वासौ देवता वस्त्रपरिधाने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि।
शतं च जीवामि शरदः पुरुची रायस्पोषमभिसंव्ययिष्ये।। पा०गृ०सू० ०२/०६/२०।।

इति वासः परिधाय। आचमनं कृत्वा।

## २५/ २४. अथ यज्ञोपवीतधारणम्।

ततः ब्रह्मचारिणः आपोहिष्ठेतितिभिर्मन्त्रैर्यज्ञोपवीतं प्रक्षालयेत्।

हस्ते जलमादाय। आपोहिष्ठेति तिसृणां सिन्धुद्विप ऋषिः गायत्री छन्दः आपो देवता यज्ञोपवीतप्रक्षालने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ आपोहिष्ठामयोभुवस्तानऽउर्ज्जेदधातन। महेरणायचक्षसे।। शु०य० ११/५०।।[५९०]
ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः।। शु०य० ११/५१।।
ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः। शु०य० ११/५२।।

इति यज्ञोपवीतं प्रक्षाल्य करसम्पुटे धृत्वा दशवारं गायत्रीमन्त्रेण अभिमन्त्र्य।

ॐ ब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।
सबुद्ध्न्याऽउपमाऽअस्यविष्ठाः सतश्च योनिमसतश्चविवः।। शु०य० १३/०३।।[५९१]

ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्।
समूढमस्य पां सुरेस्वाहा।। शु०य० ०५/१५।।[५९२]

ॐ नमस्ते रुद्र मन्यवऽउतो त इषवे नमः।
बाहुभ्यामुत ते नमः।। शु०य० १६/०१।।[५९३]

इति त्रिभिर्मन्त्रैरङ्गुष्ठमुपवीते भ्रामयित्वा ततो नवतन्तुषु देवता अक्षतैरावाहयेत्।

प्रथमतन्तौ – ॐकाराय नमः। ॐकारमावाहयामि स्थापयामि।[५९४]

---

[५९०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरिकाक्षं स बाह्याभ्यन्तरः शुचिः।। ब्र०स०पृ. ३४।।

[५९१] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
विष्णोर्वरप्रदानेन तपः कर्तारमद्भुताम्। कर्म कर्तुं जगत् सृष्टेः ब्रह्माणं तं नमाम्यहम्।।

[५९२] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वत्र व्यापकं देवं प्रभुं लोकनमस्कृतम्। सर्वकल्याणकर्तारं वन्दे नारायणं विभुम्।।

[५९३] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः।।

[५९४] अत्र ब्राह्मणेतरवर्णानां कृते कर्मकौशलकारा नवतन्तुषु देवतावाहनमेवं पठन्ति।
१. नारायणाय नमः। नारायणमावाहयामि स्थापयामि। २. अग्नये नमः। अग्निमावाहयामि स्थापयामि।
३. नागेभ्यो नमः। नागानावाहयामि स्थापयामि। ४. सोमाय नमः। सोममावाहयामि स्थापयामि।

द्वितीयतन्तौ – ॐ अग्नये नमः। अग्निमावाहयामि स्थापयामि।
तृतीयतन्तौ – ॐ नागेभ्यो नमः। नागानावाहयामि स्थापयामि।
चतुर्थतन्तौ – ॐ सोमायनमः। सोममावाहयामि स्थापयामि।
पञ्चमतन्तौ – ॐ पितृभ्यो नमः। पितृनावाह्यामि स्थापयामि
षष्ठतन्तौ – ॐ प्रजापतये नमः। प्रजापतीमावाहयामि स्थापयामि।
सप्तमतन्तौ – ॐ अनिलाय नमः। अनिलमावाहयामि स्थापयामि।
अष्टमतन्तौ – ॐ यमाय नमः। यममावाहयामि स्थापयामि।
नवमतन्तौ – ॐ विश्वेभ्यो देवेभ्यो नमः। विश्वान् देवानावाहयामि स्थापयामि।

ततः यज्ञोपवीतग्रन्थिदेवता अक्षतैरावाहयेत्।

ॐ ब्रह्मणे नमः। ब्रह्माणमावाहयामि स्थापयामि।
ॐ विष्णवे नमः। विष्णुमावाहयामि स्थापयामि।
ॐ रुद्राय नमः। रुद्रमावाहयामि स्थापयामि।

**ततो ध्यानम्।**

ॐ प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम्।
ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम्।। ब्र०नि०स०पृ० ३९५।।

इति ध्यात्वा। ॐ प्रणवादिनवतन्तुदेवतासहितब्रह्मविष्णुरुद्रेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इति सम्पूज्य। उदुत्यमिति सूर्याय दर्शयेत्।

ब्रह्मचारिणः हस्ते जलमादाय। उदुत्यमिति प्रस्कण्व ऋषिः गायत्री छन्दः सूर्यो देवता सूर्यावलोकने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ उदुत्यं जातवेद सन्देवं वहन्ति केतवः।
दृशे विश्वाय सूर्य्यम्।। शु०य० ४१/०८।।[५९५]

---

५. इन्द्राय नमः। इन्द्रमावाहयामि स्थापयामि। ६. वायवे नमः। वायुमावाहयामि स्थापयामि।
७. प्रजापतये नमः। प्रजापतीमावाहयामि स्थापयामि। ८. सूर्याय नमः। सूर्यमावाहयामि स्थापयामि।
९. विश्वेभ्यो देवेभ्यो नमः। विश्वान् देवानावाहयामि स्थापयामि।

[५९५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
नमः सवित्रे जगदेक चक्षुषे जगत्प्रसूति स्थितीनाश हेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने।। कर्म०पृ. १२।।

इति सूर्याय यज्ञोपवीतं दर्शयेत्।

ब्रह्मचारी हस्ते जलमादाय। यज्ञोपवीतमितिमन्त्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता यज्ञोपवीतधारणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः।।
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि।। पा०गृ०सू० ०२/०२/११।।[५९६]

इति मन्त्रं पठीत्वा दक्षिणबाहुमुद्धृत्य वामस्कन्धोपरि यज्ञोपवीतं धारयेत्। ब्रह्मचारिणः त्रिवारमाचामेत्।

## २५/ २५. अथोत्तरीयधारणम्।

हस्ते जलमादाय। यशसामेति मन्त्रस्य अथर्वण ऋषिः पङ्क्तिश्छन्दः लिङ्गोक्तादेवता उत्तरीयवस्त्रधारणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती।
यशौभगश्चमाविन्दद्यशोमाप्रतिपद्यताम्।। पा०गृ०सू० ०२/०६/२१।।

इति उत्तरीयं धारयेत्। यदि एकं चेद्वासो भवति तदा तस्यैव परिधानं कृत्वा तस्यैव वासस उत्तरार्द्धमुत्तरीयं कुर्यात्।

## २५/ २६. अथ पुष्पमालाग्रहणम्।

हस्ते जलमादाय। याऽआहरज्जमदग्निरिति मन्त्रस्य भरद्वाज ऋषिः अनुष्टुप्छन्दः सुमनसो देवताः पुष्पमालापरिग्रहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ याऽआहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय।
ताऽअहं प्रतिगृह्णामि यशसा च भगेन च।। पा०गृ०सू० ०२/०६/२३।।

इति पुष्पमालां गृह्णीयात्। पुष्पमालां च शिरसि बध्नीयात्।

## २५/ २७. अथ पुष्पमालाबन्धनम्।

---

[५९६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यज्ञोपवीतं परमं षण्णवति तन्तुकम्। परिधास्याम्यहं शुद्धं ह्रीमादिदशदैवतम्।। कर्म०पृ. २६५।।

हस्ते जलमादाय। यद्यशोप्सरसेति मन्त्रस्य भरद्वाज ऋषि: अनुष्टप्छन्द: सुमनसो देवता: पुष्ममालाबन्धने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ यद्यशोप्सरसामिन्द्रश्चकार विपुलं पृथु।
तेन सङ्ग्रथिता: सुमनसऽआबध्नामि यशो मयि।। पा०गृ०सू० ०२/०६/२४।।

इति पुष्पमालां बध्नीयात्।

**२५/ २८. अथोष्णीषेण शिरोवेष्टनम्।**

हस्ते जलमादाय। युवासुवासा इति मन्त्रस्य विश्वामित्र ऋषि: त्रिष्टुप्छन्द: सूर्यो देवता उष्णीषेण शिरोवेष्टने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ युवासुवासा: परिवीतऽआगात्सऽउश्रेयान्भवति जायमान:।
तंधीरास: कवयऽउन्नयन्तिस्वाध्योमनसादेवयन्त:।। पा०गृ० ०२/०२/१९।।

इति शिरो वेष्टयेत्।

**२५/ २९. अथालङ्करणधारणम्।**

हस्ते जलमादाय। अलङ्करणमिति मन्त्रस्य भरद्वाज ऋषि: उष्णिक्छन्द: अलङ्करण देवता अलङ्करणधारणे वनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अलङ्करणमसिभूयोलङ्करणम्भूयात्।। पा०गृ०सू० ०२/०६/२६।।

दक्षिणवामकर्णे चाऽलङ्करणं धारयेत्।

**२५/ ३०. अथ चक्षुरञ्जनम्।**

हस्ते जलमादाय। वृत्रस्येति मन्त्रस्य प्रजापतिर्ऋषि: गायत्री छन्द: अञ्जनो देवता चक्षुरञ्जने विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ वृत्रस्यासिकनीनकश्चक्षुर्दाऽअसि चक्षुर्मे देहि।। शु०य० ०४/०३।।

इति चक्षुसोरञ्जनं कुर्यात्।

**२५/ ३१. अथाऽऽदर्शे आत्मदर्शनम्।**

हस्ते जलमादाय। रोचिष्णुरिति मन्त्रस्य सूर्य ऋषिः आशीर्देवता आदर्शे आत्मदर्शने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ रोचिष्णुरसि।। पा०गृ०सू० ०२/०६/२८।।

इत्यादर्शे आत्मदर्शनं कुर्यात्।

**२५/ ३२. अथ छत्रग्रहणम्।**

हस्ते जलमादाय। बृहस्पते इति मन्त्रस्य गौतम ऋषिः निचृद् गायत्री छन्दः छत्रं देवता छत्रग्रहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ बृहस्पतेश्छदिरसि पाप्मनो ममन्तेर्धेहि तेजसो यशसोमान्तर्धेहि।। पा०गृ०सू० ०२/०६/२९।।

इति छत्रग्रहणं कुर्यात्। ततः उपानहौ प्रमुञ्चते पादयोर्युगपत्।

**२५/ ३३. अथोपानट्परिधानम्।**

हस्ते जलमादाय। प्रतिष्ठेति मन्त्रस्य विश्वामित्र ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता उपानह्परिधाने विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ प्रतिष्ठेस्थो विश्वतोमापातम्।। पा०गृ०सू० ०२/०६/३०।।

इत्युपानट्परिधानम् कुर्यात्।

**२५/ ३४. अथ दण्डग्रहणम्।**

हस्ते जलमादाय। विश्वाभ्य इति मन्त्रस्य याज्ञवल्क्य ऋषिः त्रिष्टुप्छन्दः दण्डो देवता दण्डग्रहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वत।। पा०गृ०सू० ०२/०६/३१।।

इति मन्त्रेण वैष्णवदण्डमादत्ते।

### २५/ ३५. अथ स्नातकस्य नियमाः।

(०१) शूद्रादिस्पर्शनं न कर्तव्यम्। (०२) नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्। (०३) क्षेमे सति रात्रौ ग्रामान्तरं न गच्छेद क्षेमे तु कामं गच्छेत्। (०४) क्षेमे सति न धावेत्। (०५) कूपमध्ये अवलोकनं न कर्तव्यम्। (०६) वृक्षारोहणं न कर्तव्यम्। (०७) फलत्रोटनं न कर्तव्यम्। (०८) सन्ध्यासमये गमनं न कर्तव्यम्। (०९) नग्नस्नानं न कर्तव्यम्। (१०) पर्वतगर्तादेर्लङ्घनं न कर्तव्यम्। (११) लज्जकरं दुःखकरममङ्गलभाषणं न कर्तव्यम्। (१२) सन्ध्यासमये उपरुक्त सूर्यबिम्बावलोकनं न कर्तव्यम्। (१३) सवर्णं विना सिद्धभिक्षाचर्या न कर्तव्या। (१४) जलमध्ये स्वमुखं न पश्येत्। (१५) अनुत्पन्नलोम्नीं स्त्रीं पुरुषाकृतिं स्त्रीं नपुंसकं च एतान्नोपहसेत्। (१६) अभिगमनं च न कारयेत्। (१७) गर्भिणीं विजन्येति ब्रूयात्। (१८)नसकुलमिति नकुलं ब्रूयात्।[५९७] (१९) कपालं भगालमिति ब्रूयात्। (२०) इन्द्रधनुः मणिधनुरिति ब्रूयात्। (२१) परस्य गां वत्सं पाययन्तीं परस्मै स्वामिने वा न कथयेत्। (२२) सस्यवत्यां भूमौ केवलायां तृणैरनंतर्हितायां मूत्रपुरीषोत्सर्गं न कुर्यात्। (२३) धावमानः सन् उत्तिष्ठन् सन् मूत्रपुरीषोत्सर्गं न कुर्यात्। (२४) स्वयं प्रशीर्णेनायज्ञियकाष्ठेन गुदं प्रमृजीत्। (२५) तृणाद्यन्तरभूमौ शिरः प्रावरणैरावेष्टय यज्ञोपवीतं निवीतं कृत्वा आलम्बितं कर्णे कृत्वा दिवोदङ्मुखो रात्रौ दक्षिणमुख उपविश्य मौनी भूत्वा पुरीषोत्सर्गं कुर्यात्।
(२६) नील्यादिरञ्जितवस्त्रं न परिदधीत।

तिस्रो रात्रीर्व्रत नियमान् चरेत्। (२७) अमांसाशी भवेत्। (२८) मृन्मयेन पात्रेणोदकादिकं न पिबेत्। (२९) स्त्रीशूद्रशवकाकशुनां चाऽदर्शनमसम्भाषा च तैः। (३०) शवशूद्रसूतकान्नानि नाऽद्यात्। (३१) मूत्रपुरीषे ष्ठीवनं चाऽऽतपे न कुर्यात्। (३२) सूर्यात् स्वमात्मानं छत्रादिनाऽन्तर्हितं न कुर्यात्। (३३) तप्तेन जलेन शौचाचमनादिकाः क्रिया न कुर्वीत। (३४) रात्रौ दीपं प्रज्वाल्य भोजनं कुर्वीत। (३५) सत्यवाक्योच्चारणमेव कुर्यात्। इत्यादयो यमानियमाः कर्तव्याः।

### २५/ ३६. अथ ब्राह्मणभोजनसङ्कल्पः।

हस्ते जलमादाय। ततः कृतस्य समावर्तनसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं यथासङ्ख्याकान् ब्राह्मणान् बटुकान् कुमारिकाः सुवासिनीश्च यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम् न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। कृतस्य समावर्तनसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं भूयसीं दक्षिणां दातुमहमृत्सृजे तेन कर्माङ्गदेवताः प्रीयन्ताम् न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ततः आचार्यादीन् गन्धवस्त्रादिना सम्पूज्य तेभ्यश्च दक्षिणां दत्वा तेषामाशिषो गृह्णीयात्।

---

[५९७] षोडशसंस्कारपद्धतिकारा इतः परं नियमानदत्वाऽऽधुनिककालस्य संस्कारविधिं प्रति सवर्णानां यजमानानां विडम्बनां प्रस्तौति।

**२५/ ३७. अथाऽऽशीर्वादाः।**

ॐ शतञ्जीवशरदो वर्धमानः शतंहेमन्ताच्छतमुवसन्तान्।
शतमिन्द्राग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः।।[५९८]
ॐ शतञ्जीवशरदो वर्धमानऽइत्यपिनि गमोभवति शतमिति शतंदीर्घमायुर्मरुते मां वर्धयन्ति।
शतमेवशतमात्मानं भवति। शतमितिशतं दीर्घमायुः।। ब्रा० ।।
ॐ शतमिन्नु शरदोऽअन्ति देवायत्रानश्च्चक्क्रा जरसन्तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नोमध्यारीरिषतायुर्गन्तोः।। शु०य० २५/२२।।
ॐ विश्वानिदेवसवितर्दुरितानि परासुव।
यद्भद्रन्तन्नऽआसुव।। शु०य० ३०/०३।।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा।। १३९।। ब्र०स०पृ. ३१९।।

यथाशक्त्या समावर्तनसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति समावर्तनसंस्कारप्रयोगः।।**

**।। विवाहसंस्कारप्रयोगः।। २६।।**
**(संस्कारः १६।)**

**२६/ ०१. अथ वाग्दानविधिः।**

ज्योतिर्विदाऽऽदिष्टे विवाहनक्षत्रादियुते शुभे काले प्रशस्तवेषैर्युग्मब्राह्मणैः पुरन्ध्रीभिर्ज्ञातिबान्धवैश्च सह कन्यापिता[५९९] गन्धाक्षतपुष्पयुग्मवस्त्राभूषणताम्बूलादि गृहीत्वा तूर्यमङ्गलवाद्यादिभिर्यतः वरगृह-मागत्य शुभवस्त्रपीठासने प्रत्यङ्मुख उपविशेत्। कन्यापिता प्राङ्मुख उपविश्य स्वदक्षिणः प्राङ्मुखीं

---

[५९८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवति प्रसन्ना।। स०श००४/१५।।
धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृति करोति।
स्वर्गं प्रयाति च ततो भवतिप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन।। स०श० ०४/१६।।
दुर्गे स्मृता हरसि भितिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यद:खभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता।। स०श० ०४/१७।।

[५९९] अत्र वाग्दानविधौ बृहद् ब्रह्मनित्यकर्मसमुच्च - षोडश संस्कार पद्धति – कर्मकौशलकाराणां मते वरपिता कन्यागृहं गच्छतीति। सामान्यतया तु कन्यापिता वरगृहं गच्छति।

कन्यामुपवेश्य स्वपुरतः गणपतिं कलशं च संस्थाप्य। श्रीगणपत्यादिस्मरणपूर्वकं कन्याविवाहाङ्गभूतं वाग्दानं करोति।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

**२६/०२. अथ सङ्कल्पः।**

कन्यापिता हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ करिष्यमाणकर्मणः साङ्गतासिद्ध्यर्थं अस्या मम कन्यायाः विवाहाङ्गभूतं गणपतिपूजनं वरुणपूजनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

वरपिता हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ करिष्यमाणकर्मणः साङ्गतासिद्ध्यर्थं अस्य मम पुत्रस्य विवाहाङ्गभूतं गणपतिपूजनं वरुणपूजनं कन्यानिरिक्षणं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३)।

ततो वरपिता कन्यानिरीक्षण्पूर्वकं कुङ्कुमाक्षतपुष्पयुग्मवस्त्राभूषणताम्बूलादिभिः कन्यां स्थाने पूजयेत्सम्प्रदायागतमन्त्रैः। ततो दाता(= कन्यापिता) प्रत्यङ्मुखोपविष्टरपितरं गन्धताम्बूलादिभिः पूजयेत्। स च वरपिता दातारं पूजयेत्। ततो दाता(= कन्यापिता) हरिद्राखण्डयुतानि पञ्च वा सप्त पूगीफलानि गृहीत्वा पठेत्।

> अव्यङ्गेऽपतितेऽक्लिबे दशदोषविवर्जिते।
> इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ।। १४०।। ब्र०स०पृ. ४१८।।

**२६/०३. अथ गोत्रोच्चारः।**

ततो दाता(= कन्यापिता) वदेत्। अमुकगोत्रोत्पन्नाय[६००] अमुकप्रवरान्विताय अमुकशर्मण: प्रपौत्राय अमुकशर्मण: पौत्राय अमुकशर्मण: पुत्राय अमुकशर्मणे वराय।

अमुकगोत्रोत्पनाम् अमुकप्रवरान्विताम् अमुकशर्मण: प्रपौत्रीम् अमुकशर्मण: पौत्रीम् अमुकशर्मण: पुत्रीम् अमुकनाम्नीमिमां कन्यां ज्योतिर्विदादिष्टे मुहूर्ते दास्ये इति वाचा सम्प्रददे।

ॐ यदा बद्ध्नन्दाक्षायणाहिरण्यं शतानी कायसुमनस्यमाना:।
तन्मऽआबद्ध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्।। शु०य० ३४/५२।।[६०१]

इति मन्त्रेण हरिद्राखण्डपूगीफलानि वरपितृवस्त्रप्रान्ते बद्ध्वा ग्रन्थिं चन्दनार्चयित्वा वदेत्।

वाचा दत्ता मया कन्या पुत्रार्थे स्वीकृता त्वया।
कन्यावलोकनविधौ निश्चिन्तस्त्वं सुखी भव।। १४१।। ब्र०स०पृ. ४१९।।

ततो वरपिता पूर्ववत् हरिद्राखण्डपूगीफलानि गृहीत्वा। वदेत्।

अमुकगोत्रोत्पनाम् अमुकप्रवरान्विताम् अमुकशर्मण: प्रपौत्रीम् अमुकशर्मण: पौत्रीम् अमुकशर्मण: पुत्रीम् अमुकनाम्नीमिमां कन्याम् अमुकगोत्रोत्पन्नाय अमुकप्रवरान्विताय अमुकशर्मण: प्रपौत्राय अमुकशर्मण: पौत्राय अमुकशर्मण: पुत्राय अमुकशर्मणे वराय दातारो भवन्तो निश्चिन्ता भवन्तु।

ॐ यदा बद्ध्नन्दाक्षायणाहिरण्यं शतानी कायसुमनस्यमाना:।
तन्मऽआबद्ध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्।। शु०य० ३४/५२।।[६०२]

इति मन्त्रेण हरिद्राखण्डपूगीफलानि कन्यापितावस्त्रप्रान्ते बद्ध्वा ग्रन्थिं चन्दनार्चयित्वा वदेत्।

वाचा दत्ता त्वया कन्या पुत्रार्थे स्वीकृता मया।
वरावलोकनविधौ निश्चिन्तस्त्वं सुखी भव।। १४२।। ब्र०स०पृ. ४१९।।

---

[६००] सामान्यतया ब्राह्मणेतरवर्णानां काश्यपगोत्रत्वं स्वीक्रियते। केषाञ्चित क्षत्रियकुलानां वैश्यकुलानां च पृथग् गोत्रमपि प्राप्यते। ब्राह्मणानां तु गोत्र-प्रवर-वेद-शाखानां संग्रहो गोत्रप्रवरमञ्जरीग्रन्थे द्रष्टव्य:।

[६०१] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
येन बद्धो बलिराजा दानवेन्द्रो महाबल:। तेन त्वामभि बध्नामि रक्षे मा चल मा चल।।

[६०२] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
येन बद्धो बलिराजा दानवेन्द्रो महाबल:। तेन त्वामभि बध्नामि रक्षे मा चल मा चल।।

ततः कन्यापिता पात्रस्थिततण्डुलपुञ्जोपरि शचीमावाहयेत्। कन्याहस्ते गन्धाक्षतपुष्पाणि गृहीत्वा सम्पूज्य प्रार्थयेत्।

देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि।
विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे।। १४३।। ब्र०स०पृ. ४१९।।

पुरन्ध्रीभिर्निराजनादि माङ्गलिकं कार्यम्। विप्रान् गन्धताम्बूलदक्षिणादिभिः सम्पूज्य तेषामाशिषो गृहीत्वा गणपत्यादिं विसर्जयेत्।

## २६/०४. अथ विवाहविधेः पूर्वं वरगृहे प्रस्थान विधिः।

विवाहस्य शुभे दिने वरः प्रातरुत्थाय स्नानादिसन्ध्यादि नित्यकर्म सम्पादयेत्। कुलाचार्यमामन्त्र्य मातापितृभ्यां गणेशस्थापनं मण्डपमहूर्तं च कारयित्वा (यथाकुलाचारं पूर्वदिने रान्दलादीनां मातृकाणाम् आवाहनस्थापनपूजननैवेद्यादिकर्म पारयित्वा) ग्रहशान्तिमखस्याऽन्ते वा पूर्व वाहरिद्रापिष्टिकालेपनम् वरशरिरे सुवासिनीभिः कारयित्वा वरस्य दक्षिणे मणिबन्धे मदनफल बन्धनमाचार्यः कुर्यात्। ततः सुवासिन्यः अवस्कर(उकरडी) पूजनं कृत्वा गौरमृत्तिकां(गोरमटीं) समानयेयुः। आचार्यो गौरमृत्तिकया वेदिं कृत्वा तत्र गणेशमृत् पात्राणि स्थापयेत्। ग्रहशान्तिमखं चारभेत्। ततश्च नववधूदेयानि वस्त्रालङ्कारादिनीगृहित्वा वृद्धा सम्बन्धिनः नार्यश्च मातापितरौ यात्राप्रस्थानं कुर्युः। वरयात्रायामागतानां वरसम्बन्धिनां निश्चिते स्थाने निवासं कारयेत्।

## २६/०५. अथ कन्यागृहे वरयात्रागमनपूर्वो विधिः।

कन्यायाः पितरौ स्वगृहे गणेशस्थापनं मण्डपमहूर्तं गणेशमातृका–कुम्भस्थापनं तत्पूजनं च ग्रहशान्तिं वा नवचण्डीयागं वा यथानुकूलसमयं कृत्वा (यथाकुलाचारं पूर्वदिने रान्दलादीनां मातृकाणाम् आवाहनस्थापनपूजननैवेद्यादिकर्म पारयित्वा) ग्रहशान्तिमखस्याऽन्ते वा पूर्व वाहरिद्रापिष्टिकालेपनम् कन्याशरिरे सुवासिनीभिः कारयित्वा कन्यायाः दक्षिणे मणिबन्धे मदनफल बन्धनमाचार्यः कुर्यात्। ततः सुवासिन्यः अवस्कर(उकरडी) पूजनं कृत्वा गौरमृत्तिकां(गोरमटीं) समानयेयुः। आचार्यो गौरमृत्तिकया वेदिं कृत्वा तत्र गणेशमृत् पात्राणि स्थापयेत्। ग्रहशान्तिमखं चारभेत्।

## २६/०६. अथ विवाहाङ्गविधिः।

वरपक्षे यात्रायां समागतानां सम्बन्धिनां विश्रामावासे कन्यायाः पितृव्यानी(काकीति भाषायां) पञ्चभिः ततो वाऽयुग्मसङ्ख्याकाभिः सुवासिनीभिः घृतगुडमिश्रितं कान्सारं वराय भोजयितुं साधयेत्। भोजनदानान्ते वराय वरयात्रागतेभ्यश्च विवाहमण्डपं प्रति प्रस्थानाय प्रार्थयेत्। विश्रामावासाद् हर्षोल्लासपूर्वकं सवाद्यनृत्यगीतं कन्यागृहद्वारि समागताय वराय स्वागतविधिं(सामैयु) सम्पर्यवेक्षणं च माता वा वृद्धा वा सुवासनी कुर्यात्।

तत्र तावत्कन्यापिता अर्हणवेलायां मण्डपे उदङ्मुख उपविश्य स्वदक्षिणत:पत्नीं चोपवेश्य मण्डपं समागताय वरायोपवेशनार्थं शुद्धमासनं प्रयच्छेत्। तत्र प्राङ्मुखं वरमूर्ध्वजानुं तिष्ठन्तं मधुपर्केणाऽर्चयेत्। ततः कन्यापिता आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

## २६/ ०७. अथ सङ्कल्पः।

कन्यापिता हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ करिष्यमाणकर्मणः साङ्गतासिद्ध्यर्थं अस्य मम कन्यार्थिनं मण्डपमागतं वरं मधुपर्केणार्चयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तदङ्गत्वेन दिग्रक्षणं कलशाराधनं गणपतिपूजनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार-सामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा भूमिपूजनम् (०१/१३), दिग्रक्षणम् (०१/१४), कलशार्चनम् (०१/१५), दीपपूजनम् (०१/१६), सूर्यपूजनम् (०१/१७), शङ्खपूजनम् (०१/१८), घण्टापूजनम् (०१/१९), गणपतिपूजने (०२/-) गणपत्यथर्वशीर्षम् (०२/०१), पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम् (०३/०३), ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् (०३/०४), आशीर्वादः (०३/०५), पात्रे उदकसेकः (०३/०६), अभिषेकः (०३/०७)।

तत्र प्राङ्मुखं वरमूर्ध्वजानुं तिष्ठन्तं मधुपर्केणार्चयेत्।

## २६/ ०८. अथ मधुपर्कप्रयोगः।

कन्यापिता ब्राह्मणो वा वदेत्। ॐ षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रिय स्नातक इति प्रति संवत्सरानर्हयेयुक्ष्यमाणास्तृत्विजः। आसनमाहार्याह साधुभवानास्तामर्चयिष्मो भवन्तम्। वरो वदेद्- अहं साधु भवामि माम अर्चय। कन्यापिता वदेद्- अहं अर्चयिष्यामि।

ततः कन्यापिता पञ्चविंशतिकुशात्मकं विष्टरं गृहीत्वा वदेत्। ॐ विष्टरो विष्टरो विष्टरः प्रतिगृह्यताम्। वरो वदेत्। प्रतिगृह्णामि। ततो यजमानो विष्टरं वरहस्ते दद्यात्। वरो विष्टरं गृहीत्वा वदेत्।

ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः।
इमन्तमभितिष्ठामि यो मा कश्चाभिदासति।। पा०गृ०सू० ०१/०३/०८।।[६०३]

एनमभ्युपविशति। विष्टरम् आसने निधाय तस्योपरि उपविशति।

ततः कन्यापिता पाद्यपात्रं गृहीत्वा वदेत। पादार्थमुदकं पादार्थमुदकं पादार्थमुदकम्। प्रतिगृह्यताम्। वरो वदेत्– प्रतिगृह्णामि। हस्ते पात्रमादाय। वरो ब्राह्मणश्चेद्दक्षिणं प्रथमं ततश्च सव्यं पादं प्रक्षालयेत्। वरश्चेद् ब्राह्मणेतरः सव्यं प्रथमं ततश्च दक्षिणं पादं प्रक्षालयेत्।

ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः।।
पा०गृ०सू० ०१/०३/१२।।[६०४]

इत्युक्त्वा वरेण स्वयमेव पादप्रक्षालनं कर्तव्यम्।

ततः कन्यापिता पञ्चविंशतिकुशात्मकं विष्टरं गृहीत्वा वदेत्। द्वितीयः ॐ विष्टरो विष्टरो विष्टरः प्रतिगृह्यताम्। वरो वदेत्। प्रतिगृह्णामि। ततो यजमानो पूर्ववत् द्वितीय विष्टरं वरहस्ते दद्यात्। वरो विष्टरं गृहीत्वा वदेत्।

ॐ वर्ष्मोऽस्मिसमानानामुद्यतामिव सूर्यः।
इमन्तमभितिष्ठामि यो मा कश्चाभिदासति।। पा०गृ०सू० ०१/०३/०८।।[६०५]

एनमभ्युपविशति। द्वितीय विष्टरं भूमौ निधाय तस्योपरि पादौ करोति।

ततः कन्यापिता गन्धपुष्पाक्षतफलोदकसहितम् अर्घ्यपात्रं गृहीत्वा वदेत्। अर्घो अर्घो अर्घः प्रतिगृह्यताम्। वरो वदेत्। प्रतिगृह्णामि। ततो यजमानो वरहस्ते अर्घ्यपात्रं दद्यात्। वरो अर्घ्यपात्रं गृहीत्वा वदेत्।

ॐ आपःस्थः युष्माभिः सर्वान् कामानवाप्नवानि।। पा०गृ०सू० ०१/०३/१३।।[६०६]

---

[६०३] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
श्रेष्ठोस्मि वै समानाना मुद्यतामिव भास्करः। तिष्ठामि त्वामधः कृत्वा य इदं मेऽभिदीयते।। कर्म०पृ. २७९।।

[६०४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
विराजोदोहोऽसि विराजोदोहमशीय विराजोदोहः पाद्यायमयित्वं भव भो जल।। कर्म०पृ. २८०।।

[६०५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
श्रेष्ठोस्मि वै समानाना मुद्यतामिव भास्करः। तिष्ठामि त्वामधः कृत्वा य इदं मेऽभिदीयते।। कर्म०पृ. २७९।।

[६०६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
वयं वरुण युष्माभिः सर्वान् कामानशेषतः। अतोर्घ्यं गृहाणेमं भो ह्यापस्थमवाप्नुयात्।। कर्म०पृ. २८०।।

इति शिरसार्घवन्दनं कृत्वानिनयन्नभिमन्त्रयेत्।

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत।
अरिष्टाऽस्माकं वीरा मा परासेचिमत्पयः।। पा०गृ०सू० ०१/०३/१४।।[६०७]

प्राग्वाउदग्वा क्षिपेत्।

ततः कन्यापिता आचमन पात्रं गृहीत्वा वदेत्। आचमनीयमुदकमाचमनीयमुदकमाचमनीयमुदकम् प्रतिगृह्यताम्। वरो वदेत्। प्रतिगृह्णामि। ततो यजमानो वरहस्ते आचमन पात्रं दद्यात्। वरो आचमनपात्रं गृहीत्वा वदेत्।

ॐ आमागन्यशसा संसृज वर्चसा।
तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्।। पा०गृ०सू० ०१/०३/१५।।[६०८]

इति मन्त्रेण सकृदाचमनं कुर्यात्। द्विस्तूष्णीम्।

ततः कन्यापिता कांस्यपात्रे दधिमधुघृतम् एकीकृत्य वदेत्। ॐ मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यताम्। वरो वदेत्। प्रतिगृह्णामि। इत्युक्त्वा वरः कन्यापितुर्हस्तस्थितं मधुपर्कम् ईक्षते वदेत्।

ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे।। पा०गृ०सू० ०१/०३/१६।।[६०९]

ततो देवस्येति प्रतिगृह्णाति वरः।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोर्हस्ताभ्याम्।
प्रतिगृह्णामग्नेष्ट्वास्येन प्राश्नामि।। पा०गृ०सू० ०१/०३/१७।।[६१०]

इति मन्त्रेण वरो मधुपर्कपात्रं गृहीत्वा सव्ये पाणौ कृत्वा। दक्षिणस्यानामिकया मधुपर्कं त्रिः प्रद–क्षिणमालोडयति।

---

[६०७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिकौ मन्त्रौ गृह्येते।
वयं वरुण युष्माभिः सर्वान् कामानशेषतः। अतोर्घ्यं गृहाणेमं भो ह्यापस्थमवाप्नुयात्।। कर्म०पृ. २८०।।
गमयामि समुद्रस्तां योनिमापः प्रयान्तु वै। वीरा अरिष्टाश्चास्माकं मा परोसेचि मत्पयः।। कर्म०पृ. २८०।।

[६०८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
प्रियं जनानां यशसा पशूनां स्वामिनं कुरु। शरीरीणा मरिष्टानि वरुणाऽऽचामयाम्यहम्।। कर्म०पृ. २८०।।

[६०९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
समीक्षामां यथा सर्वाण्यहं भूतामि चक्षुषा। तथाऽहं मधुपर्कं च समीक्षामि खलु प्रभो।। कर्म०पृ. २८१।।

[६१०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
पुष्योदेवस्य सवितर्हस्ताभ्यामादधे किल। मधुपर्कं भर्गरूपं अश्विनं सूर्य दैवतम्।। कर्म०पृ. २८१।।

ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि।। पा०गृ०सू० ०१/०३/१८।।[६११]

अनामिकाङ्गुष्ठेन च प्राग्वाउदग्वा त्रिर्निरुक्षयति। ततो वरो वदेत्।

ॐ यन्मधुनो मधव्यम् परमं रूपमन्नाद्यम्।
तेनाहं मधुनो मधव्येन परमेण रूपेणान्नद्येन
परमो मधव्योऽन्नादोऽसानि।। पा०गृ०सू० ०१/०३/२०।।[६१२]

इति मन्त्रेण त्रिः प्राश्नीयात्। मधुमतीभिर्वा प्रत्यृचं पुत्रायाऽअन्ते वासिने वा उत्तरतः आसीनायोच्छिष्टं दद्यात्।

ॐ मधु व्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्न्नः सन्त्वोषधीः।। शु०य० १३/२७।।
ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मध द्यौरस्तु नः पिता।। शु०य० १३/२८।।
ॐ मधुमान्नो वनस्पतिर्मधुमाँ२अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।। शु०य० १३/२९।।

इत सर्वं वा प्राश्नीयात् प्राग्वासञ्चरे निनयेत्। वर आचमनं कुर्यात्।

**२६/०९. अथाऽङ्गन्यासः।**

ततो यजमानो वरस्य वामहस्ते जलं दद्यात्। वरो दक्षिणहस्तेनाङ्गन्यासं कुर्यात्।

कराङ्गुल्यग्रैः मुखं जलेन स्पृशन् वदेत्। ॐ वाङ्म आस्येऽस्तु।
तर्जन्यङ्गुष्ठाभ्यां नासिकां जलेन स्पृशन् वदेत्। ॐ नसोर्मे प्राणोऽस्तु।
अनामिकाङ्गुष्ठाभ्यां चक्षुसी जलेन स्पृशन् वदेत्। ॐ अक्ष्णोर्मे चक्षुरस्तु।
मध्यमाङ्गुष्ठाभ्यां कर्णौ जलेन स्पृशन् वदेत्। ॐ कर्णयोर्मे श्रोत्रमस्तु।
कराङ्गुल्यग्रैः बाहू जलेन स्पृशन् वदेत्। ॐ बाह्वोर्मे बलमस्तु।
कराङ्गुल्यग्रैः ऊरू जलेन स्पृशन् वदेत्। ॐ ऊर्वोमे ओजोऽस्तु।
हस्तद्वयतलं जलेन लेदयित्वा मस्तकात् पाद पर्यन्तं जलेन अभिषिञ्चन् वदेत्।
ॐ अरिष्टानिमेऽङ्गानितनूस्तन्वासन्तु।। पा०गृ०सू० ०१/०३/२५।।

---

[६११] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
प्रयौमि मधुपर्कं च नाशनेनादनीयकम्। निष्कृन्तामि च यत्तद्वै श्यावाश्याय नमो नमः।। कर्म०पृ. २८१।।

[६१२] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
परमेण मधव्येन रूपेणान्नाद्यकेन च। मध्वयं परमं तेन ह्याश्नामि मधुनोशनम्।। कर्म०पृ. २८१।।

आचान्तोदकाय वराय हस्ते दर्भमादाय[६१३] गौ: गौ: गौरितित्रिर्वदेत्। गौर्गौर्गौ: प्रतिगृह्यताम्। वरो वदेत् प्रतिगृह्णामि।

ॐ माता रुद्राणां दुहिता वसूनां स्वसाऽदित्यानाममृतस्य नाभि:।
प्रनुवोचश्चिकितुषे जनाय मागामनागामदितिं वधिष्ट।
मम चामुष्य च पाप्मानं हनोमि।। पा०गृ०सू० ०१/०३/२७।।[६१४]

तत: उपांशु अथयद्युसिसृक्षन्मम चामुकशर्मणो यजमानस्य उभयो: पाप्माहत:। तत: उच्चै: कन्यापिता वदेत्।

ॐ उत्सृजत तृणान्यत्तु।
ॐ मां सोर्ध: स्यादधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयाद्यद्यप्यसकृत् संवत्सरस्य
सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्न्नाकृतार्घ्या।। पा०गृ०सू० ०१/०३/२९-३१।।[६१५]

वरस्य ललाटे यजमानो गन्धं कुर्यात्।

ॐ सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन।
सुश्रुत्कर्णाभ्यां भूयासम्।। पा०गृ०सू० ०२/०६/१९।।[६१६]

तिलकोपरि अक्षतान् समर्पयेत्।

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्म्मेदा: पुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्ये प्रजाम्मेदा:।
सुखदापश्चाद्देवस्यसवितुराधिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्त्येरायष्पोषम्मेदा:।
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्त्यऽओजोमेदाविश्वाभ्योमानष्ट्राभ्यस्पाहिमनोरश्वासि।।शु०य०३७/१२।।[६१७]

वराय यज्ञोपवीतं समर्पयेत्।

---

[६१३] कलियुगे तत्स्थाने तन्नीष्क्रयद्रव्योत्सर्ग:।

[६१४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिकौ मन्त्रौ गृह्येते।
वसूनां दुहिता माता रुद्राणां भास्कर स्वसा। अथ पद्युसि सुक्षेन्मम च यजमानस्य पाप्मा हत:।।
वसूमां दुहिता माता रुद्राणां भास्कर स्वसा। ब्रवीमिगां मावधिष्ट जनाय चेतनावृते।।
मम यजमानस्य च पाप्मा हत:।। कर्म०पृ. २८२।।

[६१५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
अमाषोर्धश्च भवति षडर्घ्यानधि कृत्यवै। गोरुदर्शेन तान् तस्या: निष्क्रयं ह्युत्सृजाम्यहम्।। कर्म०पृ. २८२।।

[६१६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं वरश्रेष्ठ चन्दनं प्रतिगृह्यताम्।। ब्र०स०पृ. ४६।।

[६१७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
अक्षतांश्च वरश्रेष्ठ कुङ्कुमाक्ता सुशोभिता:। मया निवेदितास्तुभ्यं गृहाण प्रीतिपूर्वकम्।। ब्र०स०पृ. ४६।।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः।।
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि।। पा०गृ०सू० ०२/०२/११।।[६१८]

वराय वस्त्रं समर्पयेत्।

ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि।
शतं च जीवामि शरदः पुरुची रायस्पोषमभिसंव्ययिष्ये।। पा०गृ०सू० ०२/०६/२०।।[६१९]

यजमानो हस्ते जलमादाय। अनेन मधुपर्कार्चनेन लक्ष्मीनारायणौ प्रीयेताम्। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## २६/१०. अथ प्रधानो विवाहसंस्कारविधिः।

आचार्यः वरस्य हस्ते जलमर्पयित्वा। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं धर्मार्थकामप्रजासिद्ध्यर्थं दारपरिग्रहणं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्र पञ्चभूसंस्कारपूर्वकं योजकनामाग्नि[६२०]प्रतिष्ठापनमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। इति योजकनानग्निं स्थापयेत्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/–) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७)।

ततः कन्यादान वेदिसमीपानयनकाले अन्तरपटं कुर्यात्। अत्रावसरे मङ्गलघोषं कारयेत्। ब्राह्मणा सम्बन्धिनश्च मङ्गलाष्टकं पठेयुः। विंशोपका उच्चारणीयाः।

---

[६१८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यज्ञोपवीतं परमं षण्णवति तन्तुकम्। परिधास्याम्यहं शुद्धं ह्रीमादिदशदैवतम्।। कर्म०पृ. २६५।।

[६१९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
परिधास्याम्यहं वस्त्रं कौशेयमाहृतम् दृढम्। सुन्दरं च महादिव्यं पवित्रं परिधानकम्।। कर्म०पृ. २८३।।

[६२०] अत्रावसरे अग्निस्थापनं कृतं चेत् पुनर्न कर्तव्यम्। सम्प्रति कन्यादानान्तरमग्निप्रतिष्ठापनं कुर्वन्ति तत्र यथाचारं कर्तव्यम्।

**२६/११. अथ मङ्गलाष्टकम्।**

श्रीमत्पङ्कजविष्टरो हरिहरौ वायुर्महेन्द्रोनल-
श्चन्द्रो भास्करवित्तपालवरुणप्रेताधिपादिग्रहाः।
प्रद्युम्नो नलकूबरौ सुरगुरुश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरश्च लाङ्गलधरः कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १४४।। ब्र०स०पृ. ४२३।।[६२१]

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। आचार्यः सावधानः। रत्नदीपकः सावधानः। मातापितरौ सावधानौ। वरकन्ये सावधाने।

गौरी श्रीरदितिर्दितिश्च सुभगा कण्डूः सुपर्णा शिवा
सावित्री च सरस्वती च सुरभिः सत्यव्रताऽरुन्धती।
स्वाहा जाम्बुवती च रुक्मभगिनी दुःस्वप्नविध्वंसिनी
वेला चाम्बुनिधेः सुमीनमकरा कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १४५।। ब्र०स०पृ. ४२४।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। मातापितरौ सावधानौ। वरकन्ये सावधाने।

नेत्राणि त्रितयं महत्पशुपतेरग्नेस्तुते पादत्रयं
तद्वद्विष्णुपदत्रयं त्रिभुवने ख्यातं च रामत्रयम्।
गङ्गौधस्य गतित्रयं सुविमलं तद्वद्दषीणां त्रयं
सन्ध्यायास्त्रितयं द्विजैरभिमतं कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १४६।। ब्र०स०पृ. ४२४।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। ग्रीवासूत्रं सावधानम्। मातापितरौ सावधानौ। वरकन्ये सावधाने।

गङ्गा गोमतिगोपतिर्गणपतिर्गोविन्दगोवर्धनौ
गीतागोमयगोरजो गिरिसुता गङ्गाधरो गौतमः।

[६२१] अन्तरपटविधौ पठ्यमाने मङ्गलाष्टकेष्टौ श्लोकाः भवेयुस्तथापि क्वचित्क्वचिदधिकाः श्लोकाः प्राप्यन्ते। अत्र मङ्गलाष्टकेऽष्टसु बहवः देवा ऋषयो नद्य इत्यादयो बहुवचनान्ताः सन्ति। अतः कुर्यात् सदा मङ्गलमित्यस्य स्थाने व्याकरणदृष्ट्या कुर्युः सदा मङ्गलमिति शुद्धिः कृता। तदत्र सम्पूर्णः श्लोक एकवचनान्त इति स्वीकृत्य पुनः कुर्यात् सदा मङ्गलमिति पठ्यते। तदत्र स्वीकृतम्।

गायत्री गरुडो गदाधरगयागम्भीरगोदावरी
गन्धर्वग्रहगोपगोकुलधरः कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १४७।। ब्र०स०पृ. ४२४।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। कृष्णकण्ठि सावधाना। मातापितरौ सावधानौ। वरकन्ये सावधाने।

अश्वत्थो वटवृक्षचन्दनतरुर्मन्दारकल्पद्रुमो
जाम्बुर्निम्बकदम्बकाम्रसरला वृक्षाश्च ये क्षीरिणः।
सर्वैस्तैः फलपुष्पपल्लववरैर्युक्तैः सदा मण्डितं
रम्यं चैत्ररथं सनन्दनवनं कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १४८।। ब्र०स०पृ. ४२४।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। रत्नदीपकः सावधानः। मातापितरौ सावधानौ। वरकन्ये सावधाने।

वाल्मीकः सनकः सनन्दनमुनिर्व्यासो वसिष्ठो भृगु–
र्जाबालिर्जमदग्निजह्नुजनकौ गर्गोऽङ्गिरा गौतमः।
मान्धाता ऋतुपर्णवेनसगरा धन्यो दिलीपो नलः
पुण्यो धर्मसुतो ययातिनहुषौ कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १४९।। ब्र०स०पृ. ४२४।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। मातापितरौ सावधानौ। वरकन्ये सावधाने।

गङ्गा सिन्धुसरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयूर्महेन्द्रतनया चर्मण्वती वेदिका।
शिप्रा वेत्रवती महासुरनदी ख्याता गया गड्डकी
पुण्याः पुण्यजलैः समुद्रसहिताः कुर्युः सदा मङ्गलम्।।
कुर्यात् सदा मङ्गलम्।। १५०।। ब्र०स०पृ. ४२५।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। मातापितरौ सावधानौ। वरकन्ये सावधाने।

लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा
गावः कामदुघा सुरेश्वरगजो रम्भादिदेवाङ्गनाः।
अश्वः सप्तमुखः सुधा हरिधनुः शङ्खो विषं चाम्बुधे
रत्नानीति चतुर्दश प्रतिदिनं कुर्युः सदा मङ्गलम्।।
कुर्वन्तु वै मङ्गलम्।। १५१।। ब्र०स०पृ. ४२५।।

सुमुहूर्तं सावधानम्। शुभलग्नं सावधानम्। आचार्यः सावधानः। मदनफलं सावधानम्। रत्नदीपकः सावधानः। मातापितरौ सावधानौ। देयद्रव्यं सावधानम्। वरकन्ये सावधाने।

एवं मङ्गलाष्टकं पठीत्वा मातुलद्वारा भ्रातृद्वारा वा कन्यां वेदि समीपं नीत्वा वरसम्मुखासने समुपवेशयेत्। अन्तरपटं च निःस्सारयेत्। ततो ब्राह्मणा वदेयुः। प्रतिष्ठस्व। हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
विश्श्वे देवासऽइह मादयन्ता मोइँम्प्रतिष्ठ ।। शु०य० २/१३।।[६२२]

सुप्रतिष्ठितमस्तु दम्पत्योरविच्छिन्ना प्रीतिरस्तु इत्युक्त्वा अक्षतान् दम्पत्योः शिरसि प्रक्षिपेयुः। अथ कन्यानयनकर्तारं मातुलं भ्रातरं वा तिलकादिना सत्कृत्य विसर्जयेत्।

ततो कन्यामाता कन्यायाः पादौ प्रक्षालयेत्। हस्ते जलमादाय।

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यातम्।
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण।। शु०य० ३१/२२।।[६२३]

इति पादौ प्रक्षाल्य। कन्याया भ्रुवौर्मध्ये तिलकं कुर्यात्। कन्यापिता वरं प्रति ब्रूयाद् वधूमीक्षस्व इति। यदा वधूः वरस्य कण्ठे पुष्पमालार्पयेत् तदा ब्राह्मणाः पठेयुः।

ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्।
समूढमस्य पां सुरेस्वाहा।। शु०य० ०५/१५।।[६२४]

यदा च वरो वधू कण्ठे पुष्पमालामर्पयेत् तदा ब्राह्मणाः पठेयुः।

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यातम्।
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण।। शु०य० ३१/२२।।[६२५]

पुष्पमालार्पणान्ते ब्राह्मणा वदेयुः।

---

[६२२] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[६२३] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीःपापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्मः परिपालय देवि विश्वम् ।। स०श० ०४/०५।।

[६२४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मङ्गलं भगवान विष्णोर्मङ्गलं गरुडध्वज। मङ्गलं पुण्डरीकाक्षो मङ्गलाय तनं हरिः।। ब्र०स०पृ. ५१।।

[६२५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।। स०श० ०५/५८।।

ॐ तम्पत्नीभिरनुगच्छेमदेवा: पुत्रैर्भ्रातृभिरुतवाहिरण्यै:।
नाकङ्गृभ्ष्णाना: सुकृतस्य लोकेतृतीयेपृष्ठेऽअधिरोचनेदिव:।। शु०य० १५/५०।।[६२६]

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।। १५२।।

ततो वर: कन्याया उपरि मङ्गलसाटिकां परिधापयेत्। वरो ब्राह्मणो वै तान् पठेत्।[६२७]

ॐ जराङ्गच्छ परिधत्स्व वासोभवाकृष्टीनाभिसस्ति पावा।
शतं च जीव शरद: सुवर्चारयिं च पुत्राननु
संव्ययस्वायुष्मतीदं परिधत्स्व वास:।। पा०गृ०सू० ०१/०४/१२।।[६२८]

ततो वर: कन्याया उपरि उत्तरीयं परिधापयेत्।

ॐ याऽअकृंतन्वयं याऽअतन्वत याश्चदेवीस्तंतूनभितोततन्थ।
तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास:।। पा०गृ०सू० ०१/०४/१३।।[६२९]

तत: कन्यापिता वदेद्- वधूवरौ परस्परं निरिक्षेथामिति। वरो ब्राह्मणो वा वदेत्।

ॐ समञ्जन्तु विश्वे देवा: समापो हृदयानि नौ।
सम्मातरिश्वा सन्धाता समुद्रेष्ट्री दधातु नौ।। पा०गृ०सू० ०१/०४/१४।।

---

[६२६] अत्र ब्राह्मणेतरवर्णानां कृते केवल:- तदेव लग्नं सुदिनमित्येव पौराणिको मन्त्रो गृह्यते।

[६२७] कारिका- कन्यावस्त्रपरिधाने तथैव चोत्तरीयके। तथा समीक्षकाले तु पितुर्निष्क्रमणे गृहात्।।
अश्मनो रोहणे चैव हस्तग्राहे तथैव च। तथा सप्तपदे चैव वधूमूर्ध्न्यभिषेचने।।
हृदयालम्भने चैव तथैव चाभिमन्त्रणे। दृढपार्श्वे क्रमेणैव एतान्मन्त्रान्वर: पठेत्।। ब्र०स०पृ. ४२५।।
ॐ चत्वार: पाकयज्ञाहुतोऽहुतप्रहुत: प्राशितऽइति पञ्चसुबहि: शालायां विवाहेचूडाकरणऽउपनयनेकेशान्ते सीमन्तोन्नयनऽइत्युपलिप्तऽउद्धृतावोक्षितेग्निमुपसमाधायनिर्मन्थ्यमेके विवाहऽउदगयनऽआपूर्यमाणपक्षे पुण्याहे कुमार्या: पाणिंगृह्णीयात्। त्रिषुत्रिषूत्तरादिषुस्वातौमृगशिरेसिरोहिण्यांवातिस्रो ब्राह्मणस्यवर्णानुपूर्व्येण- द्वेराजन्यस्यैकावैश्यस्यसर्वेषां शूद्रामप्येकेमन्त्रवर्जम्।। पा०गृ०सू० ०१/०४/०१-११।।

[६२८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे। मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम्।। ब्र०स०पृ. ४५।।

[६२९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
उत्तरीयं दृढं वस्त्रं कौशेयं सुमनोहरं। नूतनं विपुलं वौर्णकार्पासं धारयाम्यहम्।। बृ०स०पृ.२२४।।

ततो द्विजाः परित्वागिर्वणोगिरऽइत्यादि जुषाणोऽअप्तु राजस्यवेतुस्वाहेत्यन्तेनानुवाकेन वधूवरावच्छिन्नचतुर्विंशतितन्तुभिर्द्विगुणीकृतसूत्रेण कण्ठे ईशानादि वेष्टयन्तः। ब्राह्मणाः पठेयुः।

ॐ परि त्वा गिर्वणो गिरऽइमा भवन्तु विश्वतः।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय।। शु०य० ०५/२९।।[६३०]
इन्द्रस्य स्यूससीन्द्राय ध्रुवोऽसि।
ऐन्द्रमसि वैश्वदेवमसि।। शु०य० ०५/३०।।
विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः।
श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदाः।। शु०य० ०५/३१।।
उशिगसि कविरङ्घारिरसि बम्भारिरवस्युरसि दुवस्वान् शुन्ध्यूरसि
मार्जालीयःसाम्राऽसि कृशानुः परिसद्योऽसि पवमानो नभोऽसि
प्रतक्वा मृष्टोऽसि हव्यसूदन ऋतधामासि स्वर्ज्योतिः।। शु०य० ०५/३२।।
समुद्रोऽसि विश्वव्यचा अजोऽस्येक पादहिरसि बुध्न्यो वागस्यैन्द्रमसि
सदोऽस्तस्य द्वारौ मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर स्वस्ति
मेऽस्मिन् पथि देवयाने भूयात्।। शु०य० ०५/३३।।
मित्रस्य मा चक्षुषेक्षध्वमग्नयः सगराः सगराःस्थ सागरेण नाम्ना रौद्रेणानीकेन
पातमाग्नयः पिपृतमाग्न्यो गोपायत मा नमो वोऽस्तु मा मा हिंसिष्ठ।। शु०य० ०५/३४।।
ज्योति रसि विश्वरूपं विश्वेषां देवानां समित्।
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि
वरूथं स्वाहा जुषाणो अप्तुराज्यस्य वेत्तु स्वाहा।। शु०य० ०५/३५।।

## २६/१२. अथ वाचनिकश्राद्धम्।

अत्रावसरे कन्यापिता वाचनिकश्राद्धं कुर्यात्। आचम्य प्राणानायम्य प्रजापतिस्वरूपिणे वराय एतत्ते पाद्यं पादप्रक्षालनं हस्ताभ्याम् एषतेऽर्घः। इदमत्रोदकं सह चन्दनं पुष्पम्। पादोदकं परित्यज्य। गौरीस्वरूपिणि कन्यके एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनम् एषतेऽर्घः। पादोदकं परित्यज्य। आचम्य स्वपादौ करौ प्रक्षाल्याचम्य। दिग्बन्धनम्। ब्राह्मणा वदेयुः।

ॐ स्वस्ति नऽइन्द्रोव्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्व वेदाः।
स्वस्ति नस्ताक्ष्योऽ-अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु।। शु०य० २५/१९।।[६३१]

---

[६३०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
माङ्गल्यतन्तुनानेन भर्तुर्जीवन हेतुना। कण्ठे बध्नामि सुभगे त्वं जीव शरदां शतम्।। कर्म०पृ. २८८।।

[६३१] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्ति धनधान्य समृद्धिरस्तु।
ऐष्वर्यमस्तु बलमस्तु रिपुक्षयोस्तु वंशे सदैव भवतां हरिभक्तिरस्तु।। या०र०पृ. २५।।

कन्यादाननिमित्तं वाचनिकश्राद्धोपहाराणां सवेषां पवित्रतास्तु। देशकालपाकपात्रोपहारद्रव्य–श्रद्धासम्पदस्तु। कन्यापिता सङ्कल्पं कुर्यात्।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं मम एकोत्तरशतकुलोद्धारणार्थं कन्यादानारम्भाङ्गनिमित्तं वाचनिकश्राद्धमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

प्रजापतिस्वरूपिणे वराय इदमासनम्। प्रजापतिस्वरूपिणे वराय यथादत्तं गन्धार्चनं कङ्कण–कुण्डलमुद्रिकावासांसि भोजनपात्रादीनि नानादेवतानि गन्धपुष्पाद्यर्चितानि तन्निष्क्रयभूतं द्रव्यं वा तुभ्यमहं सम्प्रददे। गौरीस्वरूपकन्यकायै यथादत्तं गन्धार्चनं कङ्कणकुण्डलमुद्रिकावासांसि भोजन–पात्रादीनि नानादेवतानि गन्धपुष्पाद्यर्चितानि तन्निष्क्रयभूतं द्रव्यं वा तुभ्यमहं सम्प्रददे। दीपादिनां प्रसादात् इदं वो ज्योतिः सुज्योतिः शेषोपचाराः सम्पूर्णाः भवन्तु। ततो भोजनसङ्कल्पं कुर्यात्।

हस्ते जलमादाय। यथा तृप्तिपर्यन्तं ब्राह्मणभोजनं सपरिवाराय प्रजापतिस्वरूपिणे वराय अहं दास्ये वा अन्नाद्येनाहं तर्पयिष्ये। यथा तृप्तिपर्यन्तं ब्राह्मणभोजनं सपरिवारायै गौरीस्वरूपकन्यकायै वराय अहं दास्ये वा अन्नाद्येनाहं तर्पयिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। ततो दक्षिणासङ्कल्पं कुर्यात्।

हस्ते जलमादाय। प्रजापतिस्वरूपिणे वराय फलमुखवासताम्बूलं हिरण्यदक्षिणां तुभ्यमहं सम्प्रददे। गौरीस्वरूपकन्यकायै फलमुखवासताम्बूलं हिरण्यदक्षिणां तुभ्यमहं सम्प्रददे। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। अस्य हिरण्यश्राद्धविधेः परिपूर्णताऽस्तु। ब्राह्मणा वदेयुः अस्तु परिपूर्णतेति।

### २६/१३. अथ कन्यादानविधिः।

ततो कन्यादाता स्वदक्षिणस्थितपत्न्या सह वामपार्श्व भागे शुभासने उदङ्मुख उपविश्याऽऽचम्य सङ्कल्पं कुर्यात्।

हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। ॐश्रीविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहेकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे जम्बूद्वीपे  रामक्षेत्रे परशुरामाश्रमे बौद्धावतारे दण्डकारण्यैकदेशे श्रीमल्लवणाब्धेरुत्तरे तीरे श्रीनर्मदायाः उत्तरे दिग् विभागे श्रीमह्यायाः दक्षिणे दिग् विभागे विश्वामित्रि तटे वटपत्तन–नगरे अमुक तमे[६३२] श्रीशालिवाहनशके अस्मिन्वर्तमाने अमुकनाम संवत्सरे अमुक तमे श्रीविक्रमवर्षे अमुकनाम संवत्सरे अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशीस्थिते श्रीचन्द्रे अमुकराशीस्थिते श्रीसूर्ये अमुकराशीस्थिते श्रीदेवगुरौ

[६३२] अथाऽधस्ता यत्र यत्र अमुक इति लिखितम् तत्र तत् तद वर्ष गणना–मासादि नामानि पठितव्यानि।

शेषेषु ग्रहेषु यथायथं राशीस्थान स्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ (यजमानस्य गोत्रोच्चार:) अमुकगोत्रोत्पन्न: अमुकप्रवरान्वित: अमुकवेदान्तर्गत अमुकशाखाध्यायि अमुकशर्मा सपत्नीक: सपरिवारो यजमानोऽहं ममात्मन: श्रुति-स्मृतिपुराणोक्त शुभपुण्यफल प्राप्त्यर्थं अस्मिन्पुण्याहे अस्या: कन्याया अनेन वरेण धर्मप्रजया उभयो: वंशवृद्ध्यर्थं तथा च मम समस्तपितृणां निरतिशयानन्द ब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेण अस्यां कन्यायामुत्पादयिष्यमाणसंतत्यां दश पूर्वान् दशापरान् मां च एकविंशतिपुरुषानुद्धर्तुं ब्रह्मविवाहविधिना श्रीलक्ष्मीनारायणप्रीतये गोत्रोच्चारपूर्वकं कन्यादानमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

तत: कन्यापिता वधूवरयोर्दक्षिण हस्ते सुप्रोक्षतादिकं कुर्यात्।

जलं दत्वा-कन्यापिता वदेत्। ॐशिवा आप: सन्तु । वरो वदेत्। ॐसन्तु शिवा आप:।

पुष्पं दत्वा-कन्यापिता वदेत्। ॐसौमनस्यमस्तु। वरो वदेत्। ॐअस्तु सौमनस्यम्।

अक्षतान् दत्वा-कन्यापिता वदेत्। ॐअक्षतं चारिष्टं चास्तु।

वरो वदेत्। ॐअस्त्वक्षतमरिष्टं च।

गन्धं दत्वा-कन्यापिता वदेत्। ॐगन्धा: पान्तु सौमङ्गल्यं चास्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐ गन्धा: पान्तु सौमङ्गल्यं चास्तु।

अक्षतान् दत्वा-कन्यापिता वदेत्। ॐ अक्षता: पान्तु आयुष्यमस्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐ अक्षता: पान्तु आयुष्यमस्तु।

पुष्पं दत्वा-कन्यापिता वदेत्। ॐपुष्पाणि पान्तु सौश्रियमस्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐ पुष्पाणि पान्तु सौश्रियमस्तु।

ताम्बूलं दत्वा-कन्यापिता वदेत्। ॐताम्बूलानि पान्तु ऐश्वर्यमस्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐताम्बूलानि पान्तु ऐश्वर्यमस्तु।

पूगीफलं दत्वा-कन्यापिता वदेत्। ॐपूगीफलानि पान्तु बहुफलमस्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐ पूगीफलानि[६३३] पान्तु बहुफलमस्तु।

व्यावहारिकं द्रव्यं दत्वा-कन्यापिता वदेत्। ॐदक्षिणा: पान्तु बहुदेयं चास्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐ दक्षिणा: पान्तु बहुदेयं चास्तु।

जलं दत्वा-कन्यापिता वदेत्। ॐपुनरत्रा पान्तु स्वर्चितमस्त्विति भवन्तो ब्रुवन्तु।

वरो वदेत्। ॐ पुनरत्रा पान्तु स्वर्चितमस्तु।

कन्यापिता वदेत्। ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु।

वरो वेदत्। अस्तु ते यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतम्।

## २६/ १४. अथ गोत्रोच्चार:।

तत: गोत्रोच्चार: वरस्य प्रथमं पश्चात् कन्याया:। तत: वरस्य गोत्रोच्चार:। ब्राह्मणा वदेयु:।

---

[६३३] संस्कारभास्करकारा पूगीफलानि पान्तु बहुफलमस्त्विति भवन्तो ब्रुवन्त्विति न पठन्ति।

अमुकगोत्रोत्पन्नस्य[६३४] अमुकप्रवरस्य अमुकशर्मण: प्रपौत्राय।
अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मण: पौत्राय ।
अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मण: पुत्राय ।
अमुकगोत्रोत्पन्नस्य अमुकप्रवराय शुक्लयजुर्वेदान्तर्गत वाजसनेयि माध्यन्दिनशाखाद्यायिने अमुकशर्मणे वराय।
स्थिरस्थावरसंयोगे बहुपुत्रं बहुधनं चायुष्यं चास्तु। ततः कन्याया गोत्रोच्चारः। ब्राह्मणा वदेयुः।

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मण: प्रपौत्रीम्।
अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मण: पौत्रीम्।
अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मण: पुत्रीम्।
अमुकगोत्राम् अमुकप्रवराम् अमुकनाम्नीं श्रीरूपिणीमिमां कन्यां दास्ये। उभयोः पाणिग्रहणं भवतु।[६३५]

## २६/१५. अथ कन्यादानसङ्कल्पः।

कन्यापिता हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। ॐश्रीविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहेकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे जम्बूद्वीपे रामक्षेत्रे परशुरामाश्रमे बौद्धावतारे दण्डकारण्यैकदेशे श्रीमल्लवणाब्धेरुत्तरे तीरे श्रीनर्मदायाः उत्तरे दिग् विभागे श्रीमह्यायाः दक्षिणे दिग् विभागे विश्वामित्रि तटे वटपत्तन-नगरे अमुक तमे[६३६] श्रीशालिवाहनशके अस्मिन्वर्तमाने अमुकनाम संवत्सरे अमुक तमे श्रीविक्रमवर्षे अमुकनाम संवत्सरे अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशीस्थिते श्रीचन्द्रे अमुकराशीस्थिते श्रीसूर्ये अमुकराशीस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथायथं राशीस्थान स्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ (यजमानस्य गोत्रोच्चारः) अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकवेदान्तर्गत अमुकशाखाध्यायि अमुकशर्मा सपत्नीकः सकन्यायाः सपरिवारो यजमानोऽहं ममात्मनः श्रुति-स्मृतिपुराणोक्त शुभपुण्यफल प्राप्त्यर्थं अस्मिन्पुण्याहे अथ मण्डपाधस्तात् कुलशीलसौभाग्यसामुद्रिकलक्षणलावण्यावयवारोग्यां काञ्चनकुण्डलकङ्कणवलयनूपुर-कटिमेखलाभुजचूडिकेयुराङ्गदभूषितां यवनालिकेरहस्तां भ्रमरध्वनिसुगन्धिमालालङ्कृतां कर्पूरागरुधूपितां गन्धयक्षकर्दमद्रव्यादिसहितां मुकुटमालादिविविधालङ्कृतां श्रृंगारराशिशय्याम् आसनछत्रोपानहवासः कमण्डलुकांस्यपात्रसौवर्णरौप्यमुद्रिकोपेतां गजदन्तकङ्कणान्वितम् एतेषां वस्तुमात्राणां

[६३४] सामान्यतया ब्राह्मणेतरवर्णानां काश्यपगोत्रत्वं स्वीक्रियते। केषाञ्चित क्षत्रियकुलानां वैश्यकुलानां च पृथग् गोत्रमपि प्राप्यते। ब्राह्मणानां तु गोत्र-प्रवर-वेद-शाखानां संग्रहो गोत्रप्रवरमञ्जरीग्रन्थे द्रष्टव्यः।
[६३५] वरस्य गोत्रोच्चरादि एकः पर्यायः एवमेव पुनः पर्यायद्वयमिति सम्प्रदायो वा ततः वरमातुलपक्षगोत्रोच्चारः। तत कन्यामातुलपक्षगोत्रोच्चारः इति ब्रह्मनित्यकर्मसमुच्चयकाराः।
[६३६] अथाऽधस्ता यत्र यत्र अमुक इति लिखितम् तत्र तत् तद वर्ष गणना-मासादि नामानि पठितव्यानि।

स्वहस्तोपार्जितगृहवित्तानुसारेण भक्ष्यभोजपय:पानादिकिंञ्चिन्मात्रद्रव्यादिसहितां श्रौतस्मार्तकर्मदक्षां प्रियंवदां कुङ्कुमकज्जलमुक्ताफलमालालङ्कृतां व्रीह्यञ्जलिपूरिताम् आदर्शहस्तां मदनफलबद्धां त्रिमातुलशुद्धां दशपुरुषविख्यातां वेदशास्त्रपुराणनिगमान्वितां दूर्वाङ्कुरप्रसारित–प्रयागवटशाखाविस्तारेण एकोत्तरशतकोटिकुलोद्धारश्रेयसे अमुकगोत्राय अमुकप्रवरन्विताय शुक्ल–यजुर्वेदान्तर्गत वाजसनेयि माध्यन्दिनशाखाद्यायिने अमुकशर्मणे वराय मधुपर्केण पूजिताय तत्सन्तानपरम्परावृद्धये यावच्चन्द्रदिवाकरौ इमां कन्यां यथाशक्त्यलङ्कृतां गृहमण्डपोप– विष्टस्वजनसाक्षिभिर्विष्णुवह्निब्राह्मणसन्निधौ वेदशास्त्रपुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रफल–प्राप्तिकाम: भार्यात्वेन तुभ्यमहं सम्प्रददे। तेन लक्ष्मीनारायणौ प्रयेतां न मम। इत्युक्त्वा जलं वरहस्ते स्थापयेत्।

पुनर्जलमादाय। कृतस्य कन्यादानस्य साङ्गतासिद्ध्यर्थं सुवर्णनिष्क्रयीं दक्षिणां तुभ्यमहं सम्प्रददे। इत्युक्त्वा कन्याया: कुशजलाक्षतयुक्त दक्षिणहस्तं वरस्य दक्षिणहस्ते दद्यात्। वरो वदेत्। ॐ स्वस्ति। तत: कन्यामातापितरौ उभौ पठेत्।

कन्यां लक्षणसम्पन्नां कनकाभरणैर्युताम्।
दास्यामि ब्रह्मणे तुभ्यं ब्रह्मलोकजिगीषया।। १५३।। ब्र०स०पृ. ४२९।।
पृथिव्यादिमहाभूता: साक्षिण्य: सर्व देवता:।
इमां कन्यां प्रदास्यामि पितृणां तारणाय च।। १५४।। ब्र०स०पृ. ४३०।।
मम वंशकुले जाता यावद्वर्षाणि पोषिता।
तुभ्यं वर मया दत्ता पुत्रपौत्रविवर्धिनी।। १५५।। ब्र०स०पृ. ४३०।।
गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम्।
गोत्राय शर्मणे तुभ्यं दत्ता विप्र समाश्रय।। १५६।।

माता वदेत्। मयापिदत्ता। वरो वदेत्। मया प्रतिगृहीता।

कन्यादानदाता वदेत्। यस्त्वया धर्मचरितव्य: सोऽनया सह धर्मे चार्थे च कामे च त्वयेयं नातिचरितव्या। वर: त्रिवारं वदेत्। अहं न अतिचरामि। अहं न अतिचरामि। अहं न अतिचरामि।

### २६/१६. अथ गोदानसङ्कल्प:।[६३७]

कन्यापिता हस्ते जलमादाय। कन्यादान साङ्गतासिद्ध्यर्थं इमां गां रुद्रदैवत्यां वा गोनिष्क्रयीभूतमिदं द्रव्यं प्रजापतिरूपिणे वराय तुभ्यमहं सम्प्रददे। इत्युक्त्वा वरहस्ते जलं दद्यात्।

ॐ कोदात्कस्माऽअदात्कामायादात्।
कामोदाताकाम: प्रतिग्रहीताकामैतत्ते।। शु०य० ०७/४८।।[६३८]

[६३७] अत्र नैमित्तिककर्मप्रकाशकारा: गोदानेन सह भूमीदासी शय्याङ्गुलीयकुण्डलादिनां सप्तदशदानानां परिगणनं समन्त्रकं कुर्वन्ति। (पृष्ठानि–२८१–२८२)

ततः परिवारजनाः सम्बन्धिनः सुहृदवर्गश्च यथाशक्ति निजदानानि समर्पयेयुः तदर्थम् आचार्यः तान् उच्चैः सम्बोधयेत्। कन्यादानसमयः इति।

ततः कन्यामाता कृताञ्जलिः कन्याया दक्षिणकर्णे पठति। ब्रह्मसावित्र्योः सौभाग्यमस्तु। शिवपार्वत्योः सौभाग्यमस्तु। ततो ब्राह्मणो वदेत्।

ॐ यदैषि मनसा दूरं दिशोनुपवमानो वा।
हिरण्यपर्णो वैकर्णः सत्वा मन्मनसां करोत्वित्यसा।। पा०गृ०सू० ०१/०४/१५।।

इत्युच्चार्य कन्यां वरस्य दक्षिणपार्श्वे पूर्वाभिमुखं समुपवेशयेत्। ततः कन्यापिता वदति। परस्परं मुखावलोकनं कुरुतं। वरो वदेत्।

ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः।
वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे।।[६३९]
सोमः प्रथमो विविदे गन्धर्वो विविदऽउत्तरः।
तृतीयोग्निष्टे परिस्तुरीयस्ते मनुष्यजः।।
सोमोददद् गन्धर्वाय गन्धर्वोददद्ग्नये।
रयिं पुत्रांश्चादादग्निर्मह्यमथोऽइमाम्।।
सानः पूषा शिवतमामेरयसानऽउरूऽउशती विहर।
यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या।। पा०गृ०सू० ०१/०४/१६।।

## २६/ १७. अथ पुण्याहवाचनम्।

ततः आचारात् प्राप्तं स्वस्तिपुण्याहवाचनं कुर्यात्। कन्यापिता पूजितः कलशो वरहस्ते दत्वा कन्यया च स्पर्शयित्वा।

वरो वदेत्। मम गृहे ॐ पुण्याहं भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ अस्तु पुण्याहम्। ॐ अस्तु पुण्याहम्। ॐ अस्तु पुण्याहम्।

---

[६३८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
गावोममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदयः सन्तु गवां मध्ये वसाम्यहम्।। सु०वि०पृ. ०६।।
पञ्चगावो समुत्पन्ना मथ्यमाने महोदधौ। तासां मध्ये तु या नन्दा तस्यै धन्वे नमोनमः।। सु०वि०पृ. ०६।।
अदितिर्देवमाता च वेदमाता च धीश्वरि। धेनुरूपेण सा देवि मम पापं व्यपोहतु।। सु०वि०पृ. ०६।।

[६३९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
सौम्यासौम्यवचोदात्रि पश्चादिप्रणयान्विता। सेवकानां हिते रक्ता प्रसन्नाभव सर्वदा।। परम्परया।।
वीरपुत्रप्रसूर्नित्यं देवताप्रीयकारिणी। सुभगा चन्द्रगन्धर्ववह्निभ्योहं पतिस्तव।। परम्परया।।

वरो वदेत्। मम गृहे ॐ कल्याणं भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ अस्तु कल्याणम्। ॐ अस्तु कल्याणम्। ॐ अस्तु कल्याणम्।
वरो वदेत्। मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ कर्म ऋध्यताम्। ॐ कर्म ऋध्यताम्। ॐ कर्म ऋध्यताम्।
वरो वदेत्। मम गृहे ॐ स्वस्ति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति।
वरो वदेत्। मम गृहे ॐ श्रीरस्त्विति भवन्तो ब्रुवन्तु।
ब्राह्मणा वदेयुः। ॐ अस्तु श्रीः। ॐ अस्तु श्रीः। ॐ अस्तु श्रीः।

इति पुण्याहं वाचयित्वा मन्त्राशिषो गृहीत्वा।

## २६/१८. अथाऽभिषेकः।

ततः कन्यां वरस्य वामपार्श्वे उपवेशयेत्। अभिषेकं च कुर्यात्। ब्राह्मणा वदेयुः।

ॐ आपो हि ष्ठा मयोभुवस्ता नऽउर्ज्जे दधातन। महे रणायचक्षसे।। शु०य० ११/५०।।[६४०]
ॐ यो वः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिव मातरः ।। शु०य० ११/५१।।
ॐ तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा चनः ।। शु०य० ११/५२।।

अथवा

---

[६४०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।। १।।
प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा।। २।।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणाऽनन्त सहिताः दिक्पालाः पान्तु ते सदा।। ३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः।। ४।।
एतास्त्वामभिषिञ्चन्तु देव पत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुध-जीव-सिताऽर्कजाः।। ५।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देव-दानव-गन्धर्वा यक्ष-राक्षस-पन्नगाः।। ६।।
ऋषयो मुनयो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्सरसां गणाः।। ७।।
अस्त्राणि सर्वशस्त्राणि गजानो वाहनानि च। औषधानि च रत्नानि कालस्याऽवयवाश्च ये।। ८।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते स्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये।। ९।।
सहस्राक्षं शतधारं ऋषिभिः पावनं कृतम्। तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते।। १०।।
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो दधुः।। ११।।
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि। ललाटे कर्णयो रक्ष्णो रापो निघ्नन्तु ते सदा।। १२।।
या०र०पृ. ३२।।
सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।। १३।।

ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः।
पयस्वतीः प्प्रदिशः सन्तुमहयम्।। शु०य० १८/३६।।
ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
ह्वयामिशक्रम्पुरुहूतमिन्द्रं स्वस्तिनो मघवाधात्विन्द्रः।। शु०य० २०/५०।।
ॐवरुणय्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्त्थोवरुणस्यऽऋतसदन्यसि-
वरुणस्यऋतसदनमसिवरुणस्यऽऋतसदनमासीद।। शु०य० ०४/३६।।
ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके।। शु०य० २१/०१।।
ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः।
अहेडमानोव्वरुणेहबोद्ध्युरुशं समानऽआयुः प्प्रमोषीः।। शु०य० १८/४९।।

अपः स्पृष्ट्वा कन्यां स्वस्थाने उपवेशयेत्।

**२६/१९. अथाऽऽशीर्वादाः।**

कन्यादानकर्त्रे वधूवराभ्यां चाशिषो ददानो ब्राह्मणा वदेयुः।

ॐ शतञ्जीवशरदो वर्धमानः शतंहेमन्ताच्छतमुवसन्तान्।
शतमिन्द्राग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः।।[६४१]
ॐ शतञ्जीवशरदो वर्धमानऽइत्यपिनि गमोभवति शतमिति शतंदीर्घमायुर्मरुते मां वर्धयन्ति।
शतमेवशतमात्मानं भवति। शतमितिशतं दीर्घमायुः।।
ॐ शतमिन्नु शरदोऽअन्ति देवायत्रानश्च्चक्क्रा जरसन्तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नोमध्यारीरिषतायुर्गन्तोः।। शु०य० २५/२२।।

**२६/२०. अथ ब्राह्मणभोजनसङ्कल्पः।**

कन्यापिता हस्ते जलमादाय। कृतस्य कन्यादानकर्मणः साङ्गतासिद्ध्यर्थं यथासङ्ख्याकान् ब्राह्मणान् कुमारिकाबटुकसुवासिन्यादिजनान् यथाकाले भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम् न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। कृतस्य कन्यादानकर्मणः साङ्गतासिद्ध्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[६४१] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यावद्भागीरथि गङ्गा यावद्देवो महेश्वरः। यावद्वेदा प्रवर्तन्ते तावत्वं विजयी भव।। बृ०प्र०पृ. १६८।।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा।। १५७।। ब्र०स०पृ. ३१९।।

इति कन्यादानविधिः।

**२६/ २१. अथ विवाहहोमः।**

वरो हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं भार्यात्वसिद्ध्यर्थं विवाहहोममहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गन्धाक्षतपुष्पैः गणपतिपूजनं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ गणानान्त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं–
हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम्।। शु०य० २३/१९।।[६४२]

ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहितमहागणपतये नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि समर्पयेत्।

ततः आचार्यः पञ्चभूसंस्कारपूर्वकमग्निं[६४३] संस्थापयेत्। अग्नेरुत्तरतो भूरसि इत्यादिक्रमेण उदककुम्भस्थापनं कृत्वा। ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनादि प्रोक्षण्याः प्रत्युत्पवनान्तं कर्म कृत्वा तिष्ठेत्। तत्र उपकल्पनीयानि उत्तरे शमीपलाशमिश्रा लाजाः। अश्मा। अखण्डलोहितम्। आनडुहं चर्म। कुमारीभ्राता। शूर्पम्। पूर्णपात्रं वरो वा। प्रोक्षणकाले उपकल्पनीयानां प्रोक्षणम्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कार–सामान्यविधि गृहीतव्या। तद्यथा आचार्यादिऋत्विग्वरणे (०७/–) अर्घकरणम् (०७/०१), ब्राह्मणप्रार्थना (०७/०२), आचार्यवरणम् (०७/०३), ब्रह्मर्त्विग्वरणम् (०७/०४), मधुपर्क (०७/०५), ऋत्विक् प्रार्थना (०७/०६), यजमानहस्ते कङ्कणबन्धनम् (०७/०७), यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम् (०७/०८), पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम् (०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वक- मग्निस्थापने (०८/–)

---

[६४२] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
वक्रतुंड महाकाय सूर्यकोटिसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।। कर्म०पृ. १९४।।

[६४३] यदि पूर्वमग्निस्थापनं कृतं न भवेत् तर्हि अस्मिन् स्थानेऽग्निस्थापनं करणीयम्।

सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम् (०८/०७), कुशकण्डिकायां (१०/-) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

**२६/२२. अथाऽऽघाराज्यहोमः।**

ततः उपयमनकुशानादाय तिष्ठन् समिधोभ्याधाय। प्रोक्षणीशेषोदकेन अग्निं प्रदक्षिणीकृत्य इतरथावृत्तिः। पवित्रयोः प्रणीतासु निधानम्। वरणाऽन्वारब्ध आचार्यो वा ब्राह्मणा दक्षिणहस्तेनान्वारब्धः वरः दक्षिणं जान्वाच्य स्रुवेण जुहुयात्।

१. मनसा – ३ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
वरो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ३ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
वरो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे– ३ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
वरो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे– ३ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
वरो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

**२६/२३. अथाऽग्निपूजनम्।**

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

३ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[६४४]

विवाहे योजकनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्। इत्यग्निं सम्पूज्य अष्टप्रायश्चित्ताहुतीर्जुहुयात्।

**२६/२४. अथाऽष्टप्रायश्चित्ताहुतयः।**

१.३ॐ भूः स्वाहा।[६४५] इदमग्नये न मम।

---

[६४४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिकाो मन्त्रो गृह्यते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।

[६४५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

२.ॐ भुवः स्वाहा। इदं वायवे न मम।

३.ॐ स्वः स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्द्वान्देवस्यहेडोऽअवयासिसीष्ठाः।
यजिष्ठोवह्नितमः शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/३।।
इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।
अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/४।।
इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।
अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।
इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्त्रंयज्ञियाः पाशाविततामहान्तः।
तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा।।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।
अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।
इदं वरुणायाऽऽदित्यायाऽदितये च न मम।

### २६/ २५. अथ राष्ट्रभृद्धोमः।

वरो हस्ते जलमादाय। ऋताषाडित्यादि द्वादशानां प्रजापतिर्ऋषिः तत्तन्मन्त्रोक्ता देवताः यजुश्छन्दः राष्ट्रभृद्धोमे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। वर आज्येन जुहुयात्।

ॐ ऋताषाड् ऋतधामाग्नि गन्धर्वः सनऽइदं
ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्।। ।।[६४६]

---

१. अग्नये नमः स्वाहा। इदम् अग्नये न मम।
२. वायवे नमः स्वाहा। इदं वायवे न मम।।
३. सूर्याय नमः स्वाहा। इदं सूर्याय न मम।
४. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।
५. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।
६. अग्नये अयसे नमः स्वाहा। इदमग्नये अयसे न मम।
७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च नमः स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।
८. वरुणायाऽऽदित्यायाऽदितये नमः स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।

[६४६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
१. ऋताषाहे ऋतधाम्ने अग्नये गन्धर्वाय स्वाहा। इदं ऋताषाहं ऋतधाम्ने अग्नये गन्धर्वाय न मम। इति त्यागः।

इदं ऋताषाहं ऋतधाम्ने अग्नये गन्धर्वाय न मम। इति त्याग:।

ॐ ऋताषाड् ऋतधामाग्नि गन्धर्वस्तस्यौषधयोप्सरसो
मुदोनामताभ्य: स्वाहा।। शु०य० १८/३८।।
इदमौषधिभ्योप्सरोभ्यो मुद्भ्यो न मम।

ॐ सं हितो विश्वसामा सूर्यो गन्धर्व: सनऽइदं
ब्रह्मक्षत्रंपातु तस्मै स्वाहा वाट्।।
इदं संहिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम।

ॐ सं हितो विश्वसामा सूर्योगन्धर्वस्तस्य मरीचयोप्स-
रसऽआयुवोनाम ताभ्य: स्वाहा।। शु०य० १८/३९।।
इदं मरीचिभ्योप्सरोभ्यऽआयुभ्यो न मम।

ॐ सषुम्ण: सूर्यरश्मिश्चन्द्रमा गन्धर्व: सनऽइदं
ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्।।
इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम।

ॐ सुषुम्ण: सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्त
नक्षत्राण्यप्सरसोभेकुरयोनाम ताभ्य: स्वाहा।। शु०य० १८/४०।।
इदं नक्षत्रेभ्योप्सरोभ्यो भेकुरिभ्यो न मम।

ॐ इषिरोविश्वव्यचावातोगन्धर्व: सनऽइदं
ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्।।
इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम।

ॐ इषिरोविश्वव्यचावातोगन्धर्वस्तस्या-
पोऽप्सरसऽऊर्जोनामताभ्य: स्वाहा।। शु०य० १८/४१।।
इदमद्भ्योप्सरोभ्योऽऊर्ग्भ्यो न मम।

ॐ भुज्यु:सुपर्णोयज्ञो गन्धर्व: सनऽइदं
ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्।।

---

२. औषधिभ्योप्सरोभ्यो मुद्भ्य: स्वाहा। इदमौषधिभ्योप्सरोभ्यो मुद्भ्यो न मम।

३. संहिताय विश्वनाम्ने सूर्याय गन्धर्वाय स्वाहा। इदं संहिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम।

४. मरीचिभ्योऽप्सरोभ्य आयुभ्य: स्वाहा। इदं मरीचिभ्योऽप्सरोभ्यऽआयुभ्यो न मम।

५. सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय स्वाहा। इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम।

६. नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्य: स्वाहा। इदं नक्षत्रेभ्योप्सरोभ्यो भेकुरिभ्यो न मम।

७. इषिराय विश्वव्यचसे वाताय गन्धर्वाय स्वाहा। इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम।

८. अद्भ्योऽप्सरोभ्यऊर्ग्भ्यो स्वाहा। इदमद्भ्योप्सरोभ्योऽऊग्भर्यो न मम।

९. भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय स्वाहा। इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम।

१०.दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्य: स्वाहा। इदं दक्षिणाभ्योप्सरोभ्यस्तावाभ्यो न मम।

११.प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय स्वाहा। इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम।

१२.ऋक्सामभ्योऽप्सरोभ्य एष्टिभ्य: स्वाहा। इदम् ऋक्सामभ्योप्सरोभ्यऽएष्टिभ्यो न मम।। कर्म०पृ. २९२।।

इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम।

ॐ भुज्यु:सुपर्णोयज्ञो गन्धर्वस्तस्य दक्षिणाऽअ-
प्सरसस्तावानामताभ्य: स्वाहा।। शु०य० १८/४२।।
इदं दक्षिणाभ्योप्सरोभ्यस्तावाभ्यो न मम।

ॐ प्रजापतिविश्वकर्मामनोगन्धर्व: सनऽइदं
ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्।।
इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम।

ॐ प्रजापतिर्विश्वकर्मामनोगन्धर्वस्तस्यऽऋक्सा-
मान्यप्सरसऽएष्टयोनामताभ्य:स्वाहा।। शु०य० १८/४३।।
इदम् ऋक्सामभ्योप्सरोभ्यऽएष्टिभ्यो न मम।

## २६/ २६. अथ जयाहोम:।

वरो हस्ते जलमादाय। चित्तंचेत्यादित्रयोदशमन्त्राणां परमेष्ठी ऋषि: यजुंषि छन्दांसि लिङ्गोक्ता देवता: विवाहकर्मणि जयाहोमे विनियोग:। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ चित्तं च स्वाहा। इदं चित्ताय न मम।[६४७]

ॐ चित्तिश्च स्वाहा । इदं चित्त्यै न मम।

ॐ आकूतं च स्वाहा।इदम् आकूताय न मम।

ॐ आकूतिश्च स्वाहा। इदम् आकूत्यै न मम।

ॐ विज्ञातं च स्वाहा। इदं विज्ञाताय न मम।

ॐ विज्ञातिश्च स्वाहा। इदं विज्ञात्यै न मम।

---

[६४७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

०१. चित्ताय स्वाहा। इदं चित्ताय न मम।
०२. चित्त्यै स्वाहा । इदं चित्त्यै न मम।
०३. आकूताय स्वाहा।इदम् आकूताय न मम।
०४. आकूत्यै स्वाहा। इदम् आकूत्यै न मम।
०५. विज्ञाताय स्वाहा। इदं विज्ञाताय न मम।
०६. विज्ञात्यै स्वाहा। इदं विज्ञात्यै न मम।
०७. मनसे स्वाहा। इदं मनसे न मम।
०८. शक्वरीभ्य: स्वाहा। इदं शक्वरीभ्यो न मम।
०९. दर्शाय स्वाहा। इदं दर्शाय न मम।
१०. पौर्णमासाय स्वाहा। इदं पौर्णमासाय न मम।
११. बृहते स्वाहा। इदं बृहते न मम।
१२. रथन्तराय च स्वाहा। इदं रथन्तराय न मम।
१३. प्रजापतये जयानिन्द्राय स्वाहा। इदं प्रजापतये जयानिन्द्राय न मम।। कर्म०पृ. २९३।।

ॐ मनश्च स्वाहा। इदं मनसे न मम।

ॐ शक्वर्यश्च स्वाहा। इदं शक्वरीभ्यो न मम।

ॐ दर्शश्च स्वाहा। इदं दर्शाय न मम।

ॐ पौर्णमासं च स्वाहा। इदं पौर्णमासाय न मम।

ॐ बृहच्च स्वाहा। इदं बृहते न मम।

ॐ रथन्तरं च स्वाहा। इदं रथन्तराय न मम।

ॐ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु।
तस्मै विशः समनमन्त सर्वाः स उग्रः सऽइ हव्यो बभूव स्वाहा।।
पा०गृ०सू० ०१/०५/०९।।

इदं प्रजापतये जयानिन्द्राय न मम।

इति जयाहोमः।

## २६/२७. अथाऽभ्यातानहोमः।

वरो हस्ते जलमादाय। अग्निर्भूतानामित्याद्यष्टादशानां मन्त्राणां प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः तत्तन्मत्रोक्ता देवताः अभ्यातानहोमे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।[६४८]

---

[६४८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।

०१. अग्नये भूतानामधिपतये स्वाहा। इदमग्नये भूतानामधिपतये न मम।

०२. इन्द्राय ज्येष्ठानामधिपतये स्वाहा। इदमिन्द्राय ज्येष्ठानामधिपतये न मम।
अन्तरपटं कृत्वा।

०३. यमाय पृथिव्या अधिपतये स्वाहा। इदं यमाय पृथिव्या अधिपतये न मम।
दक्षिणस्याम् अन्यपात्रं निधाय तन्मध्ये त्यागं कुर्यात्।
अन्तरपटं निस्सार्य। प्रणीतोदकं स्पृशेत्।

०४. वायवे अन्तरिक्षस्याधिपतये स्वाहा। इदं वायवे अन्तरिक्षस्याधिपतये न मम।

०५. सूर्याय दिवाधिपतये स्वाहा। इदं सूर्याय दिवाधिपतये न मम।

०६. चन्द्रमसे नक्षत्राणामधिपतये स्वाहा। इदं चन्द्रमसे नक्षत्राणामधिपतये न मम।

०७. बृहस्पतये ब्रह्माधिपतये स्वाहा। इदं बृहस्पतये ब्रह्माधिपतये न मम।

०८. मित्राय सत्यानामधिपतये स्वाहा। इदं मित्राय सत्यानामधिपतये न मम।

०९. वरुणाय अपाम् अधिपतये स्वाहा। इदं वरुणाय अपाम् अधिपतये न मम।

१०. समुद्राय स्रोत्यानामधिपतये स्वाहा। इदं समुद्राय स्रोत्यानामधिपतये न मम।

११. अन्नाय साम्राज्यानामधिपतये स्वाहा। इदमन्नाय साम्राज्यानामधिपतये न मम।

१२. सोमाय औषधीनामधिपतये स्वाहा। इदं सोमायौषधीनामधिपतये न मम।

१३ सवित्रे प्रसवानामधिपतये स्वाहा। इदं सवित्रे प्रसवानामधिपतये न मम।
अन्तरपटं कृत्वा।

इदमग्नये भूतानामधिपतये न मम।

ॐ इन्द्रो[६४९] ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

इदमिन्द्राय ज्येष्ठानामधिपतये न मम।

अन्तरपटं कृत्वा।

ॐ यमः पृथिव्या अधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

इदं यमाय पृथिव्या अधिपतये न मम।

दक्षिणस्याम् अन्यपात्रं निधाय तन्मध्ये त्यागं कुर्यात्।

अन्तरपटं निस्सार्य। प्रणीतोदकं स्पृशेत्।

ॐ वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

इदं वायवे अन्तरिक्षस्याधिपतये न मम।

ॐ सूर्यो दिवोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

इदं सूर्याय दिवोऽधिपतये न मम।

ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

इदं चन्द्रमसे नक्षत्राणामधिपतये न मम।

ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम।

ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां

---

१४. रुद्राय पशूनामधिपतये स्वाहा। इदं रुद्राय पशूनामधिपतये न मम।
ऐशान्यां अन्यपात्रं निधाय तन्मध्ये त्यागं कुर्यात्।
अन्तरपटं निःसार्य प्रणीतोदकं स्पृशेत्।

१५. त्वष्ट्रे रूपाणामधिपतये स्वाहा। इदं त्वष्ट्रे रूपानामधिपतये न मम।

१६. विष्णवे पर्वतानामधिपतये स्वाहा। इदं विष्णवे पर्वतानामधिपतये न मम।

१७. मरुद्भ्यो गणानामधिपतिभ्यः स्वाहा। इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम।
अन्तरपटं कृत्वा।

१८. पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यः स्वाहा। इदं पितृभ्यः पितामहेभ्यः परेभ्योऽ–वरेभ्यस्ततेभ्यस्ततामहेभ्यश्च न मम।
दक्षिणाग्न्योर्मध्ये अन्यपात्रं निधाय तन्मध्ये त्यागं कुर्यात्।
अन्तरपटं निस्सार्य प्रणीतोदकं स्पृशेत्।। कर्म०पृ. २९५।।

[६४९] अस्मात् मन्त्रात् परेषां सप्तदशमन्त्राणामन्तिमः पादौ ब्रह्मनित्यकर्मसमुच्चयकारैः गृहीतो नास्ति। तत् स्थाने तु – एवमेवमभ्यातानहोमे प्रत्याहुतौ समावत्वस्मिन्नित्यारभ्य सर्वत्रसमानमिति। (पृ. ४३४)

पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं मित्राय सत्यानामधिपतये न मम।
ॐ वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं वरुणायापामधिपतये न मम।
ॐ समुद्रः स्त्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं समुद्राय स्त्रोत्यानामधिपतये न मम।
ॐ अन्नं साम्राज्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदमन्नाय साम्राज्यानामधिपतये न मम।
ॐ सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं सोमायौषधीनामधिपतये न मम।
ॐ सविता प्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं सवित्रे प्रसवानामधिपतये न मम।
अन्तरपटं कृत्वा।
ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं रुद्राय पशूनामधिपतये न मम।
ऐशान्यां अन्यपात्रं निधाय तन्मध्ये त्यागं कुर्यात्।
अन्तरपटं निःसार्य प्रणीतोदकं स्पृशेत्।
ॐ त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं त्वष्ट्रे रूपानामधिपतये न मम।
ॐ विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं विष्णवे पर्वतानामधिपतये न मम।
ॐ मरुतो गणानामधिपतयस्ते स मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।
इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम।
अन्तरपटं कृत्वा।
ॐ पितरः पितामहाः परेऽवरे ततास्ततामहाः स मावन्त्वस्मिन् ब्रह्मण्यस्मिन्
क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा।।

पा०गृ०सू० ०१/०५/१०।।

इदं पितृभ्य: पितामहेभ्य: परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यश्च न मम।

दक्षिणाग्न्योर्मध्ये अन्यपात्रं निधाय तन्मध्ये त्यागं कुर्यात्।

अन्तरपटं निस्सार्य प्रणीतोदकं स्पृशेत्।

## २६/ २८. अथ पञ्चक(पञ्चाहुति)होमः।

वरो हस्ते जलमादाय। अग्निरैत्वित्यादि पञ्चानां प्रजापतिर्ऋषि: अन्तिमस्य सङ्कर्षणऋषि: अग्निर्देवता चतुर्थस्य वैवस्वतो देवता पञ्चमस्य मृत्युर्देवता त्रिष्टुप्छन्द: सर्वेषां होमे विनियोग:। इत्युकत्वा जलपात्रे जलं क्षिपेत्।

ॐ अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुञ्चतु मृत्युपाशात्।
तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघन्नरोदात् स्वाहा।।[६५०]
इदमग्नये न मम।
ॐ इमामग्निस्त्रायतां गार्हपत्य: प्रजामस्यै नयतु दीर्घमायु:।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा।।
इदमग्नये न मम।
ॐ स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानि धेह्ययथा यजत्र।
यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा।।
इदमग्नये न मम।
ॐ सुगन्नु पन्थां प्रदिशन्त एहि ज्योतिष्मध्ये ह्यजरन्न आयु:।
अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा।। पा०गृ०सू० ०१/०५/११।।
इदं वैवस्वताय न मम।
दक्षिणस्यां दिशि अन्यपात्रे त्यागं कृत्वा। प्रणीतोदकं स्पृशेत्। अन्तरपटं कृत्वा।
ॐ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्।
चक्षुष्मते श्रृण्वते ते ब्रवीमि मा न: प्रजां रीरिषो मोत वीरान्।। शु०य० ३५/०७।।
इदं मृत्यवे न मम।

---

[६५०] अत्र ब्राह्मणेतरवर्णानां कृत पौराणिका मन्त्रा गृह्यन्ते।

०१. अग्नये स्वाहा। इदमग्नये न मम।
०२. अग्नये स्वाहा। इदमग्नये न मम।
०३. अग्नये स्वाहा। इदमग्नये न मम।
०४. वैवस्वताय स्वाहा। इदं वैवस्वताय न मम।
दक्षिणस्यां दिशि अन्यपात्रे त्यागं कृत्वा। प्रणीतोदकं स्पृशेत्। अन्तरपटं कृत्वा।
०५. मृत्यवे स्वाहा। इदं मृत्यवे न मम।
इत्यग्नौ वा भूमौ वा त्यजेत्। अन्तरपटं नि:सार्य। प्रणीतोदकं स्पृशेत्।

इत्यग्नौ वा भूमौ वा त्यजेत्। अन्तरपटं निःसार्य। प्रणीतोदकं स्पृशेत्।
इति पञ्चकहोमः।

**२६/२९. अथ लाजाहोमः।**

अथ कुमार्या भ्राता[६५१] शमीपलाशमिश्रानासादितशूर्पस्थान्लाजानञ्जलिनाऽऽदाय कुमार्या अञ्जलावावपति। तान् लाजान् प्राङ्मुखी तिष्ठन्ती कुमारी अञ्जलिना जुहोति।

वरो हस्ते जलमादाय। अर्य्यमणमित्यादित्रयाणामाथर्वणऋषिस्त्रिष्टुप्छन्दस्तृतीयस्यानुष्टुप्छन्दोऽग्निर्देवतालाजाहोमे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। ततः कन्या वदेत्।

ॐ अर्यमणं देवं कन्याऽऽग्निमयक्षत।
स नो अर्यमा देवः प्रेतो मुञ्चन्तु मा पतेः स्वाहा।।[६५२]
इदमर्यम्णे न मम।
अनेन मन्त्रेण अञ्जलिस्थलाजानां तृतीयांशं जुहोति।
ॐ इयं नार्युपब्रूते लाजानावपन्तका।
आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा।।[६५३]
इदमग्नये न मम।
अनेन अञ्जलिस्थलाजार्द्धं जुहोति।
ॐ इमां लाजानावपाम्यग्नौ समृद्धिकरणं तव।
मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वाहा।। पा०गृ०सू० ०१/०६/०२।।[६५४]
इदमग्नये न मम।
इत्यनेन मन्त्रेणाञ्जलिस्थान्सर्वान्ल्लाजाञ्जुहोति।

वरः कन्याया दक्षिण[६५५] हस्तं साङ्गुष्ठम् उत्तानं गृह्णाति पठति च।

वरो हस्ते जलमादाय। गृभ्णामीत्यादीनां चतुर्णां याज्ञवल्क्यभरद्वाजात्रिप्रजापतय ऋषयः। त्रिष्टुबुष्णिगनुष्टुब्यजुश्छन्दांसि लिङ्गोक्ता देवताः वध्वाः पाणिग्रहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। वरो वदेत्।

---

[६५१] ब्रह्मनित्यसमुच्चयकारा अन्यो भ्रातुरभावे स्याद्बान्धवो ज्ञातिरेववेति रेणोर्मतं लिखन्ति।

[६५२] अत्र ब्राह्मणेतरवर्णानां कृते अर्यम्णे स्वाहा इदं अर्यम्णे न ममेति पौराणिको मन्त्रो गृह्यते।

[६५३] अत्र ब्राह्मणेतरवर्णानां कृते अग्नये स्वाहा इदं अग्नये न ममेति पौराणिको मन्त्रो गृह्यते।

[६५४] अत्र ब्राह्मणेतरवर्णानां कृते अग्नये स्वाहा इदं अग्नये न ममेति पौराणिको मन्त्रो गृह्यते।
इत्यनेन मन्त्रेणाञ्जलिस्थान्सर्वान्ल्लाजाञ्जुहोति।

[६५५] अथास्यै दक्षिणं हस्तं वरो गृह्णाति साङ्गुष्ठम्।

ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः।।[६५६]
अमोहमस्मि सा त्वं सा त्वमस्यमोऽहम्।
सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वम्।।
तावेहि विवाहावहै सह रेतो दधावहै।
प्रजां प्रजनयावहै पुत्रान् विद्यान्वहै बहून्।।
ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ।
पश्येम शरदः शतं जीवेम शरदः शतं
श्रृणुयाम शरदः शतमिति।। पा०गृ०सू० ०१/०६/०३।।

## २६/ ३०. अथाऽश्मारोहणम्।

ततः बधूमग्रे कृत्वा अग्नेरुत्तरतो गत्वा तत्र वरो वध्वा दक्षिणपादं सव्यहस्तेन गृहीत्वा[६५७] दक्षिणेन वा गृहीत्वा। पूर्वोपकल्पितदृषदुपरि करोति।

वरो हस्ते जलमादाय। आरोहममेति मन्त्रस्य आथर्वणऋषिः त्रिष्टुप्छन्दः अग्निर्देवता अश्मारोहणे विनियोगः। इत्युक्त्वा जलपात्रे जलं क्षिपेत्। वरो वदेत्।

ॐ आरोहे ममश्यानमश्मेव त्वं स्थिरा भव।
अभितिष्ठ पृतन्यतोऽवबाधस्य पृतनायतः।। पा०गृ०सू० ०१/०७/०१ ।।[६५८]

## २६/ ३१. अथ गाथागानम्।

वरो वदेत्।

ॐ सरस्वति प्रेदमव सुभगे वाजिनीवती।
यान्त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः।।
यस्यां भूतं समभद्यस्यां विश्वमिदं जगत्।
तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः।। पा०गृ०सू० ०१/०७/०२।।[६५९]

---

[६५६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिकौ मन्त्रौ गृह्येते।
भगोर्यम सवितृभ्यो नमः।
चित्ते सौम्यगुणेर्युक्ता वीरसूर्जीवसूर्भव। कूले मदीये समाग्नौ मच्चित्तानुगता सदा। कर्म०पृ. २९८।।

[६५७] गुर्जरप्रदेशे वरेण वधूदक्षिणपादस्यग्रहणं न क्रियते। अशिष्टलोकाचारोऽयं शास्त्रसम्मतो नाऽस्ति। अतस्त्याज्यः।

[६५८] अत्र ब्राह्मणेतरवर्णानां कृते कन्यायै नम इति पौराणिकं मन्त्रं वरो वदेत्।

[६५९] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
तामद्य गाथां गास्यामि सुभगे वाजिनीवती। सरस्वती नमस्तुभ्यं या स्त्रीणामुत्तमं यशः।। कर्म०पृ. २९८।।

**२६/ ३२. अथाऽग्निपरिक्रमणम्।**

अग्रे कन्या चलति। तत्पृष्ठतो वरश्चलति।

वरो हस्ते जलमादाय। तुभ्यमग्नेइत्याथर्वण ऋषिः अनुष्टुप्छन्दः अग्निर्देवता अग्निपरिक्रमणे विनियोगः इत्युक्त्वा जलपात्रे जलं क्षिपेत्। परिक्रमणे वरो वदेत्।

ॐ तुभ्यमग्ने पर्यवहन्सूर्यां वहतु ना सह।
पुनः पतिभ्यो जायां दाग्ने प्रजया सह।। पा०गृ०सू० ०१/०७/०३।।[६६०]

एवं कन्याया भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति। इत्यारभ्य परिक्रमणान्तं पुनः वारद्वयं कुर्यात्।

ततः तृतीयप्रदक्षिणानन्तरं शूर्पकोणप्रदेशेन कन्याया भ्राता कन्याञ्जलौ सर्वान्लाजान् आवपति। कन्या तिष्ठती लाजाञ्जुहोति।

ॐ भगाय स्वाहा। इदं भगाय न मम।

इति मन्त्रं कन्याया वाचोच्चारयति वरः। अग्रे वरश्चलति। तत्पृष्ठतः कन्या चलति।[६६१] ततः समाचारात् तूष्णीं चतुर्थपरिक्रमणं कुरुतः। अग्र वरो गत्वा तिष्ठति। तत्पृष्ठतः कन्या तिष्ठति। परिक्रमणान्ते वरः कन्याया आसने स्वयं स्थित्वा कन्यां च स्वस्याऽऽसने उपवेशयेत्।

ततश्च पुनः उभौ पश्चादग्नेः प्राग्वत् स्वासने उपविशेताम्। वरो ब्रह्मान्वारब्धः प्राजापत्यहोमं कुर्यात्।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। इति प्रोक्षण्यां त्यागः।

इति लाजाहोमः।

**२६/ ३३. अथ सप्तपदाक्रमणः।**

तत्रादौ शिष्टाचारात् अग्नेरुत्तरत उदक्संस्थान् सपूगीफलान् सप्ततण्डुलपुञ्जान्कृत्वा वरः तत्र सप्ताचलपूजनं कुर्यात्।

वरो हस्ते जलमादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं मम गृहीत कन्यापतित्वसिद्धये सप्ताचलपूजनमहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

---

[६६०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तुते।। कर्म० पृ. २९८।।

[६६१] अत्र स्थले वरेणाऽपि अश्मारोहणं क्रियमाणे कन्याभ्राता वरस्य दक्षिणपादं स्पृशतीति लोकाचारः।

ॐ प्रतिपदसि प्रतिपदे त्वानुपदेस्यनुपदे त्वा
सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा।। शु०य० १५/०८।।[६६२]

ॐ भूर्भुवः स्वः सप्ताचलेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयेत्। इत्युक्त्वा गन्धाक्षपुष्पाणि समर्पयेत्।

ततो वरः सप्तपदानि प्रक्र[६६३]मस्वेति प्रैषं कुर्यात्। सप्तपदी वरो वदेत्।
ॐ एकमिषे विष्णुस्त्वा नयतु। इति प्रथमम्।[६६४]
इति वरोक्ते वधूर्दक्षिणैकपदमुदग्धान्याचले दद्यात्। एवं सर्वत्र।
ॐ द्वे उर्जे विष्णुस्त्वा नयतु। इति द्वितीयम्।
ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु। इति तृतीयम्।
ॐ चत्वारि मायोभवाय विष्णुस्त्वा नयतु। इति चतुर्थम्।
ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु। इति पञ्चम्।
ॐ षड् ऋतुभ्यो विष्णुस्त्वा नयतु। इति षष्ठम्।
ॐ सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु।।
पा०गृ०सू० ०१/०८/०१-२।। इति सप्तम।
केचिदत्र प्रतिपदं वधूः प्रतिज्ञावचनं पठेदित्याहुः।

## २६/ ३४. अथ कन्याप्रतिज्ञा।

ततः कन्या वदेत्।
त्वत्तो मेऽखिलसौभाग्यं पुण्यैस्त्वं विविधैः कृतैः।
देवैः सम्पादितो मह्यं वधूराद्ये पदेऽब्रवीत्।। १५८।। ब्र०स०पृ. ४४१।।
कुटुम्बं पालयिष्यामि ह्यावृद्धबालकादिकम्।
यथालब्धेन सन्तुष्टा ब्रूते कन्या द्वितीयके।। १५९।। ब्र०स०पृ. ४४१।।
मिष्टान्नव्यञ्जनादीनि काले सम्पादये तव।
आज्ञासम्पादिनी नित्यं तृतीये साऽब्रवीद्वरम्।। १६०।। ब्र०स०पृ. ४४१।।
शुचिः शृङ्गारभूषाऽहं वाङ्मनःकार्यकर्मभिः।
क्रीडिष्यामि त्वया सार्धं तुरीये साऽब्रवीदिदम्।। १६१।। ब्र०स०पृ. ४४१।।
दुःखे धीरा सुखे हृष्टा सुखदुःखविभागिनी।

---

[६६२] अत्र ब्राह्मणेतरवर्णानां कृते सप्ताचलदेवताभ्यो नम इति मन्त्रेण सम्पूजयेत्।
[६६३] अथैनामुदिचीं सप्तपदानि प्रक्रामयति।
[६६४] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
इषे नमः। उर्जे नमः। रायस्पोषाय नमः। मायो भवाय नमः। पञ्चपशुभ्यो नमः। षड् ऋतुभ्यो नमः। सखिभ्यो नमः।। कर्म०पृ. २९९।।

नाहं परतरं गच्छे पञ्चमे साऽब्रवीत्पतिम्।। १६२।। ब्र०स०पृ. ४४२।।
सुखेन सर्वकर्माणि करिष्यामि गृहे तव।
सेवां श्वशुरयोश्चापि बन्धूनां सत्कृतं तथा।।
यत्र त्वं वा ह्यहं तत्र नाहं वञ्चे प्रियं क्वचित्।
नाहं प्रियेण वञ्चयाऽस्मि कन्या षष्ठे पदेऽब्रवीत्।। १६३।। ब्र०स०पृ. ४४२।।
होमयज्ञादिकार्येषु भवामि च सहायकृत्।
धर्मार्थकामकार्येषु मनोवृत्तानुसारिणी।।
सर्वे च साक्षिणस्त्वं मे पतिभूतोऽसि साम्प्रतम्।
देहो मयाऽर्पितस्तुभ्यं सप्तमे साऽब्रवीद्वरम्।। १६४।। ब्र०स०पृ. ४४३।।

इति सप्तपदाक्रमणम्।

निष्क्रमणारम्भ वर: अग्नेर्दक्षिणत: स्थितस्य वाग्यतस्य वा स्वस्य स्कन्धधृतोदककुम्भाद्धस्तेन जलमादाय एनां वधूं शिरसि आप: शिवश्च आपोहिष्ठेतित्रिभिर्मन्त्रैरभिषिञ्चति।

ॐ आप: शिवा: शिवतमा: शान्ता:
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।
ॐ आपोहिष्ठामयोभुवस्तानऽउर्ज्जेदधातन। महेरणायचक्षसे।। शु०य० ११/५०।।[६६५]
ॐ योव: शिवतमोरसस्तस्यभाजयतेहन:। उशतीरिवमातर:।। शु०य० ११/५१।।
ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचन:। शु०य० ११/५२।।

## २६/ ३५. अथ सूर्यमुदीक्षणम्।

ततो दिवा विवाहश्चेद्वर: सूर्यमुदीक्षस्वेति वधूं प्रेरयति। वरो वदेत।

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरद: शतं जीवेम शरद: शतं शृणुयाम शरद: शतं प्रब्रवाम
शरद: शतमदीना: स्याम शरद: शतं भूयश्च शरद: शतात्।। शु०य० ३६/२४।।[६६६]

---

[६६५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि। ललाटे कर्णयो रक्ष्णो रापो निघ्नन्तु ते सदा।। या०र०पृ. ३२।।

[६६६] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम्।
दारिद्र्य दु:ख क्षयकारणं च पुनातुमांतत् सवितुर्वरेण्यम्।। कर्म०पृ० २६६।।

ततो वरो वध्वा दिक्षणस्कन्धोपरि हस्तं नीत्वा ममव्रतेति स्वपठितमन्त्रेण तस्या हृदयमालभेत्। ततः कन्या वदेत्।

ॐ ममव्रतेते हृदयं दधामि ममचित्तमनुचित्तन्तेऽअस्तु।
मम वाचमेकमनाजुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्।। पा०गृ०सू० ०१/०८/०८।।[६६७]

**२६/ ३६. अथ सिन्दूरदानम्।**

ततो वरोऽनामिकाग्रे वधूशिरसि धृत्वा एनामभिमन्त्रयेत्। वरो वदेत्।

ॐ सुमङ्गलीरियं वधूरिमां समेत पश्यत।
सौभाग्यमस्यै दत्वा याथास्तं विपरेतन।। पा०गृ०सू० ०१/०८/०९।।[६६८]

अत्र आचाराच्चतस्रः स्त्रियो मङ्गलं कुर्वन्ति।[६६९]
चतस्रः सुवासिन्यः प्रथमं वरस्य कन्यायाश्च भाले तिलकं कृत्वा कन्यायाः पृष्ठभागे गत्वा कन्याया वस्त्रान्तरे लाजान् प्रक्षिपन्त्यः दक्षिणकर्णे कथयेयुः। ब्रह्मसावित्र्योः सौभाग्यम्। इन्द्रेन्द्राण्योः सौभाग्यम्। शिवपार्वत्योः सौभाग्यम्। लक्ष्मीनारायणयोः सौभाग्यम्। अखण्ड सौभाग्यवती पुत्रपौत्रवती भव। अनन्तरं कन्या लाजान् स्वकीयाञ्जलौ गृहीत्वा शिष्टाचारात् स्वस्य पत्युः शिरसि प्रक्षिपेत्।

ततो वधूं वरस्य वामभागे उपवेशयति। अत्र च वध्वाः सीमन्ते वरः सिन्दूरं ददाति। वरो वदेत।

ॐ वाममद्य सवितर्वाममुश्वो दिवे दिवे वाममस्मभ्यं सावीः।
वामस्य हि क्षयस्य देवभूरेरया धिया वामभाजः स्याम।। शु०य० ०८/०६।।[६७०]

इति सिन्दूरदानम्।

---

[६६७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
मम तव चित्तं वाग्भ्यां नमः।। कर्म०पृ० ३०२।।

[६६८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
वध्वै नमः।

[६६९] रेणुः-
पतिपुत्रान्विता भव्याश्चतस्रः सुभगा अपि। सौभाग्यमस्यै दद्युस्ता मङ्गलाचारपूर्वकम्।। ब्र०स०पृ. ४४३।।

[६७०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
सिन्दूरे सर्वसौभाग्यं सिन्दूरे सुखसम्पदः। ददामि तव सीमन्ते सिन्दूरं सुखवर्धनम्।। कर्म०पृ. ३०२।।

ततस्तासां दृढपुरुषेणोन्मथ्याग्नेः प्राग्वोदग्वानुगुप्तऽऽगारेप्राग्ग्रीवऽउत्तरेलोमास्तीर्णेरोहितेऽ-आनडिहचर्मण्युपवेशयति। वरो वदेत्।

ॐ इह गावो निषीदन्त्विहाश्वा इह पुरुषाः।
इह सहस्रदक्षिणो यज्ञ इह पूषा निषीदन्तु।। पा०गृ०सू० ०१/०८/१०।।[६७१]

ततः आगत्य पूर्ववद्यस्थानमुपविश्य ब्रह्मान्वारब्धो वरः स्विष्टकृतं जुहोति।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।

संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्पः। कृतस्य विवाहसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।। पा०गृ०सू० ०३/१५/२१।।
अग्नेः पश्चात् प्रणीताविमोकः। तज्जलेन मार्जनम्।
ॐ आपः शिवाः शिवतमाः शान्ताः
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

परिस्तरणान्युत्तरे विसृजेत्। ततः स्वकीयाचार्याय गां ददाति ब्राह्मणश्चेद्वरः।[६७२] अत्र ग्रामवचनं[६७३] च कुर्यर्विवाहस्मशानयोरित्येनं यथाकुलाचारं तिलककरणादिकं कुर्यात्। ततोऽस्तमिते ध्रुवं दर्शयति दिवा विवाहश्चेद्रात्रौ चेत्तदा वरदानानन्तरं ध्रुवमसीति। तत्र वरो वधूं प्रेषयति ध्रुवमीक्षस्वेति।

## २६/ ३७. अथ ध्रुवदर्शनम्।

ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि।
मह्यं त्वादाद् बृहस्पतिर्मया पत्या प्रजावती
सञ्जीव शरदः शतम्।। पा०गृ०सू० ०१/०८/१९।।[६७४]

सा यदि ध्रुवं न पश्येत्तदा पश्यामीत्येव ब्रूयात्।

---

६७१

६७२ गौब्राह्मणस्य वरः। ग्रामोराजन्यस्य। अश्वो वैस्यश्च। (ब्र०स०पृ. ४४४)

६७३ ग्रामशब्देन स्वकुलवृद्धाः स्त्रिय इति गदाधरः। ग्रामवचनं लोकवचनमिति भतृयज्ञः। (ब्र०स०पृ. ४४४)

६७४ अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
ध्रुवत्वं ध्रवकर्तारं ध्रुवदेव महाबलम्। अचलं कुरु कल्याणं ध्रुवदेव नमोऽस्तुते।।

**२६/ ३८. अथ दम्पत्योर्नियमाः।**

ततो विवाहदिनमारभ्य दम्पत्योर्नियमाः।

(०१) त्रिरात्रमक्षारलवणाशिनौ स्याताम्। (०२) त्रिरात्रमधः शयीयाताम्। (०३) संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः।

**२६/ ३९. अथ ब्राह्मणभोजनसङ्कल्पः।**

हस्ते जलमादाय। कृतस्य विवाहसंस्काराख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं यथासङ्ख्याकान् ब्राह्मणान् बटुकान् कुमारिकाः सुवासिनीश्च यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम् न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। कृतस्य विवाहाख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं आचार्यादिनानानामगोत्रेभ्यो ब्राह्मणेभ्यो गन्धादिभिः सम्पूज्य यथोत्साहं दक्षिणां दास्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

**२६/ ४०. अथाऽऽशीर्वादाः।**

ॐ शतञ्जीवशरदो वर्धमानः शतंहेमन्ताच्छतमुवसन्तान्।
शतमिन्द्राग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः।।[६७५]
ॐ शतञ्जीवशरदो वर्धमानऽइत्यपिनि गमोभवति शतमिति शतंदीर्घमायुर्मरुते मां वर्धयन्ति।
शतमेवशतमात्मानं भवति। शतमितिशतं दीर्घमायुः।। ब्रा० ।।
ॐ शतमिन्नु शरदोऽअन्ति देवायत्रानश्च्चक्क्रा जरसन्तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नोमध्यारीरिषतायुर्गन्तोः।। शु०य० २५/२२।।
ॐ विश्वानिदेवसवितर्दुरितानि परासुव।
यद्भद्रन्तन्नऽआसुव।। शु०य० ३०/०३।।

---

[६७५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवति प्रसन्ना।। स०श०० ४/१५।।
धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृति करोति।
स्वर्गं प्रयाति च ततो भवतिप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन।। स०श० ०४/१६।।
दुर्गे स्मृता हरसि भितिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता।। स०श० ०४/१७।।

लम्बोदर नमस्तुभ्यं सततं मोदक प्रियम्।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा।। १६५ ।। ब्र०स०पृ. ३१९।।

यथाशक्त्या विवाहसंस्कारविधेः परिपूर्णताऽस्तु। अस्तु परिपूर्णता।

**।। इति विवाहाङ्गविधिः।।**

## २६/४१. अथ चतुर्थीकर्मप्रयोगः।

पारस्कराचार्यः पारस्करगृह्यसूत्रे (०१/११/०१) "चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमा-धाय।।" इति चतुर्थीकर्मविषयेकं सार्वत्रिकं नियमं विदधाति।

विवाहदिवसाच्चतुर्थ्यामपररात्रे[६७६] भार्यया सह मङ्गलं स्नात्वाऽहतवाससी परिधाय धृतमङ्गल-तिलकः शुभासने वर उपविशति। तत्र दक्षिणतो वधूः। ततो वरः आचमनं प्राणायामं सङ्कल्पं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कारसामान्यविधि(०१/-)-प्रकरणात् गृहीतव्या। तद्यथा शिखाबन्धनम् (०१/०१), कुशपवित्रधारणम् (०१/०२), आचमनम् (०१/०३), प्राणायामः (०१/०४), तिलककरणम् (०१/०५), आचारात् कङ्कणबन्धनम् (०१/०६), शान्तिपाठः (०१/०७), भद्रसूक्तम् (०१/०८), देवतानमस्कारः (०१/०९), प्रायश्चित्तसङ्कल्पः (०१/१०), धेनुपूजनम् (०१/११)।

## २६/४२. अथ सङ्कल्पः।

वरो हस्ते जलामादाय। देशकालौ सङ्कीर्त्य। अद्येत्यादि शुभपुण्यतिथौ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं विवाहाङ्गभूतं चतुर्थीकर्माऽहं करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्थण्डिले पञ्चभूसंस्कारपूर्वक-मग्निस्थापनं च करिष्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

तत्र गणपतिपूजनपूर्वकं गृहाभ्यन्तरतः स्थण्डिले पञ्चभूसंस्कारपूर्वकं साक्षीनामानमग्नेः स्थापनं च कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कारसामान्यविधि गृहीतव्या। तद्यथा गणपतिपूजनम् (०२/-) आचार्यादिऋत्विग्वरणे (०७/-) पुनर्दिग्रक्षणम् (०७/०९), पञ्चगव्यकरणम्

---

[६७६] विवाहमारभ्य चतुर्थेऽहनि अपररात्रे इत्यर्थः।

(०७/१०), भूमि प्रार्थना (०७/११), भूमिकूर्मानन्तपूजनम् (०७/१२), देवताऽऽवाहनम् (०७/१३), स्थण्डिल(कुण्ड)पूजनपूर्वकमग्निस्थापने (०८/-) सङ्कल्पः (०८/०१), देवानावाहनम् (०८/०२), पञ्चभूसंस्काराः (०८/०३), अग्निस्थापनम् (०८/०४), अग्न्यावाहनम् (०८/०५), प्रतिष्ठापनम् (०८/०६), अग्निपूजनम्।

ततोऽग्नेदक्षिणतः ब्रह्मासनाद्यासादनं कृत्वा अग्नेरुत्तरतः उदककुम्भं स्थापयेत्।

ॐ भूभुवः स्वः उदककुम्भाधिष्ठातृदेवताभ्यो नमः इति षोडशोपचारैः पूजनं कुर्यात्।

अतः परमावश्यकत्वेन करणीया विधयः तृतीयसंस्कृतेः सर्वसंस्कारसामान्यविधि गृहीतव्या। तद्यथा पुण्याहवाचनप्रयोगे (०३/-) वरुणावाहन् (०३/०१), प्रतिष्ठापनम् (०३/०२), वरुणपूजनम्, कुशकण्डिकायां (१०/-) पात्रासादनम् (१०/०४), कुशकण्डिका (१०/०५)।

## २६/४३. अथाऽऽघाराज्यहोमः।

स्थानोपविष्टः दक्षिणं जान्वाच्यकुशैर्ब्रह्मणाऽन्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयेत्।

१. मनसा - ॐ प्रजापतये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं प्रजापतये न मम।
२. अग्नेर्दक्षिण प्रदेशे उत्तराघारमाघारयेत्। ॐ इन्द्राय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत् । इदमिन्द्राय न मम।। इत्याघारौ। इत्येतौ पूर्वोत्तरावाघारौ।
३. अग्नेरुत्तरार्धपुर्वार्द्धे- ॐ अग्नये स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदमग्नये न मम।
४. अग्नेर्दक्षिणार्द्धपूर्वार्द्धे- ॐ सोमाय स्वाहा। (प्रोक्षण्यां संस्रवप्रक्षेपः)
यजमानो वदेत्। इदं सोमाय न मम। इत्याज्यभागौ। इत्येतौ आज्यभागौ त्यागः।

## २६/४४. अथाऽग्निपूजनम्।

हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा।

ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मत् जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।। शु०य० ०५/३६।।[६७७]

[६७७] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिकौ मन्त्रौ गृह्येते।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समिद्धं विश्वतोमुखम्।। या०र०पृ. ४६।।
यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः। तथा त्वम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम।। ब्र०स०पृ. ३३९।।

ॐभूर्भुवःस्वः चतुर्थीकर्मणी साक्षीनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थण्डिले अग्निं समर्पयेत्।

**२६/४५. अथ पञ्चाहुतिः।**

ततो वर आज्येन पञ्चाज्याहुतिर्जुहुयात्। उदपात्रे सर्वासां त्यागः। यथा–

ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्यै पतिघ्नी तनुस्तामस्यै नाशय स्वाहा।।[६७८]
इदमग्नये न मम।
ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्यै प्रजाघ्नी तनुस्तामस्यै नाशय स्वाहा।।
इदं वायवे न मम।
ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्यै पशूघ्नी तनुस्तामस्यै नाशय स्वाहा।।
इदं सूर्याय न मम।
ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्यै गृहघ्नी तनुस्तामस्यै नाशय स्वाहा।।
इदं चन्द्रमसे न मम।
ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम
उपधावामि यास्यै यशोघ्नी तनुस्तामस्यै नाशय स्वाहा।। पा०गृ०सू० ०१/११/०२।।
इदं गन्धर्वाय न मम।

ततः स्थालिपाकेन एकामाहुतिं जुहुयात्। चरुमभिघार्य।

ॐ प्रजापते स्वाहा। इदं प्रजापये न मम।
ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्ने स्विष्टकृते न मम।

ततो आज्येन भूराद्यानवाहुतयः।
ततः ब्रह्मणाऽन्वारब्धः–

---

[६७८] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
०१. अग्नये प्रायश्चित्ताय स्वाहा। इदमग्नये न मम। ०२. वायवे प्रायश्चित्ताय स्वाहा। इदं वायवे न मम।
०३. सूर्याय प्रायश्चित्ताय स्वाहा। इदं सूर्याय न मम। ०४. चन्द्राय प्रायश्चित्ताय स्वाहा। इदं चन्द्राय न मम।
०५. गन्धर्वाय प्रायश्चित्ताय स्वाहा। इदं गन्धर्वाय न मम। (कर्म०पृ. ३०३)

१.ॐ भूः स्वाहा।[६७९] इदमग्नये न मम।

२.ॐ भुवः स्वाहा। इदं वायवे न मम।

३.ॐ स्वः स्वाहा। इदं सूर्याय न मम।

४. ॐ त्वन्नोऽअग्ने वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः।

यजिष्ठोवह्नितमः शोशुचानोविश्वाद्द्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा।। शु०य० २१/०३।।

इदमग्निवरुणाभ्यां न मम।

५. ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।

अवयक्ष्वनोवरुणरराणोवीहिमृडीकं सुहवोनऽएधिस्वाहा।। शु०य० २१/०४।।

इदमग्निवरुणाभ्यां न मम।

६. ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्चसत्वमित्त्वमयाऽअसि।

अयानोयज्ञवहास्ययानोधेहिभेषजं स्वाहा।।

इदमग्नये अयसे न मम।

७. ॐ येते शतं वरुणये सहस्रंयज्ञियाः पाशावितताममहान्तः।

तेभिर्नोऽ अद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा।।

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।

८. ॐ उदुत्तमं वरुणपाशमस्मदवाधमविमध्यमंश्रथाय।

अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा।। शु०य० १२/१२।।

इदं वरुणायाऽऽदित्यायाऽदितये च न मम।

मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।

९. ॐ प्रजापतये स्वाहा।

इदं प्रजापतये न मम।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। उदकोपस्पर्शः।

---

[६७९] अत्र ब्राह्मणेतरहितानां कृते पौराणिका मन्त्रा गृह्यन्ते।

१. अग्नये नमः स्वाहा। इदम् अग्नये न मम।

२. वायवे नमः स्वाहा। इदं वायवे न मम।।

३. सूर्याय नमः स्वाहा। इदं सूर्याय न मम।

४. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।

५. अग्निवरुणाभ्यां नमः स्वाहा। इदमग्निवरुणाभ्यां न मम।

६. अग्नये अयसे नमः स्वाहा। इदमग्नये अयसे न मम।

७. वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च नमः स्वाहा।

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।

८. वरुणायाऽऽदित्यायाऽदितये नमः स्वाहा। इदं वरुणायाऽऽदित्याऽदितये च न मम।

मनसा प्रजापतये इत्युच्चार्यमाणः आचार्यः।

९. प्रजापतये नमः स्वाहा। इदं प्रजापतये न मम।

संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्र प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानम्। प्रणीतोदकेन सङ्कल्पः। कृतस्य चतुर्थीकर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे। तत आचार्याय पूर्णपात्रं तुभ्यमहं सम्प्रददे।

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ।। पा०गृ०सू० ०३/१५/२१।।
अग्नेः पश्चिमे प्रणीताविमोकः। तज्जलेन मार्जनम्।
ॐ आपः शिवाः शिवतमाः शान्ताः
शान्ततमास्तास्ते कृण्वन्तु भेषजम्।। पा०गृ०सू० ०१/०८/०५।।

तत उदपात्रजलेन वरो वधूमूर्ध्न्यभिषिञ्चेत्।

ॐ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं
तत एनां करोमि सा जीर्य त्वं मया सहासौ।। पा०गृ०सू० ०१/११/०४।। [६८०]

असौस्थाने नामग्रहणं करोति वरः। अमुकी देवी इति।

## २६/४६. अथ चरुप्राशनम्। (कंसारभक्षणम्।)

अथैनां वधूं स्थालीपाकं (कंसार) वरः प्राशयति। कन्या मात्रा चतुर्वारं परिवेषणं कार्यम्। ततो वरः एनां प्राशयति।

०१. ॐ प्राणैस्ते प्राणान्संदधामि।[६८१]
०२. ॐ अस्थिभिरस्थीनि संदधामि।
०३. ॐ मांसैर्मांसं संदधामि।
०४. ॐ त्वाचा त्वचं संदधामि।

अत्र वधूः शुद्ध्यर्थमाचामेत्। अत्र समाचारात् वधूः वरमपि[६८२] पूर्वोक्तैर्मन्त्रैः प्राशयेत्।

---

[६८०] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
अग्निवायु सूर्यचन्द्र गन्धर्व प्रजापतिभ्यो नमः।। अमुक मम व्रतानुसारिणी भव। (कर्म०पृ. ३०४)

[६८१] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
प्राणेभ्यो नमः। अस्थिभ्यो नमः। मांसभ्यो नमः। त्वचे नमः।

[६८२] अत्र स्त्रिया सह भोजनेनऽपि न दोष इत्याह। हेमाद्रिः–
एकयानसमारोह एकपात्रे च भोजनम्। विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक्।।
अन्यथा दोषमाप्नोति पञ्चाचान्द्रायणं चरेत्।। ब्र०स००पृ. ४४८।।

तत आचार्यो हस्ते अक्षतान् गृहीत्वा।

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञं समिमं दधातु ।
व्विश्श्वे देवासऽइह मादयन्ता मोऽ३म्प्रतिष्ठ ।। शु०य० ०२/१३।।[६८३]

उभयोर्वधूवरयोः सुप्रतिष्ठितमस्तु। इत्युक्त्वा तयोः शिरसि अक्षतान् क्षिपेत्।

ततो वरः वधूदक्षिणस्कन्धोपरि हस्तं नीत्वा पठेत्।

ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्।
वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं
जीवेम शरदः शतं शृणुयाम शरदः शतम्।। पा०गृ०सू० ०१/११/०९।।[६८४]

## २६/४७. अथ ब्राह्मणभोजनसङ्कल्पः।

हस्ते जलमादाय। कृतस्य चतुर्थीकर्मणः साङ्गतासिद्ध्यर्थं यथासङ्ख्याकान् ब्राह्मणान् बटुकान् कुमारिकाः सुवासिनीश्च यथाकाले यथासम्पन्नेनाऽन्नेनाऽहं भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम् न मम। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

पुनर्जलमादाय। कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं आचार्यादिनानानामगोत्रेभ्यो ब्राह्मणेभ्यो गन्धादिभिः सम्पूज्य यथोत्साहं दक्षिणां दास्ये। इत्युक्त्वा जलपात्रे जलं क्षिपेत्।

## २६/४८. अथाऽऽशीर्वादाः।

ॐ शतञ्जीवशरदो वर्धमानः शतंहेमन्ताच्छतमुवसन्तान्।
शतमिन्द्राग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः।।[६८५]

---

[६८३] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिको मन्त्रो गृह्यते।
प्रतिष्ठा सर्वदेवानां मीत्रावरुण निर्मिता। प्रतिष्ठान्ते करोम्यऽत्र मण्डले दैवतैः सह।। या०र०पृ. ०७।।

[६८४] अत्र यज्ञोपवीतरहितानां कृते पौराणिको मन्त्रो गृह्यते।

[६८५] अत्र ब्राह्मणेतरवर्णानां कृते पौराणिका मन्त्रा गृह्यन्ते।
ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवति प्रसन्ना।। स०श००४/१५।।
धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृति करोति।
स्वर्गं प्रयाति च ततो भवतिप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन।। स०श० ०४/१६।।
दुर्गे स्मृता हरसि भितिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।

ॐ शतञ्जीवशरदो वर्धमानऽइत्यपिनि गमोभवति शतमिति शतंदीर्घमायुर्मरुते मां वर्धयन्ति। शतमेवशतमात्मानं भवति। शतमितिशतं दीर्घमायु:।। ब्रा० ।।

ॐ शतमिन्नु शरदोऽअन्ति देवायत्रानश्च्चक्क्रा जरसन्तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नोमध्यारीरिषतायुर्गन्तो:।। शु०य० २५/२२।।

ॐ विश्वानिदेवसवितर्दुरितानि परासुव।
यद्भद्रन्तन्नऽआसुव।। शु०य० ३०/०३।।

ततो वध्वा सह वरो गृहान्तगत्वा कुलदेव्या: पूजनं कुर्यात्। पूज्यान् वृद्धांश्च नमस्कृत्य यथा सुखं विहरेत्।
इति चतुर्थीकर्म:।

**।। इति विवाहसंस्कारप्रयोग:।।**[६८६]

**उपसंहार:।**

अस्या: पञ्चमीसंस्कृत्या: प्रागुपनयनान्ता: संस्कारा: विवेचितास्तदनु ऋग्वेदादिव्रतादारभ्य विवाहपर्यन्तानां संस्काराणां सम्पूर्णो विधि: प्रस्थापित: यद्यपि पुन: पुन: पठ्यमानानां पूजनकर्माङ्गानां पुनरुक्तिदोषमपनेतुं तत्र तत्र कस्माद्विधे: किं किं कर्म कियन्मानं स्वीकर्तव्यमिति क्रमाङ्कपूर्वकं संक्षेपेण विन्यस्तं वर्त्तते। यत्र यत्र संस्कारभास्करकाराणां मतं भिन्नता च प्रदर्शिते स्त:। अनेन प्रयासेन रसिकानां सहृदयानां जिज्ञासुपुरोहितानां कुलाचार्याणां तुष्टिर्भवेदिति। किं बहुना?

---

दारिद्र्यद:खभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता।। स०श० ०४/१७।।

[६८६] ब्रह्मनित्यसमुच्चयकारा एतदनन्तरं विवाहहोमकाले कन्यायामृतुमत्यां युञ्जानहोमविधि: कन्यागृहे भोजनविचारोऽर्कविवाह: कुम्भविवाहो रजोदर्शने च श्रीशान्तिर्भुवनेश्वरीशान्तिर्वेति विषयान् प्रस्तुवन्ति।

# षष्ठी संस्कृतिः ।

## संस्कारविधिनियमानां सामाजिकरीतीनां च समीक्षा।

पृष्ठानि ३६३ – ३७५।

## षष्ठी संस्कृतिः।

## संस्कारविधिनियमानां सामाजिकरीतीनां च समीक्षा।

अधुनाऽस्यां संस्कृत्याम् संस्कारभास्करे ऋषिभट्टाः विधिविषयकाँश्च नियमान् सरलतयाऽत्यन्त स्पष्टतया च प्रस्तुवन्ति तस्याः प्रस्तुतेः तेषां विधिनां तन्नियमानां च चर्चा प्रस्तूयते। प्रायः सर्वास्वाधु–निकेषु प्रकाशितेषु पुस्तकेषु वाक्यार्धानां प्रयोगः प्रचुरतया प्रचलितो दृश्यते। तत्र यजमानवृतौ नवीनागन्तुकानां याज्ञिकानां ऋत्विजां च विधिकार्यं न केवलं कठिनमपि तु कठिनतरं भवति। केषांचिद् याज्ञिकानां तु समस्या घोरा जायते यतस्ते वाक्यार्धान्येव (कदाचिन्मन्त्रार्धान्येव) पठन्ति। तेषामुपस्थितौ अधिकांशा विद्वांशो जनास्तेषामुपहासमपि कुर्वन्ति। तत्र ऋत्विजां को दोषः ? वस्तुतस्तु तादृशानां वाक्यार्धं वा मन्त्रार्धं वा प्रकाशितं कुर्वताम् लेखकानामेव कारणात् समाजे ब्राह्मणवर्गस्य विशेषतो याज्ञिकानां वा ऋत्विजानां वा प्रतिष्ठा दोलायमाना दृश्यते। शुद्धाः प्रखराः प्राज्ञा लेखकास्ते ये नवागन्तुकान् स्वपुस्तकैः सत्यं मार्गं प्रदर्शयन्ति।

संस्कारभास्करकाराः स्वकीय ग्रन्थस्य सारल्येन स्पष्टलेखनेन च विद्वन्मुर्धन्या मन्तव्याः स्वीकर्तव्याश्च।

अग्नेरुत्तरभागे प्रजापतये आहुतिः कथं देयेति लिखन्ति।[६८७] यन्मृगीमुद्रया घृत स्रुवेणाऽऽज्यमादाय प्रजापतिं मनसा ध्यात्वा स्वाहाकारमुच्चैः इदं प्रजापतये उपांशु न ममेत्युच्चैरुच्चारयेत्। अत्र उपांशु इति तूष्णीं मनसा वा। उच्चैरिति सर्वश्रवणयोग्यमित्यर्थः।

वाञ्छितार्थफलावाप्त्यै पूजितोसि सुरासुरैः।
निर्विघ्नै क्रतु संसिद्ध्यै त्वामहं गणपं वृणे।।
कर्मणामुपदेष्टारं सर्वकर्म विदुत्तमम्।
कर्मिणं वेद तत्त्वज्ञं सदस्यं त्वामहं वृणे।।
यज्ञादि कर्म कार्येषु ऋत्विक् शक्रमखे यथा।
तथा यज्ञादि कर्मेऽस्मिन्नृत्विक्त्वं मे मखे भव।।
ऋग्वेदः पद्मपत्राक्षो गायत्र्यः सोमदैवतः।
अत्रिगोत्रस्तु विप्रेन्द्र ॠत्विक्त्वं मे मखे भव।।
कातराक्षो यजुर्वेदस्त्रैष्टुभो ब्रह्मदैवतः।
भारद्वाजस्तु विप्रेन्द्र ॠत्विक्त्वं मे मखे भव।।
सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः।

---

[६८७] संस्कारभास्करः। पृ. ७९।

काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव।।
बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः।
वैखानस कुलोत्पन्नो ऋत्विक्त्वं मे मखे भव।।
भगवन्मूर्ति सर्वज्ञ सर्वधर्मभृताम्वर
वितते मम यज्ञेस्मिञ्जपार्थे त्वामहं वृणे।। पृ. ५१-५२।।

वेदिप्रमाणमपि स्पष्टं लिखितं वर्तते यत् ततो यजमान हस्त प्रमाणं चतुरस्रं चतुरङ्गुलोन्नतं स्थण्डिलं विरच्य।

स्विष्टकृतो होमस्य प्रागन्वाधानविधिरस्ति। किन्तु यजुर्वेदीयानां सूत्रभाष्यग्रन्थेषु तस्याऽप्राप्तिः। संस्कारभास्करकाराः अन्वाधानविधेरनुल्लेखं स्पष्टं कथयन्तो गोभिलसूत्रं तद्भाष्यकारौ नाम्ना निर्दिश्य स्मार्ते कर्मण्यनन्वाधानस्याऽभावः। तथापि प्रयोगरत्ने स्मार्तोल्लासाख्यग्रन्थे स्मार्तगङ्गाधर्यां च श्रौतान्वाधानस्य स्मार्तकर्मणि स्वीकृतत्वात् प्रचुरतर शिष्टाचारप्राप्तत्वात् स्मार्तकर्मण्यनन्वाधानं स्वीकुर्वन्ति प्रतिपादयन्ति च। (पृ. ७७)

गुर्जरप्रदेशेऽपि स्मार्तकर्मण्यनन्वाधानस्य समिधोभ्याधानादेः प्राप्तिः स्वीक्रियते।

आघारहोमाज्याहुति दानानन्तरं ग्रहहोमपूर्वं द्रव्यत्याग विधौ यजमानस्थाने आचार्यो वा वर्णित ब्राह्मणो वा समिच्चरुतिलाज्यादि द्रव्यं जुहोत्येतत् संस्कारभास्करकाराणां स्पष्टं निर्दिशन्ति यत्- ततो यजमानेनद्रव्यत्यागः कार्यः। यथाकालं प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात्सर्वमेवहविर्जातं देवताश्चमनसाध्यात्वाइदंयथादैवतमस्तुनममेति एवं रूपं त्यागमुच्चरयेद्यजमानः।(पृ. ८०)

गुर्जरप्रदेशे तु आचार्यो यजमानमुखेन इदं सम्पादितं समिच्चरुतिलाज्यादि हवनीय द्रव्यं या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न ममेति सङ्कल्पमुच्चारयति।

ग्रहशान्तिमखस्य पूर्णाहुतिवधौ वसोर्धाराहोमे सप्त ते अग्ने (शु.य. ), शुक्रज्योतीश्च (शु.य. ) चेत्यादि दश मन्त्राणां पाठानान्तरं अथातो वसोर्धारा (श.ब्रा. ), यद्देवैताम्वसोर्धारा (श.ब्रा. ) चेत्यारभ्य यत्कर्मणात्यरीरिचम् (श.ब्रा ) इत्यन्ता ब्राह्मणमन्त्राः पठनीयत्वेन विहितः। बहूनां याज्ञिकानां मते केवलं यत्कर्मणात्यरीरिचम् (श.ब्रा. ) इति ब्राह्मणमन्त्रस्य पाठः प्रचलितः।[६८८]

धर्मशास्त्रानुसारेण गर्भरक्षणं सुप्रजायै भवतीति सुनिश्चितमत एव संस्कारभास्करकाराः गर्भिणीपतिनियमान् (निषेधरूपान्) संगृहणन्ति। तद्यथा स्मृतिचिन्तामणौ

पुंसो भार्या गर्भिणी यस्य चेत्

[६८८] महाविष्णुयागमहारुद्रयागातिरुद्रशतचण्डियागादिषुमूर्तिप्राणप्रतिष्ठाप्रयोगेषु चेमे त्रयोदश ब्राह्मणमन्त्रा अनिवार्यतया समग्रा एव पठनीयाः।

स्यात्सुनोचौलं क्षौरकर्मात्मनश्च।
गेहारम्भस्तम्भसं स्थापनं च
वार्धिस्नानं नैवकुर्याच्च यात्राम्।। पृ. १०५।।

दक्षवाक्यं च

ऋतुद्वयेव्यतिते तु नकुर्यान्मौञ्जिबन्धनम्।
अग्न्याधानं गयाश्राद्धं वपनं च विवर्जयेत्।। पृ. १०५।।

सीमन्तोन्नयनसंस्कारविधौ विशेषतो गर्भस्थ शिशुरक्षणं प्राथम्यं भजते तदङ्गविधित्वेन च गर्भिण्या तिलतैलभक्षणमुदरे च तल्लेपनमिति दर्शयन्त: संस्कारभास्करकारा लिखन्ति।

हिमवत्युत्तरे पार्श्वे शबरीनाम यक्षिणी।
नूपुरशब्देन विशल्या स्यात्तु गर्भिणी स्वाहा।। पृ. १११।।

इति लेपयेत्। यन्त्रप्रकाशात् सुखप्रसवयन्त्रमपि समुद्धृतम्।

गजाग्निवेदा उडुराट्शराङ्का रसर्षिपक्षा इति हि क्रमेण।
लिखेत्प्रसूते: समये गृहे वै सुखेन नार्य:प्रसवन्ति शीघ्रम्।। पृ. १११।।

इति गर्भिण्यानार्यादृष्टिगोचरेदेशेसमचतुरस्रं संसाध्य तस्य समान्नवकोष्ठकान् कृत्वा ईशानोत्तरवायुकोष्ठेषु अष्टमतृतीयचतुर्थानङ्कान् क्रमेण लिखित्वा पूर्वमध्यमपश्चिमकोष्ठेषु प्रथमपञ्चमनवमाङ्कान् क्रमेण विलिख्य आग्नेयदक्षिणनैर्ऋतकोष्ठेषु षष्ठसप्तमद्वितीयाङ्कान् क्रमेण विलिखेत्।

| | | |
|---|---|---|
| ८ | १ | ६ |
| ३ | ५ | ७ |
| ४ | ९ | २ |

इदं यन्त्रं प्रसूतिसमये पूर्वं सूतिकागृहे लेखनीयमेतद्दर्शनेन सुखेन शीघ्रं नार्य: प्रसवन्ति।

जातकर्मसंस्कारविधावन्यासु विश्वप्रजासु सर्वसामान्य विधानानि गृह्यन्ते। किन्तु वैदिकधर्मानुसारेण जातकर्मसंस्कारे जातस्य शिशो: मेधाजननम् आयुष्करणम् स्तनपानविधि: बालारिष्टशमनं चेत्यादयो विधय पार्यन्ते। अत्र च बालानां रोदानातिशयनानिवारणं रोगनिवारणं च संगृह्येते। एतेन जातकर्मसंस्कारस्य समग्रता बहुफलता च सिद्ध्यत:।

अन्नप्राशनसंस्कारविधौ शिशुं षड्रसप्राशन समये दत्तकविधि (पृ. १३०-१३३) समग्रतया विवेचयन्ति। अत्र कुमारदत्तकविषय: कन्यादत्तकविषय: स्त्रिशूद्रसन्ततिविषयको विविधसङ्कल्पाश्च यथान्यायं वर्णिता: सन्ति।

जातस्य शिशो: पारस्कराचार्य: पारस्करगृह्यसूत्रे (०२/०१/०१-०२,०४) "सांवत्सरिकस्य चूडाकरणम्। तृतीये वाऽप्रतिहते। यथामङ्गलं वा सर्वेषाम्।।" वा वर्षे चौलविधे: चूडाकरणस्य वा कर्म यदा सम्पाद्यते तदा वैदिकसंस्कृत्यनुसारेण वर्धापनविधि: प्रचलितोऽस्ति। अयमेवाऽऽधुनिककाले मार्कण्डेयपूजनप्रयोग इति नाम्ना प्रसिद्ध:। यद्यपि अन्नप्राशनान्ते जन्मन: तिथौ प्रतिमासं ततश्च प्रतिवर्षं सम्पादनीय इति ज्ञातेऽपि संस्कारभास्करकारा अस्य चर्चां चौलसंस्कारान्तर्गतां कुर्वन्ति।

यदा शिशुर्बालो भूत्वा ब्रह्मचर्यं साधयितु क्षमो भवति तदा प्रभृति तस्य बालस्योपनयनयोग्यता यज्ञोपवीतधारणसामर्थ्यं वा प्रचलति। उपनयनसंस्कारमुहूर्तेषु बालस्य जन्मकुण्डल्यां चन्द्रशुक्रसूर्याणां बलाबलं स्थितिश्चावश्यतया प्रेक्षणीये। तत्रापि नेष्टचन्द्रस्याष्टमशुक्रस्य निरंशसूर्यस्य च स्थितयो दृश्यन्ते। यद्यपि गुरुबलमुपनयनसंस्कारे प्रेक्ष्यते तथापि तदभावे बृहस्पतिशान्तिरपरनाम गुरुशान्तिर्विधीयते। एतदर्थं संस्कारभास्करकारा: नारदोक्तिं प्रस्तौति। तद्यथा

बालस्यबलहीनोपि शान्त्याजीवो बलप्रद:।
यथोक्तवत्सरेकार्यमनुक्तेनोपनायनम्।। पृ. १५१।।

अत्रैवोपेनयनसंस्कारविधौ चतुर्थाष्टगुरोरदुष्टत्वं निर्दोषनक्षत्राणि साधुयोगा: करणानि दिनमानं ग्रहणवर्ज्यदिनं सूतकप्राप्तिरधिकारनिमित्तं च प्रायश्चित्त्यमित्यादि विषया विवेचिता:। तदङ्गतयाऽजिनं मेखला यज्ञोपवीतसूत्रविशेषे दण्डश्चेत्युपनयन संभाराणां विवरणमपि कृतमस्ति।

वेदव्रतसंस्कारारम्भे प्राचीनपरिपाटीमनुसृत्य ऋग्वेदायारभ्य व्रतारम्भो भवेदिति प्राप्यते तथापि संस्कारभास्करकारा वेदव्रतारम्भस्य सङ्कल्पे – वेदव्रतचतुष्टयारम्भकर्मणां स्वशाखापूर्वकवेदारम्भमहं करिष्ये (पृ. १८७) - इति स्पष्टं सूचयन्ति। अत: परिपाटीद्वयं प्रचलिते स्तो यद् ऋग्वेदादारभ्य ऋग्यजुस्सामाथर्ववेदानामध्ययनं स्वशाखानुसारेण तत्तद्वेदारम्भो वा स्वीक्रियते। संस्कारभास्करकारै: शुक्लयजुर्वेद: ऋग्वेद: सामवेदोथर्ववेदश्चेति (पृ. १८७) क्रमो गृहीत:।

संस्कारभास्करकाराणां सर्वतन्त्रस्वतन्त्रबुद्धिमतां प्रखरपाण्डित्यं निर्बाधमतित्वं च बहुषु स्थलेषु दृष्टिपथमायान्ति। तत्राप्युपनयनसंस्काराविधिचर्चायां स्त्रीणां यज्ञोपवीतधारणं शास्त्रदृष्ट्या न केवलं नेष्टमपि तु नावश्कमिति स्पष्टं समुदाहरन्त: ऋषिभट्टमहोदया विस्तृतां चर्चां कुर्वन्ति। अष्टमेवर्षे ब्राह्मणमुपनयेदित्याश्वलायनवचनमुपक्रम्य व्याख्याकारस्य हरदत्तस्य कुमारमिति पदं स्वीकर्तव्यं न तु कुमारीमिति। यत: शास्त्रकाराणां विशेषतो भगवतो मनोरेवेदृशी आज्ञावर्त्तते साऽपि प्रदत्ता। यथा

वैवाहिको विधिः स्त्रीणांमौपनायनिकः स्मृतः।
पतिसेवा गुरौ वासो गृहस्थाग्निपरिक्रिया।। ०२/६७।।

अत्रेदमिदमवश्यं स्पष्टीकर्तव्यं यद् गुर्जरमहाराष्ट्रराजस्थानादिराज्येषु केचन स्वयं पण्डितमन्यमाना अन्धेनैव नीयमाना यथान्धाः सम्प्रदायाचार्याः शास्त्राज्ञां नाऽनुमन्यते स्त्रीणां च यज्ञोपवीतधारणमनुमन्यन्ते। यद्यपि वैदिककाले तदनन्तरकालेऽपि 'पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते' इति शास्त्रोक्तिवर्त्तत तथापि कलियुगे स्त्रीणां यज्ञोपवीतधारणेऽनधिकार इति स्पष्टतया सूचयन्तः संस्कारभास्करकाराः शास्त्राज्ञामेव सुदृढीकुर्वन्ति।

भद्रसूक्ते संस्कारभास्करकाराः निम्नलिखितौ मन्त्रौ समावेशयन्ति।

ॐ तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः।
नाकङ्गृभ्णानाः सुकृतस्य लोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः।। शु०य० १५/५०।।
ॐ आयुष्यं व्वर्चस्यं रायस्पोषमौद्भिदम्।
इदं हिरण्यं व्वर्चस्वज्जैत्त्राया विशतादुमाम्।। शु०य० ३४/५०।।

वरुणावाहनानन्तरं कलशाभिमन्त्रणविधौ

अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः।
गायत्री चात्र सावित्री शान्तिः पुष्टिकरी तथा।।

इति मन्त्रं कथं न गृह्णन्तीति। इति प्रकाशकस्य दोषो ज्ञायते।

तथा च

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर।।

इत्यपि न दृश्यते।

पूजाविधौ पुण्याहवाचनान्तिमविधावभिषेकप्रसङ्गे प्रायः सर्वत्र यज्ञोपवीतरहितानां कृते सुरास्त्वा०, प्रद्युम्नाश्च०, वरुणः पवनः, कीर्तिर्लक्ष्मी०, एतास्त्वा०, ग्रहास्त्वामभि०, ऋषयः मुनयः, अस्त्राणि सर्व०, सरितः सागराः, सहस्राक्षम्०, भगं ते वरुणः, यत्ते केशेषु, सर्वेऽत्र सुखिन इति त्रयोदशमन्त्राः पठ्यन्ते। संस्कारभास्करकारा आवश्यकतानुसारेण पौराणिकमन्त्रान् गृह्णन्तोऽप्येतान् मन्त्रान् न पठन्ति।

मातृकापूजनविधौ मत्स्याद्या: सप्त जलमातरो[६८९] ब्राह्मयाद्या: सप्त स्थलमातरो[६९०] जयन्ताद्या: पञ्च द्वारमातर:[६९१] कीर्तिलक्ष्म्याद्याश्च गृहमातर:[६९२] आवाह्यन्ते पूज्यन्ते च गुर्जरप्रदेशे तु एता: न प्रचलिता:।

गुर्जरप्रदेशे चौलविधे: पूर्वमेव कर्णवेध: वर्धापनम् अक्षरारम्भश्चेति विधिकर्माणि प्रचलितानि सन्त्यत एव नैमित्तिककर्मप्रकाशकर्मकौशलेतिप्रकाशितग्रन्थेष्वपि तादृक् क्रमो विहित:। संस्कारभास्करकारैस्तु तानि विधिकर्माणि चौलविधेरनन्तरं करणीयत्वेन विहितानि।

मातृकापूजनविधौ सगणेशगौर्यादिमातृणामावाहने निम्नलिखितौ मन्त्रौ पठ्येते।

गौरी पद्मा शचीमेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातर:।।
धृति पुष्टिस्तथा तुष्टिरात्मन: कुलदेवता।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश(षोडश)।।

(०१) गौरी (०२) पद्मा (०३) शची (०४) मेधा (०५) सावित्री (०६)विजया (०७)जया (०८) देवसेना (०९) स्वधा (१०) स्वाहा (११) मातर: (१२) लोकमातर: (१३) धृति: (१४) पुष्टि: (१५) तुष्टि: (१६) कुलदेवता चेति षोडशमातृका आवाह्यन्ते पूज्यन्ते च तासां मातृणां मातरो लोकमातर इति विशेष्यपदत्वेन स्वीकुर्वन्त: संस्कारभास्करकारा: चतुर्दशमातृका गृह्णन्ति। तानेवाऽनुसरन्तो ब्रह्मनित्यकर्मसमुच्चयकारा[६९३] मातरो लोकमातरश्चेति भिन्न पदत्वेन गृहीत्वा षोडशमातृका इति स्वीकुर्वन्ति।

अग्निस्थापनस्य पूर्वकाले पञ्चगव्यकरणविधौ कांस्यपात्रे गोमयक्षेपणमन्त्ररूपेण गुर्जरप्रदेशे[६९४] मा नस्तोके तनये मा न आयुषीति पठ्यते संस्कारभास्करकारास्तु गन्धद्वारां दुराधषामिति[६९५] श्रीसूक्तस्य मन्त्रं गृह्णन्ति।

---

[६८९] मत्सीकूर्मी च वाराहि माण्डूकी मकरी तथा। ग्रहकी क्रौंचकी चैव सप्तैता जलमातर:।। सं०भा०पृ. ४४।।

[६९०] ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चतथेन्द्राणी चामुण्डा: सप्तमातर:।। सं०भा०पृ. ४५।।

[६९१] जयन्ती मङ्गला चैव पिङ्गला दक्षिणे गृहात्। आनन्दवर्धिनी वामे महाकाली च निर्गमे।।
गृहस्य दक्षिणे भागे तिस्रोलेख्यास्तु मातर:। वामभागे तथा द्वे च जयन्त्यादि क्रमेण तु।। सं०भा०पृ. ४५।।

[६९२] कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टि: श्रद्धाक्रियामति:। बुद्धिर्लज्जावपु: शान्तिस्तुष्टि: कान्तिस्तुमातर:।। सं०भा०पृ. ४५।।

[६९३] केचन मातृ: लोकमातृरित्यावाहयन्ति तदुक्तम्। अत एव
ॐभूर्भुव: स्व: मातृभ्यो नम:। मातृ: आवाहयामि स्थापयामि।
ॐ भूर्भुव: स्व: लोकमातृभ्यो नम:। लोकमातृ: आवाहयामि स्थापयामि।

[६९४] ब्रह्मनित्यकर्मसमुच्चय: (पृ. ३४०)

[६९५] गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम्।।( ऋ० खिलसूक्तं १२/-)

## संस्कारभास्करोल्लिखितसामाजिकरीतयः।

प्राचीनकालाद् आरब्धा धार्मिकी विधिविधानपद्धतिः समग्रे भारतवर्षे देशेदेशे राज्येराज्ये नगरे नगरे ग्रामेग्रामे कुलेकुले कुटुम्बेकुटुम्बे च तथा ओतप्रोता जाता यथा मनुष्यस्य श्वासनिश्वासयोः जीवन वाहिनी नियमितगतिः। मनुष्यजीवनं वंशपरम्परानुगतम् अनादिकालात् प्रचलति। मनुष्यः सामाजिकः प्राणीति सर्वजनप्रसिद्धम्। समाजेऽत एव देशाचराणाम् लोकाचाराणाम् कुलाचाराणां च तारतम्येन ग्रहणं सार्वजनीनम्। एकैव वैदिकाचार परम्परा कालक्रमेण देशानुरूपेण यथाप्राप्तवस्तुनियमेन वैविध्यम् समधारयत्। ततश्च वैदिकाचाराणाम् श्रुतिस्मृतिपुराणोक्तस्वरूपं प्रचलितं जातम्। गुर्जरप्रदेशे प्राचीनकालाद्वा मध्ययुगीनकालाद्वा यत्स्वरूपेण आचाराः सम्प्राप्तास्तत्स्वरूपेण कालक्रमेण परिवर्तनं तु प्राप्ताः। तथैव महाराष्ट्रेऽपि जातमेवेति निःसंशयम्।

ख्रिस्तस्य सप्तदशशतकस्याऽन्ते सम्भूताः संस्कारभास्करकाराः ऋषिभट्टाः संस्कारभास्करग्रन्थं विरचितः। तत् समयावधिः प्रचलितानां संस्कारविषयकाणां विधिविधानानि तैः सदृग्धानि संगृह्य च प्रस्थापितानि। यद्यपि आधुनिके काले महाराष्ट्रेऽपि किञ्चित् किञ्चित् समुचितमनुचितं वा परिवर्तनम् विधिविधानेषु भवेदेव तथापि संस्कारभास्करलिखितानां संस्काराणां चर्चासु यानि यानि श्रुतिस्मृतिपुराणोक्तानि स्मृतिसंग्रहोक्तानि च विधिविधानानि सन्ति तेषां विधिविधानानां गुर्जरप्रदेशे प्रचलितेभ्यो विधिविधानेभ्यो यानि यानि विधिविधानान्यधिकानि वा न्यूनानि वा लक्षितानि तान्यत्र चर्चा पुरःसरं प्रदर्श्यन्ते समीक्ष्यन्ते च।

पूजाया यागादेश्च प्रारम्भे पुरोहितैः पठ्यमाने देवतानमस्कारविधौ सर्वत्र निम्नलिखितो मन्त्रः भण्यते।

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः।।
मङ्गलं भगवान विष्णुर्मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनं हरिः।।

अत्राऽऽयतन शब्दस्य नित्यनपुंसकलिङ्गत्वाद् बहुषः पुरोहिताः **मङ्गलायतनो हरि**रिति घोषयन्ति तद् व्याकरण दृष्ट्याऽशुद्धप्रयोगः।

**होमद्रव्यम्।**

होमद्रव्यं वस्तुतस्तु गवां घृतमेवेति। तथाऽपि बौधायनमनुश्रृत्य[६९६] ऋषिभट्टः माहिष्यघृतं अजाया वा अव्या वा घृतं स्वीकरोति। तेषामभावे तुजातिलम कौसुभं सार्षपं वा तैलमपि स्वीकार्यं होमद्रव्यं भवेदिति।

**होमविधौ नियमः।**

यस्यकस्यचिन्मन्त्रस्य यज्ञकालेऽध्ययनकाले जपकाले च विनियोगः क्रियते तदा तत्तन्मन्त्रस्य ऋषिछन्दो दैवतम् विनियोगश्चेति जातकेन छात्रेण जपकर्त्रा च ज्ञेयः। तथा च होममध्ये जलपानमपि निषिद्धम्। अतएव एतत् कर्तुः फलमर्धं याज्ञवल्क्येन[६९७] कथितम्।

अत्र महाराष्ट्रीयाणां व्यवहारानुसारेण दम्पत्योः पुत्रवतीभिवृद्धसुवासिनीभिर्नीराजनं कार्यम्। तस्य मन्त्रः–

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्त्ये प्रजाम्मेदाः।
सुखदापश्चाद्देवस्यसवितुराधिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्त्येरायष्पोषम्मेदाः।
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्त्यऽओजोमेदा
विश्वाभ्योमानष्ट्राभ्य स्पाहि मनोरश्वासि ।। शु०य० ३७/१२।।

मण्डपमातृकापूजनावसरे महाराष्ट्रीयाणां रीत्यानुसारेण शाखासु तैलं पूर्यते। तदेव ऋषिभट्टः कथयति– आसां मण्डपमातृसंज्ञाताश्चमण्डपमातृर्मण्डपे वा वंशपात्रे स्थापयित्वा। व्वसोः पवित्रमिति मन्त्रेण यजमानपत्न्या शाखासु तैलारोपणं कार्यम्।

ॐ व्वसोः पवित्त्रमसिशतधारंव्वसोः पवित्रमसिसहस्त्रधारम्।
देवस्त्वासवितापुनातु व्वसोः पवित्रेणशतधारेण सुप्वा कामधुक्षः।। शु०य० ०१/०३।।

एतत्तु गुर्जरप्रान्ते न पाल्यते।

मण्डपमातृकापूजनावसरे च मण्डपस्थिरीकरणार्थम् ऋषिभट्टो लिखति– अथवा वंशपात्रमध्ये चतुर्षुकोणेषु चतस्त्रोमध्ये एकाएवं स्थिरीकरणसम्प्रदायः।

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भववाज्यर्वन्।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः।। शु०य० ११/४४।।

अत्र विधिविषये गुर्जरप्रान्ते पञ्चपुरुषाः मण्डपस्तम्भं स्पृशन्ति।

---

[६९६] एतदर्थियौ श्लोकौ अग्रे द्वितीया संस्कृत्यां प्रदत्तौ।
[६९७] एतदर्थियौ श्लोकौ अग्रे द्वितीया संस्कृत्यां प्रदत्तौ।

ऋषिभट्टः अवस्करपूजनं गौरमृत्तिका समानयनं गणेशमृत्पात्रादि समानयनं न निर्दिशति। अनेनेदमनुमानं क्रियते यत् महाराष्ट्रीयाणामेतानि पूजनानि न क्रियन्ते गुर्जरे तु स्वीक्रियन्ते।

गणेशगौर्यादिमातृकास्थापनप्रसङ्गे गुर्जरप्रदेशे रक्ते पटे वा पीते पटे वा गोधूमपुञ्जः चणकद्विदलपुञ्जो वा क्रीयते। किन्तु संस्कारभास्करकाराः पीते पटेऽक्षतपुञ्जः करणीय इति लिखन्ति।[६९८]

प्राणप्रतिष्ठाविधौ सूर्येन्द्रेन्द्राणिभुवनेश्वरीकदलीदेवतानां ध्यानपूर्वक आवाहनं प्रतिष्ठा प्रार्थना क्षमापनानि प्रस्थापितानि वर्तन्ते।

गुर्जरप्रदेशे यद्यपि रजोदर्शनशान्तिप्रयोगः ऋतुकालशान्तिप्रयोगश्च प्रचलितौ न स्तः संस्कारभास्करकारास्तु उभयोः प्रयोगयोः समग्रोविधिर्नारदपुराणोक्तदिशया सङ्गृह्णन्ति। तयोः पूजनीयदेवतानां ध्यानम् आवाहनं प्रतिष्ठां प्रार्थनां क्षमापनं च प्रस्थापयन्ति।

आदित्यादिनवग्रहपूजनविधिर्गुर्जरप्रदेशे सरुद्रग्रहमण्डलदेवतापूजनविधिरितिनाम्ना प्रचलितः। तत्र विधौ संस्कारभास्करकाराः लिखन्ति यद् ॐ भूर्भुवः स्वः आदित्यादिनवग्रहमण्डलदेवताभ्यो नमः इति मन्त्रेण षोडशोपचारैः सम्पूज्य प्रार्थयेदिति। गुर्जरप्रदेशे तु सरुद्रग्रहमण्डलस्य देवतानां पृथक् पृथक् षोडशोपचारपूजनं क्रियते।

संस्कारभास्करे शान्तिप्रयोगस्याऽन्ते बलिदान विधौ नवग्रहाणां साद्गुण्यदेवताख्यानां च पञ्चलोकपालानां वास्तोष्पतेः क्षेत्राधिपतेश्च बलिदानं पृथक् पृथग्विहितमिन्द्रादिदशदिक्पालानां–बलिदानमेकतन्त्रेण विहितम्। यद्यपि गुर्जरप्रदेशे इन्द्रादिदशदिक्पालानां बलिदानं पृथक् पृथग्विधीयतेऽ–न्येषां त्वेकतन्त्रेण विधीयते।

नान्दीश्राद्धानन्तरं आचार्यादिऋत्विग्वरणे ब्राह्मणप्रार्थनायां पावनाः इत्येकादशमन्त्राणां स्थाने निम्नलिखितो मन्त्रो गुर्जरप्रदेशे पठ्यते।

> नमो ब्रह्मण्य देवाय गो ब्राह्मण हिताय च।
> जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।

इदमत्राऽनुसन्धेयं यदाधुनिके समये समयाभावाद् द्रव्याल्पत्वादावश्कताभावाच्च व्रतबन्धो वोपनयनं वा मौञ्जीबन्धनं  वा समाजे विलम्बेन विवाहकाले वैकतन्त्रेणान्यऽन्यैः संस्कारैः सह सम्पाद्यते। यद्यपि भगवता मनुना कथितमस्ति यद्

---

[६९८] ब्रह्मनित्यकर्मसमुच्चयकारा यद्यपि गुर्जरमहाराष्ट्रप्रान्तयोः परम्पराद्वयं सम्मीलयन्त इव लिखन्ति।(पृ० ३३१)

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः।। ०२/३६।।
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे।। ०२/३७।।

इति ब्राह्मणबटुकस्य गर्भात् पञ्चमेऽष्टमे वा क्षत्रियकुमारस्य षष्ठ एकादशे वा वैश्यबालकस्य त्वष्टमे द्वादशे वा यज्ञोपवीतधारणं विहितम्।

गर्भाधानसंस्कारविधेः व्याख्यां प्रस्थापयन्तः संस्कारभास्करकारा लिखन्ति। गर्भाधानसीमन्तोन्नयने तु स्त्रीसंस्कारत्वात् प्रतिगर्भं नावर्तेते। किन्तु प्रथमेगर्भे एव कार्ये। इति धर्मसिन्धौ। तत्र प्रथमरजोदर्शने त्रयोदशदोषाः तेषां फलानि च ज्योतिःशास्त्रे उक्तानि। अथ प्रथमर्तौ शिष्टाचारात्कर्तव्यमाहसंस्कारकौस्तुभेकश्यप इति।(पृ. ९८)

अत्र दोषनिवारणार्थं हरिद्राकुङ्कुमादिभिः सुवासिनीस्त्रिसमूहद्वारापूजनमावश्यकम्। तदर्थं रजस्वलात्व समाप्तिपर्यन्तं नारी अप्सु न स्नायादधौ न शयीत दिवा न स्वप्यादित्यादिनिषेधा अपि स्पष्टतया निर्दिष्टाः।

बहुषः समाजे स्मृत्याज्ञाः न मन्यन्ते तथापि संस्कारभास्करकाराः कतिपयान् पद्मपुराणोक्तान् गर्भिणिधर्मान् गर्भिणिपतिधर्मानपि निर्दिशन्ति। तद्यथा

नावस्करेषूपविशेन्मुसलालूखलादिषु।
जलं च नावगाहेत शून्यागारं विवर्जयेत्।
वल्मीकेनाधितिष्ठेत नचोद्विग्नमनाभवेत।।
विलिखेन्ननखैर्भूमिं नांगारेण न भस्मना।
नशयालुः सदा तिष्ठेद्व्यायामं च विवर्जयेत्।। पृ. १०३।। इत्यादयः।
गर्भिणी वांछितं द्रव्यं तस्यै दद्याद्यथोचितम्।
सुते चिरायुषं पुत्रमन्यथादोषमर्हति।।
दोहदस्या प्रदानेन गर्भोदोषमवाप्नुयात्।
वैरूप्यं मरणं वाऽपि तस्मात्कार्यं प्रियं स्त्रियाः।। पृ. १०५।। इत्यादयः।।

संस्कारभास्करे षष्ठेमासेन्नप्राशनसंस्कारविधावन्तरितानि (न कृतानि यावत्) गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातकर्म नामकरणं निष्क्रमणं चेत्यादीनि संस्कारकर्माणि यानि न पारितानि तान्यन्नप्राशनसंस्कारविधेः पूर्वमेव सम्पादयितव्यानि।

अधुना तु गुर्जरप्रदेशेऽन्नप्राशनविधिरेव न सम्पाद्यते तदान्तरितानि कर्माणि कुत्र कदा वा सम्पादयितव्यानि? विबुधाः कुलाचार्याः कुलपुरोहिता वा तेषामन्तरितानां संस्कारकर्मणां प्रयोगविधिमुपनयनकाले एकतन्त्रेण साधयन्त्यथ वा विवाहकाले साधयन्ति यतः वेदवाक्यं प्रमाणभूतमिति सार्वजनीनमेतत्।

पूजनारम्भे देवता नमस्कारविधौ गुर्जरप्रदेशेऽतिप्रचलितान् श्रीगुरु–परमगुरु–परमेष्ठिगुरु–परात्पर–गुरुभ्यो इति नमस्कारान् निर्दिशन्ति।

तत्र च

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।।

इति श्लोकमपि न गृह्णन्ति।

पूजाविधेः प्रधानसङ्कल्पे स्वकीयं प्रदेशं महाराष्ट्रं निर्दिशन्तस्ते गोदावर्याः पश्चिमतीरे इत्यधिकं पठित्वा देशकालौ सङ्कीर्त्य–सन्दर्भस्य पूर्तीं कुर्वन्ति।

गुर्जरप्रदेशे दीपपूजनविधौ तत्प्रज्वालनान्ते निम्नलिखितो मन्त्रो यज्ञोपवीतरहितानां कृते पठ्यते।

भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्।
यावत्पूजासमाप्तिः स्यात्तावदत्र स्थिरो भव।।

संस्कारभास्करकारास्तु परिनिर्दिष्टस्य मन्त्रस्य स्थाने एवं पठन्ति।

भोदीपत्वं ब्रह्मरूप अन्धकार निवारक।
इमां मया कृतां पूजां गृह्णंस्तेजः प्रवर्धय।।

गणपतिषोडशोपचारपूजनविधौ गुर्जरप्रदेशेऽतिप्रचलिताः ध्यानावाहनासनादिषु प्रायः शुक्ल यजुर्वेदीय पुरुषसूक्तस्य मन्त्राः पठ्यन्ते।

संस्कारभास्करकारा महाराष्ट्रीयाणां शुक्लयजुर्वेदान्तर्गतवाजसनेयिमाध्यन्दिनशाखाध्यायिनां परम्परामनुसृत्यान्यान् मन्त्रान् पठन्ति।

गणपतिषोडशोपचारविधौ गुर्जरप्रदेशे गणपतिप्रतिष्ठाविधौ मनोजुतिर्जुषतामिति पठ्यते । अयमेव मन्त्रः सर्वदेवदेवीपूजाविधौ पृथक्तया पठ्यते। तत्र कारणमिदमेव ज्ञायते यद् गुर्जरप्रदेशे मूर्तीनां स्थाने पूगीफलमुपयुज्यते। ब्रह्मनित्यकर्मसमुच्चयकारा संस्कारभास्करकाराश्च मनोजुतिर्जुषतामिति मन्त्रस्याऽऽवश्यकतां नैव पश्यन्ति यतस्तैः मूर्तिष्वेव पूजनं पार्यते।

पुण्याहवाचनविधौ गुर्जरप्रदेशे धान्यमसीति मन्त्रेण कलशे धान्यप्रक्षेपो विधीयते। किन्तु संस्कारभास्करकाराणां मते कलशे धान्यप्रक्षेपस्याऽऽवश्यकता न भाति।

पुण्याहवाचनविधौ वरुणपूजने गुर्जरप्रदेशे पञ्चोपचारैः विधिः सम्पाद्यते संस्कारभास्करकारास्तु षोडशोपचारैः पूजनं साधयितुं स्वीकुर्वन्ति।

तत्रैव ब्रह्माण्डोदरतीर्थानीति तीर्थानामावाहने कृतेऽपि संस्कारभास्करकाराः गङ्गाद्यावाहनं कुर्वन्त एवं लिखन्ति।

सर्वेसमुद्राः सरितस्तीर्थानि जलदानदाः।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।। पृ. ३४।।

गुर्जरप्रदेशे पुण्याहवाचनान्ते ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणविधौ पूगीफलानि पान्तु बहुफलमस्त्वित्यत्र महाराष्ट्रीयाणां परम्परायामेष विधिर्न दृश्यते। कदाचित् गुर्जरप्रान्तीया ब्राह्मणाः पूगीफलचर्वणरसिकाः सन्तीति सामाजिकोऽयं विधिः प्रतिभाति।

ग्रहशान्तिमखे पूजाविधिषु मातृकापूजनप्रयोगेऽवस्कर(उकरडी)पूजनं गौरमृत्तिका(गोरमटी)-समानयनं गणेशमृत्पात्रादि(गुजरडा)समानयनं चेति कर्माणि गुर्जरप्रदेशे सर्वत्र प्रचलितानि सन्ति। किन्तु एतादृशः कर्मविधिर्महाराष्ट्रे प्रचारे नाऽस्ति।

# सप्तमी संस्कृतिः।

## उपसंहारः।

पृष्ठानि ३७६ - ३८३।

# सप्तमी संस्कृतिः।
# उपसंहारः।
# संस्कारभास्करकाराणां योगदानम्।

विश्वधरायां विविधासु मानवसंस्कृतिषु तत्तद्देशीयानां सामाजिकव्यवस्थानुसारेण संस्कारविधिविधानानि वर्त्तन्ते। यत: संस्कारो नाम कार्यान्तरयोग्यताकरणम्। अनेन संस्कारविधिना मनुष्यस्याऽऽन्तरिकी बाह्या च शुद्धिरपेक्ष्यते। एतादृशी च शुद्धि: मनुष्यस्य व्यक्तिगतं मनोव्याक्व्यापारमुन्नतं करोति। ततश्च कुटुम्बस्य कुलस्य समाजस्य च भावनां दृढतरां करोति। एतदर्थमेव प्राचीनकालादर्वाचीनकालपर्यन्तं श्रौतगृह्यसूत्राणाम् आविर्भावो जात इति स्पष्टतरम्।

महामहोपाध्यायकाणेमहोदयै: निश्चितात् कालादिदं कथितव्यं भवति।

वैदिकानामेकोनविंशतिगृह्यसूत्रग्रन्थानां मध्ये आश्वलायनगृह्यसूत्रं शाङ्खायनगृह्यसूत्रं पारस्करगृह्यसूत्रं बौधायनगृह्यसूत्रं आपस्तम्बगृह्यसूत्रं हिरण्यकेशि(सत्याषाढ)गृह्यसूत्रं च कालदृष्ट्या प्राचीनानि कौशितकिगृह्यसूत्रमपरनाम शाम्भव्यगृह्यसूत्रं शौनकगृह्यसूत्रं बैजवापगृह्यसूत्रं भारद्वाजगृह्यसूत्रं वैखानसगृह्यसूत्रं अग्निवेश्यगृह्यसूत्रं वाराहगृह्यसूत्रं काठकगृह्यसूत्रं कौथुमशाखीयगोभिलगृह्यसूत्रं खादिरगृह्यसूत्रं जैमिनीयगृह्यसूत्रं कौथुमगृह्यसूत्रं कौशिकसूत्रं चावान्तरकालीनानि मन्यन्ते। कृष्णयजुर्वेदीयतैत्तिरीयशाखाया वैखानसगृह्यसूत्रं सामवेदीयं च कौथुमशाखीयगोभिलगृह्यसूत्रं वस्तुतो गृह्यसूत्रसाहित्यस्य कक्षायां नावतरतो यतोऽत्र यज्ञादिविधीनां संस्कारविधीनां च विषयकान् मन्त्रान् प्रतीकरूपेण संगृहणीत:। अथर्ववेदीयं कौशिकसूत्रमपि स्वल्पांशेन गृह्यसूत्रग्रन्थोऽधिकांशेन त्वौषधोपयोगीन्द्रजालविद्युपयोगी च लक्ष्यते। अत: ऋग्वेदिनामाश्वलायनगृह्यसूत्रं शुक्लयजुर्वेदिनां पारस्करगृह्यसूत्रं कृष्णयजुर्वेदिनां बौधायनापस्तम्बवैखानसगृह्यसूत्राणि सामवेदिनां कौथुमशाखीयगोभिलगृह्यसूत्रमथर्ववेदिनां च कौशिकसूत्रमतिप्रचलितानि भान्ति। अत एव तेषां च प्रचार: सर्वदा स्वीकृतौ दृश्येते।

अष्टादशपुराणान्यपि वैदिकसंस्कृते: प्रामाण्यं स्वीकुर्वन्ति वैदिकज्ञानस्य वैदिकविधीनां च दर्पणसमानानि। संस्कारविधिप्रयोगो भविष्यपुराणे ब्रह्मपुराणे वायुपुराणे मत्स्यपुराणे स्कन्दपुराणे गरुडपुराणे नारदपुराणे वराहपुराणे मार्कण्डेयपुराणे अग्निपुराणे विष्णुपुराणे भविष्योत्तरपुराणे विष्णुधर्मोत्तरपुराणे च समाविष्टो दृश्यते।

संस्कारविधिप्रयोगार्थे काश्चन स्मृतयो यथा यमस्मृति: वसिष्ठस्मृति: कात्यायनस्मृति: शङ्खस्मृति: आपस्तम्बस्मृति: शातातपस्मृति: गौतमस्मृति: मनुस्मृति: नारदस्मृति: शौनकस्मृतिस्ततश्चान्ये स्मृतिसङ्ग्रह: स्मृतिरत्नावली हेमाद्रि: सिद्धान्तशेखर: कर्मप्रदीप: स्मृतिदर्पण: धर्मसिन्धु: पञ्चरात्रं शान्तिकमलाकर: आचारदर्श: प्रयोगचूडामणि: रेणुकारिका शान्तिसार: कल्पवल्लि कुशकण्डिका कर्मप्रदीप: महाभारतं मदनरत्नसङ्ग्रह: शान्तिरत्नं च संस्कारविधिज्ञानार्थकानीति तेषामावश्यकता वर्त्तते।

सप्तदशशतकान्ते महाराष्ट्रस्य नासिकनगरे प्रादुर्भूता ऋषिभट्टमहोदया: स्वस्थितिकाले वैदुष्य–शालिनो बुधानामग्रगण्या: समाजे यजमानकर्मणि संस्कारादिविधिषु च प्रसिद्धा ऋत्विज आसन्। तेषामन्यग्रन्था यद्यपि न प्राप्यन्ते तथाप्येक एव संस्कारभास्कर ऋषिभट्टानामनुपमो ग्रन्थ इति नि:संशयम्। वेदानां तु वैदुष्यं पाण्डित्यं च दृश्यत एव। सूत्रग्रन्थानां पुराणानां स्मृतीनां तद्भाष्याणामन्यस्मृतिग्रन्थानां च गहनमध्ययनं प्रकटमेव।

लक्ष्मीवेङ्कटेश्वरस्टीममुद्रणालयात् १९८३तमे वैक्रमाब्दे १९२६तमे ख्रिस्ताब्दे १८४८तमे च शकाब्दे प्रकाशिते पत्राकाररूपे संस्कारभास्करे पत्राणि ५८२ सङ्ख्याकानि भवन्ति यत्र ६३६६ श्लोकप्रमाणको महाकायो ग्रन्थ ऋषिभट्टस्य याज्ञिकीकर्मविधावमूल्य प्रदानरूपो भवति।

ग्रन्थाननेकानालोक्य यथामति मया कृत:।
याज्ञिकानां हितार्थाय श्रीरामचरणार्पित:।। पृ. २९१।।

इति स्वयमेव संस्कारभास्करस्यापरनाम सर्वसंस्कारभास्कर इति नाम निर्देशेन १६२१तमे शाके ग्रन्थरचना कृतेति लिखन्ति।

आधुनिके समये समयाभावाद् द्रव्याल्पत्वादावश्कताभावाच्चोपनयनसंस्कार: समाजे विलम्बेन विवाहकाले वैकतन्त्रेणान्यऽन्यै: संस्कारै: सह सम्पाद्यते। यद्यपि भगवता मनुना (०२/३६–३७) कथितमस्ति यद् ब्राह्मणबटुकस्य गर्भात् पञ्चमेऽष्टमे वा क्षत्रियकुमारस्य षष्ठ एकादशे वा वैश्यबालकस्य त्वष्टमे द्वादशे वा यज्ञोपवीतधारणं विहितम्।

संस्कारभास्करस्य विषयसङ्कलनमनुसृत्य संस्कारभास्करकारा: प्राय: सर्वेषां प्राप्ताप्राप्तगृह्यसूत्राणां (तेषामधिकतराणामद्ययावद् अप्रकाशितानि) सन्दर्भान् समावेशयन्ति तेषां गृह्यसूत्राणां मध्ये ऋग्वेदस्याऽऽश्वलायनगृह्यसूत्रं शाङ्खायनगृह्यसूत्रं शुक्लयजुर्वेदस्य पारस्करगृह्यसूत्रं कृष्णयजुर्वेदस्य बौधायनगृह्यसूत्रम् आपस्तम्बगृह्यसूत्रं हिरण्यकेशि(सत्याषाढ)गृह्यसूत्रं वैखानसगृह्यसूत्रं च ख्रिस्ताब्दपूर्वात् विरचितानि संकलितानि वाऽत एव प्राचीनानि गण्यन्ते धर्मविद्भि:। अन्येषां तु कालनिर्णयस्याऽशक्यत्वात् तेषां संकलनं प्राय: ख्रिस्ताब्दस्योत्तरकालीनं मन्यते तानि यथा ऋग्वेदस्य कौषीतकिगृह्यसूत्रं शौनकगृह्यसूत्रं शुक्लयजुर्वेदस्य बैजवापगृह्यसूत्रं कृष्णयजुर्वेदस्य भारद्वाजगृह्यसूत्रम् अग्निवेश्यगृह्यसूत्रं वाराहगृह्यसूत्रं काठकगृह्यसूत्रं सामवेदस्य कौथुमशाखीयगोभिलगृह्यसूत्रं खादिरगृह्यसूत्रं जैमिनीयगृह्यसूत्रं कौथुमगृह्यसूत्रमथर्ववेदस्य च कौशिकसूत्रं सन्ति।

अष्टादशपुराणान्यपि वैदिकसंस्कृते: प्रामाण्यं स्वीकृत्य वैदिकज्ञानस्य वैदिकविधीनां च दर्पणसमानानि प्रतिभान्ति:। अत एव संस्कारभास्करे भविष्यपुराणं ब्रह्मपुराणं वायुपुराणं मत्स्यपुराणं स्कन्दपुराणं

गरुडपुराणं नारदपुराणं वराहपुराणं मार्कण्डेयपुराणमग्निपुराणं विष्णुपुराणं भविष्योत्तरपुराणं विष्णुधर्मोत्तरपुराणं च स्पष्टनिर्देशेन तत्र निर्दिष्टान् विधिविषयान् संगृह्णन्ति।

न केवलं वैदिकानि गृह्यसूत्राण्यपि तु पुराणानि समावेशयन्तः संस्कारभास्करकाराः यमस्मृति- र्वसिष्ठस्मृतिः कात्यायनस्मृतिः शङ्खस्मृतिरापस्तम्बस्मृतिः शातातपस्मृतिर्गौतमस्मृतिर्मनुस्मृति- र्नारदस्मृतिः शौनकस्मृतिरन्ये च स्मृतिग्रन्था यथा स्मृतिसङ्ग्रहः स्मृतिरत्नावली हेमाद्रिः सिद्धान्तशेखरः कृष्णभट्टः कर्मप्रदीपः स्मृतिदर्पणो धर्मसिन्धुः पञ्चरात्रं शान्तिकमलाकर आचारदर्शः प्रयोगचूडामणिर्वृद्धमनू रेणुकाकारिका शान्तिसारः कल्पवल्लि कुशकण्डिका कर्मप्रदीपः मदनरत्नं शान्तिरत्नं च। एतेभ्यो ग्रन्थेभ्य आवश्यकसन्दर्भान् प्रस्थापयन्ति।

सर्वसंस्कारसामान्यविधेः शिखाबन्धनं कुशपवित्रधारणम् आचमनं प्राणायामः तिलककरणम् आचारात् कङ्कणबन्धनम् शान्तिपाठः भद्रसूक्तं देवतानमस्कारः प्रायश्चित्तसङ्कल्पः धेनुपूजनं प्रधानसङ्कल्पः भूमिपूजनं दिग्रक्षणं कलशार्चनं दीपपूजनं सूर्यपूजनं शङ्खपूजनं घण्टापूजनम्।

गणपतिपूजने गणपत्यथर्वशीर्षं सङ्कष्टनाशनं गणेशस्तोत्रम्।

पुण्याहवाचनप्रयोगे वरुणावाहनं प्रतिष्ठापनं वरुणपूजनं ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् आशीर्वादः पात्रे उदकसेकः अभिषेकः।

मातृकापूजनप्रयोगे अविघ्नमातृका पूजनं मण्डपमातृका स्थापनम् अवस्कर(उकरडी) पूजनं गौरमृत्तिका(गोरमटी) समानयनं गणेशमृत् पात्रादि(गुजरडा) समानयनं गणपतिपूजनं गौर्यादिमातृणां पूजन वैश्वदेव सङ्कल्पः श्र्यादिसप्तवसोर्धारापूजनं श्रीसूक्तम् मार्कण्डेयपुराणोक्तं देवीसूक्तम्।

आयुष्यमन्त्रजपः।

नान्दीश्राद्धप्रयोगे पाद्यदानं सङ्कल्पः आसनदानं गन्धादिदानं भोजननिष्क्रयभूतद्रव्यदानं सक्षीरयवमुदकदानम् आशीषो ग्रहणं दक्षिणदानं विसर्जनम् अनुव्रजनं पितृस्मरणम्।

आचार्यादिऋत्विग्वरणे अर्घकरणं ब्राह्मणप्रार्थना आचार्यवरणं ब्रह्मर्त्विगवरणम् मधुपर्कः ऋत्विक् प्रार्थना यजमानहस्ते कङ्कणबन्धनं यजमानपत्न्याः वामहस्ते कङ्कणबन्धनं पुनर्दिग्रक्षणं पञ्चगव्यकरणं भूमि प्रार्थना भूमिकूर्मानन्तपूजनं देवताऽऽवाहनम्।

स्थण्डिल(कुण्ड)पूजनपूर्वकमग्निस्थापने सङ्कल्पः देवानावाहनं पञ्चभूसंस्कारा अग्निस्थापनम् अग्न्यावाहनं प्रतिष्ठापनम् अग्निपूजनम्।

सरुद्रग्रहमण्डलदेवतापूजने सङ्कल्पः नवग्रहाऽवाहनम् अधिदेवतावाहनं प्रत्यधिदेवतावाहनं पञ्चलोकपालदेवतावाहनं क्षेत्रपालावाहनं वास्तुदेवातावाहनम् इन्द्रादिदिक्पालावाहनम् ईशानकलशे रुद्रावाहनं प्रतिष्ठापनम् अग्न्युत्तारणं प्राणप्रतिष्ठा नेत्रोन्मीलनं सरुद्रनवग्रहमण्डलदेवतापूजनम्।

कुशकण्डिकायां सङ्कल्पः वैकल्पिकपदार्थावधारणं देवताभिध्यानपूर्वकमन्वाधानं पात्रासादनं कुशकण्डिका आघारहोमः आज्यभागः अग्निपूजनं द्रव्यत्यागः।

प्रधानहोमे वराहुतिः नवग्रहहोमः गुग्गुलहोमः सर्षपहोमः लक्ष्मीहोमः व्याहृतिहोमः।

उत्तरपूजने सङ्कल्पः गणपतिपूजनं मातृकापूजनं सरुद्रग्रहमण्डलदेवतापूजनम् अग्निपूजनं स्थापितब्रह्मापूजनं नमस्कारः स्विष्टकृद्धोमः नवाहुतिहोमः बलिदानप्रयोगः दिक्पालदेवताबलिदानं स्थापितदेवताबलिदानं क्षेत्रपालबलिदानम्।

पूर्णाहुतिहोमे सङ्कल्पः वसोर्द्धाराहोमः भस्मधारणं श्रेयोदानं दक्षिणादानम् आचार्यपूजनम् आचार्याय गोप्रदानं सुवर्णदानं भूमिदानं तिलपात्रदानम् अभिषेकः घृतपात्रदानं ब्राह्मणभोजनसङ्कल्पः भूयसीदक्षिणाप्रदानम् आशिर्वादः देवताविसर्जनं पीठादिदानम् अग्निविसर्जनं क्षमाप्रार्थनं परिपूर्णतावाचनं प्रैशात्मकपुण्याहवाचनम्।

गर्भाधानसंस्कारप्रयोगे सङ्कल्पः नाभ्यभिमर्शः अभिगमनम् हृदयालम्भनं ब्राह्मणभोजनसङ्कल्पः।

पुंसवनसंस्कारप्रयोगे सङ्कल्पः न्यग्रोधाङ्कुररससेचनं गर्भाभिमन्त्रणं ब्राह्मणभोजनसङ्कल्पः।

सीमन्तोन्नयनसंस्कारप्रयोगे सङ्कल्पः आघाराज्यहोमः अग्निपूजनं नवाऽहुतिहोमः विनयनं वेणीबन्धनं गाथागानं ब्राह्मणभोजनसङ्कल्पः शीघ्रप्रसवोपायः सुखप्रसवयन्त्रम्।

जातकर्मसंस्कारप्रयोगे सङ्कल्पः अनादिष्टप्रायश्चित्तहोमः आघाराज्यहोमः अग्निपूजनं नवाऽहुतिहोमः जातकर्मसंस्कारविधिः सङ्कल्पः गणपतिपूजनं मेधाजननम् आयुष्करणं ब्राह्मणभोजनसङ्कल्पः षष्ठीपूजनप्रयोगः सङ्कल्पः प्रार्थनामन्त्राः बलिदानं राकादिदेवतापूजनम्।

नामकरणसंस्कारप्रयोगे प्रायश्चित्तसङ्कल्पः नामकरणविधिः सङ्कल्पः पञ्चोपचारगणपतिपूजनं नामदेवतापूजनम् अभिवादनं ब्राह्मणभोजनसङ्कल्पः।

निष्क्रमणसंस्कारप्रयोगे प्रायश्चित्तसङ्कल्पः नामकरणविधिः सङ्कल्पः पञ्चोपचारगणपतिपूजनं सूर्यदर्शनं ब्राह्मणभोजनसङ्कल्पः।

अन्नप्राशनसंस्कारप्रयोगे प्रायश्चित्तसङ्कल्पः अन्नप्राशनसंस्कारविधिः सङ्कल्पः आघाराज्यहोमः अग्निपूजनं प्रधानहोमः नवाऽहुतिहोमः षड्रसप्राशनं ब्राह्मणभोजनसङ्कल्पः।

चौलसंस्कारप्रयोगे प्रायश्चित्तसङ्कल्पः चौलसंस्कारविधिः सङ्कल्पः आघाराज्यहोमः अग्निपूजनं नवाऽहुतिहोमः मुण्डनं ब्राह्मणभोजनसङ्कल्पः।

उपनयनसंस्कारप्रयोगे प्रायश्चित्तसंकल्पः उपनयनसंस्कारः सङ्कल्पः पञ्चोपचारगणपतिपूजनं वपनं वासः परिधानं मेखलाबन्धनं यज्ञोपवीतधारणम् अजिनधारणं दण्डधारणं सूर्योदिक्षणं हृदयालम्भनं कुशकण्डिका आघाराज्यहोमः अग्निपूजनम् उपनयनाङ्गप्रधानहोमः बटुकशिक्षा गायत्रीमन्त्रोपदेशः सङ्कल्पः पञ्चोपचारगणपतिपूजनं सन्धुक्षणहोमः समिदाधानं मुखविमर्शनम् अङ्गाप्यायनं भस्मधारणम् अभिवादनं भिक्षाचर्याचरणं ब्रह्मचारिनियमाः ब्राह्मणभोजनसङ्कल्पः।

वेदारम्भसंस्कारप्रयोगे सङ्कल्पः पञ्चोपचारगणपतिपूजनम् आघारहोमः अग्निपूजनम् ऋग्वेदाहुतयः यजुर्वेदाहुतयः सामवेदाहुतयः अथर्ववेदाहुतयः नवाऽहुतिहोमः सरस्वतीपूजनम् ऋग्वेदारम्भः यजुर्वेदारम्भः सामवेदारम्भः अथर्ववेदारम्भः ब्राह्मणभोजनसङ्कल्पः।

केशान्तसंस्कारप्रयोगे प्रायश्चित्तसङ्कल्पः केशान्तसंस्कारविधिः सङ्कल्पः आघाराज्यहोमः अग्निपूजनं नवाऽहुतिहोमः वपनं गोदानसङ्कल्पः ब्राह्मणभोजनसङ्कल्पः।

समावर्तनसंस्कारप्रयोगे प्रायश्चित्तसङ्कल्पः समावर्तनसंस्कारविधिः सङ्कल्पः समावर्तनम् आघाराज्यहोमः अग्निपूजनं वेदाहुतयः नवाऽहुतिहोमः सन्धुक्षणहोमः समिदाधानं मुखविमर्शनम् अङ्गाप्यायनं भस्मधारणम् अभिवादनम् उदककुम्भदेवतापूजनं स्नानं मेखलोन्मोचनं सूर्योपस्थानं दन्तधावनं चन्दनोपग्रहणं जल निषेकः चन्दनानुलेपनं वस्त्रपरिधानं यज्ञोपवीतधारणम् उत्तरीयधारणं पुष्पमालाग्रहणं पुष्पमालाबन्धनम् उष्णीषेण शिरोवेष्टनम् अलङ्करणधारणं चक्षुरञ्जनम् आदर्शे आत्मदर्शनं छत्रग्रहणम् उपानट्परिधानं दण्डग्रहणं स्नातकस्य नियमाः ब्राह्मणभोजनसङ्कल्पः आशीर्वादाः।

विवाहसंस्कारप्रयोगे वाग्दानविधिः सङ्कल्पः गोत्रोच्चारः विवाहविधेः पूर्वं वरगृहे प्रस्थान विधिः वरयात्रागमनपूर्वो विधिः विवाहाङ्गविधिः सङ्कल्पः मधुपर्कप्रयोगः अङ्गन्यासः प्रधानो विवाहसंस्कारविधिः मङ्गलाष्टकं वाचनिकश्राद्धं कन्यादानविधिः गोत्रोच्चारः कन्यादानसङ्कल्पः गोदानसङ्कल्पः पुण्याहवाचनम् अभिषेकः आशीर्वादाः ब्राह्मणभोजनसङ्कल्पः विवाहहोमः आघाराज्यहोमः अग्निपूजनम् अष्टप्रायश्चित्ताहुतयः राष्ट्रभृद्धोमः जयाहोमः अभ्यातानहोमः पञ्चक(पञ्चाहुति)होमः लाजाहोमः अश्मारोहणं गाथागानम् अग्निपरिक्रमणं सप्तपदाक्रमणः कन्याप्रतिज्ञा विवाहहोमकाले कन्यायामृतुमत्यां होमविधिः(युञ्जानहोमविधिः) कन्यागृहे भोजनविचारः अर्कविवाहः कुम्भविवाहश्च।

प्रस्तुतशोधनिबन्धस्य फलस्वरूपेण निष्कर्षभूतानि निरीक्षणानि तारणरूपाणि चैवंप्रकाराणि सन्ति।

(०१) वेदाङ्गग्रन्थानां वेदार्थज्ञाने यावती आवश्यकताऽस्ति तावती चावश्यकता वैदिकसाहित्यान्तर्गत विधिविधानानां यज्ञयागादीनां श्रौतस्मार्तव्रतानां नियमानां च ज्ञानप्राप्तये बोधार्थं वा वर्त्तते।

(०२) जगति वैदिकोधर्मो मानवानां दुर्गुणान् मलीनतां आध्यात्मिकीश्च प्रतिकूलता अपनेतुं सहायकारी सम्पद्यते। आत्मश्रेयसि च प्रवर्त्तयति।

(०३) संस्काराणां प्रयोग एव वाक्कायमनसां कार्यान्तरयोग्यताकरणे विधिविधानरूपेणोद्भूतः प्रचलितश्चाऽभवत्।

(०४) मानवजीवनस्य वैविध्यपूर्णत्वाच्चतुर्णां वेदानां नैकाः शाखाप्रशाखाः समभवन्। तत्र देशकालनिमित्तनामाश्रयत्वेन शाखाभेदा अपि प्रवर्त्तिताः।

(०५) महामहोपाध्यायकाणेमहोदयैः स्वकीये धर्मशास्त्रस्येतिहासाख्यमहाकायग्रन्थेऽनल्पा गृह्यसूत्रविषयका ग्रन्था विवेचितास्तेषामद्यावधि बहवः प्रकाशिता न सन्ति।

(०६) पुराणानां विविधा आवृत्तयः प्रकाशनं नीतास्तथापि संशोधनसम्पादनानि प्रकाशनसूर्योदयं अपेक्ष्यमाणानीति विदुषामैकमत्यम्।

(०७) गुर्जरप्रदेशे सर्वत्र ग्रहशान्तिमखे मातृकापूजनविधाअवस्कर(उकरडी)पूजनं गौरमृत्तिका(गोरमटी)पूजनं गणेशमृत्पात्रादि(गुजरडा)समानयनं चेति कर्माणि प्रचलितानि सन्ति। तादृशान्यनेकानि विधिकर्माणि देशकालानुसारेण करणीयत्वेन सङ्गृहीतानि स्युर्वा न स्युः।

(०८) गुर्जरप्रदेशे कर्णवेधः वर्धापनम् अक्षरारम्भश्चेति विधिकर्माणि चौलविधेः पूर्वमेव प्रचलितानि विधीयन्ते। महाराष्ट्रे तु संस्कारभास्करानुसारेण तानि चौलविधेरनन्तरं करणीयत्वेन विहितानि। एतादृशः क्रमविपर्ययोऽपि संशोधनमपेक्षते।

(०९) संस्कारभास्करस्य विविधा भिन्नभिन्ना विधयोऽवलोकिताः स्युस्तदा याज्ञिककर्मणां कर्मकाण्डग्रन्थानां चाऽपि संशोधनं कृत्वा तेषां समीक्षितावृत्तिरावश्का प्रतिभाति।

(१०) संस्कारभास्करे समावेशितानां सन्दर्भानां प्रकरणानुसारेण संशोधनमपि दुष्करम्। यतः महत्सङ्ख्याकाः स्मृतिग्रन्था अप्रकाशिताः सन्ति।

(११) संस्कारभास्करः संस्कारप्रयोगविधौ प्रमाणभूतो ग्रन्थो मन्यतेऽत एव गुर्जरमहाराष्ट्रराजस्थानमालवाप्रान्तेष्वस्य प्रचुरः प्रचारो दरीदृश्यते।

(१२) संस्कारभास्करेति नैकेषु स्थलेषु मन्त्राणां विधीनां च प्रतीकरूपेण प्राप्तिर्भवति अत एवाऽस्मि शोधनिबन्धे सर्वसंस्कारसामान्यविधिगर्भाधानादारभ्य विवाहसंस्कारपर्यन्तं पूर्णान् विधीन् प्रस्तोतुं कृतेन विनम्र प्रयासेन जिज्ञासूनां नवोदित याज्ञिकानां च सुलभतया विधिग्रन्थः प्राप्येतेति किं बहुना ?

**श्रीरस्तु।**
**कल्याणमस्तु।**

## परिशिष्टम् – ०१
## संस्कारसंख्या भिन्नत्वम्।

**संस्कारभास्करः।**

(०१) गर्भाधानम्
(०२) पुंसवनम्
(०३) सीमन्तोन्नयनम्
(०४) जातकर्मः
(०५) नामकरणम्
(०६) निष्क्रमणम्
(०७) अन्नप्राशनम्
(०८) चूडाकरणम्
(चौलकर्म)
(०९) व्रतबन्धः
(उपनयनम्)
(१०) ऋग्वेदव्रतम्
(११) यजुर्वेदव्रतम्
(१२) सामवेदव्रतम्
(१३) अथर्ववेदव्रतम्
(१४) केशान्तः
(१५) समावर्तनम्
(१६) विवाहः च।

**अङ्गिराः।**

(०१) गर्भाधानम्
(०२) पुंसवनम्
(०३) सीमन्तोन्नयनम्
(०४) विष्णुबलिः
(०५) जातकर्म
(०६) नामकरणम्
(०७) निष्क्रमणम्
(०८) अन्नप्राशनम्
(०९) चौलकर्मः
(१०) उपनयनम्
(११-१४) चतुर्वेदव्रतम्
(१५) समावर्तनम्
(१६) विवाहः
(१७) पञ्चमहायज्ञम्
(१८) आग्रयणम्
(१९) अष्टकाः
(२०) श्रावणी
(२१) आश्वयुजी
(२२) मार्गशीर्षी
(२३) पार्वणम्
(२४) उत्सर्गः
(२५) उपाकर्मः च।

**आश्वलायनगृह्यसूत्रम्।**

(०१) विवाहः
(०२) गर्भाधानम्
(०३) पुंसवनम्
(०४) सीमन्तोन्नयनम्
(०५) जातकर्मः
(०६) नामकरणम्
(०७) चूडाकर्मः
(०८) अन्नप्राशनम्
(०९) उपनयनम्
(१०) समावर्तनम्
(११) अन्त्येष्टिः च।

**गौतमधर्मसूत्रम्।**

(०१) गर्भाधानम्
(०२) पुंसवनम्
(०३) सीमन्तोन्नयनम्
(०४) जातकर्म
(०५) नामकरणम्
(०६) अन्नप्राशनम्
(०७) चूडाकरणम्
(चौलकर्म)
(०८) उपनयनम्

(०९-१२) वेदव्रत
(१३) स्नान
(१४) सहधर्मिणी संयोग
(१५-१९) पञ्च महायज्ञ (देव, पितृ, मनुष्य, भूत एवं ब्रह्म)
(२०-२६)सप्त पाकयज्ञसंस्था (अष्टका, पार्वण, श्राद्ध, श्रावणी, आग्रहायणी, चैत्री एवं आश्वयुजी)
(२७-३३) सप्त हविर्यज्ञसंस्था (अग्न्याधेय, अग्निहोत्र, दर्शपौर्णमास, चातुर्मास्य, आग्रहायणेष्टि, निरूढपशुबन्ध एवं सौत्रामणी)
(३४-४०) सप्त सोमयज्ञसंस्था (अग्निष्टोम, अत्यग्निष्टोम, उक्थ्य, षोडशी, वाजपेय, अतिरात्र, एवं आप्तोर्याम) च।

**पारस्करगृह्यसूत्रम्।**

(०१) विवाहः
(०२) गर्भाधानम्
(०३) पुंसवनम्
(०४) सीमन्तोन्नयनम्
(०५) जातकर्मः
(०६) नामकरणम्
(०७) निष्क्रमणम्
(०८) अन्नप्राशनम्
(०९) चूडाकरणम्
(१०) उपनयनम्
(११) केशान्तः
(१२) समावर्तनम्
(१३) अन्त्येष्टि च।

**बौधायनगृह्यसूत्रम्।**

(०१) विवाहः
(०२) गर्भाधानम्
(०३) पुंसवनम्
(०४) सीमन्तोन्नयनम्
(०५) जातकर्मः
(०६) नामकरणम्
(०७) उपनिष्क्रमणम्
(०८) अन्नप्राशनम्
(०९) चूडाकर्म
(१०) कर्णवेधः
(११) उपनयनम्
(१२) समावर्तनम्
(१३) पितृमेधः च।

**मनुस्मृतिः।**

(०१) गर्भाधानम्
(०२) पुंसवनम्
(०३) सीमन्तोन्नयनम्
(०४) जातकर्म
(०५) नामकरणम्
(०६) निष्क्रमणम्
(०७) अन्नप्राशनम्
(०८) चूडाकरणम्
(०९) कर्णवेधः
(१०) उपनयनम्
(११) केशान्तः
(१२) समावर्तनम्
(१३) विवाहः
(१४) वानप्रस्थः
(१५) परिव्रज्या
(१६)पितृमेधश्च।

**वराहगृह्यसूत्रम्।**

(०१) जातकर्म:
(०२) नामकरणम्
(०३) दन्तोद्गमनम्
(०४) अन्नप्राशनम्
(०५) चूडाकरणम्
(०६) उपनयनम्
(०७) वेदव्रतानि
(०८) गोदानम्
(०९) समावर्तनम्
(१०) विवाह:
(११) गर्भाधानम्
(१२) पुंसवनम्
(१३) सीमन्तोन्नयनं च।

**वैखानसगृह्यसूत्रम्।**

(०१) ऋतुसङ्गमनम्
(०२) गर्भाधानम्
(०३) सीमन्तोन्नयनम्
(०४) विष्णुबलि:
(०५) जातकर्म
(०६) उत्थानम्
(०७) नामकरणम्
(०८) अन्नप्राशनम्
(०९) प्रवासागमनम्
(१०) पिण्डवर्धनम्
(११) चौलक:
(१२) उपनयनम्
(१३) पारायणम्
(१४) व्रतबन्धविसर्ग:
(१५) उपाकर्म:
(१६) उत्सर्जनम्
(१७) समावर्तनम्
(१८) पाणिग्रहणं च।

**व्यासस्मृति:।**

(०१) गर्भाधानम्
(०२) पुंसवनम्
(०३) सीमन्तोन्नयनम्
(०४) जातकर्म:
(०५) नामकरणम्
(०६) निष्क्रमणम्
(०७) अन्नप्राशनम्
(०८) चूडाकरणम्
(०९) कर्णवेध:
(१०) उपनयनम्
(११) वेदारम्भ:
(१२) केशान्त:
(१३) समावर्तनम्
(१४) विवाह:
(१५) विवाहाग्निपरिग्रह:
(१६) त्रेताग्निसङ्ग्रहश्च।

## परिशिष्टम् – २ (अ)

## उद्धृतवैदिकमन्त्राणाम् अकाराद्यनुक्रमणी।


### अ

अक्रन्दग्निः स्तनयन्।। ऋ०१४/४५/०४,
शु०य० १२/२१।।
अक्षन्नमीमदन्त ह्यव ।। शु०य० ०३/५१।।
अक्षुण्वन् परिवप।। पा०गृ०सू० ०२/०१/२०।।
अग्न आयाहि वीतये ।। सा० ०१/०१।।
अग्नये समिधमहार्षम्।। पा०गृ०सू ०२/०४/०३।।
अग्निमीळे पुरोहितम्।। ऋ० ०१/०१/०१।।
अग्निं दूतं पुरो ।। शु०य० २२/१७।।
अग्निर्ऋषिः पवमानः ।। शु०य० २६/०९।।
अग्निर्ज्योतिर्ज्योतिरग्निः ।। शु०य० ०३/०९/।।
अग्निर्भूतानामधिपतये।। पा०गृ०सू० ०१/०५/१०।।
अग्निर्मूर्द्धा दिवः ककुत्पतिः।। शु०य० ०३/१२।।
अग्निरैतु प्रथमो देवतानाम्०।।
पा०गृ०सू० ०१/०५/११।।
अग्ने न य सुपथा।। शु०य० ०५/३६।।
अग्ने पावक रोचिषा ।। शु०य० १७/८।।
अग्ने प्रायश्चित्ते त्वम्।। पा०गृ०सू० ०१/११/०२।।
अग्नेः सुश्रवः सुश्रव।। पा०गृ०सू० ०२/०४/०२।।
अघोरचक्षुरपतिघ्न्येधि।। पा०गृ०सू० ०१/०४/१६।।
अथ प्रातराहुते वाहुते।। ब्रा० ।।
अथाध्वर्योः प्रतिगरोरात्।। ब्रा० ।।
अद्भ्यः सम्भृतः पृथिव्यै।। शु०य० ३१/१७।।
अदितिदर्द्यौरदिति ।। शु०य० २५/२३।।
अध्यवो चदधिवक्ता।। शु०य० १६/०५।।
अनाधृष्टा पुरस्तात्।। शु०य० ३७/१३।।
अन्नपतेन्नास्यनो देह्यनमी०।। शु०य० ११/८३।।
अन्नात्परिस्त्रुतो रसम्।। शु०य० १९/७५।।
अन्नाद्याय व्यूहध्वम्।। पा०गृ०सू० ०२/०६/१७।।
अपामिदं न्ययनं समुद्र०।। शु०य० १७/०७।।
अपा सोमस्तमिन्द्र।। ब्रा० ।।
अपां रसमुद्वयसं।। ०९/०३।।
अभिप्रवन्तसमनेव०।। शु०य० १७/९६।।
अभ्यर्षतसुष्टुति०।। शु०य० १७/९८।।
अम्बेऽअम्बिकेम्बालिकेन ।। शु०य० २३/१८।।
अयमूर्जावतो वृक्ष।। पा०गृ०सू० ०१/१५/०६।।
अयाश्चाग्ने स्यनमि।। ब्रा० ।।
अर्यमणं देवं कन्या।। पा०गृ०सू० ०१/०६/०२।।
अलङ्करण सभूयः।। पा०गृ०सू० ०२/०६/२६।।
अवतत्य धनुष्ट्वं सह० ।। शु०य० १६/१३।।
अश्वपूर्वां रथमध्यां।। ऋ०खि० १२/०३।।
अश्वत्थेवोनिषदनं० ।। शु०य० १२/७०।।
असंख्याता सहस्राणि ।। शु०य० १६/५४।।
असुन्वन्तमयजमान०।। शु०य० १२/६२।।
असौ यस्ताम्रौ अरुण।। शु०य० १६/०६।।
असौ योव सर्पति।। शु०य० १६/०७।।
अस्माभव परशर्भव।। पा०गृ०सू० ०१/१६/१८।।
अस्मे रुद्रा मेहना पर्व० ।। शु०य० ३३/५०।।
अहिरिव भोगैः।। शु०य० २९/५१
अं शुनाते अं शुः।। शु०य० २०/२७।।

### आ

आ कृष्णेन रजसा।। शु०य० ३३/४३।।
आग्रयणश्च मे वैश्वदेव०।। शु०य० १८/२०।।
आजिघ्रकलशम्म० ।। शु०य० ०८/४२।।
आदित्यवर्णे तपसो०।। ऋ०खि० १२/०६।।
आदित्यं गर्भं पयसा।। शु०य० १३/४१।।
आनो नियुद्भिः शतिनी०।। शु०य० २७/२८।।
आ नो भद्राः क्रतवो ।। शु०य० २५/१४।।
आपः शिवाः शिव०।। पा०गृ०सू० ०१/०८/०५।।
आपः सृजन्तु स्निग्धानि।। ऋ०खि०१२/१२।।
आपःस्थ युष्माभिः।। पा०गृ०सू० ०१/०३/१३।।
आपो हि ष्ठा मयोभुव० ।। शु०य० ११/५०।।
आप्यायस्व समेतु ते ।। शु०य० १२/११२।।

आब्रह्मन्ब्राह्मणोब्रह्मर्चसी।। शु०य० २२/२२।।
आमागन्यशसा।। पा०गृ०सू० ०१/०३/१५।।
आमावाजस्यप्रसविज०।। शु०य० ०९/१९।।
आयं गौः पृश्निरक्रमीद०।। शु०य० ०३/०६।।
आयुष्मानग्ने।। शु०य० ३५/१७।।
आयुष्यं व्वर्च्चस्यं राय०।। शु०य० ३४/५०।।
आरात्रि पार्थिवं रजः ।। शु०य० ३४/३२।।
आरोहे ममश्या न ।। पा०गृ०सू० ०१/०७/०१।।
आर्द्रां पुष्करिणी पुष्टिम्।। ऋ०खि० १२/१४।।
आर्द्रां यः करिणीं यष्टिम्।। ऋ०खि० १२/१३।।

### इ

इदं विष्णुर्विचक्रमे।। शु०य० ५/१५।।
इदं हविः प्रजननम्मेऽ ।। शु०य० १९/४८।।
इन्द्रन्दैवीर्व्विशो।। शु०य० १७/८६।।
इन्द्रस्य स्यूससीन्द्राय।। शु०य० ०५/३०।।
इमम्मेव्वरुण।। शु०य० २१/०१।।
इमा रुद्राय तवसे कप०।। शु०य० १६/४८।।
इमं देवाऽअसपत्नम्।। शु०य० ०९/४०।।
इमं स्तनमूर्ज्जस्व०।। शु०य० १७/८७।।
इयं दुरुक्तं परि०।। पा०गृ०सू० ०२/०२/०८।।
इषिरो विश्वव्यचसे।। शु०य० १८/४१।।
इषे त्वोर्जे त्वा वायव ।। शु०य० ०१/०१।।
इह गावो निषीदन्त०।। पा०गृ०सू० ०१/०८/१०।।

### ई

ईदृक्षासऽएतादृक्षासऽ।। शु०य० १७/८४।।
ईदृङ्चान्यादृङ्।। शु०य० १७/८१।।
ईहरतिरिहमध्वर।। ब्रा० ।।

### उ

उच्चाते जातमन्धसो ।। शु०य० २६/१६।।
उच्चादिविदक्षिणावन्तोऽ- ।। ऋ० ८/६/३।।
उतस्मास्यद्रव० ।। शु०य० ०९/१५।।
उत्तिष्ठ ब्रह्मणस्पते ।। शु०य० ३४/५६।।
उदुत्तमं वरुण ।। शु०य० १२/१२।।
उदुत्यं जातवेद।। शु०य० ४१/०८।।
उद्गातेव शकुने साम।। ऋ० ०२/१२/०८।।
उद्बुध्यस्वाग्ने प्रति०।। शु०य० १५/५४।।
उद्यन् भ्राजभृष्णुरिन्द्रः।। पा०गृ०सू० ०२/०६/१६।।
उपज्मन्नुप वेतसेऽ-।। शु०य० १७/६।।
उपयाम गृहीतोसि सावित्रो० ।। शु०य० ०८/०७।।
उपैतु मां देव सखः।। ऋ०खि० १२/०७।।
उर्क् च मे सूनृता च मे।। शु०य० १८/०९।।
उशिक् पावकोऽअरतिः।। ऋ० १४/४५/०७,
शु०य० १२/२४।।
उशिगसि कविरङ्घारि।। शु०य० ०५/३२।।
उष्णेन वाय उदकेन।। पा०गृ०सू० ०२/०१/०६।।

### ऋ

ऋतजिच्चसत्य०।। शु०य० १७/८३।।
ऋतश्च सत्यश्च।। शु०य० १७/८२।।
ऋताषाड् ऋतधामाग्नि।। शु०य० १८/३८।।
ऋधङ्मन्त्रो।। अथ० ०५/०१/०१/०१।।
ऋध्याम स्तोमम्।। ऋ० ।।

### ए

एकमिषे विष्णुस्त्वा०।।पा०गृ०सू० ०१/०८/१-२।।
एताऽअर्षन्ति हृद्यात् ।। शु०य०१७/९३।।
एतावानस्य महिमातो।। शु०य० ३१/०३।।
एषाहदेवः प्रदिशो।। शु०य० ३२/०४।।
एहयातु वरुणः।। अथ० ०६/०८/७३/०१।।

### ओ

ओषधयः समवदन्त।। शु०य० १२/९६।।
ओषधीः प्रतिमोदध्वम्।। शु०य० १२/७७।।
ओषधेत्रायस्वधिते।। पा०ग०सू० ०२/१/१०।।
औहौवा औहोवा।। साम० ०४/०१/०४।।

### क

कदाचनस्तरीरसिने० ।। शु०य० ०८/०२।।
कर्दमेन प्रजाभूता।। ऋ०खि०१२/११।।
कन्याऽइव व्वहतु ।। शु०य० १७/९७।।
कया नश्चित्रऽआभुवदूती।। शु०य० २७/३९।।
काण्डात्काणा० ।। शु०य० १३/२०।।
काया नश्चा इत्रा।। साम० ०५/०१/२५।।
कार्षिरसिसमुद्रस्य।। शु०य० ०६/२८।।
कुलायिनी घृतवती।। शु०य० १४/०२।।
कांसोस्मितां हिरण्य०।। ऋ०खि०१२/०४।।
केतुङ्कृण्वन्नकेतवे ।। शु०य० २९/३७।।
कोदात्ककस्माऽअदात्।। शु०य० ०७/४८।।
कृणुष्वपाजः प्रसितिं।। शु०य० १३/०९।।
क्षुत्पिपासमलां ज्येष्ठाम्।। ऋ०खि० १२/०८।।

**ग**

गणानान्त्वागणपतिं ।। शु०य० २३/१९।।
गन्धद्वारां दुरा धर्षाम्।। ऋ०खि०१२/०९।।
गन्धर्व्वस्त्वा व्विश्वावसुः ।। शु०य० ०२/०३।।
गायत्रेण त्वा छन्दसा०।। शु०य० ०५/०२।।
गृभ्णामि ते सौभग०।। पा०गृ०सू० ०१/०६/०३।।
ग्रहाऽउर्ज्जा हुतयो ।। शु०य० ०९/०४।।

**घ**

घृतङ्घृतपावानः ।। शु०य० ०६/१९।।
घृतमिमिक्षे घृतमस्य।। शु०य० १७/८८।।

**च**

चत्वारि शृङ्गात्रयोऽ-।। शु०य० १७/९१।।
चन्द्रमा मनसो ।। शु०य० ३१/१२।।
चन्द्रां प्रभासां यशसा०।। ऋ०खि०१२/०५।।
चित्रावसोस्वस्तितेपारमशीय।। शु०य० ०३/१८।।

**ज**

जराङ्गच्छ परिधत्०।। पा०गृ०सू० ०१/०४/१२।।
ज्योति रसि विश्वरूपम्।। शु०य० ०५/३५।।

**त**

तच्चक्षुर्देव हितं।। शु०य० ३६/२४।।
ततो व्विराडजायत ।। शु०य० ३१/०५।।
तत्वायामि ब्रह्मणा ।। शु०य० १८/४९।।
तत्सवितुर्वरेण्यं ।। शु०य० ०३/३५।।
तनूनपाऽअग्नेसि०।। पा०गृ०सू० ०२/०४/०७।।
तनूनपादसुरो।। शु०य० २७/१२।।
तन्नो वातो मयोभु वातु ।। शु०य० २५/१७।।
तमीशानं जगतस्तस्थु०।। शु०य० २५/१८।।
तस्माऽअरङ्गमाम ।। शु०य० ११/५२।।
तस्मादश्वा अजायन्त।। शु०य० ३१/०८।।
तस्माद्यज्ञात्सर्वहुत ऋचः।। शु०य० ३१/०७।।
तस्माद्यज्ञात्सर्वहुतः ।। शु०य० ३१/०६।।
तस्यते पवित्रपते।। शु०य० ०४/०४।।
तान्पूर्वया निविदाहूमहे।। शु०य० २५/१६।।
तुभ्यमग्ने पर्यवहन्०।। पा०गृ०सू० ०१/०७/०३।।
तेजोऽसि शुक्रमस्यमृतमसि ।। शु०य० ०१/३१।।
तेन मामभिषिञ्चामि।। पा०गृ०सू० ०२/०६/११।।
तं पत्नीभिरनुगच्छेम देवा ।। शु०य० १५/५०।।
तं यज्ञं बर्हिषि ।। शु०य० ३१/०९।।
त्रयादेवा एकादश।। शु०य० २०/११।।
त्रातारमिन्द्रमवितार०।। शु०य० २०/५०।।
त्रातारमिन्द्रमवितार०।। साम० ०९/०१/०३।।
त्रिधाहितम्पणिभि०।। शु०य० १७/९२।।
त्रिपादूर्ध्वऽउदैत्पुरुषः ।। शु०य० ३१/०४।।
त्रीणि त आहुर्दिवि।। शु०य० २९/१५।।
त्रीणि पदा विचक्क्रमे ।। शु०य० ३४/४३।।
त्र्यम्बकं यजामहे।।शु०य० ०३/६०।।
त्र्यायुषंजमदग्नेः ।। शु०य० ०३/६२।।
त्वं नोऽअग्ने तव देव।। शु०य० ३४/१३।।
त्वं नोऽअग्ने वरुणस्य।। शु०य० २१/०३।।
त्वं यविष्ठुदाशुषो० ।। शु०य० १८/७७।।
त्वष्टातुरीपो अद्द्भुत।। शु०य० २१/२०।।
त्वाङ्गन्धर्व्वाऽअख० ।। शु०य० १२/९८।।
त्वामग्ने यजमाना।। ऋ०१४/४५/११,

शु०य० १२/२८।।
तां म आवह जातवेदो ।। ऋ०खि०१२/०२।।
तां म आवह जातवेदो ।। ऋ०खि०१२/१५।।

### द

दधिक्राव्णोऽअकारि० ।। शु०य० २३/३२।।
दिवस्परि प्रथमं यज्ञे।। ऋ० १४/४५/०१,
शु०य० १२/१८।।
दीर्घायुस्तऽओखधे ।। शु०य० १२/१००।।
देव सवितुः प्रसुव।।शु०य० ०९/०१।।
देवस्त्वा सवितुः।। शु०य००१/१०।।
देवस्यत्वासवितुः प्प्रस० ।। शु०य० ०९/३०।।
देवस्यत्वासवितुः।। शु०य० १८/३७।।
देवस्यत्वा सवितुः ।। शु०य० २०/०३।।
देवस्यत्वा....प्राश्नामि।। पा०गृ०सू० ०१/०३/१७।।
देवं देवं वोऽवसे।। शु०य० ३३/९१।।
देवा गातु विदो।। शु०य० ०८/२१।।
देवानाम्भद्रा सुमति-।। शु०य० २५/१५।।
देवी जोष्ट्री सरस्वत्य।। शु०य० २१/५१।।
देवीं वाचमजनयन्त।। पा०गृ०सू० ०१/१९/०२।।
दृशानो रुक्मऽउर्विया।। ऋ० १४/४५/०८,
शु०य० १२/२५।।
द्यौः शान्तिरन्तरिक्षं ।। शु०य० ३६/१७।।
द्यौस्त्वा ददातु।। पा०गृ०सू० ०३/१५/२१।।
द्रविणो दा द्रविणसस्तु०।। अष्टक ०१/०७/०४।।
द्रविणोदाः पिपीषति ।। शु०य० २६/२२।।
द्रापेऽअन्धसस्पते ।। शु०य० १६/४७।।

### ध

धानाः करम्भः।। शु०य० १९/२१।।
धान्यमसिधिनुहि ।। शु०य० ०१/२०।।
धामच्छ्दग्निरिन्द्रो ।। शु०य० १८/७६।।
धामन्ते विश्वम्भुवन०।। शु०य० १७/९९।।
धृष्टिरस्यपाग्नेऽअग्नि० ।। शु०य० ०१/१७।।
ध्रुवमसि ध्रुवं त्वा०।। पा०गृ०सू० ०१/०८/१९।।

### न

नतद्द्रक्षां सिनपिशाचा०।। शु०य० ३४/५१।।
नमस्तऽआयुधायाना।। शु०य० १६/१४।।
नमस्ते रुद्र मन्यव०।। शु०य० १६/०१।।
नमस्ते हरसे शोचिषे।। शु०य० १७/११।।
नमो गणेभ्यो गणपति० ।। शु०य० १७/२५।।
नमोऽस्तु रुद्रेभ्यो ये पृ०।। शु०य० १६/६६।।
नमोऽस्तु सर्पेभ्यो ।। शु०य० १३/०६।।
नमः शम्भवाय च।। शु०य० १६/४१।।
नमः श्यावास्याय।। पा०गृ०सू० ०१/०३/१८।।
नमः स्रुत्याय च पथ्या०।। शु०य० १६/३७।।
नवो नवो भवति।। ऋ० ८/३/२३।।
नहिस्पशमविद०।। शु०य० ३३/६०।।
नाभ्याऽआसिद० ।। शु०य० ३१/१३।।
निकामे निकामे नः पर्ज्ज०।। शु०य० २२/२२।।
निकामे निकामे नः।। ब्रा० ।।
नीलग्रीवाः शितिकण्ठा दिवं ।। शु०य० १६/५६।।
नीलग्रीवाः शितिकण्ठाः ।। शु०य० १६/५७।।
नृषदे वेडप्सुषदे।। शु०य० १७/१२।।

### प

पञ्चनद्यः सरस्वतीमपि ।। शु०य० ३४/११।।
पयः पृथिव्याम्पयऽ ।। शु०य० १८/३६।।
परं मृत्यो अनु परेहि।। शु०य० ३५/०७।।
परि ते धन्वनो।। शु०य० १६/१२।।
परि त्वा गिर्वणो।। शु०य० ०५/२९।।
परिधास्यायै यशो०।। पा०गृ०सू० ०२/०६/२०।।
परिवाजपतिः कवि।। शु०य० ११/२५।।
पवित्रे स्थो वैष्णव्यौ ।। शु०य० ०१/१२।।
पावकया यश्चितय०।। शु०य० १७/१०।।
पावका नः सरस्वती ।। शु०य० २०/८४।।
पितृभ्यः स्वधायिभ्यः।। शु०य० १९/३६।।
पुनन्तु मा देवजनाः ।। शु०य० १९/३९।।
पुनन्तु मा देवजनाः।। अथ० ०६/०२/१९/०१।।
पुनस्त्वादित्यारुद्रा।। शु०य० १२/४४।।

पुनानः सोमा धारा।। साम०१४/०१/३५।।
पुरुष एवेदं सर्वं ।। शु०य०३१/०२।।
पूर्णादर्व्विपरापत।। शु०य० ०३/४९।।
पृषदश्वा मरुतः ।। शु०य०२५/२०।।
प्रजापते न त्वदेता ।। शु०य० २३/६५।।
प्रजापतये त्वा परि०।। पा०गृ०सू० ०२/०२/२।।
प्रजापतिर्विश्वकर्मण०।। शु०य० १८/४३।।
प्रतिपदसि प्रतिपदे।। शु०य० १५/०८।।
प्रतिष्ठेस्थो।। पा०गृ०सू० ०२/०६/३०।।
प्र मुञ्च धन्वनस्तव।। शु०य० १६/०९।।
प्राच्यै दिशे स्वाहा०।। शु०य० २२/२४।।
प्राण इति पूर्वः।। पा०गृ०सू० ०१/१६/११-१५।।
प्राणदाऽअपानदा ।। शु०य० १७/१५।।
प्राणापानौ मे तर्पय।। पा०गृ०सू० ०२/०६/१८।।
प्राणेन्नमशीय स्वाहा।। पा०गृ०सू००१/१९/०४।।
पितरः शुन्धद्ध्वमिति।। पा०गृ०सू० ०२/०६/१९।।


### ब


बृहस्पतेऽअति यदर्योऽ-।। शु०य० २६/०३।।
बृहस्पतेश्छदिरसि।। पा०गृ०सू० ०२/०६/२९।।
ब्रह्म जज्ञानं प्रथम्।। शु०य० १३/०३।।
ब्राह्मणोऽस्य मुख- ।। शु०य० ३१/११।।


### भ


भद्द्रङ्कर्ण्णेभिः शृणुयाम ।। शु०य० २५/२१।।
भुज्युः सुपर्णो यज्ञो।। शु०य० १८/४२।।
भूरसि भूमिरसि दिति०।। शु०य० १३/१८।।
भूर्भुवः स्वः तत्स।। शु०य० ३६/०३।।


### म


मनो जूतिर्ज्जुषतामा०।। शु०य० ०२/१३।।
मनसः काममाकूतिं वाचः।। ऋ०खि०१२/१०।।
मनसः काममाकूतिं वाचः।। शु०य० ३९/०४।।
मम व्रतेते हृदयम्।। पा०गृ०सू० ०२/०२/१६।।
मम व्रतेते हृदयम्।। पा०गृ०सू० ०१/०८/०९।।
महीद्यौः पृथिवि च ।। शु०य० ०८/३२।।
माता रुद्राणां दुहिता।। पा०गृ०सू० ०१/०३/२७।।
मानस्तोके तनये।। शु०य० १६/१६।।
मा नो महान्तमुतमानः।। शु०य० ३३/०८।।
मांसोधः स्यादधि०।। पा०गृ०सू० ०१/०३/२९-३१।।
मूर्द्धानन्दिवोऽअरति०।। शु०य० ३३/०८।।
मेधाम्मे वरुणो ददातु।। शु०य० ३२/१५।।
मेधां मे देवः।। पा०गृ०सू० ०२/०४/०८।।
मधु वाताऽऋतायते।। शु०य० १३/२७।।
मधु नक्तमुतोषसो।। शु०य० १३/२८।।
मधु मान्नो वनस्ति०।। शु०य०१३/२९।।
मित्रस्य चक्षुर्धरुणं।। पा०गृ०सू० ०२/०२/११।।
मित्रस्य त्वा चक्षुषा।। पा०गृ०सू० ०१/०३/१६।।
मित्रस्य मा चक्षुषे।। सु०य० ०५/३४।।


### य


यज्ञ यज्ञं गच्छः ।। शु०य० ०८/२२।।
यज्ञेन यज्ञमयजन्त ।। शु०य० ३१/१६।।
यज्ञोदेवानाम्प्रत्येति ।। शु०य० ०८/०४।।
यज्ञोपवीतं परमं ।। पा०गृ०सू० ०२/०२/११।।
यतोयतः समीहसे ततो ।। शु०य० ३६/२२।।
यत्कर्मणा त्यरीरिचं।। ब्रा० ।।
यत्क्षुरेण मज्यता।। पा०गृ०सू० ०२/०१/१८।।
यत्पुरुषं व्वदधुः ।। शु०य० ३१/१०।।
यत्पुरुषेण हविषा ।। शु०य० ३१/१४।।
यत्ते सुसीमे हृदयं।। पा०गृ०सू० ०१/११/०९।।
यथेमां व्वाचङ्कल्याण०।। शु०य० २६/०२।।
यदद्यसूरऽउदितेऽनागा ।। शु०य० ३३/२०।।
यद्क्रन्दः प्रथमं जाय० ।। शु०य० २९/१२।।
यदा बद्ध्नन्दाक्षायणा०।। शु०य० ३४/५२।।
यदैषि मनसा दूरम्।। पा०गृ०सू० ०१/०४/१५।।
यद्दत्तं यत्परादानम्।। शु०य० १८/३४।।
यद्येशोप्सरसामिन्द्रः।। पा०गृ०सू० ०२/०६/२४।।
यन्मधुनो मधव्यम्।। पा०गृ०सू० ०१/०३/२०।।

यन्मेच्छिद्रञ्चक्षुषो।। शु०य० ३६/०२।।
यमाय त्वाङ्गिरस्वते ।। शु०य० ३८/०९।।
यशसामाद्यावा।। पा०गृ०सू० ०२/०६/२१।।
यस्तेऽअद्य कृणवत्।। ऋ० १४/४५/०९,
शु०य० १२/२६।।
यस्य कूर्मो गृहे।। शु०य० १७/५२।।
य: शुचि: प्रयतो।। ऋ०खि० १२/१६।।
याऽकृतं तन्वयं या०।। पा०गृ०सू० ०१/०४/१३।।
या आहारज्जमदग्नि:।। पा०गृ०सू० ०२/०६/२३।।
याऽओषधी: पूर्व्वा ।। शु०य० १२/७५।।
या ते पतिघ्नी प्रजा०।। पा०गृ०सू० ०१/११/०४।।
या ते रुद्र शिवातनूरघोरा ।। शु०य० १६/०२।।
या ते हेतिमीढुष्टम।। शु०य० १६/११।।
या: फलिनीर्याऽ-।। शु०य० १२/८९।।
यावाङ्कशामधुम० ।। शु०य० ०७/११।।
यामिषुं गिरिशन्त हस्ते।। शु०य० १६/०३।।
युञ्जते मन उत।। शु०य० ११/०४।।
युञ्जान प्रथमं मन०।। शु०य० ११/०१।।
युवासुवासा: परिवीत।। पा०गृ० ०२/०२/०९।।
येऽअप्स्वन्तरग्नय:।। पा०गृ०सू० ०२/०६/१०।।
ये तीर्थानि प्रचरन्ति।। शु०य० १६/६१।।
ये ते शतं वरुणये।। ब्रा० ।।
ये देवा देवानां यज्ञिया ।। शु०य० १७/१३।।
ये देवा देवेष्वधि ।। शु०य० १७/१४।।
ये न भूरिश्चरा दिवं।। पा०गृ०सू० ०२/०१/१६।।
ये न श्रियमकृणुतां।। पा०गृ०सू० ०२/०६/१२।।
ये ना वपत्सविता।। पा०गृ०सू० ०२/०१/११।।
येनेन्द्राय बृहस्पति।। पा०गृ०सू० ०२/०२/०७।।
ये भूतानामधिपतयो ।। शु०य० १६/५९।।
यो मे दण्ड: परापत।। पा०गृ०सू० ०२/०२/१२।।
यो व: शिवतमो ।। शु०य० ११/५१।।

### र

रक्षसां भागोसि निरस्तं ।। शु०य० ०६/१६।।
रक्षोहणं वलगहनं वैष्ण०।। शु०य० ०५/२३।।
रक्षोहणो वो व्वलगहन: ।। शु०य० ०५/२५।।
रक्षोहा व्विश्श्वचर्षणि० ।। शु०य० २६/२६।।
रयिश्चमे रायश्चमे ।। शु०य० १८/१०।।
रूपेण वो रूपमभ्याङ्गाम्।। शु०य० ०७/४५।।
रेतो मूत्रँ विजहाति।। शु०य० १९/७६।।
रोचिष्णुरसि।। पा०गृ०सू० ०२/०६/२८।।

### व

वयं नामप्रब्रमवाम०।। शु०य० १७/९०।।
वयं सोम व्रते ।। शु०य० ०३/५६।।
वरुणस्योत्तम्भनमसि० ।। शु०य० ०४/३६।।
वसो: पवित्रमसि०।। शु०य० ०१/०३।।
वर्ष्मोऽस्मि समाना।। पा०गृ०सू० ०१/०३/०८।।
वाङ्मऽआयेस्तु।। पा०गृ०सू० ०१/०३/२५।।
वाजे वाजे वतवाजिनो ।। शु०य० ०९/१८।।
वाममद्य सवितर्वा०।। शु०य० ०८/०६।।
वायो नो अद्य प्रसु।। पा०गृ०सू० ०१/१९/०३।।
वायो ये ते सहस्रिणो ।। शु०य० २७/३२।।
वास्तोस्पते प्रतिजानी।। ब्रा० ।।
विज्यन्धनु: कपर्द्दिनो ।। शु०य० १६/१०।।
विद्मा तऽअग्ने।। ऋ० १४/४५/०२,
शु०य० १२/१९।।
विभूरसि प्रवाहणो।। शु०य० ०५/३१।।
विराजो दोहोसि ।। पा०गृ०सू० ०१/०३/१२।।
विश्वकर्मन् हविषा ।। शु०य० ०८/४६।।
विश्वजित् कल्याण्यै।। अथ० ०६/११/१०७/०३।।
विश्वस्य केतुर्भवनस्य।। ऋ०१४/४५/०६,
शु०य० १२/२३।।
विश्वानि देव सवित० ।। शु०य० ३०/०३।।
विश्वाभ्यो मा ।। पा०गृ०सू० ०२/०६/३१।।
विष्णो रराटमसि ।। शु०य० ०५/२१।।
वृत्रस्यासिकनी।। शु०य० ०४/०३।।
वेद ते भूमिहृदयं।। पा०गृ०सू० ०१/१६/१७।।
वेदोऽसि येन त्वं।। शु०य००२/२१।।
व्रतेन दीक्षामाप्नोति ।। शु०य० १९/३०।।

व्रीहयश्च मे यवाश्च।। शु०य० १८/१२।।

### श

शतञ्जीव शरदो वर्ध०।। ब्रा०।।
शतमिन्नु शरदोऽअन्ति ।। शु०य०२५/२२।।
शन्नो देवीरभि०।। अ० १/१,शु०य० ३६/१२।।
शुक्रज्योतिश्चचित्र०।। शु०य० १७/८०।।
शुद्धवाल: सर्वशुद्ध०।। शु०य० २४/०३।।
शिवेनव्वचसा त्वा।। शु०य० १६/०४।।
शिवो नामासि स्व०।। शु०य० ०३/६३।।
श्रायन्त इव सू रायां।। साम० ०७/०२/०५।।
श्रिये जात: श्रिय:।। ऋ० ०७/०४/०४।।
श्रीणामुदारो धरुणो।। ऋ० १४/४५/०५,
शु०य० १२/२२।।
श्रीवर्चस्वमायुष्यमारोग्यम्।। ब्रा० ।।
श्रीश्चते लक्ष्मीश्च ।। शु०य० ३१/२२।।

### स

सजोषाऽइन्द्रसगणो ।। शु०य० ०७/३७।।
सत्वन्नोऽअग्ने ।। शु०य० २१/४।।
सत्रस्यऽऋद्धिरस्यगन्म०।। शु०य० ०८/५२।।
स न: पावक दीदिवो०।। शु०य० १७/०९।।
सप्ततेऽअग्नेसमिध:।। शु०य० १७/७९।।
सप्तास्यासन् परिध० ।। शु०य० ३१/१५।।
समख्ये देव्या धिया०।। शु०य० ०४/२४।।
समञ्जन्तु विश्वे देवा:।। पा०गृ०सू० ०१/०४/१४।।
समुद्र वा प्रहिणोमि।। पा०गृ०सू० ०१/०३/१४।।
समुद्रस्यत्वावकया०।। शु०य० १७/०४।।
समुद्रादुर्म्मिर्मधुर्मां ।। शु०य० १७/८९।।
समुद्रेत्वा नृमणा।। ऋ० १४/४५/०३,
शु०य० १२/२०।।
सरस्वति प्रेदभव।। पा०गृ०सू० ०१/०७/०२।।
सर्वेषां वा एष वेदानां।। ब्रा० ।।
सहस्रशीर्षा पुरुष:।। शु०य० ३१/०१।।
सहैषयज्ञऽउवाच।। ब्रा० ०१/०६/०१/२८।।
समुद्रोऽसि विस्वव्यचा।। शु०य० ०५/३३।।
सम्यक् स्रवन्ति।। शु०य० १७/९४।।
सर्वामृद्धिमृघ्नुयामिति।। ब्रा० ।।
सवितात्त्वासवानाम् ।। शु०य० ०९/३९।।
सवितापश्चातात्सविता०।। ऋ० ०७/०८/०१।।
सवित्रा प्रसूता दैव्या।। पा०गृ०सू० ०२/०१/०९।।
सिन्धोरिवप्राद्ध्व०।। शु०य० १७/९५।।
सुचक्षा अहमक्षीभ्यां।। पा०गृ०सू० ०२/०६/१९।।
सुपर्णोसि गरुत्क्मास्त्रि० ।। शु०य० १२/०४।।
सुषुम्ण: सूर्यरश्मिश्च०।। शु०य० १८/४०।।
सूर्यरश्मिर्हरिकेश: ।। शु०य० १७/५८।।
स्थिरो भविड्वङ्ग।। शु०य० ०८/१८।।
सोमऽएवतो राजेम।। पा०गृ०सू० ०१/१५/०८।।
सं हितो विश्वसामा।। शु०य० १८/३९।।
स्योना पृथिवि नो ।। शु०य० ३६/१३।।
स्वतवाँश्च प्रघासी।। शु०य० १७/८५।।
स्वस्ति नऽइन्द्रो ।। शु०य० २५/१९।।
स्वस्ति मात्र उत।। अथ० ०१/०६/३१/०४।।
स्वस्ति रिद्धि प्रपथे।। ऋ० ।।
स्वादिष्ठया मदिष्ठया ।। शु०य०२६/२५।।
स्वाहा मरुद्भि: परि०।। शु०य० ३७/१३।।
स्वाहा यज्ञं मनस:।। शु०य० ०४/०६।।

### ह

हिङ्काराय स्वाहा ।। शु०य० २२/०७।।
हिमस्यत्वा जरायुणाग्ने ।। शु०य० १७/०५।।
हिरण्यगर्भ: समव० ।। शु०य० २३/०१।।
हिरण्यरूपाऽउषसो० ।। शु०य० १०/१६।।
हिरण्यवर्णां हरिणीं।। ऋ०खि०१२/०१।।

## परिशिष्ट – २ (ब)

## पौराणिकमन्त्राणाम् अकाराद्यनुक्रमणि।


**अ**

अक्रोधनाः शौचपराः।।७०।।ब्र०स०पृ.३४०।।
अगजाननपद्मार्कम् ।।०१,११४।।
अग्ने त्वमैश्वरं तेजः।। ८३।। ब्र०स०पृ. ३५५।।
अग्निं प्रज्वलितं।। ७९।। या०र०पृ. ४६।।
अङ्गीकुर्वन्तु कर्मै।। ६८।।ब्र०स०पृ. ३४०।।
अङ्गैश्च सहिताः ।।२४,३५,९९।। ब्र०स०पृ.३३।।
अज्ञानाज्ज्ञानतो वापि।। ७८।। या०र०पृ. ४२।।
अदुष्टभाषणाः सन्तु ।। ७१।। ब्र०स०पृ. ३४०।।
अन्यथा शरणं नास्ति।। ९१।। ब्र०स०पृ. ५५।।
अपराधसहस्राणि।। ९५।। ब्र०स०पृ. ५५।।
अपवित्रः पवित्रो वा।। ३१,७४।। ब्र०स०पृ. ३४।।
अप्रजायां तु कन्या।। १६७।। ब्र०स०पृ. ४४९।।
अभीप्सितार्थसिद्ध्यर्थं।। ०७।। ब्र०स०पृ. २९।।
अव्यङ्गेऽपतिते।। १४०।। ब्र०स०पृ. ४१८।।
अश्वत्थो वटवृक्ष।। १४८।। ब्र०स०पृ. ४२४।।

**आ**

आचार्यस्तु यथा स्वर्गे।। ६०।। ब्र०स०पृ. ३३९।।
आदित्याद्याः ग्रहाः।। ५३।। ब्र०स०पृ. ३३८।।
आदिदेव नमस्तुभ्ये।। ११६।।
आपदामपहर्तारं।। १६।। रा०र०३५।।
आयान्तु मम शान्त्यर्थं।।२५,३६।।ब्र०स०पृ. ३३।।
आयुरारोग्यदानेन।। ८५।।ब्र०स०पृ.३६२।।
आयुरारोग्यपुत्रादि।। ५२।। ब्र०स०पृ. ३३८।।
आवाहनं न जानामि।। ९०।। ब्र०स०पृ. ५५।।
आवाहयामि तत् कुण्डं।। ७५।। या०र०पृ. ४२।।
आवाहयाम्यहं विप्र।। ५९।। ब्र०स०पृ. ३३९।।

**इ**

इन्द्रादिभिश्च दिक्पालै।। ५४।। ब्र०स०पृ. ३३८।।
इमं वोऽर्घं प्रयच्छामि।। ५८।। ब्र०स०पृ. ३३८।।

**ऋ**

ऋत्विजश्च यथा पूर्वं।। ७२।। ब्र०स०पृ. ३४०।।

**ओ**

ॐ नमामि क्षेत्रपालम्।। ८४।। ब्र०स०पृ. ३६२।।

**क**

कन्यां लक्षणसम्पन्नाम्।। १५३।। ब्र०स०पृ. ४२९।।
कलशस्य मुखे विष्णुः।।२२,९७।।ब्र०स०पृ. ३३।।
कामधेनु समुद्भूतम्।। १६६।। ब्र०स०पृ. ४४९।।
कुक्षौ तु सागराः सर्वे।। २३,९८।। ब्र०स०पृ. ३३।।
कुटुम्बं पालयिष्यामि।। १५९।। ब्र०स०पृ. ४४१।।
क्षेत्रस्याधिपते देवि।। १२८।। ब्र०स०पृ. ३८२।।

**ग**

गङ्गा गोमतिगोपति।। १४७।। ब्र०स०पृ. ४२४।।
गङ्गा सिन्धुसरस्वती।। १५०।। ब्र०स०पृ. ४२५।।
गजाग्निवेदा उडुराट्।। १२१।। ब्र०स०पृ. ३७७।।
गजाननं भूतगणादि।। १२२।। कर्म०पृ. ३२।।
गणनाथ-सरस्वती।। ०२,११५।।
गतं पापं गतं दुःखम्।। ९२।। ब्र०स०पृ. ५५।।
गौरीपुत्रो यथा स्कन्दः ।।१२६।।ब्र०स०पृ. ३८२।।
गौरीं कन्यामिमां विप्र।। १५६।।
गौरी श्रीरदितिर्दितिश्च।। १४५।। ब्र०स०पृ. ४२४।।
ग्रहयागस्य निष्पत्ता।। ७३।। ब्र०स०पृ. ३४०।।
ग्रहा राज्यं प्रयच्छन्ति।। ८१।। कर्म०पृ. २२४।।

**च**

चरणाक्षालनोद्देवा।। ५७।। ब्र०स०पृ. ३३८।।

**ज**

जननी जन्मसौख्यानां।। १२५।। ब्र०स०पृ. ३८२।।
जपच्छिद्रं तपश्छिद्र।। ९६।।
जपयज्ञैस्तथा होमे।। ६३।। ब्र०स०पृ. ३३९।।

**त**

तदेव लग्नं सुदिनम्।। १०,१५२।।ब्र०स०पृ. ३०।।
तिथिर्विष्णुस्तथावारो ।। १९।।
त्वत्तो मेऽखिलसौभाग्य।।१५८।।ब्र०स०पृ. ४४१।।
त्वत्तोये सर्वतीर्थानि।। २८,१०३।।ब्र०स०पृ. ३४।।
त्वयि तिष्ठन्ति सर्वेऽपि।।३०,४१।।ब्र०स०पृ. ३४।।

**द**

देवदानव संवादे।। २७,१०२।।ब्र०स०पृ. ३४।।
देवेन्द्राणि नमस्तुभ्यं।। १४३।। ब्र०स०पृ. ४१९।।
दु:खे धीरा सुखे हृष्टा ।। १६२।।ब्र०स०पृ. ४४२।।

**ध**

धिषणा वृद्धिमाता च।। १२९।। ब्र०स०पृ. ३८३।।
धूम्रकेतुर्गणाध्यक्ष:।। ०४।। ब्र०स०पृ. २९।।
ध्येय: सदा सवितृ ।। ३२।। ब्र०स०पृ. ३७।।

**न**

नमस्ते शारदे देवी।। १३६।।
नमो नमस्ते स्फटिक ।।१०६।।ब्र०स०पृ. ३२१।।
नेत्राणि त्रितयम् ।। १४६।। ब्र०स०पृ. ४२४।।

**प**

पाञ्चजन्याय विद्महे।। ३३।। ब्र०स०पृ. ३६।।
पावना: सर्ववर्णानाम्।।४८,६६।।ब्र०स०पृ. ३३८।।
पाशपाणे नमस्तुभ्यम्।।४३,१०७।।ब्र०स०पृ. ३२१।।
पुण्याहवाचनं दैवे।। ४५,१०९।। सु०वि०पृ. ३४।।
पृथिव्यादिमहाभूता:।। १५४।। ब्र०स०पृ. ४३०।।
पृथ्वि त्वया धृता लोका०।। २०।। ब्र०स०पृ. १५।।
प्रमादात्कुर्वतां कर्म।। १११।।

**ब**

ब्रह्मवक्त्रं भुजौ।। ७७।। या०र०पृ. ४२।।
ब्रह्माण्डोदरतीर्थानि ।। २६,३७,१०१।।ब्र०स०पृ. ३३।।
ब्राह्मणा जङ्गमं तीर्थम्।। ६५।। ब्र०स०पृ. ३३९।।
ब्राह्मणा: सन्तु मे शस्ता:।। ६२।। ब्र०स०पृ. ३३९।।

**भ**

भास्वान्काश्यपगोत्रजो।। १३४।। ब्र०स०पृ. ३९४।।
भौमान्तरिक्षदेवैश्च।। ५५।। ब्र०स०पृ. ३३८।।

**म**

मन्त्रहीनं क्रियाहीनम्।। ९३।। ब्र०स०पृ. ५५।।
मम वंशकुले जाती।। १५५।। ब्र०स०पृ. ४३०।।
महर्षेर्गोत्रसम्भूता:।। ८९।। ब्र०स०पृ. ३६८।।
मिष्टान्नव्यञ्जनादीनि।। १६०।। ब्र०स०पृ. ४४१।।
मृत्युञ्जय महादेव।। ८२।। या०र०पृ. ५०।।

**य**

यत्कृपालोचनात्सर्वा।। ६९।। ब्र०स०पृ. ३४०।।
यत्र योगेश्वर: कृष्ण:।। १२।। भ०गी०१८/७८।।
यथा चतुर्मुखो ब्रह्मा।। ६१।। ब्र०स०पृ. ३३९।।
यथोक्तनियमैर्युक्ता।। ५१।। ब्र०स०पृ. ३३८।।
यदक्षरपदभ्रष्टम्।। ९४।। ब्र०स०पृ. ५५।।
यदङ्गत्वेन भो देव्य:।। ४७।। ब्र०स०पृ. ३३४।।
यद्वाक्यामृतसंसिक्ता।। ५०।। ब्र०स०पृ. ३३८।।
यस्यस्मरणमात्रेणे।। ११३।। वि०स०ध्यानम्।।
यस्य स्मृत्या च।। ११२।। नै०प्र०पृ. १४७।।
यान्तु मातृगणा: सर्वे।। ११७,११९ ।।कर्म०पृ. २४८।।
ये च कुण्डे स्थिता देवा:।। ७६।। या०र०पृ. ४२।।
येषां देहे स्थिता वेदा:।। ६४।। ब्र०स०पृ. ३३९।।
यं यं यं यक्षरूपं।। ८६।। ब्र०स०पृ. ३६२।।

**र**

रक्ताम्भोधिस्थ पोतो।। ८०।। सु०वि०पृ. ८१।।

**ल**

लक्ष्मी: कौस्तुभ।। १५१।। ब्र०स०पृ. ४२५।।
लम्बोदर नमस्तुभ्यम्।।१२३,१३२।।ब्र०स०पृ. ३१९।।
लाभस्तेषां जयस्तेषा।। ११।। ब्र०स०पृ. ३०।।

**व**

वागर्थाविव सम्पृक्तौ।। १८।। रघु० ०१/०१।।
वाचा दत्ता त्वया कन्या।। १४२।। ब्र०स०पृ. ४१९।।

वाचा दत्ता मया कन्या।। १४१।। ब्र०स०पृ. ४१९।।
वाल्मीक: सनक:।। १४९।। ब्र०स०पृ. ४२४।।
विद्यारम्भे विवाहे च।। ०५।। ब्र०स०पृ. २९।।
विनायकं गुरुं भानु।। १४।। ब्र०स०पृ. ३०।।
विश्वेशं माधवं ढुंढि।। १५।। सु०वि०पृ. ०५।।
विष्णुं जामातरम्।। १६८।। ब्र०स०पृ. ४४९।।

**श**

शुक्लाम्बरधरं देवम्।। ०६।। ब्र०स०पृ. २९।।
शङ्करं शङ्कराचार्यम्।। १७।। ब्र०स०पृ. ०२।।
शुचि: शृङ्गारभूषाऽहम्।। १६१।। ब्र०स०पृ. ४४१।।
शिव: स्वयं त्वमेवासि।।२९,१०४।।ब्र०स०पृ. ३४।।
श्रीपूर्वसप्तमातृश्च ।। ४६।। ब्र०स०पृ. ३३४।।
श्रीमत्पङ्कजविष्टरो।। १४४।। ब्र०स०पृ. ४२३।।
श्रीवर्चस्वमायुष्य।। ११०।।
श्रोत्रिया: सत्यवाचश्च।। ६७।। ब्र०स०पृ. ३४०।।

**ष**

षष्ठीदेवि नमस्तुभ्यं ।। १२४।। ब्र०स०पृ. ३८२।।

**स**

सर्वदा सर्वकार्येषु।। ०९।। ब्र०स०पृ. २९।।
सर्वमङ्गलमाङ्गल्ये।। ०८।। स०श०११/१०।।
सर्वभूताश्रया।। ८८।। ब्र०स०पृ. ३६८।।
सर्व विघ्नानपाकृत्य।। १२७।। ब्र०स०पृ. ३८२।।
सर्वेष्वारब्धकार्येषु।। १३।। ब्र०स०पृ. ३०।।
सर्वे समुद्रा: सरित:।। २१।। या०र०पृ. ०७।।
सुखेन सर्वकर्माणि।। १६३।। ब्र०स०पृ. ४४२।।
सुमुखश्चैकदन्तश्च।। ०३।। ब्र०स०पृ. २९।।
सम्पूज्य गन्ध माल्या।। ४४,१०८।। सु०वि०पृ. ३४।।
स्वस्वकर्मरता नित्यम्।। ४९।। ब्र०स०पृ. ३३८।।
स्वागतं वो द्विजश्रेष्ठा ।। ५६।। ब्र०स०पृ. ३३८।।

**ह**

हिरण्यगर्भगर्भस्थ।। ८७।। ब्र०स०पृ. ५०।।
हिमवत्युत्तरे पार्श्वे।। १२०।। ब्र०स०पृ. ३७७।।
होमयज्ञादिकार्येषु।। १६४।। ब्र०स०पृ. ४४३।।

## परिशिष्टम् – ०३

## पादटीपोद्धृतपौराणिकमन्त्राणाम् अकाराद्यनुक्रमणी।


### अ

अक्षताश्च सुरश्रेष्ठ।। ब्र०स०पृ. ४६।।
अक्षतांश्च वरश्रेष्ठ।। ब्र०स०पृ. ४६।।
अग्नये गन्धादिकम् । विष्णुधर्मोत्तरे–मध्येऽपि
अग्निर्वैश्वानरो वह्नि।। सु०वि०पृ. ८०।।
अग्निं प्रज्वलितं वन्दे।। या०र०पृ. ४६।।
अङ्गुष्ठमूलस्य तले ब्राह्मम्।। मनु००२/५९।।
अदितिर्देवमाता च ।। सु०वि०पृ. ०६।।
अनेकरूपभेदेन प्राणिनाम्।। या०र०पृ. ५२।।
अन्नं चतुर्विधं स्वादु ।। ब्र०स०पृ. ४९।।
अपक्रामन्तु भूतानि।। ब्र०स०पृ. ३२।।
अपवित्र: पवित्रो वा।। ब्र०स०पृ. ३४।।
अपसर्पन्तु ते भूता।। ब्र०स०पृ. ३२।।
अबीलमायाषोवृद्धि: ।। परम्परा।।
अबीलं च गुलालं च।। ब्र०स०पृ. ४८।।
अमाषोर्धश्च भवति।। कर्म०पृ. २८२।।
अर्क: पलाशखदिरा।। ब्र०स०पृ. ३५५।।
अर्धकायं महावीर्यम्।। या०र०पृ. ४९।।
अविघ्नो मण्डपश्चैव।। ब्र०स०पृ. ३२९।।
अश्वत्थामा बलिर्व्यासो ।। या०र०पृ. ३७।।
अश्वत्थामा बलिर्व्यासो।। कर्म०पृ० २००।।
अश्वत्थोदुम्बरप्लक्ष।। कर्म०पृ. १८२।।
अश्वस्थानाद्गजस्थानात्।। कर्म०पृ. १८२।।
अश्विन्यश्च स्वरूपोक्त।। या०र०पृ. ५२।।
अहं वैश्वानरो भूत्वा।। भ०गी० १५/१४।।

### आ

आगमार्थं तु देवानाम्।। ब्र०स०पृ. ३६।।
आगमार्थं तु देवानाम्।। कर्म०पृ. २०४।।
आग्नेयदिक्प्रभुं दीप्तम्।। या०र०पृ. ५३।।
आचार्यस्तु यथा स्वर्गे।। ब्र०स०पृ. ३३९।।
आज्यं तेज: समुद्भूत।। ब्र०चं०पृ. ६१२।।
आदित्यस्य नमस्कारम्।। सु०वि०पृ. ११।।
आधारभूता जगत।। स०श० ११/०४।।
आवाहयामि पूजार्थम्।। कर्म०पृ.१७२।।
आवाहयाम्यहं तुष्टिम्।। कर्म०पृ. १९७।।
आवाहयाम्यहं देवीम्।। कर्म०पृ. १९८।।

### इ

इक्षुसारसमुद्भूता।। ब्र०स०पृ. ४१।।
इदं फलं मया देव ।। ब्र०स०पृ. ५०।।
इन्द्रकृतानेकरूपम्।। या०र०पृ. ५३।।
इन्द्रपत्नीं सतीं देवीम्।। या०र०पृ. ५१।।

### ई

ईशावास्यमिदं सर्वम् ।। शु०य०४०/१।।
ईषमनोहररूपविलासे।। या०र०पृ. १०३।।

### उ

उत्तरीयं दृढं वस्त्रम्।। बृ०स०पृ.२२४।।
उषसि मागधमङ्गल।। या०र०पृ. १०२।।
उष्णोदकं निर्मलं च।। या०र०पृ. १२।।

### ऊ

ऊर्ध्व दिक्पालं नित्यम्।। या०र०पृ. ५४।।

### ऋ

ऋतजिच्चसत्य०।। शु०य०१७/८३।।
ऋताषाड् ऋतमाग्नि० ।। शु०य०१८/३८।।

### ए

एकयानसमारोह एक०।। ब्र०स००पृ. ४४८।।
एणधराश्म–कृतोन्नत।। या०र०पृ. १०२।।
एतच्चम्पकतैलमम्ब।। या०र०पृ. १०४।।
एलालवङ्गादिसमन्वितानि।। या०र०पृ. १३०।।
एलाशीरलवङ्गादि।। ब्र०स०पृ. ४९।।
एलाशीरसुवासितै:।। या०र०पृ. १०४।।

### ऐ

ऐशान्यधिपतिं देवम्।। या०र०पृ. ५४।।

### ओ

ओषधय: सोमवदन्त ।। शु०य०१२/९६।।
ओषधी: प्रतिमो०।। शु०य० १२/७७।।

**क**

कङ्कोलकुड्मलदलै।। शा०र०पृ. ८४।।
कनकं कुलिशं नीलम्।। कर्म०पृ. १८२।।
कन्यावस्त्रपरिधाने तथैव।। ब्र०स०पृ. ४२५।।
कर्पूरकुन्दकुमुदेन्दु।। शा०र०पृ. ८४।।
कर्पूरखण्ड परिकल्पित।। शा०र०पृ. ८८।।
कर्पूरगौरं करुणावतार ।। ब्र०स०पृ. ५१।।
कलिङ्गकोशातकसंयुतानि।। या०र०पृ. १३०।।
कल्पलतादिसुरद्रुमे।। या०र०पृ. १०२।।
कल्पितमद्य धियाऽमृत।। या०र०पृ. १२९।।
कव्यमादाय सततम्।। कर्म०पृ. १९६।।
कश्यपादिति सम्भूतम्।। या०र०पृ. ५१।।
कामधेनुसमुद्भूतं सर्वेषा ।। ब्र०स०पृ. ४०।।
कालं कलयतां नाथ।। या०र०पृ. ५१।।
कालागरोश्च घृतमिश्रित।। शा०र०पृ. ८७।।
कावेरी नर्मदा वेणी।। बृ०प्र०पृ. ९५।।
कुशमूले स्थितो ब्रह्मा।। या०र०पृ. ०१।।
कृच्छ्रमयं चोपनेता।। ब्र०स०पृ. ३९३।।
कृष्णोऽनन्तोऽच्युतश्चक्री।। ब्र०स०पृ. ३८४।।
केशरागरुकंकोलघनसार ।। या०र०पृ. २१।।
कौशेयवस्त्रयुगलम्।। शा०र०पृ. ८५।।
कंदलदंशुकिरीट।। या०र०पृ. १०५।।
क्षेत्रपालं गणाधीशम्।। या०र०पृ. ५२।।

**ख**

खड्गो वैश्वदेव: ।। शु०य०२४/४०।।

**ग**

गङ्गाजलैरमृतमाधुरता।। शा०र०पृ. ८३।।
गङ्गा सरस्वती रेवो।। या०र०पृ. १२।।
गच्छ गच्छ सुरश्रेष्ठ । ब्र०स०पृ. ३७०।।
गजाननं भूतगणादिसेवितम्।। कर्म०पृ. ३२।।
गणेशाय नमस्तुभ्यम्।। परम्परा।।
गन्धर्वकिन्नरमहर्षि।। शा०र०पृ. ८२।।
गन्धाक्षतपुष्पादी।। ब्र०स०पृ. ३५८।।
गमयामि समुद्रस्ताम्।। कर्म०पृ. २८०।।
गर्भं धेहि सिनीवालि।। कर्म०पृ. २४८।।
गर्भाधानमतश्च पुंसवनकम्।। स्मृत्यन्तरे, सं०भा०पृ. २अ।।
गायत्र्या त्रिष्टुभात्वा।। परम्परया।।
गावोममाग्रत: सन्तु।। सु०वि०पृ. ०६।।
गृहेशं शिवकर्तारम्।। या०र०पृ. ५३।।
गृहाणार्घ्यमिदं देव।। या०र०पृ. २०।।
गोमूत्रं गोमयं क्षीरम्।। या०र०पृ. ४२।।
गौरी पद्मा शचीमेधा।। ब्र०स०पृ. ३३१।।
ग्रहा राज्यं प्रयच्छन्ति।। या०र०पृ. ५०।।
ग्रहा राज्यं प्रयच्छन्ति।। कर्म०पृ. २२४।।

**घ**

घृतङ्घृतपावान: ।। शु०य०६/१९।।
घृतम्मिमिक्षे घृतमस्य।। शु०य०१७/८८।।
घृतेनाञ्जन्त्सम्पथो ।। शु०य०२९/२।।

**च**

चतुर्मुखं चतुर्बाहुम्।। या०र०पृ. ५०।।
चतु:शृङ्गं त्रिपादं च।। या०र०पृ. ५१।।
चित्ते सौम्यगुणेर्युक्ता।। कर्म०पृ. २९८।।
चिद्रूपिणि महामाये।। ब्र०स०पृ. १३।।

**ज**

जगत्कल्याण सकर्त्री।। या०र०पृ. ५२।।
जगत्सृष्टिकरीं धात्रीम्।।कर्म०पृ.१९५।।
जपाकुसुमसंकाशम् ।। या०र०पृ. ४९।।
जातीजपाकनकपङ्कज।। शा०र०पृ. ८४।।
जिवेद्वर्षशतं साग्रम्।। देवी कवच. ४७।।
जिह्वा सुधा कनकपात्रे।। शा०र०पृ. ८८।।
जीवनं सर्वजीवानां।। या०र०पृ. २१।।

**त**

तरुपुष्पसमुद्भूतं ।। ब्र०स०पृ. ४१।।
तामद्य गाथां गास्यामि।। कर्म०पृ. २९८।।
ताम्रपात्रे स्थितं तोयम्।। या०र०पृ. १२।।
ते सम्मता जनपदेषु।। स०श००४/१५।।
तेजोमयेन तपनद्युति।। शा०र०पृ. ८४।।
तोमरं व्यजनं वामे।। ब्र०स०पृ. ३४२।।
त्वं पुरा सागरोत्पन्ना।। ब्र०स०पृ. ३५।।
त्वां विघ्नशत्रु दलनेति च।। ब्र०स०पृ. ३१९।।

त्रैलोक्ये यानि तीर्थानि।। ब्र०स०पृ. ३५।।

### द

दण्डवैहायस: प्राप्तम्।। कर्म०पृ० २६६।।
दत्तंमया सुमनसो।। शा०र०पृ. ८५।।
दधिशङ्खतुषाराभम्।। या०र०पृ. ४९।।
दशमे वा द्वादशे।। पा०गृ०सू० ०१/१७/०१।।
दाक्षायणा शतानीकम।। ब्र०स०पृ. ३४०।।
दिव्यद्रुमेन्धनसमिद्ध।। शा०र०पृ. ८३।।
दिव्यरूपां विशालाक्षिम्।। कर्म०पृ.१९५।।
दिव्योषधिद्रवभवम्।। शा०र०पृ. ८३।।
दुर्गे स्मृता हरसि।। स०श० ०४/१७।।
दूर्वाङ्कुराम्बुजमनोहर।। शा०र०पृ. ८३।।
दूर्वायवाक्षतसुगन्धि।। शा०र०पृ. ८३।।
दूर्वा ह्यमृतसम्पन्ना।। या०र०पृ. १७।।
दूर्वेऽमृतसंपन्ने।। बृ०प्र० ११४।।
देवानाञ्च ऋषीणाञ्च।। या०र०पृ. ४९।।
देवि प्रपन्नार्तिहरे प्रसीद।। स०श० ११/०३।।
देवि प्रसीद परिपालय।। स०श० ११/३४।।
देवी दुरुक्तं परिबाधमाना।। कर्म०पृ. २६४।।
देवेभ्य: पूर्वतो जाता।। सु०वि०पृ. २९।।
देहि सौभाग्यमारोग्यम्।। अ०स्तो० १२।।
द्वैमातुरकृपासिन्धो।। ब्र०स०पृ. ३१९।।
द्रष्टारं सर्वलोकानाम्।। या०र०पृ. ५१।।

### ध

धरणीगर्भसम्भूतम् ।। या०र०पृ. ४९।।
धर्माधर्मविवेक्तारम् ।। या०र०पृ. ५०।।
धर्म्याणि देवि सकलानि।। स०श००४/१६।।
धवलवपुषमिन्दोर्मण्डलेश।। शा०र०पृ. ८९।।
धान्योषधीमनुष्याणाम्।। कर्म०पृ. १८१।।
धृति पुष्टिस्तथा।। ब्र०स०पृ. ३३१।।

### न

नवनीतसमुत्पन्नम्।। ब्र०स०पृ. ४१।।
नवभिस्तन्तुभिर्युक्तम्।। या०र०पृ. १६।।
नमो देव्यै महादेव्यै।। स०श० ०५/०९।।
नमो नमस्ते स्फटिक।। ब्र०स०पृ. ३२१।।
नमो ब्राह्मण्य देवाय।। सु०वि०पृ. ५१।।
नमो देव्यै महादेव्यै शिवायै।। स०श००५/०९।।
नमो देव्यै महादेव्यै।। स०श० ०५/०९।।
नमस्ते बह्मरूपाय।। ब्र०स०पृ. ३१९।।
नम: सवित्रे जगदेक।। कर्म०पृ. १२।।
नागस्य नागहारत्वम्।। कर्म०पृ. १७२।।
नामधेयं दशम्यां तु ।।मनु० २/३०।।
नारङ्गरम्भाफलमातुलिङ्ग।। शा०र०पृ. ८९।।
नानाविधौषधिलतारस ।। शा०र०पृ. ८४।।
नानासुगन्धि द्रव्यं च।। ब्र०स०पृ. ४०।।
नाना सुगन्धि पुष्पाणि।। नै०प्र०पृ. ३९।।
नीरूपं निर्विकारं च।। या०र०पृ. ५२।।
नीलाञ्जनसमाभासम्।। या०र०पृ. ४९।।

### प

पञ्चगावो समुत्पन्ना।। सु०वि०पृ. ०६।।
पत्नी वामकरे सूत्रम्।। कर्म०पृ. २०७।।
पदे पदे या परिपूजकेभ्य:।। या०र०पृ. १३०।।
पद्माभां पद्मवदनाम्।। कर्म०पृ. १९५।।
पयो दधि घृतं चैव।। ब्र०स०पृ. ४०।।
पयसस्तु समुद्भूतम्।। ब्र०स०पृ. ४०।।
परमेण मधव्येन।। कर्म०पृ. २८१।।
परिधास्याम्यहं वस्त्रम्।। कर्म०पृ. २८३।।
पलाशपुष्पशङ्काशम् ।। या०र०पृ. ४९।।
पापानि मे बहुविधानि।। शा०र०पृ. ८८।।
पाशायुधधरं देवम्।। या०र०पृ. ५३।।
पार्वतीशिव सत्पुत्रम्।। या०र०पृ. ५२।।
पिता पितामहश्चैव।। कर्म०पृ. २०४।।
पिधानं सर्ववस्तूनाम्।। कर्म०पृ. १८३।।
पुगीफलं महद्दिव्यम्।। ब्र०स०पृ. ५०।।
पुगै: सपूर्णखदिरै:।। शा०र०पृ. ८८।।
पुण्याहादित्रिरभ्यास।। सं०भा०पृ० ३१।।
पुष्योदेवस्य सवित।। कर्म०पृ. २८१।।
पूगीफलमिदं दिव्यम् ।। कर्म०पृ. १८२।।
पूजा स्विष्टं नवाहुत्यो।। ब्र०स०पृ. ३५७।।
पूर्णेक्षुसागरसमुद्भव।। शा०र०पृ. ८४।।
पूर्णे घृतेन गिरिजेश।। शा०र०पृ. ८७।।
पृथ्वी त्वया धृता लोका।। ब्र०स०पृ. १५।।
पृथिव्यामुद्धृतायांतु।। ब्र०स०पृ. ३२५।।
पृथ्वी त्वया धृता ।। ब्र०स०पृ. १५।।
पोषयन्ती जगत्सर्वं।। कर्म०पृ. १९७।।
प्रजापतिर्गणानां यो ।। या०र०पृ. ५१।।

प्रणवस्यैव जननीम्।। कर्म०पृ. १९९।।
प्रतिष्ठा सर्वदेवानाम्।। या०र०पृ. ०७।।
प्रियङ्गुकलिकाश्यामम्।। या०र०पृ. ४९।।
प्रणवं प्राक् प्रयुञ्जीत।। ब्र०नि०पृ० ४०६।।
प्रयौमि मधुपर्कं च।। कर्म०पृ. २८१।।
प्रियं जनानां यशसा।। कर्म०पृ. २८०।।

**ब**

बट्सूर्य्यश्रवसामहाँऽ-।। शु०य० ३३/४०।।
बण्महाँ रऽअसि सूर्य्य ।। शु०य० ३३/३९।।
बृहस्पतेऽअति यदर्यो०।। शु०य० २६/३।।
ब्रह्म जज्ञानं प्रथम्।। शु०य० १३/३।।
ब्राह्मणोऽस्य मुख० ।। शु०य० ३१/११।।
ब्राह्म्यं पुण्यं महद्यच्च।। ब्र०स०पृ. ३२५।।
ब्रह्मामुरास्त्रिपुरान्तकारिः।। कर्म०पृ.२२४।।

**भ**

भक्तार्तिनाशन पराय।। या०र०पृ. २०।।
भवत्पूर्वं चरेद्भैक्ष।। मनु० ०२/४९।।
भूतग्राममिदं सर्वं।। कर्म०पृ. १९९।।
भूतप्रेतपिशाचाद्या।। ब्र०स०पृ. ३२।।
भूतानि राक्षसा वाऽपि ।। ब्र०स०पृ. ३२।।
भो दीप देवरूपस्त्वं।। सु०वि०पृ. ११।।
भो दीपत्वं ब्रह्मरूप।। सं०भा०पृ. २५।।

**म**

मकरस्थं पाशहस्तम्।। ब्र०स०पृ. ३३।।
मङ्गलं भगवान्ढुढि०।।
मङ्गलं भगवान विष्णो।। ब्र०स०पृ. ५१।।
मन्त्रार्था सफलाः सन्तु।। बृ०प्र०पृ. १६८।।
मम व्रते ते हृदयम्।। कर्म०पृ० २६७।।
मलयाचलसम्भूतम्।। ब्र०स०पृ. ४०।।
मयूरवाहनां देवीम्।। कर्म०पृ. १९६।।
महादेवांश सम्भूतम् ।। या०र०पृ. ५०।।
महाफणाधरान् नित्यं।। या०र०पृ. ५२।।
महालक्ष्म्यै च विद्महे।। श्रीसूक्तं० फलश्रुति- १०।।
माङ्गल्यतन्तुनानेन।। कर्म०पृ. २८८।।
मातः कुङ्कुमपङ्क।। या०र०पृ. १०४।।
मामग्नावा दग्धनीश।। कर्म०पृ. २६९।।
माल्यादीनि सुगन्धिनी। ब्र०स०पृ. ४६।।
माविघ्नं मा च मे पाप।। कर्म०पृ. १८७।।
मित्रस्य चक्षुर्धरुणं।। कर्म०पृ० २६६।।
मृत्युञ्जय महादेव।। ब्र०स०पृ. ३०७।।
मेधां विष्णुप्रियां नित्या।। कर्म०पृ. १९५।।

**य**

यक्षराजं धनाध्यक्षम्।। या०र०पृ. ५३।।
यज्ञोपवीतं परमं षण्ण।। कर्म०पृ० २६५।।
यत्श्रेष्ठमस्ति ।। शा०र०पृ. ८६।।
यथाग्निर्दहते भस्म ।।कर्म०पृ. ११।।
यथा शस्त्रप्रहाराणाम् ।। व्र०चं०पृ. १८८।।
यदत्र संस्थितं भूतम्।। ब्र०स०पृ. ३२।।
येन बद्धो बलिराजा।। कर्म०पृ. १६८।।
यन्मण्डलं दीप्तिकरम्।। कर्म०पृ. २६६।।
यवोसि यवराजोसि।। कर्म०पृ. १८०।।
या देवि सर्वभूतेषु।। स०श० ०५/५८।।
यानि कानि च पापानि।। या०र०पृ. २०।।
यान्तु देवगणाः सर्वे।। ब्र०स०पृ. ३६९।।
यावद् ब्रह्मोपदेशो न।। ब्र०स०पृ. ४०१।।
यावद्भागीरथी गङ्गा।। बृ०प्र०पृ. १६८।।
यावन्न छिद्यते नालम् ।। ब्र०स०पृ. ३७७।।
या श्रीः स्वयं सुकृतिनाम्।। स०श००४/०५।।
या साम्प्रतं चोद्धत।। स०श० ०५/८२।।
येन बद्धो बलिराजा।। कर्म०पृ. १६८।।
यो देवः सविता।। कर्म०पृ. २६८।।

**र**

रक्ष रक्ष गणाध्यक्ष।। ब्र०स०पृ. ३१८।।
रत्नाक्षतैस्त्वां परि।। या०र०पृ. १०५।।
रम्यं सुशोभनं दिव्यम्।। या०र०पृ. १२।।
राक्षसाधिपतिं शूरम्।। या०र०पृ. ५३।।
रोगानशेषानपहंसि तुष्टा।। स०श० ११/२९।।

**ल**

लङ्घितकेतकवर्णविशेषैः।। या०र०पृ. १३०।।
लब्धभवत् करुणो।। या०र०पृ. १०३।।
लब्धविकासकदम्ब।। या०र०पृ. १०६।।
लम्बोदर नमस्तुभ्यम्।। ब्र०स०पृ. ३१९।।

**व**

वक्रतुण्ड महाकाय।। कर्म०पृ. १९४।।
वागर्थाविवसंपृक्तौ।। रघु० ०१/०१।।
वज्रायुध देवदेव।। या०र०पृ. ५३।।
वनस्पतिरसोद्भूतो।। ब्र०स०पृ. ४८।।
वराहेणोद्यतां देवीं सर्व।। या०र०पृ. ५१।।
वयं वरुण युष्माभिः।। कर्म०पृ. २८०।।
वसूनां दुहिता माता।। कर्म०पृ. २८२।।
विघ्नेश्वराय वरदाय।। ब्र०स०पृ. ३१९।।
विद्युद्दासमप्रभां मृगपतिम्।। स०श० ध्यानम्।।
विभावसोर्बिजमिदम्।। शा०र०पृ. ८८।।
विविधं पुष्प संजातम्।। सु०वि०पृ. ३०।।
विराजोदोहोऽसि विराजो।। कर्म०पृ. २८०।।
विश्वरूपस्वरूपाय।। ब्र०स०पृ. ३१९।।
विश्वाधाराऽसि धरणा।। या०र०पृ. २१।।
विश्वेश्वरि त्वं परपासि।। स०श० ११/३३।।
विष्णोर्वरप्रदानेन ।। या०र०पृ. ५२।।
वीरपुत्रप्रसूर्नित्यम्।। परम्परया।।
वृषादित्रये वह्निकोणे।। ब्र०स०पृ. ३३०।।
वेदशास्त्रविधानेन ।। कर्म०पृ. १६८।।

**श**

शङ्खं चन्द्रार्कदैवत्यं वरुणम्।। ब्र०स०पृ. ३५।।
शरणागतदीनार्त ।। स०श० ११/१२।।
शुभलक्षणसम्पन्नाम्।। कर्म०पृ. १९८।।
शुक्लां ब्रह्मविचारसार।। ब्र०स०पृ. ४०६।।
श्रद्धां मेधां यशःप्रज्ञाम्।। या०र०पृ. १६३।।
श्रीखण्डं चन्दनं दिव्यम्।। ब्र०स०पृ. ४६।।
श्रीजाह्नवीजलमिदम्।। शा०र०पृ. ८५।।
श्री लक्ष्मी च धृति।। या०र०पृ. ३५।।
श्रेष्ठोस्मि वै समानानो।। कर्म०पृ. २७९।।
श्वेताङ्गं श्वेतवस्त्रम्।। ब्र०स०पृ. ३७।।
श्वेतैरखण्डित।। शा०र०पृ. ८६।।
श्वेताबिरेण सहित।। शा०र०पृ. ८७।।

**स**

सञ्चितमम्ब मया।। या०र०पृ. १०४।।
सदसत्कार्यकरिणीम्।। कर्म०पृ. १९९।।
सन्तमसापह मुज्वलपात्रे।। या०र०पृ. १२८।।
सप्तैतान् संस्मरेन्नित्यम्।। कर्म०पृ० २००।।
सप्तहस्तश्चतुःशृङ्गः।। ब्र०स०पृ. ३४२।।
समीक्षामां यथा सर्वाण्यहम्।। कर्म०पृ. २८१।।
समुद्रमथनाज्जाता।। ब्र०स०पृ. ३२७।।
सर्वकल्याण कर्तारम्।। या०र०पृ. ५४।।
सर्वचैतन्यरूपां तामाद्याम् ।। दे०भा० ०१/०१/०१।।
सर्वतीर्थसमायुक्तम्।। या०र०पृ. १२।।
सर्वत्र व्यापकं देवम्।। या०र०पृ. ५१।।
सर्वप्राणि नियन्तारम्।। या०र०पृ. ५३।।
सर्वभूषाधिके सौम्य।। ब्र०स०पृ. ४५।।
सर्वमङ्गलमाङ्गल्ये।। स०श० ११/१०।।
सर्वहर्षकरीं देवीम्।। कर्म०पृ. १९७।।
सर्वप्राणि नियन्तारम्।। या०र०पृ. ५३।।
सर्वस्वरूपे सर्वेशे।। स०श० ११/२४।।
सर्वाबाधाप्रशमनं त्रैलोक्यस्या।। स०श० ११/३९।।
सर्वाबाधाप्रशमनम् ।। स०श० ११/३९।।
सर्वास्त्र धारिणीं देवीम् ।। कर्म०पृ. १९५।।
सर्वेऽत्र सुखिनः सन्तु।। १३।।
सर्वेषां जीवनोपाया।। या०र०पृ० ५१।।
सागरस्य यथा वृद्धिः।। ब्र०स०पृ. ३२६।।
साज्यं च वर्तिसंयुक्तम्।। ब्र०स०पृ. ४९।।
सिंहासने रथारोह।। सं०भा०पृ०   ।।
सिंहासनं कनकरत्न।। शा०र०पृ. ८२।।
सीताफलं क्षीरमाज्यम्।। ब्र०स०पृ. ३५६।।
सुवर्ण पद्महस्ताम्।। कर्म०पृ. १९८।।
सुरारिमथिनीं  देवीम्।। कर्म०पृ. १९६।।
सुरास्त्वामभिषिञ्चन्तु ।। १२।। या०र०पृ. ३२।।
सुरास्त्वामभिषिञ्चन्तु।। १-१२।। या०र०पृ. ३२।।
सूत्रं कार्पाससंभूतम्।। कर्म०पृ. १८१।।
सृष्टिसंरक्षितारं च।। या०र०पृ. ५०।।
सेवन्तिका बकुल।। शा०र०पृ. ८६।।
सोदकुम्भं सकूष्माण्डम् ।। ब्र०स०पृ. ३६१।।
सोमरूपा सुवर्णाभाम्।। कर्म०पृ. १९९।।
सौम्यासौम्यवचोदात्रि।। परम्परया।।
संसारधारणपराम्।। कर्म०पृ. १९८।।
स्वर्गाधिपं शचीनाथम्।। या०र०पृ. ५०।।
स्वस्त्यस्तुयाऽविना०।। सु०वि०पृ. ०२।।
स्वस्त्यस्तु ते कुशल।। या०र०पृ. २५।।
स्वस्त्यस्तुयाऽविनाशाख्या।। सु०वि०पृ. ०२।।
स्वाहां तु दक्षिणे पार्श्वे।। ब्र०स०पृ. ३४२।।

**ह**

हविर्गृहीत्वा सततम्।। कर्म०पृ. १९६।।
हरिद्रमोत्थामतिपीत ।। या०र०पृ. १२७।।
हस्तलसत्कटकादि।। या०र०पृ. १०४।।
हस्तलसच्चतुरायुध।। या०र०पृ. १०५।।
हिमकुन्द-मृणालाभम्।। या०र०पृ. ४९।।
हिमालयसुतां देवीम्।। या०र०पृ. ५०।।
हिरण्यगर्भगर्भस्थम्।। ब्र०स०पृ. ५०।।
हिमाद्रितनयां देवीम्।। कर्म०पृ. १९४ ।।
ह्रीं पदशोभिमहामनुरूपे।। या०र०पृ. १२७।।
ह्रीमिति मन्त्रजपेन।। या०र०पृ. १०३।।
हेमरौप्यादिसम्भूतम्।। या०र०पृ. २१।।
हे हेरम्ब त्वमेह्येह्य०।। कर्म०पृ. १७२।।
हे कुण्ड तव निर्माण।। नै०प्र०पृ. ८१।।
होमोऽग्नौ द्विविधः।। ब्र०स०पृ. ३६३।।

## परिशिष्टम् -०४
## शुक्लयजुर्वेदीय पुरुषसूक्तम् (अध्यायः ३१)।

हरि:ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्व्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।। शु०य० ३१/०१।।

पुरुषऽएवेदं सर्व्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्त्वस्येशानो यदन्नेनातिरोहति।। शु०य० ३१/०२।।

एतावानस्य महिमातो ज्यायाँश्च पुरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।। शु०य० ३१/०३।।

त्रिपादूर्ध्वऽउदैत्पुरुषः पादोऽस्ये हा भवत्पुनः।
ततो विष्वंव्यक्रामत्साशनानशनेऽअभि।। शु०य० ३१/०४।।

ततो विराडजायतविराजोऽअधिपूरुषः।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः।। शु०य० ३१/०५।।

तस्माद्यज्ञात्सर्वहुतः सम्भृत पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।। शु०य० ३१/०६।।

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्युस्तस्मादजायत।। शु०य० ३१/०७।।

तस्मादश्वाऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्याज्जाताऽअजावयः।। शु०य० ३१/०८।।

तं यज्ञं बर्हिषि प्रोक्षन्पुरुषं जातमग्रतः।
तेन देवाऽअयजन्त साद्धयाऽऋषयश्च ये।। शु०य० ३१/०९।।

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किं बाहू किमुरूपादाऽउच्येते।। शु०य० ३१/१०।।
ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत।। शु०य० ३१/११।।

चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत।
श्रोत्राद्द्वायुश्च प्राणश्च मुखादग्निरजायत।। शु०य० ३१/१२।।

नाभ्याऽआसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोतात्तथा लोकाँऽअकल्पयन्।। शु०य० ३१/१३।।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यादीदाज्यं ग्रीष्मऽइध्मः शरद्धविः।। शु०य० ३१/१४।।

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वानाऽअबध्नन्पुरुषं पशुम्।। शु०य० ३१/१५।।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साद्ध्याः सन्ति देवाः।। शु०य० ३१/१६।।

## ।। परिशिष्टम् ०५ ।।

### (०१) वैदिकनवग्रहमन्त्राः ।

सूर्यः। ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन रथेना देवो याति भुवनानि पश्यन्।।०१।।

चन्द्रः। ॐ इमं देवाऽअसपत्नं सुवध्वं महते क्षत्राय महते
ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इमममुख्य पुत्रमुष्यै पुत्रमस्यै विशऽएष वोऽमी
राजा सोमोऽस्माकं ब्राह्मणानां राजा।। शु०य० ९/४०।।

भौमः । ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्।
अपां रेतां सि जिन्वति।। शु०य० ०३/१२।।

बुधः । ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं सृजेथामयं च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा
यजमानश्च सीदत।। शु०य० १५/५४।।

गुरुः । ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्युमद्विबाति क्रतुमज्जनेषु।
यद्दीदयच्छवसऽऋतप्रजाततदस्मासु
द्रविणं धेहि चित्रम्।। शु०य० २६/०३।।

शुक्रः । ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रंपयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽ-
इन्द्रस्येन्द्रियमिदं पयोमृतं मधु।। शु०य० १९/७५।।

शनिः । ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।
शं य्योरभिस्रवन्तु नः।। शु०य० ३६/१२।।

राहुः । ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा।
कया शचिष्ठयाऽवृता।। शु०य० २७/३९।।

केतुः । ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे।
समुषद्भिरजायथाः।। शु०य० २९/३७।।

### (०२) व्यासोक्तं पौराणिकं नवग्रहस्तोत्रम् ।

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।

तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ।।१।।

दधिशंखतुषाराभं क्षीरोदार्णवसंभवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ।।२।।

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं तं मंगलं प्रणमाम्यहम् ।।३।।

प्रियंगुकलिकाश्यामं रूपेणाऽप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ।।४।।

देवानां च ऋषीणां च गुरुं कांचनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ।।५।।

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ।।६।।

नीलांजनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ।।७।।

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ।।८।।

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ।।९।।

इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ।।१०।।

नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ।।११।।

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ।।१२।।

।। व्यासोक्तं पौराणिकं नवग्रहस्तोत्रम् ।।

## सूर्यादिनवग्रहाणां वर्णधातुदेशादि कोष्टकम्।

| ग्रहाणां नामानि | सूर्य | चन्द्र | भौम | बुध | बृहस्पति | शुक्र | शनि | राहु | केतु |
|---|---|---|---|---|---|---|---|---|---|
| ग्रहवर्णाः | रक्त | श्वेत | रक्त | पीत | पीत | श्वेत | कृष्ण | कृष्ण | धूम्र |
| ग्रहप्रतिमा निर्माण धातवः | ताम्र | रौप्य (स्फटिक) | ताम्र | स्वर्ण | स्वर्ण | रौप्य | लोह | सीसक | कांस्य |
| ग्रहदेशाः | कलिङ्ग | यमुनातीर | अवन्ति | मगध | सिन्धु | भोजकट | सौराष्ट्र | राठिनापुर | अन्तर्वेदि |
| ग्रहगोत्राणि | काश्यप | आत्रेय | भारद्वाज | आत्रेय | आङ्गिरस | भार्गव | कश्यप | पैठीन | जैमिनि |
| ग्रहस्थानानि (आकृती) | वर्तुल | चतुरस्त्र | त्रिंकोण | बाण | दीर्घचतुरस्त्र (पट्टिशाकारं) | पञ्चकोण | धनुष्य | शूर्प | ध्वजा |
| ग्रहमण्डल व्यासः (अङ्गुल) | द्वादश | चतुः | त्रय | चतुः | षट् | नव | द्वय | द्वादश | षट् |
| ग्रहाणां दिङ्मुखानि | पूर्व | पश्चिम | दक्षिण | उत्तर | उत्तर | पूर्व | पश्चिम | दक्षिण | दक्षिण |
| ग्रहाणां वस्त्राणि | कुसुम्भ | श्वेत | रक्त | नील | पीत | चित्र | कृष्ण | नील | कृष्ण |
| ग्रहाणां पुष्पाणि | रक्त | श्वेत | रक्त | सर्वपुष्प | पीत | श्वेत | कृष्ण | कृष्ण | धूम्र |
| ग्रहाणां गन्धाः | रक्त | श्वेत | रक्त | कुङ्कुम युक्त चन्दन | कुङ्कुम युक्त चन्दन | श्वेत | कृष्ण | अगरु चन्दन | अगरु चन्दन |
| ग्रहाणां नैवेद्यानि | गुड | पायस | कंसार | क्षीर | दध्योदन | घृतोदन | मिश्रित तिल मासान्नं | गुडोदन माषौदन | चित्रौदन (खीचडी) |
| ग्रहाणां समिधः | अर्क | पलाश | खदिर | अपामार्ग | पिप्पल | औदुंबर | शमी | दूर्वा | कुश |
| ग्रहाणां आहुति संख्या | ०८ | ०८ | ०८ | ०८ | ०८ | ०८ | ०८ | ०८ | ०८ |
| ग्रहाणां स्थानदिशा | मध्ये | अग्नि | दक्षिण | ईशान | उत्तर | पूर्व | पश्चिम | नैऋत्य | वायव्य |
| ग्रहाणां धूपः | कुंदरुकं | घृताक्षताः | सर्जरसं | अगरु | सिह्लकं | बिल्वागरु | गुग्गुलं | लाक्ष | लाक्ष |

## परिशिष्टम् – ०६
## शुक्लयजुर्वेदीयं रुद्रसूक्तम् (अध्यायः १६)।

ॐ भूः ॐभुवः ॐस्वः

ॐ नमस्ते रुद्र मन्यवऽउतो त इषवे नमः।
बाहुभ्यामुत ते नमः।। शु०य० १६/०१।।

या ते रुद्र शिवा तनूरघोरा पापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि।। शु०य० १६/०२।।

जामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरत्रतां कुरु मा हिं सीः पुरुषं जगत्।। शु०य० १६/०३।।

शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मं सुमनाऽअसत्।। शु०य० १६/०४।।

अध्यवोचदधिवक्ता प्रथमा दैव्यो भिषक्।
अहिंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव।। शु०य० १६/०५।।

असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः।
ये चैनं रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोऽवैषांहेडऽईमहे।। शु०य० १६/०६।।

असौ योऽवसर्पति नीलग्रीवाो विलोहितः।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः।। शु०य० १६/०७।।

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो येऽअस्य सत्वानोऽहं तेभ्योऽकरं नमः।। शु०य० १६/०८।।

प्रमुञ्च धन्वनस्त्वमुभयोराक्त्र्योर्ज्याम्।
याश्च ते हस्तऽइषवः परा ता भगवो वप।। शु०य० १६/०९।।

विज्यं धनुः कपर्दिनो विशल्ल्यो बाणवाँ२ उत।
अनेशन्नस्य याऽइषव आभुरस्य निषङ्गधिः।। शु०य० १६/१०।।

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज।। शु०य० १६/११।।

परि ते धन्वनो हेतिरस्मान्वणृक्तु विश्वतः।
अथो यऽइषुधिस्तवारे अस्मन्नि धेहि तम्।। शु०य० १६/१२।।

अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव।। शु०य० १६/१३।।

नमस्त आयुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।। शु०य० १६/१४।।

मा नो महान्तमुत मा नोऽअर्भकं मा न उक्षन्तमुत मा नऽउक्षितम्।
मा नो वधीः पितरम्मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।। शु०य० १६/१५।।

मानस्तोके तनये मानऽआयषि मानो गोषुमानोऽअश्वेषु रीरिषः।
मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे।। शु०य० १६/१६।।

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो
हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते
पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः।। शु०य० १६/१७।।

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो
भवस्य हेत्यै जगतां पतये नमो नमो  रुद्रायाततायिने
क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः।। शु०य० १६/१८।।

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये
वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे व़ाणिजाय कक्षाणां
पतये नमो नमऽउच्चैघोषायाक्रन्दयते पत्तीनां पतये नमः।। शु०य० १६/१९।।

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय
निव्याधिनऽआव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय
स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः।। शु०य० १६/२०।।

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिणऽइषुधिमते

तस्कराणां पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मृष्णतां पतये
नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः।। शु०य० १६/२१।।

नमऽउष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो
नमऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः
पतिदधानेभ्यश्च वो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमः।। शु०य० १६/२२।।

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो
जाग्रद्भ्यश्च  वो नमो नमः शयानेभ्यऽआसीनेभ्यश्चवो
नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः।। शु०य० १६/२३।।

नमः सभाभ्यः सभापतिभ्यश्च वो नमो
नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नमऽआव्याधिनीभ्यो
विविध्यन्तीभ्यश्च वो नमो नमऽउगणाभ्यस्तृं हतीभ्यश्च वो नमः।। शु०य० १६/२४।।

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो
व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च
वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः।। शु०य० १६/२५।।

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो
रथिभ्योऽअरथेभ्यश्च वो नमो नमःक्षतृभ्यः संग्रहीतृभ्यश्च
वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः।। शु०य० १६/२६।।

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः
कमरिभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च
वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः।। शु०य० १६/२७।।

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय नमः
शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च।। शु०य० १६/२८।।

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने
च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च।। शु०य० १६/२९।।

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे
च नमो वृद्धाय च सवृधे नमोग्र्याय प्रथमाय च।। शु०य० १६/३०।।

नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च
नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्विप्याय च।। शु०य० १६/३१।।

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च।। शु०य० १६/३२।।

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च
नमः श्लोक्याय चावसान्याय च नमऽउर्वर्याय च खल्याय च।। शु०य० १६/३३।।

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च
नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च।। शु०य० १६/३४।।

नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च
नमःश्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च।। शु०य० १६/३५।।

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च।। शु०य० १६/३६।।

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च
नमःकुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च।। शु०य० १६/३७।।

नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च
नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च।। शु०य० १६/३८।।
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः
सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च।। शु०य० १६/३९।।

नमः शङ्गवे च पशुपतये च नमऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च
नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय।। शु०य० १६/४०।।

नमःशम्भवाय च मयोभवाय च नमः शङ्कराय च
मयस्कराय च नमः शिवाय च शिवतराय च।। शु०य० १६/४१।।

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च
नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च।। शु०य० १६/४२।।

नमः सिकत्त्याय च प्रवाह्याय च नमः किं शिलाय च क्षयणाय च
नमः कपर्दिने च पुलत्ये च नमऽइरिण्याय च प्रपथ्याय च।। शु०य० १६/४३।।

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च
नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च।। शु०य० १६/४४।।

नमः शुष्क्याय च हरित्त्याय च नमः पां सव्याय च रजस्याय च
नमो लोप्याय चोलप्याय च नमऽऊर्व्याय च सूर्व्याय च।। शु०य० १६/४५।।

नमः पर्णाय च पर्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च
प्रखिदते नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानां हृदयेभ्यो
नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः।। शु०य० १६/४६।।

द्रापेऽअन्धसस्पते दरिद्र नीललोहित।
आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाममत।। शु०य० १६/४७।।

इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा समसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम्।। शु०य० १६/४८।।

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे।। शु०य० १६/४९।।

परि नो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड।। शु०य० १६/५०।।

मीढुष्टम शिवतम शिवो नः सुमना भव।
परमे वृक्षऽआयुधं निधाय कृत्तिं वसानऽआ
चर पिनाकं बिभ्रदा गहि।। शु०य० १६/५१।।

विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः।
यास्ते सहस्रं हेतयोऽन्यस्मन्नि वपन्तु ताः।। शु०य० १६/५२।।

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः
तासामीशानो भगवः पराचीना मुखा कृधि।। शु०य० १६/५३।।

असङ्ख्याता सहस्राणि ये रुद्राऽअधि भूम्याम्।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/५४।।

अस्मिन् महत्त्यर्णवेऽन्तरिक्षे भवाऽअधि।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/५५।।

नीलग्रीवा: शितिकण्ठा: दिवं रुद्राऽउपश्रिता:।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/५६।।

नीलग्रीवा: शितिकण्ठा: शर्वाऽअध:क्षमाचरा:।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/५७।।

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिता:।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/५८।।

ये भूतानामधिपतयो विशिखास: कपर्दिन:।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/५९।।
ये पथां पथिरक्षयऽऐलबृदाऽआयुर्युध:।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/६०।।

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिण:।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/६१।।

येन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/६२।।

यऽएतावन्तश्च भूयां सश्च दिशो रुद्रा वितस्थिरे।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।। शु०य० १६/६३।।

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषव:।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा:।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्म:।। शु०य० १६/६४।।

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वातऽइषवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः।। शु०य० १६/६५।।

नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँ येषामन्नमिषवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः।। शु०य० १६/६६।।
ॐ भूः ॐभुवः ॐस्वः।

## परिशिष्टम् – ०७
## श्रीपुष्पदंतप्रणीतं शिवमहिम्नःस्तोत्रम्।

श्रीपुष्पदन्त उवाच।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाऽप्येष स्तोत्रे हर निरपवादः परिकरः।।०१।।

अतीतः पन्थानं तव च महिम वाङ्मनसयो–
रतद्व्यावृत्याऽयं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः।।०२।।

मधुस्फीता वाचः परमममृतं निर्मितवत–
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन पुरमथन बुद्धिर्व्यवसिता।।०३।।

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुशु।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः।।०४।।

किमीहः किंकायः स खलु किमुपास्त्रिभुवनं
किमाधारो धाता सृजति कुमपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं काँश्चिन्मुखरयति मोहाय जगतः।।०५।।

अजन्मानो लोकाः किमवयववन्तोऽपि जगता–
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद् भुवनजनने कःपरिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे।।०६।।
त्रयीं सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।

रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।०७।।

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत् तव वरद तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति तुभवद्भ्रूपरणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति।।०८।।

ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
शमस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता।।०९।।

तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्ध्वपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति।।१०।।

अयत्नादापाद्य त्रिभुवनमवैरव्यतिक्रमं
दशास्यो यद् बाहूनभृत रणकण्डूपरवशान्।
स्थिरः पद्मश्रेणिरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम्।।११।।

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः।।१२।।

यदृद्धिं सूत्राम्णो वरद परमोच्चैरपि सती–
मधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः।
न तच्चित्रं तस्मिन वरिवसितरि त्वच्चरणयो–
र्न कस्याऽप्युन्नत्यै भवति शिरसस्त्वय्यवनति।।१३।।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा–
विधेयस्याऽऽसीद् यस्त्रिनयन विषं संहृतवतः।

स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः।।१४।।

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्त्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः।।१५।।

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता।।१६।।

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषदलघु दृष्टः शिरसि ते।
जगद् द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः।।१७।।

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परातन्त्राः परधियः।।१८।।

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्।।१९।।
क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः।।२०।।

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो

ध्रुवं कर्तुः विधुरमभिचाराय हि मखाः।।२१।।

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः।।२२।।

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटनाद्
अवैति त्वामद्धा बत वरद मुग्धा युवतयः।।२३।।

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि।।२४।।

मनः प्रत्यक्चित्ते सविधमवधायाऽऽत्तमरुतः
प्रहृष्यद्रोमाणः परमदसलिलोत्सङ्गितदृशः।
यदालोक्याऽह्लादं ह्रद इव निमज्याऽमृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान्।।२५।।

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न्न विद्मस्त्वत्तत्त्वं वयमिह तु यत्त्वं न भवसि।।२६।।

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
अकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति।
तुरीयं ते धाम ध्वनिभिरवरुन्धनमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्।।२७।।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहाँ-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि

प्रियायाऽस्मै धाम्ने प्रविहितनमस्योऽस्मि भवते।।२८।।

नमो नेदिष्ठय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महहिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति सर्वाय च नमः।।२९।।

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुणये शिवाय नमो नमः।।३०।।

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वबदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम्।।३१।।

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतुवरशाखा लेखिनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानाामीश पारं न याति।।३२।।
असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार।।३३।।

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुःपुत्रवान् कीर्त्तिमाँश्च।।३४।।

महेशान्नाऽपरो देवो महिम्नो नाऽपरा स्तुतिः।
अघोरान्नाऽपरो मन्त्रो नाऽस्ति तत्त्वं गुरोः परम्।।३५।।

दीक्षा दानं तपस्तीर्थं स्नानं यागादिकाः क्रियाः।

महिम्नस्तवपाठस्य कलां नाऽर्हन्ति षोडशीम्।।३६।।

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुधरमौलेर्देवदेवस्य दासः।
स खलु निजमहिम्नो भ्रष्ट एवाऽस्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः।।३७।।

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नाऽन्यचेताः।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम्।।३८।।

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः।।३९।।

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेश प्रीयतां मे सदाशिवः।।४०।।

इति पुष्पदंतप्रणीतं शिवमहिम्नःस्तोत्रम्।

## परिशिष्टम् – ०८
## मार्कण्डेयपुराणान्तर्गता शक्रादिस्तुतिः।

ऋषिरुवाच।। १।।
शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः।। २।।
देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः।। ३।।
यस्या प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च नहि वक्तुमलं बलं च।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु।। ४।।
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम्।। ५।।
किं वर्णयाम तव रूपमचिंत्यमेतत्–
किं चातिवीर्यमसुरक्षयकारि भूरि।
किं चाहवेषु चरितानि तवाति यानि
सर्वेषु देव्यसुरदेवगणादिकेषु।। ६।।
हेतुः समस्तजगतां त्रिगुणापि दोषै–
र्न ज्ञायसे हरिहरादिभिरप्यपारा।
सर्वाश्रयाखिलमिदं जगदंशभूत–
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या।। ७।।
यस्याः समस्त सुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मुखेषु देवि।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु–
रुच्चार्यसे त्वमत एव जनैः स्वधा च।। ८।।
या मुक्तिहेतुरविचिंत्यमहाव्रता त्व–
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै–

विद्याऽसि सा भगवती परमा हि देवी।। ९।।
शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम्।
देवी त्रयी भगवती भवभावनाय
वार्तासि सर्वजगतां परमार्तिहन्त्री।। १०।।
मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा।।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरि त्वमेव शशिमौलिकृतप्रतिष्ठा।। ११।।
ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्ति कान्तम्।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण।। १२।।
दृष्ट्वा तु देवि कुपितं भृकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न मद्यः।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन।। १३।।
देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयति कोपवती कुलानि।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य।। १४।।
ते संमता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति बन्धुवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना।। १५।।
धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्पादृतः प्रतिदिनं सुकृती करोति।
र्स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन।। १६।।
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता।। १७।।
एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम्।

संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान्विनिहंसि देवि।। १८।।
दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वहितेषु साध्वी।। १९।।
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम्।
यन्नागता विलयमंशुमन्दिदुखण्ड
योग्याननं तव विलोकयतां तदेतत्।। २०।।
दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम्।। २१।।
केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि।। २२।।
त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा।।
नीता दिवं रिपुगणा भयमप्यपास्त–
मस्माकमुन्मदसुरारिभवं नमस्ते।। २३।।
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च।। २४।।
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि।। २५।।
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम्।। २६।।
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः।। २७।।
ऋषिरुवाच।। २८।।
एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः।। २९।।
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता।
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान्।। ३०।।

देव्युवाच।। ३१ ।।
व्रियतां त्रिदशा सर्वे यदस्मत्तोऽभिवाञ्छितम्।।३२।।
देवा ऊचुः।।३३।।
भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते।
यदयं निहतः शत्रुरस्माकं महिषासुरः।। ३४।।
यदि चापि वरो देयत्स्वयाऽस्माकं महेश्वरि।
संस्मृताऽसंस्मृता त्वं नो हिंसेथाः परमापदः।। ३५।।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोयत्यमलानने।
तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम्।। ३६।।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके।। ३७।।
ऋषिरुवाच।।३८।।
इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः।
तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप।। ३९।।
इत्येतत्कथितं भूप संभूता सा यथा पुरा।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी।। ४०।।

**।। इति मार्कण्डेयपुराणान्तर्गतया शक्रादिस्तुतिः।।**

## परिशिष्टम् – ०९
## मार्कण्डेयपुराणोक्तं रात्रिसूक्तम्।

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः।।०१।।
ब्रह्मोवाच।
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारःस्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधामत्रात्मिका स्थिता।।०२।।
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः।
त्मेव सन्ध्या सावित्री त्वं देवि जननि परा।।०३।।
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्।
त्वयैतत्पाल्यते देवि त्वमस्यन्ते च सर्वदा।।०४।।
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये।।०५।।
महाविद्या महामाया महामेधा महास्मृतिः।
महामोहा च भवति महादेवी महासुरी।।०६।।
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा।।०७।।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च।।०८।।
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा।।०९।।
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी।
परापराणां परमा त्वमेव परमेश्वरी।।१०।।
यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा।।११।।
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत्।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः।।१२।।
विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्।।१३।।
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ।।१४।।
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ।।१५।।

**।। इति मार्कण्डेयपुराणोक्तं रात्रिसूक्तम्।।**

## परिशिष्टम् – १०
## मुख्यसंस्कारोपयोगसामग्रीसूचि।

**(सर्वसामान्यविधिसामग्री)**

अबीर
गुलाल
कुंकुम
सिन्दूर
हरिद्रा
अष्टगन्ध
रक्तसूत्र
सरसव
गुग्गुल
उतत्ति( कमळकाकडी)
धूपबत्ती
दीपवती
कार्पास
कपूर
मधु
पूगिफल
नारिकेल
शुष्कनारिकेल
लवंग
एला (इलायची)
जावन्त्री
जायफल
पञ्चमेवा
दुग्ध
दधि
गोमूत्र
गोमय
भस्म
पुष्पमाला
नागदल
पतासा
ऋतुफल

**(सप्तमृत्तिका)**

अश्वस्थान
गजस्थान
वल्मीक
सङ्गम
ह्द (समुद्र)
राजद्वार
गोगोष्ठ
तळागमृत्तिका( गौरमृत्तिका)
गुजरडा
मृत्तिकाकुम्भ
मृदपात्राणि

**(धान्यानि)**

गोधूम
अक्षत
गोधूमाः
व्रीहि
यव
तिल
मुद्ग
चणक
माष

**(पंचपल्लवान्)**

अश्वत्थ
उदुम्बर
प्लक्ष
आम्र
न्यग्रोध

**(पंचरत्नानि)**

कनक
कुलिश
नील
पद्मराग
मौक्तिक
ताम्रकलश
पूर्णपात्र के गगरा
पीतल का
कांस्य
आरती
धूप
शंख
पंचपात्र
आचमनी
अर्घ्यपात्र
घंटी
धौतवस्त्र
उपवस्त्र
अँगोछा
कम्बलासन
कुशासन
गोमुखी
माला
उपवीत
पीताम्बर
धौतवस्त्र
रक्तवस्त्र
पीतवस्त्र
श्वेतवस्त्र
काष्ठपीठ
काष्ठपट्ट

**(हवनीय-द्रव्याणि।)**तिल
चावल( चरु)
यव
गो-घृत
पायस
भोजपत्र

**(ग्रहसमिधा प्रादेशमात्र- १० अंगुल)**

अर्क
पलास
खदिर
अपामार्ग
पिप्पल
उदुम्बर
शमी
दूर्वा
कुशा
मूंज( मूंजनी दोरी)
तोरण
इष्टिका
पापड़
तेल
काष्ठ
शुष्क गोमयखण्ड
( यज्ञपात्राणि)
स्रुवः
प्रोक्षणी

प्रणीता
स्फ्य
स्रुची
वसोर्द्धारा
आज्यस्थाली
चरुस्थाली
पिप्पल

(पुंसवनसंस्कार)
सोमवेल
न्यग्रोध
वट
दूर्वा
श्वेतपुष्पा
(सीमन्तसंस्कार)
चरु
दूर्वा
शूर्प
पञ्चमासिरक्षा
तिल तैल
मुद्ग
औदुम्बरफल
अश्वत्थशङ्कु
वीरतरशङ्कु
खादिरशङ्कु
दर्भपिञ्जूला (३)
वटफल
कार्पाससूत्र
शिघ्रप्रसवयन्त्र

(जातकर्मसंस्कार)
सुवर्णशलाका

कांस्यपात्र
मधु
घृत

(नामकरणसंस्कार)
कांस्यपात्र
सुवर्णशलाका
अक्षत

(अन्नप्राशसंस्कार)
कांस्यपात्र
कुंवारनो गळ
लवण
इमलि
मरिच
हरिद्रा
शर्करा
पुस्तक
लेखिनी
शस्त्र
वस्त्र
मिष्टान्न
हिरण्य(द्रव्य)

(चौलकर्मसंस्कार)
कर्तनी
अस्त्र
कुश
गोमय
नवनीत
उष्णोदक

(उपनयनसंस्कार)
परिधानवस्त्र
अजिन
दण्ड
मेखला
उपवीत
कांस्यपात्र
मृगचर्म
मौञ्जी
समिधा
कम्बल
उत्तरीय
भिक्षापात्र
भस्म
भिक्षालड्डु
मदनफल
शमीदण्ड
माणिक्यस्तम्भ

(केशान्त –
समावर्तनसंस्कार)
अस्त्र
नूतनवस्त्र
छत्र
उपान
कुण्डल
(आभूषण)
दण्ड
अष्ट कलश(कुम्भ)
औदुम्बर दन्तधावन
काष्ठ
दधि

तिल
चन्दन
पुष्पमाला
शिरोवेष्टन
(पाघडी)
कज्जल
आदर्श
उपवीत

(विवाहसंस्कार )
मदनफल
माणिक्यस्तम्भ
शूर्प
व्रिही
कांस्यपात्र
पुष्पमाला
सिन्दूर
वरमाला
मङ्गलसूत्र
शस्त्र
पुष्पगुच्छ
बृहद् ताम्रपात्र
दुग्ध
विष्टर
अन्तरपटवस्त्र
ग्रन्थिबन्धनवस्त्र
मङ्गलसाटिकावस्त्र
रमणदीपक
शमीदण्ड
हरिद्रा
मधुपर्क

**इति सर्वसंस्कारसामान्यविधिसंम्भारा:।**

## परिशिष्टम् – ११

## कार्तिकादिमासानां द्वादशभिर्विष्णोर्नामानि।

| **मास** | | **नाम** |
|---|---|---|
| कार्तिक | – | पुण्डरीकाक्षः। |
| मार्गशीर्ष | – | कृष्णः। |
| पौष | – | अनन्तः। |
| माघ | – | अच्युतः। |
| फाल्गुन | – | चक्री। |
| चैत्र | – | वैकुण्ठः। |
| वैशाख | – | जनार्दनः। |
| ज्येष्ठ | – | उपेन्द्रः। |
| आषाढ | – | यज्ञपुरुषः। |
| श्रावण | – | वासुदेवः। |
| भाद्रपद | – | हरिः। |
| आश्विन | – | योगीशः। |

परिशिष्टम् - १२

अवकहडाचक्रम्।






429

## परिशिष्टम् – १३
## संस्कारविद्युपयोगिमुहूर्तकोष्टकम्।

| क्रमः | नाममुहूर्ताः | मास | तिथि | वार | नक्षत्र | लग्न |
|---|---|---|---|---|---|---|
| ०१ | रजोदर्शने श्रेष्ठानि | मा.म.वै.फा. ज्ये.श्रा.आ | शु–१,२,३,५,७ १०,११,१३,१५ कृ–१,२,३,५ | सो.बु. बृ.शु | श्र,ध,श,मृ,रे,चि, अनु,ह,पू,स्वा,अश्वि, उषा,उफा,उभा,रो. | २,४,३,६ ७,९,१२ |
| ०२ | रजःस्नान | – | १,२,३,५,७ १०,११,१३,१५ | सो.बु. बृ.शु | ज्ये,ध,मृ,रे, अनु,ह,स्वा,अश्वि, उषा,उफा,उभा,रो. | २,४,३,६ ७,९,१२ |
| ०३ | गर्भाधान | – | शुभ | सो.बु. बृ.शु | श्र,ध,श,मृ, अनु,ह,स्वा, उषा,उफा,उभा,रो. | शुभ |
| ०४ | पुंसवन–शीमन्त | २, ३. ६, ८. | १,२,३,५,७ १०,११,१३. शुक्लपक्षे | सो.मं. बृ. | श्र,ध,मृ,पुष्य,पुन, ह,उषा,उफा,उभा,रो. | १,४,५, ७,९,१० |
| ०५ | सूतिकायाः गृहप्रवेश | – | १,२,३,५,७ १०,११,१२,१३. | सो.बु. बृ.शु | रो,मृ,पुष्य,स्वा,श,श्र पुन,ह,ध,अनु,चि, अश्वि,रे,उषा,उफा,उभा. | शुभ |
| ०६ | जातकर्म | – | १,२,३,५,७ १०,११,१२,१३. | सो.बु. बृ.शु | मृ,रे,चि,अनु,रो,पुन,श्र, उषा,उफा,उभा,स्वा,ध,श ह,पुष्य,अश्वि | शुभ |
| ०७ | स्तनपान | – | शुभतिथौ रिक्ताऽ मावास्यात्याज्याः | सो.बु. बृ.शु | उषा,उफा,उभा,रो,अश्वि, रे,पुष्य,पुन,अनु,श्र,ह, चि,मू,ध,श. | शुभ |
| ०८ | सूतिकायाः पथ्य | – | १,२,३,५,७ १०,१३. | सो.बु. बृ.शु | रो,उषा,उफा,उभा,रे, मृ,चि,अनु,पुष्य,ह,अश्वि अभि,पुन,स्वा,श्र,ध,श | २,३,४,५. |
| ०९ | सूतिकास्नान | – | १,२,३,५,७ १०,११,१३,१५ | सू.मं बृ. | रो,उषा,उफा,उभा,रे, मृ,अनु,ह,अश्वि स्वा, | शुभ |
| १० | दोलारोहण | जन्मदिवसात् १०,१२,१६,१८ ३२ दिने | रिक्तातिथिः त्याज्या | सो.बु. बृ.शु | मृ,चि,रे,अनु,ह,अश्वि, पु, उषा,उफा,उभा,रो | १,४,५,७, ९,१०,११ |
| ११ | जलपूजन | सद्धानि,चै,पो,अधि, गुरु–शुक्रास्तवर्ज्यम् | ४,९,१४, ३०रहितः | बु.चं बृ. | श्र,पु,पुन,मृ,ह,मू,अनु | शुभ |
| १२ | भूम्युपवेशन | – | ४,९,१४, ३०रहितः | सो.बु. बृ.शु | अश्वि,उषा,उफा,उभा, रो,अनु,मृ,ज्ये,चि,रे, | चर |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | ह,पु,अभि. | |
| १३ | नामकरण | – | १,२,३,५,७,<br>१०,११,१३. | सो.बु.<br>बृ.शु | रे,पु,चि,अनु,रो,ह,पुन<br>अश्वि,उषा,उफा,उभा,<br>स्वा,श्र,ध,श. | २,५,८,११. |
| १४ | निष्क्रमण | चतुर्थे मासे | ४,६,८,९,१२,१४,<br>३०रहित: | सो.बु.<br>बृ.शु | अश्वि,रो,पुन,पु,ह,चि,<br>अनु,उषा,उफा,उभा,<br>श्र,ध,रे | शुभ |
| १४ | अन्नप्राशन | – | १,२,३,५,७<br>१०,११. | सो.बु.<br>बृ.शु | रे,पु,चि,अनु,रो,ह,पुन<br>अश्वि,उषा,उफा,उभा,<br>स्वा,श्र,ध,श.मृ. | २,३,४,५,७,<br>९,१०,११. |
| १५ | कर्णवेध | ६मासे,<br>चातुर्मा,जन्म,चै,पौ,<br>समवर्षत्याज्य | शुभतिथौ | सो.बु.<br>बृ.शु | रे,पु,अनु,रो,ह,अश्वि,<br>श्र,अभि,मू | शुभ |
| १६ | चौलकर्म | – | २,३,५,७<br>१०,११,१३. | सो.बु.<br>बृ.शु | रे,पु,चि,अनु,रो,<br>ह,पुन,अश्वि,ज्ये,<br>स्वा,श्र,ध,श,मृ | २,३,४,६,<br>७,९,१२. |
| १७ | ताम्बूलभक्षण | – | २,३,६,९,<br>१०,११,१३. | सो.बु.<br>बृ.सू | उषा,उफा,उभा,रो,मृ,<br>चि,रे,अनु,ह,अश्वि,पु,<br>अभि,स्वा,श्र,पुन,ध,मू. | ४,५,७,<br>९,१. |
| १८ | क्षेमार्थं शान्तिकर्म | शुभ | शुभतिथय: | सो.बु.<br>बृ.शु | ह,अश्वि,रे,रो,स्वा,ध,<br>श,उषा,उफा,उभा,अनु. | शुभ |
| १९ | अक्षरारम्भ | शुक्लपक्ष | ९,३,५,६,<br>१०,११,१२. | सो.बु.<br>बृ.शु | अश्वि,आर्द्रा,पुन,पु,चि,<br>स्वा,अनु,अभि,रे. | २,३,६,<br>९,१२. |
| २० | विद्यारम्भ | – | २,३,५,८,<br>१०,११,१२. | सू.<br>बृ.शु | अश्वि,ह,पु,आ,अनु,मृ,<br>पुन,ह,चि,स्वा,श्र,ध,श<br>मू,पूषा,पूभा,पूफा,रे. | शुभ |
| २१ | व्रतबन्ध(उपनयन) | – | २,३,५,<br>१०,११,१२. | सो.बु.<br>सू. | अश्वि,ह,पुन,रो,आश्ले,रे,<br>ध,श्र,उषा,उफा,उभा,<br>आर्द्रा,श,मू,चि,मृ,अनु,<br>पूषा,पूभा,पूफा | ३,४,५,६<br>७,९,१२. |
| २२ | दीक्षाग्रहण | चै,वै,आश्वि,का,<br>णार्ग,माघ | २,३,५,८,<br>१०,११,१२. | सो.सू.<br>बृ.शु | अश्वि,रो,मृ,पू,चि<br>उषा,उफा,उभा, | ३,४,५,६<br>७,९,१२. |
| २३ | केशान्त | शुभ | शुभतिथौ | शुभ | शुभ | शुभ |
| २४ | समावर्तन | शभ | १,४,८,९,१४,१५,<br>३० पर्व–<br>क्षयवृद्धिरहित: | सू.सो.<br>बु.गु.शु | रो,मृ,पुन,पु,अनु,श्र<br>चि,उषा,उफा,उभा, | शुभ |
| २५ | विवाह | शुभ | शुभ | शुभ | शुभ | शुभ |
| २६ | वधूप्रवेश | | १,२,३,५,६,७<br>८,१०,१२. | सो.बु.श.<br>शू.बृ.शु | पु,रे,अनु,पु,ह,स्वा,पुन,<br>मृ,श्र,श,अश्वि,अभि | शुभ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | उषा,उफा,उभा, | |
| २७ | भतृगुहात्पितृगृहागमन | | शुभतिथौ | सो.बु. बृ.शु | रे,चि,अनु,श्र,ध,मृ,मघा, स्वा,मू,ज्ये,आर्द्रा,आश्ले, पूषा,पूफा,फूभा,म,रे. | शुभ |
| २८ | द्विरागमन | | १,२,३,५,७,८,१०, ११,१२,१३,१५ | सो.बु. बृ.शु | अश्वि,ह,पु,रो,स्वा,श्र,ध, मू ,उषा,उफा,उभा, मृ, रे,चि. | २,३,६, ७,१२ |

## सन्दर्भग्रन्थसूची।

# Sanskrit:


०१. आह्निककर्मसूत्रावलिः।
सं. पण्डित शिवदत्तशर्मणः।
प्र. लक्ष्मीवेङ्कटेश्वर स्टीम्-प्रेस। कल्याण-मुम्बई। १९५०।

०२. आह्निकसूत्रावलिः।
सं. वैद्य नारायणशर्मणः।
प्र. निर्णयसागर मुद्रणालय। मुम्बापुरी(मुम्बई)।

०३. जीमूतवाहनकृतो दायभागः (तृतीय संस्करण)
सं. सुब्रह्मण्यशास्त्री।
प्र. मोतीलाल बनारसीदास। दिल्ली, वाराणसी, पटना। १९८२।

०४. पारस्करगृह्यसूत्र। (हरिहर-गदाधरभाष्य)।
(हिन्दी टिका- जगदीशचन्द्र मीश्र, "विमला")
सं. त्रिपाठी ब्रह्मानन्दः।
प्र. चौखम्बा सुरभारती प्रकाशन। वाराणसी। १९९१।

०५. पुरोहित दिरीशकुमार रमणलाल।
विष्णुयागपद्धतिः - एकमध्ययनम्।
म. स. विश्वविद्यालयस्य शोधमहानिबन्धः।
पदवी प्राप्तिः २०११।

०६. प्रतिष्ठामौक्तिकम्। (तृतीयावृत्तिः)
कर्ता-प्र. पं. लक्ष्मीशंकर गौरीशंकर शुक्ल।
वटपत्तनम्। सं. २०६४। ख्रि० २००८।

०७. बृहद् ब्रह्मनित्यकर्मसमुच्चयः।
परिवर्धकः- शास्त्री यज्ञदत्त दुर्गाशंकर ठाकर।
प्र. वाळुकेश्वरसंस्कृतपाठशाला। मुबई। वि०सं० २०५९। श० १९२५। ख्रि० २००३।

०८. बृहत्स्तोत्ररत्नाकरः।
सं. पं. दिवाकर शर्मा।
प्र. ढवळे प्रकाशन। मुम्बई। १९९५।

०९. भट्ट नीलकण्ठ विरचितो भगवन्तभास्करः।
(द्वादशमयूखसंवलितः धर्मविद्यात्मक ग्रन्थः।) प्रथम : - द्वितीयः खण्डः।
सं. शास्त्री वेणीमाधवः।
प्र. चौखम्बा संस्कृत प्रतिष्ठान। दिल्ली। १९८५।

१०. मनुस्मृतिः। (मेधातिथिरचित-मनुभाष्य समेता)।
सं. झा गङ्गानाथ।
प्र. परिमल पब्लिकेशन्स। दिल्ली। १९९८।

११. मित्रमिश्रकृतो वीरमित्रोदयः।
प्र. चौखम्बा विद्याभवन। बनारस।

११. यागभास्करः (नवग्रहमखसहितः)। (प्रथमावृत्तिः)
सं. उपाध्याय भाइशङ्कर कानजी।
प्र. श्री रामनाथ मुद्रणालय। लीम्बडी (सौराष्ट्र)। वि०सं० १९८७।

१२. याज्ञिकरत्नम्।
सं. मुकुन्दचन्द्र शान्तिलाल ठाकर
प्र. मुद्रा प्रकाशन। थाणा। वि०सं० २०६५।

१३. वायुनन्दमिश्रविरचितो विष्णुयागप्रयोगः।
सं. आचार्य पण्डित श्रीशिवदत्तमिश्र शास्त्री।
प्र. मास्टर खेलाडीलाल संकटाप्रसाद। वाराणसी। १९७३

१४. विष्णुधर्मोत्तरपुराणम्। (चित्रसूत्रम्)।
डॉ. अशोक चटर्जी शास्त्री।
प्र. वाराणसेय संस्कृतविश्वविद्यालयः। वाराणसी।

१५. विष्णुधर्मोत्तरपुराणम्।
सं. नागशरणसिंह।
प्र. नाग पब्लिशर्स। दिल्ली। १९८५।

१६. विष्णुमहापुराणम्। (महर्षिवेदव्यासप्रणीतम्)।(श्रीधरस्वामिकृतात्मप्रकाशाख्याख्यया
भूषितम् चतुर्थांशतः ग्रन्थपरिसमाप्तिपर्यन्तो द्वितीयो भागः।)
सं. थानेशचन्द्र उप्रैति
प्र. परिमल पब्लिकेशन्स्। दिल्ली। २००३।

१७. व्रतोद्यापनचन्द्रिका। (पुराणोक्त)(चतुर्थावृत्तिः)
सं. पण्ड्या तुलजाशङ्कर धीरजराम शास्त्री।
प्र. जे. बी. बोडा कुंपनी प्रा. लि। मुम्बई। १९९६।

१८. शान्तिरत्नम्।
सं. मुकुन्दचन्द्र शान्तिलाल ठाकर
प्र. अङ्गिरा आश्रम ट्रस्ट। कडीयादरा। वि.सं २०५२।

१९. शुक्लयजुर्वेदः। (अध्यायाः १-१०)।
भगवद्पादाचार्य-विरचित-यजुःसंस्कारभाष्येण सहितः।
प्र. श्रीचन्दनदेवी अध्यापिका। अमदावाद। वि.सं. २०२४।

२०. शुक्लयजुर्वेदीयामाध्यन्दिनीयसंहिता।
सं. मिश्र युगलकिशोर।
प्र. खेमराज श्रीकृष्णदास। श्रीवेङ्कटेश्वर मुद्रणालय। मुम्बई। सं. २०६१। ख्रि. २००५।

२१. श्रीरामदैवज्ञ विरचितो मुहूर्तचिन्तामणिः। (श्रीगोविन्दज्योतिर्विद्
रचितया पीयूषधारा व्याख्यया समेतः।)
सं. श्रीकृष्णदासात्मज गङ्गविष्णुः।
प्र. लक्ष्मीवेङ्कटेश्वर मुद्रणालय। मुम्बई। १८४४ शाके। ख्रिस्ताब्दः १९२२।

२२. संस्कारप्रकाशः।
प्र. खेमराज श्रीकृष्णदास प्रकाशन।
मुम्बई। २००३।

२३. संस्कार रत्नम्। (द्वितीयावृत्ति)
सं. मुकुन्दचन्द्र शान्तिलाल ठाकर
प्र. मुद्रा प्रकाशन। थाणा। २०१०।

२४. संस्काररत्नमाला (पूर्वार्धम्) (गृह्यसूत्रस्य प्रथमः प्रश्नः) (भट्टगोपीनाथ दीक्षितः)।
सं० आपटे हरिनारायण।

प्र० आनन्दाश्रममुद्रणालय। पुण्याखपत्तनम्। १८९९।

**English:**

01. Apte V. S.:
Sanskrit English Dictionary,
Pub: Motilal Banarsidass, Delhi, 2000.

02. Devasthali G. V.:
Sanskrit English, Marathi & Gujarati Dictionary,
Pub: Motilal Banarsidass Delhi, 1997.

03. Deussen John:
A classical dictionary of Hindu Mythology and Religion Geography,
History & Literature,
Pub. London Raut ledge & Kegan Paul Ltd. London, 1957.

04. Kane P. V. History of Dharmaśāstra - Vol. I, Part - I-II,
Pub. Bhandarkar Research Oriental Institute, Poona, (Eng.)
1st Edition, 1968.

05. Kane P. V. History of Dharmaśāstra - Vol. II, Part - I, (Eng.)
Pub. Bhandarkar Research Oriental Institute, Poona,
2nd Edition, 1974.

06. Kane P. V. History of Dharmaśāstra - Vol. III, (Eng.)
Pub. Bhandarkar Research Oriental Institute, Poona,
1st Edition, 1946 & 2nd Edition, 1973.

07. Kane P. V. History of Dharmaśāstra -Vol. V, Part- I, (Eng.)
Pub. Bhandarkar Research Oriental Institute, Poona,
2nd Edition, 1974.

08. Kane P. V. History of Dharmaśāstra -Vol. V, Part II, (Eng.)
Pub. Bhandarkar Research Oriental Institute, Poona,
2nd Edition, 1977.

09. Jani Jaydev A.
Savatrisatakam, (A century of verses on Savatri with the commentary),
Vadodara, 2002.

10. M. Monier Williams:
Sanskrit English Dictionary,
Pub. Motilal Banarsidass,
Delhi, 2002 AD.

11. Pandey Rajbali
Hindu Samskaras, (Socio-Religious Study of the Hindu Sacraments),
Pub. Motilal Banarsidass publishers private Limited,
Delhi, 2006.

## Hindi:

०१. अथर्ववेद (भाग १-४)। (हिन्दी)
अ. पण्डित सातवळेकर श्रीपाद दामोदरः।
प्र. स्वाध्याय मण्डलम्। पारडी, जि. वलसाड।

०२. अष्टादशस्मृति। (भाषा-टीका सहित)
ले. पं. मिहिरचन्द्र – सं. नागशरणसिंह।
प्र. नाग पब्लिशर्स। दिल्ली। २००६।

०३. ऋग्वेद (भाग १-४)। (हिन्दी)
अ. पण्डित सातवळेकर श्रीपाद दामोदरः।
प्र. स्वाध्याय मण्डलम्। पारडी, जि. वलसाड।

०४. कमलाकरभट्ट प्रणीत निर्णयसिन्धुः ('सरस्वती' भाषाटीका एवं 'मनोजाञ्जना' टीप्पणी सहित)। (हिन्दी)
सं. गौड दौलतराम।
प्र. सावित्री ठाकुर प्रकाशन। वाराणसी। १९९४।

०५. कल्याण धर्मशास्त्राङ्क । (हिन्दी)
(प्रथम संस्करण)
प्र. गीताप्रेस। गोरखपुर। सं० २०६४।

०६. कल्याण संस्कार-अङ्क। (हिन्दी)
प्र. गीताप्रेस। गोरखपुर। २००६।

०७. काणे पाण्डुरङ्ग वामन, । (हिन्दी)
धर्मशास्त्र का इतिहास।
अ. चौबे अर्जुन काश्यप।
प्र. हिन्दी समिति ग्रन्थमाला सं० १३२।
उत्तरप्रदेशशासन। लखनऊ। १९७५।

०८. गौतमधर्मसूत्राणि। (हिन्दीव्याख्याविभूषितहरदत्तकृत मिताक्षरावृत्ति सहितानि)
हि. व्या. डॉ. पाण्डेय उमेशचन्द्र।
प्र. चौखम्बा संस्कृत संस्थान। वाराणसी। वि.सं. २०६१।

०९. बालबोधज्योतिषसारसमुच्चय:। (हिन्दीभाषानुवादसहित:।)
सं. ठाकर यज्ञदत्त दुर्गाशङ्कर शास्त्री।
प्र. ठाकर अरुण यज्ञदत्त शास्त्री। मुम्बई। २००४।

१०. बृहज्ज्योतिषसार:। (भाषाटीकासहित:) (प्रथमावृत्ति:)(हिन्दी)
सं. पाण्डे रामतेज।
प्र. बाबू ठाकुरप्रसाद गुप्त बुक्सेलर। बनारस। वि०सं० १९९३।

११. मण्डपकुण्डसिद्धि:। (हिन्दी)
प्र. शुक्ल लक्ष्मीशंकर गौरीशङ्कर।
वटपत्तनम्। वि०सं० २०४७। ख्रिस्ताब्द: १९९०।

१२. मनुस्मृति:। (सविमर्श 'मणिप्रभा हिन्दाटीकासहिता'।)
सं. पण्डित श्री हरगोविन्द शास्त्री
प्र. चौखम्बा संस्कृत संस्थान। वाराणसी। वि०सं० २००९। ई०स० १९५२।

१३. यजुर्वेद (भाग १-२)। (हिन्दी)
अ. पण्डित सातवळेकर श्रीपाद दामोदर:।
प्र. स्वाध्याय मण्डलम्। पारडी, जि. वलसाड।

१४. याज्ञवल्क्यसमृति:। (विज्ञानेश्वरप्रणीता 'मिताक्षरा' व्याख्यया,
हिन्दी टीका- पाण्डेय उमेशचन्द्र।)
सं. मिश्र श्रीनारायण।
प्र. चौखम्बा संस्कृत संस्थान। वाराणसी। वि.सं. २०३९।

१५. विष्णुपुराण। (मूल श्लोक और हिन्दी अनुवाद सहित)
अ. श्रीमुनिलाल गुप्त।
प्र. गीताप्रेस। गोरखपुर। सं० १९९०-२०५१।

१६. शास्त्री माधवाचार्य । क्यों ।
प्र. माधवविद्याभवन, दिल्ली, वि.सं. २०६२

१७. शुक्लयजुर्वेदसंहिता।
(श्रीमदुवटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधरकृतवेददीपाख्यभाष्येण च संवलिता)।
(तत्वबोधिनी – हिन्दीव्याख्योपेता)
हिन्दी व्याख्याकार: पण्डित रामकृष्ण शास्त्री।
सं. पणशीकर वासुदेव लक्ष्मण।
प्र. चौखम्बा विद्याभवन। वाराणसी। २००७।

१८. संस्कारभास्करः। (महर्षिदयानन्दविरचितः।) (हिन्दी)
(संस्कारविधिका विस्तृतभाष्य)
सं. स्वामी विद्यानन्दसरस्वती।
प्र. रामलाल कपूर ट्रस्ट। सोनीपत (हरियाणा)। २००६।

१९. सामवेद। (हिन्दी)।
अ. पण्डित सातवळेकर श्रीपाद दामोदरः।
प्र. स्वाध्याय मण्डलम्। पारडी, जि. वलसाड।

२०. सुगम याग विधानम्।
सं. डॉ. शुक्ल राजेन्द्रप्रसाद।
प्र. डॉ. आर. आर. शुक्ल। अहमदाबाद। (हिन्दी)

२१. हिन्दूसंस्कार। (सामाजिक तथा धार्मिक अध्ययन।) (हिन्दी)
सं. पाण्डेय राजबली।
प्र. चौखम्बा विद्याभवन चौक। वाराणसी। २००६।

## Gujarati:

०१. गरुड पुराण। (महर्षि वेद व्यास रचित) (गुजराती)

सं. वरन दीप्ति।
प्र. श्री हरिहर पुस्तकालय। सुरत।

०२. जोषी आनन्दप्रसाद पुरुषोत्तमदास।(गुजराती)
नारद संहिता।
प्र. गजानन पुस्तकालय। सुरत।

०३. जोषी रमाशंकर मुक्ताशंकर। (गुजराती)
कर्मकौशल।
प्र. गजानन पुस्तकालय। सुरत।

०४. जोषी रमाशंकर मुक्ताशंकर (गुजराती)
काऽपि प्रतिष्ठा।
प्र. गजानन पुस्तकालय। सुरत।

०५. जोषी रमाशङ्कर, सामवेदी यज्ञेश – पं. दुर्गाशङ्कर जगन्नाथ शास्त्री।
षोडशसंस्कारपद्धति।(गुजराती)
प्र. हरिहर पुस्तकालय। सुरत।

०६. धर्मसिन्धु (उपाध्याय काशीनाथ विरचित:)। (गुजराती)
सं. त्रिपाठी कानजी वालजी शास्त्री।
प्र. प्रवीण पुस्तक भण्डार। राजकोट। २००४।

०७. नैमित्तिककर्मप्रकाश (पूवार्ध–उत्तरार्ध)। (गुजराती)
सं. भट्ट पीताम्बर गोविन्दराम।
प्र. आनन्दाश्रम। बीलखा(सौराष्ट्र)। २०००।

०८. पाणिग्रहणसंस्कारप्रयोग: (पुराणोक्त:)। (गुजराती)
सं. दवे विष्णुराम तापीशङ्कर, पण्ड्या तुलजाशङ्कर धीरजराम शास्त्री।
प्र. शेठ तुलजाराम वीजभूषणदास खाण्डवाळा। मुम्बई। सं. २००९।

०९. बृहद् नित्यकर्मप्रकाश। (गुजराती)
सं. जोषी रमाशङ्कर मुक्ताशङ्कर (शर्मा)।
प्र. महादेव रामचन्द्र जागुष्टे। अमदावाद। १९९४।

१०. मत्स्यमहापुराण। (गुजराती)
अ. जानी श्री हिम्मतराम महाशङ्कर।
प्र. सस्तुं साहित्य मुद्रणालय ट्रस्ट। अमदावाद। १९८३।

११. मनुस्मृति। (गुजराती)
अ. शास्त्री गिरिजाशङ्कर मयाशङ्कर।
प्र. सस्तुं साहित्य मुद्रणालय ट्रस्ट। अमदावाद। २००७।

१२. मुहूर्त मार्तण्ड। (गुजराती)
अ. जोषी सोमेश्वर द्वारकादास।
प्र. शिव ज्योतिष कार्यालय। कपडवंज। मुम्बई। २००४।

१३. मुहूर्तसंग्रहः। (गुजराती)
अ. ज्यौतिषिक कृष्णशङ्कर केशवराम।
सं. द्विवेदी जगन्नाथ परशुराम शास्त्री
प्र. गजानन पुस्तकालय। सुरत।

१४. विवाह संस्कार। (गुजराती)
सं. ठाकर मुकुन्दचन्द्र शान्तिलाल।
प्र. ठाकर मुकुन्दचन्द्र शान्तिलाल। थाणा।

१५. शुक्ल-यजुर्वेद-दर्शन। (नवम रत्नम्।)(गुजराती)
सं. ठाकर मुकुन्दचन्द्र शान्तिलाल।
प्र. अङ्गिरा आश्रम ट्रस्ट। कडियादरा। वि.सं. २०५१।

१६. षोडशसंस्कार (संस्कारसौरभ)। (गुजराती)
सं. पाठक दिनेशः।
प्र. गुजरातपुस्तकालय स. स. मण्डल लि। वडोदरा। २००२।

**मासिकी/ त्रैमासिकी/ वार्षिकी-पत्रिकाः।**

०१. देवसायुज्यम् (मासिकी)।
सं. प्र. प्रफुल्लपरोहितः।
प्रतापगंज, वडोदरा।

०२. वेदव्यासङ्ग (त्रैमासिकी)।
सं. प्रॉ. डॉ. मुकुन्द वाडेकर।
प्र. वेदव्यासङ्गः प्रकाशकः।
वडोदरा।

०३. श्रीभागवतामृतम्। (मासिकी)।
सं. प. पू. श्री कृष्णशङ्कर शास्त्रीजी।
प्र. श्री भागवत विद्यापीठ। अमदावाद।

०३. सुरभारती (वार्षिकी)।
वडोदरा संस्कृतमहाविद्यालय।
वडोदरा।